श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्वाल्मीकीयरामायणस्य

॥ युद्धकाण्डम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

विषयसूची

1	प्रथमः सर्गः	8
2	द्वितीयः सर्गः	11
3	तृतीयः सर्गः	14
4	चतुर्थः सर्गः	18
5	पञ्चमः सर्गः	30
6	षष्ठः सर्गः	33
7	सप्तमः सर्गः	36
8	अष्टमः सर्गः	39
9	नवमः सर्गः	42
10	दशमः सर्गः	45
11	एकादशः सर्गः	49
12	द्वादशः सर्गः	53
13	त्रयोदशः सर्गः	58
14	चतुर्दशः सर्गः	61
15	पञ्चदशः सर्गः	65
16	षोडशः सर्गः	68
17	सप्तदशः सर्गः	71
18	अष्टादशः सर्गः	78
19	एकोनविंशः सर्गः	83

20	**विंशः सर्गः**	**88**
21	**एकविंशः सर्गः**	**93**
22	**द्वाविंशः सर्गः**	**97**
23	**त्रयोविंशः सर्गः**	**106**
24	**चतुर्विंशः सर्गः**	**108**
25	**पञ्चविंशः सर्गः**	**113**
26	**षड्विंशः सर्गः**	**117**
27	**सप्तविंशः सर्गः**	**122**
28	**अष्टाविंशः सर्गः**	**127**
29	**एकोनत्रिंशः सर्गः**	**132**
30	**त्रिंशः सर्गः**	**136**
31	**एकत्रिंशः सर्गः**	**140**
32	**द्वात्रिंशः सर्गः**	**145**
33	**त्रयस्त्रिंशः सर्गः**	**150**
34	**चतुस्त्रिंशः सर्गः**	**154**
35	**पञ्चत्रिंशः सर्गः**	**158**
36	**षट्त्रिंशः सर्गः**	**162**
37	**सप्तत्रिंशः सर्गः**	**165**
38	**अष्टात्रिंशः सर्गः**	**169**
39	**एकोनचत्वारिंशः सर्गः**	**172**

40	चत्वारिंशः सर्गः	176
41	एकचत्वारिंशः सर्गः	180
42	द्विचत्वारिंशः सर्गः	190
43	त्रिचत्वारिंशः सर्गः	195
44	चतुश्चत्वारिंशः सर्गः	200
45	पञ्चचत्वारिंशः सर्गः	205
46	षट्चत्वारिंशः सर्गः	209
47	सप्तचत्वारिंशः सर्गः	215
48	अष्टचत्वारिंशः सर्गः	218
49	एकोनपञ्चाशः सर्गः	222
50	पञ्चाशः सर्गः	226
51	एकपञ्चाशः सर्गः	233
52	द्विपञ्चाशः सर्गः	237
53	त्रिपञ्चाशः सर्गः	242
54	चतुःपञ्चाशः सर्गः	246
55	पञ्चपञ्चाशः सर्गः	250
56	षट्पञ्चाशः सर्गः	254
57	सप्तपञ्चाशः सर्गः	259
58	अष्टपञ्चाशः सर्गः	264
59	एकोनषष्टितमः सर्गः	271

60	षष्टितमः सर्गः	**291**
61	एकषष्टितमः सर्गः	**302**
62	द्विषष्टितमः सर्गः	**307**
63	त्रिषष्टितमः सर्गः	**310**
64	चतुःषष्टितमः सर्गः	**316**
65	पञ्चषष्टितमः सर्गः	**320**
66	षट्षष्टितमः सर्गः	**327**
67	सप्तषष्टितमः सर्गः	**331**
68	अष्टषष्टितमः सर्गः	**353**
69	एकोनसप्ततितमः सर्गः	**356**
70	सप्ततितमः सर्गः	**367**
71	एकसप्ततितमः सर्गः	**375**
72	द्विसप्ततितमः सर्गः	**388**
73	त्रिसप्ततितमः सर्गः	**391**
74	चतुःसप्ततितमः सर्गः	**401**
75	पञ्चसप्ततितमः सर्गः	**411**
76	षट्सप्ततितमः सर्गः	**418**
77	सप्तसप्ततितमः सर्गः	**428**
78	अष्टसप्ततितमः सर्गः	**431**
79	एकोनाशीतितमः सर्गः	**434**

80	अशीतितमः सर्गः	**439**
81	एकाशीतितमः सर्गः	**444**
82	द्व्यशीतितमः सर्गः	**448**
83	त्र्यशीतितमः सर्गः	**451**
84	चतुरशीतितमः सर्गः	**456**
85	पञ्चाशीतितमः सर्गः	**459**
86	षडशीतितमः सर्गः	**463**
87	सप्ताशीतितमः सर्गः	**467**
88	अष्टाशीतितमः सर्गः	**471**
89	एकोननवतितमः सर्गः	**479**
90	नवतितमः सर्गः	**485**
91	एकनवतितमः सर्गः	**495**
92	द्विनवतितमः सर्गः	**499**
93	त्रिनवतितमः सर्गः	**506**
94	चतुर्नवतितमः सर्गः	**510**
95	पञ्चनवतितमः सर्गः	**515**
96	षण्णवतितमः सर्गः	**521**
97	सप्तनवतितमः सर्गः	**525**
98	अष्टनवतितमः सर्गः	**530**
99	एकोनशततमः सर्गः	**533**

100 शततमः सर्गः 539
101 एकाधिकशततमः सर्गः 546
102 द्व्यधिकशततमः सर्गः 552
103 त्र्यधिकशततमः सर्गः 560
104 चतुरधिकशततमः सर्गः 564
105 पञ्चाधिकशततमः सर्गः 567
106 षडधिकशततमः सर्गः 571
107 सप्ताधिकशततमः सर्गः 575
108 अष्टाधिकशततमः सर्गः 582
109 नवाधिकशततमः सर्गः 586
110 दशाधिकशततमः सर्गः 590
111 एकादशाधिकशततमः सर्गः 593
112 द्वादशाधिकशततमः सर्गः 605
113 त्रयोदशाधिकशततमः सर्गः 608
114 चतुर्दशाधिकशततमः सर्गः 614
115 पञ्चदशाधिकशततमः सर्गः 618
116 षोडशाधिकशततमः सर्गः 621
117 सप्तदशाधिकशततमः सर्गः 625
118 अष्टादशाधिकशततमः सर्गः 629
119 एकोनविंशत्यधिकशततमः सर्गः 632

120 विंशत्यधिकशततमः सर्गः 637
121 एकविंशत्यधिकशततमः सर्गः 640
122 द्वाविंशत्यधिकशततमः सर्गः 644
123 त्रयोविंशत्यधिकशततमः सर्गः 647
124 चतुर्विंशत्यधिकशततमः सर्गः 653
125 पञ्चविंशत्यधिकशततमः सर्गः 656
126 षड्विंशत्यधिकशततमः सर्गः 661
127 सप्तविंशत्यधिकशततमः सर्गः 667
128 अष्टाविंशत्यधिकशततमः सर्गः 674

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ प्रथमः सर्गः ॥

हनुमन्तं प्रशस्य श्रीरामकर्तृकस्तस्य परिष्वङ्गः समुद्रतरणार्थं तस्य चिन्ताकरणं च

श्रुत्वा हनूमतो वाक्यं यथावदभिभाषितम्।
रामः प्रीतिसमायुक्तो वाक्यमुत्तरमब्रवीत्॥ **6.1.1** ॥ 1

कृतं हनूमता कार्यं सुमहद् भुवि दुर्लभम्।
मनसापि यदन्येन न शक्यं धरणीतले॥ **6.1.2** ॥ 2

नहि तं परिपश्यामि यस्तरेत महोदधिम्।
अन्यत्र गरुडाद् वायोरन्यत्र च हनूमतः॥ **6.1.3** ॥ 3

देवदानवयक्षाणां गन्धर्वोरगरक्षसाम्।
अप्रधृष्यां पुरीं लङ्कां रावणेन सुरक्षिताम्॥ **6.1.4** ॥ 4

प्रविष्टः सत्त्वमाश्रित्य जीवन् को नाम निष्क्रमेत्।
को विशेत् सुदुराधर्षां राक्षसैश्च सुरक्षिताम्॥ **6.1.5** ॥ 5

यो वीर्यबलसम्पन्नो न समः स्याद्धनूमतः।
भृत्यकार्यं हनुमता सुग्रीवस्य कृतं महत्।
एवं विधाय स्वबलं सदृशं विक्रमस्य च॥ **6.1.6** ॥ 6

यो हि भृत्यो नियुक्तः सन् भर्त्रा कर्मणि दुष्करे।
कुर्यात् तदनुरागेण तमाहुः पुरुषोत्तमम्॥ **6.1.7** ॥ 7

यो नियुक्तः परं कार्यं न कुर्यान्नृपतेः प्रियम्।
भृत्यो युक्तः समर्थश्च तमाहुर्मध्यमं नरम्॥ **6.1.8**॥ 8

नियुक्तो नृपतेः कार्यं न कुर्याद् यः समाहितः।
भृत्यो युक्तः समर्थश्च तमाहुः पुरुषाधमम्॥ **6.1.9**॥ 9

तन्नियोगे नियुक्तेन कृतं कृत्यं हनूमता।
न चात्मा लघुतां नीतः सुग्रीवश्चापि तोषितः॥ **6.1.10**॥ 10

अहं च रघुवंशश्च लक्ष्मणश्च महाबलः।
वैदेह्या दर्शनेनाद्य धर्मतः परिरक्षिताः॥ **6.1.11**॥ 11

इदं तु मम दीनस्य मनो भूयः प्रकर्षति।
यदिहास्य प्रियाख्यातुर्न कुर्मि सदृशं प्रियम्॥ **6.1.12**॥ 12

एष सर्वस्वभूतस्तु परिष्वङ्गो हनूमतः।
मया कालमिमं प्राप्य दत्तस्तस्य महात्मनः॥ **6.1.13**॥ 13

इत्युक्त्वा प्रीतिहृष्टाङ्गो रामस्तं परिषस्वजे।
हनूमन्तं कृतात्मानं कृतकार्यमुपागतम्॥ **6.1.14**॥ 14

ध्यात्वा पुनरुवाचेदं वचनं रघुसत्तमः।
हरीणामीश्वरस्यापि सुग्रीवस्योपशृण्वतः॥ **6.1.15**॥ 15

सर्वथा सुकृतं तावत् सीतायाः परिमार्गणम्।
सागरं तु समासाद्य पुनर्नष्टं मनो मम॥ **6.1.16**॥ 16

कथं नाम समुद्रस्य दुष्पारस्य महाम्भसः।
हरयो दक्षिणं पारं गमिष्यन्ति समागताः॥ **6.1.17**॥ 17

यद्यप्येष तु वृत्तान्तो वैदेह्या गदितो मम।
समुद्रपारगमने हरीणां किमिवोत्तरम्॥ **6.1.18**॥ 18

इत्युक्त्वा शोकसम्भ्रान्तो रामः शत्रुनिबर्हणः।
हनूमन्तं महाबाहुस्ततो ध्यानमुपागमत्॥ **6.1.19**॥ 19

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे प्रथमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वितीयः सर्गः ॥

सुग्रीवेण श्रीरामस्य प्रोत्साहनम्

तं तु शोकपरिद्यूनं रामं दशरथात्मजम्।
उवाच वचनं श्रीमान् सुग्रीवः शोकनाशनम्॥ **6.2.1** ॥ 20

किं त्वया तप्यते वीर यथान्यः प्राकृतस्तथा।
मैवं भूस्त्यज सन्तापं कृतघ्न इव सौहृदम्॥ **6.2.2** ॥ 21

सन्तापस्य च ते स्थानं नहि पश्यामि राघव।
प्रवृत्तावुपलब्धायां ज्ञाते च निलये रिपोः॥ **6.2.3** ॥ 22

मतिमाञ्शास्त्रवित् प्राज्ञः पण्डितश्चासि राघव।
त्यजेमां प्राकृतां बुद्धिं कृतात्मेवार्थदूषिणीम्॥ **6.2.4** ॥ 23

समुद्रं लङ्घयित्वा तु महानक्रसमाकुलम्।
लङ्कामारोहयिष्यामो हनिष्यामश्च ते रिपुम्॥ **6.2.5** ॥ 24

निरुत्साहस्य दीनस्य शोकपर्याकुलात्मनः।
सर्वार्था व्यवसीदन्ति व्यसनं चाधिगच्छति॥ **6.2.6** ॥ 25

इमे शूराः समर्थाश्च सर्वतो हरियूथपाः।
त्वत्प्रियार्थं कृतोत्साहाः प्रवेष्टुमपि पावकम्।
एषां हर्षेण जानामि तर्कश्चापि दृढो मम॥ **6.2.7** ॥ 26

विक्रमेण समानेष्ये सीतां हत्वा यथा रिपुम्।
रावणं पापकर्माणं तथा त्वं कर्तुमर्हसि॥ **6.2.8**॥ 27

सेतुरत्र यथा बद्ध्येद् यथा पश्येम तां पुरीम्।
तस्य राक्षसराजस्य तथा त्वं कुरु राघव॥ **6.2.9**॥ 28

दृष्ट्वा तां हि पुरीं लङ्कां त्रिकूटशिखरे स्थिताम्।
हतं च रावणं युद्धे दर्शनादवधारय॥ **6.2.10**॥ 29

अबद्ध्वा सागरे सेतुं घोरे च वरुणालये।
लङ्कां न मर्दितुं शक्या सेन्द्रैरपि सुरासुरैः॥ **6.2.11**॥ 30

सेतुबन्धः समुद्रे च यावल्लङ्कासमीपतः।
सर्वं तीर्णं च मे सैन्यं जितमित्युपधारय।
इमे हि समरे वीरा हरयः कामरूपिणः॥ **6.2.12**॥ 31

तदलं विक्लवां बुद्धिं राजन् सर्वार्थनाशिनीम्।
पुरुषस्य हि लोकेऽस्मिञ्शोकः शौर्यापकर्षणः॥ **6.2.13**॥ 32

यत् तु कार्यं मनुष्येण शौटीर्यमवलम्ब्यताम्।
तदलङ्करणायैव कर्तुर्भवति सत्वरम्॥ **6.2.14**॥ 33

अस्मिन् काले महाप्राज्ञ सत्त्वमातिष्ठ तेजसा।
शूराणां हि मनुष्याणां त्वद्विधानां महात्मनाम्।
विनष्टे वा प्रणष्टे वा शोकः सर्वार्थनाशनः॥ **6.2.15**॥ 34

तत्त्वं बुद्धिमतां श्रेष्ठः सर्वशास्त्रार्थकोविदः।
मद्विधैः सचिवैः सार्धमरिं जेतुं समर्हसि॥ **6.2.16**॥ 35

नहि पश्याम्यहं कञ्चित् त्रिषु लोकेषु राघव।
गृहीतधनुषो यस्ते तिष्ठेदभिमुखो रणे॥ **6.2.17**॥ 36

वानरेषु समासक्तं न ते कार्यं विपत्स्यते।
अचिराद् द्रक्ष्यसे सीतां तीर्त्वा सागरमक्षयम्॥ **6.2.18**॥ 37

तदलं शोकमालम्ब्य क्रोधमालम्ब भूपते।
निश्चेष्टाः क्षत्रिया मन्दाः सर्वे चण्डस्य बिभ्यति॥ **6.2.19**॥ 38

लङ्घनार्थं च घोरस्य समुद्रस्य नदीपतेः।
सहास्माभिरिहोपेतः सूक्ष्मबुद्धिर्विचारय॥ **6.2.20**॥ 39

लङ्घिते तत्र तैः सैन्यैर्जितमित्येव निश्चिनु।
सर्वं तीर्णं च मे सैन्यं जितमित्यवधार्यताम्॥ **6.2.21**॥ 40

इमे हि हरयः शूराः समरे कामरूपिणः।
तानरीन् विधमिष्यन्ति शिलापादपवृष्टिभिः॥ **6.2.22**॥ 41

कथञ्चित् परिपश्यामि लङ्घितं वरुणालयम्।
हतमित्येव तं मन्ये युद्धे शत्रुनिबर्हण॥ **6.2.23**॥ 42

किमुक्त्वा बहुधा चापि सर्वथा विजयी भवान्।
निमित्तानि च पश्यामि मनो मे सम्प्रहृष्यति॥ **6.2.24**॥ 43

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वितीयः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ तृतीयः सर्गः ॥

लङ्काया दुर्गद्वारसैन्यविभागसङ्क्रमप्रभृतीन् वर्णयित्वा तत्र वानरसेनाप्रस्थापनाय हनुमतः श्रीरामं प्रति प्रार्थना

सुग्रीवस्य वचः श्रुत्वा हेतुमत् परमार्थवत्।
प्रतिजग्राह काकुत्स्थो हनूमन्तमथाब्रवीत्॥ **6.3.1** ॥ 44

तपसा सेतुबन्धेन सागरोच्छोषणेन च।
सर्वथापि समर्थोऽस्मि सागरस्यास्य लङ्घने॥ **6.3.2** ॥ 45

कति दुर्गाणि दुर्गाया लङ्कायास्तद् ब्रवीष्व मे।
ज्ञातुमिच्छामि तत् सर्वं दर्शनादिव वानर॥ **6.3.3** ॥ 46

बलस्य परिमाणं च द्वारदुर्गक्रियामपि।
गुप्तिकर्म च लङ्काया रक्षसां सदनानि च॥ **6.3.4** ॥ 47

यथासुखं यथावच्च लङ्कायामसि दृष्टवान्।
सर्वमाचक्ष्व तत्त्वेन सर्वथा कुशलो ह्यसि॥ **6.3.5** ॥ 48

श्रुत्वा रामस्य वचनं हनूमान् मारुतात्मजः।
वाक्यं वाक्यविदां श्रेष्ठो रामं पुनरथाब्रवीत्॥ **6.3.6** ॥ 49

श्रूयतां सर्वमाख्यास्ये दुर्गकर्म विधानतः।
गुप्ता पुरी यथा लङ्का रक्षिता च यथा बलैः॥ **6.3.7** ॥ 50

राक्षसाश्च यथा स्निग्धा रावणस्य च तेजसा।
परां समृद्धिं लङ्कायाः सागरस्य च भीमताम्॥ **6.3.8**॥ 51

विभागं च बलौघस्य निर्देशं वाहनस्य च।
एवमुक्त्वा कपिश्रेष्ठः कथयामास तत्त्वतः॥ **6.3.9**॥ 52

हृष्टप्रमुदिता लङ्का मत्तद्विपसमाकुला।
महती रथसम्पूर्णा रक्षोगणनिषेविता॥ **6.3.10**॥ 53

दृढबद्धकपाटानि महापरिघवन्ति च।
चत्वारि विपुलान्यस्या द्वाराणि सुमहान्ति च॥ **6.3.11**॥ 54

तत्रेषूपलयन्त्राणि बलवन्ति महान्ति च।
आगतं प्रतिसैन्यं तैस्तत्र प्रतिनिवार्यते॥ **6.3.12**॥ 55

द्वारेषु संस्कृता भीमाः कालायसमयाः शिताः।
शतशो रचिता वीरैः शतघ्न्यो रक्षसां गणैः॥ **6.3.13**॥ 56

सौवर्णस्तु महांस्तस्याः प्राकारो दुष्प्रधर्षणः।
मणिविद्रुमवैदूर्यमुक्ताविरचितान्तरः॥ **6.3.14**॥ 57

सर्वतश्च महाभीमाः शीततोया महाशुभाः।
अगाधा ग्राहवत्यश्च परिखा मीनसेविताः॥ **6.3.15**॥ 58

द्वारेषु तासां चत्वारः सङ्क्रमाः परमायताः।
यन्त्रैरुपेता बहुभिर्महद्भिर्गृहपङ्क्तिभिः॥ **6.3.16**॥ 59

त्रायन्ते सङ्क्रमास्तत्र परसैन्यागते सति।
यन्त्रैस्तैरवकीर्यन्ते परिखासु समन्ततः॥ **6.3.17**॥ 60

एकस्त्वकम्प्यो बलवान् सङ्क्रमः सुमहादृढः।
काञ्चनैर्बहुभिः स्तम्भैर्वेदिकाभिश्च शोभितः॥ **6.3.18**॥ 61

स्वयं प्रकृतिमापन्नो युयुत्सू राम रावणः।
उत्थितश्चाप्रमत्तश्च बलानामनुदर्शने॥ **6.3.19**॥ 62

लङ्का पुनर्निरालम्बा देवदुर्गा भयावहा।
नादेयं पार्वतं वान्यं कृत्रिमं च चतुर्विधम्॥ **6.3.20**॥ 63

स्थिता पारे समुद्रस्य दूरपारस्य राघव।
नौपथश्चापि नास्त्यत्र निरुद्देशश्च सर्वतः॥ **6.3.21**॥ 64

शैलाग्रे रचिता दुर्गा सा पूर्देवपुरोपमा।
वाजिवारणसम्पूर्णा लङ्का परमदुर्जया॥ **6.3.22**॥ 65

परिखाश्च शतघ्न्यश्च यन्त्राणि विविधानि च।
शोभयन्ति पुरीं लङ्कां रावणस्य दुरात्मनः॥ **6.3.23**॥ 66

अयुतं रक्षसामत्र पूर्वद्वारं समाश्रितम्।
शूलहस्ता दुराधर्षाः सर्वे खड्गाग्रयोधिनः॥ **6.3.24**॥ 67

नियुतं रक्षसामत्र दक्षिणद्वारमाश्रितम्।
चतुरङ्गेण सैन्येन योधास्तत्राप्यनुत्तमाः॥ **6.3.25**॥ 68

प्रयुतं रक्षसामत्र पश्चिमद्वारमाश्रितम्।
चर्मखड्गधराः सर्वे तथा सर्वास्त्रकोविदाः॥ **6.3.26**॥ 69

न्यर्बुदं रक्षसामत्र उत्तरद्वारमाश्रितम्।
रथिनश्चाश्ववाहाश्च कुलपुत्राः सुपूजिताः॥ **6.3.27**॥ 70

शतशोऽथ सहस्राणि मध्यमं स्कन्धमाश्रिताः।
यातुधाना दुराधर्षाः साग्रकोटिश्च रक्षसाम्॥ **6.3.28**॥ 71

ते मया सङ्क्रमा भग्नाः परिखाश्चावपूरिताः।
दग्धा च नगरी लङ्का प्राकाराश्चावसादिताः।
बलैकदेशः क्षपितो राक्षसानां महात्मनाम्॥ **6.3.29**॥ 72

येन केन तु मार्गेण तराम वरुणालयम्।
हतेति नगरी लङ्का वानरैरुपधार्यताम्॥ **6.3.30**॥ 73

अङ्गदो द्विविदो मैन्दो जाम्बवान् पनसो नलः।
नीलः सेनापतिश्चैव बलशेषेण किं तव॥ **6.3.31**॥ 74

प्लवमाना हि गत्वा तां रावणस्य महापुरीम्।
सपर्वतवनां भित्त्वा सखातां च सतोरणाम्।
सप्राकारां सभवनामानयिष्यन्ति राघव॥ **6.3.32**॥ 75

एवमाज्ञापय क्षिप्रं बलानां सर्वसङ्ग्रहम्।
मुहूर्तेन तु युक्तेन प्रस्थानमभिरोचय॥ **6.3.33**॥ 76

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे तृतीयः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्थः सर्गः ॥

श्रीरामप्रभृतिभिः सह वानरसैन्यस्य प्रस्थानं सागरतटे निवेशश्च

श्रुत्वा हनूमतो वाक्यं यथावदनुपूर्वशः।
ततोऽब्रवीन्महातेजा रामः सत्यपराक्रमः॥ **6.4.1** ॥ 77

यन्निवेदयसे लङ्कां पुरीं भीमस्य रक्षसः।
क्षिप्रमेनां वधिष्यामि सत्यमेतद् ब्रवीमि ते॥ **6.4.2** ॥ 78

अस्मिन् मुहूर्ते सुग्रीव प्रयाणमभिरोचय।
युक्तो मुहूर्ते विजये प्राप्तो मध्यं दिवाकरः॥ **6.4.3** ॥ 79

सीतां हृत्वा तु तद् यातु क्वासौ यास्यति जीवितः।
सीता श्रुत्वाभियानं मे आशामेष्यति जीविते।
जीवितान्तेऽमृतं स्पृष्ट्वा पीत्वामृतमिवातुरः॥ **6.4.4** ॥ 80

उत्तराफाल्गुनी ह्यद्य श्वस्तु हस्तेन योक्ष्यते।
अभिप्रयाम सुग्रीव सर्वानीकसमावृताः॥ **6.4.5** ॥ 81

निमित्तानि च पश्यामि यानि प्रादुर्भवन्ति वै।
निहत्य रावणं सीतामानयिष्यामि जानकीम्॥ **6.4.6** ॥ 82

उपरिष्टाद्धि नयनं स्फुरमाणमिमं मम।
विजयं समनुप्राप्तं शंसतीव मनोरथम्॥ **6.4.7** ॥ 83

ततो वानरराजेन लक्ष्मणेन सुपूजितः।
उवाच रामो धर्मात्मा पुनरप्यर्थकोविदः॥ **6.4.8**॥ 84

अग्रे यातु बलस्यास्य नीलो मार्गमवेक्षितुम्।
वृतः शतसहस्रेण वानराणां तरस्विनाम्॥ **6.4.9**॥ 85

फलमूलवता नील शीतकाननवारिणा।
पथा मधुमता चाशु सेनां सेनापते नय॥ **6.4.10**॥ 86

दूषयेयुर्दुरात्मानः पथि मूलफलोदकम्।
राक्षसाः पथि रक्षेथास्तेभ्यस्त्वं नित्यमुद्यतः॥ **6.4.11**॥ 87

निम्नेषु वनदुर्गेषु वनेषु च वनौकसः।
अभिप्लुत्याभिपश्येयुः परेषां निहितं बलम्॥ **6.4.12**॥ 88

यत्तु फल्गु बलं किञ्चित् तदत्रैवोपपद्यताम्।
एतद्धि कृत्यं घोरं नो विक्रमेण प्रयुज्यताम्॥ **6.4.13**॥ 89

सागरौघनिभं भीममग्रानीकं महाबलाः।
कपिसिंहाः प्रकर्षन्तु शतशोऽथ सहस्रशः॥ **6.4.14**॥ 90

गजश्च गिरिसङ्काशो गवयश्च महाबलः।
गवाक्षश्चाग्रतो यातु गवां दृप्त इवर्षभः॥ **6.4.15**॥ 91

यातु वानरवाहिन्या वानरः प्लवतां पतिः।
पालयन् दक्षिणं पार्श्वमृषभो वानरर्षभः॥ **6.4.16**॥ 92

गन्धहस्तीव दुर्धर्षस्तरस्वी गन्धमादनः।
यातु वानरवाहिन्याः सव्यं पार्श्वमधिष्ठितः॥ **6.4.17**॥ 93

यास्यामि बलमध्येऽहं बलौघमभिहर्षयन्।
अधिरुह्य हनूमन्तमैरावतमिवेश्वरः॥ **6.4.18**॥ 94

अङ्गदेनैष संयातु लक्ष्मणश्चान्तकोपमः।
सार्वभौमेन भूतेशो द्रविणाधिपतिर्यथा॥ **6.4.19**॥ 95

जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः।
ऋक्षराजो महाबाहुः कुक्षिं रक्षन्तु ते त्रयः॥ **6.4.20**॥ 96

राघवस्य वचः श्रुत्वा सुग्रीवो वाहिनीपतिः।
व्यादिदेश महावीर्यो वानरान् वानरर्षभः॥ **6.4.21**॥ 97

ते वानरगणाः सर्वे समुत्पत्य महौजसः।
गुहाभ्यः शिखरेभ्यश्च आशु पुप्लुविरे तदा॥ **6.4.22**॥ 98

ततो वानरराजेन लक्ष्मणेन च पूजितः।
जगाम रामो धर्मात्मा ससैन्यो दक्षिणां दिशम्॥ **6.4.23**॥ 99

शतैः शतसहस्रैश्च कोटिभिश्चायुतैरपि।
वारणाभैश्च हरिभिर्ययौ परिवृतस्तदा॥ **6.4.24**॥ 100

तं यान्तमनुयान्ती सा महती हरिवाहिनी।
हृष्टाः प्रमुदिताः सर्वे सुग्रीवेणापि पालिताः॥ **6.4.25**॥ 101

आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः।
क्ष्वेलन्तो निनदन्तश्च जग्मुर्वै दक्षिणां दिशम्॥ **6.4.26**॥ 102

भक्षयन्तः सुगन्धीनि मधूनि च फलानि च।
उद्वहन्तो महावृक्षान् मञ्जरीपुञ्जधारिणः॥ **6.4.27**॥ 103

अन्योन्यं सहसा दृप्ता निर्वहन्ति क्षिपन्ति च।
पतन्तश्चोत्पतन्त्यन्ये पातयन्त्यपरे परान्॥ **6.4.28**॥ 104

रावणो नो निहन्तव्यः सर्वे च रजनीचराः।
इति गर्जन्ति हरयो राघवस्य समीपतः॥ **6.4.29**॥ 105

पुरस्तादृषभो नीलो वीरः कुमुद एव च।
पन्थानं शोधयन्ति स्म वानरैर्बहुभिः सह॥ **6.4.30**॥ 106

मध्ये तु राजा सुग्रीवो रामो लक्ष्मण एव च।
बलिभिर्बहुभिर्भीमैर्वृतः शत्रुनिबर्हणः॥ **6.4.31**॥ 107

हरिः शतबलिर्वीरः कोटिभिर्दशभिर्वृतः।
सर्वामेको ह्यवष्टभ्य ररक्ष हरिवाहिनीम्॥ **6.4.32**॥ 108

कोटीशतपरीवारः केसरी पनसो गजः।
अर्कश्च बहुभिः पार्श्वमेकं तस्याभिरक्षति॥ **6.4.33**॥ 109

सुषेणो जाम्बवांश्चैव ऋक्षैर्बहुभिरावृतौ।
सुग्रीवं पुरतः कृत्वा जघनं संररक्षतुः॥ **6.4.34**॥ 110

तेषां सेनापतिर्वीरो नीलो वानरपुङ्गवः।
सम्पतन् प्लवतां श्रेष्ठस्तद् बलं पर्यवारयत्॥ **6.4.35**॥ 111

दरीमुखः प्रजङ्घश्च जम्भोऽथ रभसः कपिः।
सर्वतश्च ययुर्वीरास्त्वरयन्तः प्लवङ्गमान्॥ **6.4.36**॥ 112

एवं ते हरिशार्दूला गच्छन्ति बलदर्पिताः।
अपश्यन्त गिरिश्रेष्ठं सह्यं गिरिशतायुतम्॥ **6.4.37**॥ 113

सरांसि च सुफुल्लानि तटाकानि वराणि च।
रामस्य शासनं ज्ञात्वा भीमकोपस्य भीतवत्॥ **6.4.38**॥ 114

वर्जयन् नागराभ्याशांस्तथा जनपदानपि।
सागरौघनिभं भीमं तद् वानरबलं महत्॥ **6.4.39**॥ 115

निःससर्प महाघोरं भीमघोषमिवार्णवम्।
तस्य दाशरथेः पार्श्वे शूरास्ते कपिकुञ्जराः॥ **6.4.40**॥ 116

तूर्णमापुप्लुवुः सर्वे सदश्वा इव चोदिताः।
कपिभ्यामुह्यमानौ तौ शुशुभाते नरर्षभौ॥ **6.4.41**॥ 117

महद्भ्यामिव संस्पृष्टौ ग्रहाभ्यां चन्द्रभास्करौ।
ततो वानरराजेन लक्ष्मणेन सुपूजितः॥ **6.4.42**॥ 118

जगाम रामो धर्मात्मा ससैन्यो दक्षिणां दिशम्।
तमङ्गदगतो रामं लक्ष्मणः शुभया गिरा॥ **6.4.43**॥ 119

उवाच परिपूर्णार्थं पूर्णार्थप्रतिभानवान्।
हृतामवाप्य वैदेहीं क्षिप्रं हत्वा च रावणम्॥ **6.4.44**॥ 120

समृद्धार्थः समृद्धार्थामयोध्यां प्रतियास्यसि।
महान्ति च निमित्तानि दिवि भूमौ च राघव॥ **6.4.45**॥ 121

शुभानि तव पश्यामि सर्वाण्येवार्थसिद्धये।
अनुवाति शिवो वायुः सेनां मृदुहितः सुखः॥ **6.4.46**॥ 122

पूर्णवल्गुस्वराश्चेमे प्रवदन्ति मृगद्विजाः।
प्रसन्नाश्च दिशः सर्वा विमलश्च दिवाकरः॥ **6.4.47**॥ 123

उशना च प्रसन्नार्चिरनु त्वां भार्गवो गतः।
ब्रह्मराशिर्विशुद्धश्च शुद्धाश्च परमर्षयः।
अर्चिष्मन्तः प्रकाशन्ते ध्रुवं सर्वे प्रदक्षिणम्॥ **6.4.48**॥ 124

त्रिशङ्कुर्विमलो भाति राजर्षिः सपुरोहितः।
पितामहः पुरोऽस्माकमिक्ष्वाकूणां महात्मनाम्॥ **6.4.49**॥ 125

विमले च प्रकाशेते विशाखे निरुपद्रवे।
नक्षत्रं परमस्माकमिक्ष्वाकूणां महात्मनाम्॥ **6.4.50**॥ 126

नैर्ऋतं नैर्ऋतानां च नक्षत्रमतिपीड्यते।
मूलो मूलवता स्पृष्टो धूप्यते धूमकेतुना॥ **6.4.51**॥ 127

सर्वं चैतद् विनाशाय राक्षसानामुपस्थितम्।
काले कालगृहीतानां नक्षत्रं ग्रहपीडितम्॥ **6.4.52**॥ 128

प्रसन्नाः सुरसाश्चापो वनानि फलवन्ति च।
प्रवान्ति नाधिका गन्धा यथर्तुकुसुमा द्रुमाः॥ **6.4.53**॥ 129

व्यूढानि कपिसैन्यानि प्रकाशन्तेऽधिकं प्रभो।
देवानामिव सैन्यानि सङ्ग्रामे तारकामये।
एवमार्य समीक्ष्यैतत् प्रीतो भवितुमर्हसि॥ **6.4.54**॥ 130

इति भ्रातरमाश्वास्य हृष्टः सौमित्रिरब्रवीत्।
अथावृत्य महीं कृत्स्नां जगाम हरिवाहिनी॥ **6.4.55**॥ 131

ऋक्षवानरशार्दूलैर्नखद्रंष्ट्रायुधैरपि।
कराग्रैश्चरणाग्रैश्च वानरैरुद्धतं रजः॥ **6.4.56**॥ 132

भीममन्तर्दधे लोकं निवार्य सवितुः प्रभाम्।
सपर्वतवनाकाशं दक्षिणां हरिवाहिनी॥ **6.4.57**॥ 133

छादयन्ती ययौ भीमा द्यामिवाम्बुदसन्ततिः।
उत्तरन्त्याश्च सेनायाः सततं बहुयोजनम्॥ **6.4.58**॥ 134

नदीस्रोतांसि सर्वाणि सस्यन्दुर्विपरीतवत्।
सरांसि विमलाम्भांसि द्रुमाकीर्णांश्च पर्वतान्॥ **6.4.59**॥ 135

समान् भूमिप्रदेशांश्च वनानि फलवन्ति च।
मध्येन च समन्ताच्च तिर्यक् चाधश्च साविशत्॥ **6.4.60**॥ 136

समावृत्य महीं कृत्स्नां जगाम महती चमूः।
ते हृष्टवदनाः सर्वे जग्मुर्मारुतरंहसः॥ **6.4.61**॥ 137

हरयो राघवस्यार्थे समारोपितविक्रमाः।
हर्षं वीर्यं बलोद्रेकान् दर्शयन्तः परस्परम्॥ **6.4.62**॥ 138

यौवनोत्सेकजाद् दर्पाद् विविधांश्चक्रुरध्वनि।
तत्र केचिद् द्रुतं जग्मुरुत्पेतुश्च तथापरे॥ **6.4.63**॥ 139

केचित् किलकिलां चक्रुर्वानरा वनगोचराः।
प्रास्फोटयंश्च पुच्छानि सन्निजघ्नुः पदान्यपि॥ **6.4.64**॥ 140

भुजान् विक्षिप्य शैलांश्च द्रुमानन्ये बभञ्जिरे।
आरोहन्तश्च शृङ्गाणि गिरीणां गिरिगोचराः॥ **6.4.65**॥ 141

महानादान् प्रमुञ्चन्ति क्ष्वेडामन्ये प्रचक्रिरे।
ऊरुवेगैश्च ममृदुर्लताजालान्यनेकशः॥ **6.4.66**॥ 142

जृम्भमाणाश्च विक्रान्ता विचिक्रीडुः शिलाद्रुमैः।
ततः शतसहस्रैश्च कोटिभिश्च सहस्रशः॥ **6.4.67**॥ 143

वानराणां सुघोराणां श्रीमत्परिवृता मही।
सा स्म याति दिवारात्रं महती हरिवाहिनी॥ **6.4.68**॥ 144

प्रहृष्टमुदिताः सर्वे सुग्रीवेणाभिपालिताः।
वानरास्त्वरिता यान्ति सर्वे युद्धाभिनन्दिनः।
प्रमोक्षयिषवः सीतां मुहूर्तं क्वापि नावसन्॥ **6.4.69**॥ 145

ततः पादपसम्बाधं नानावनसमायुतम्।
सह्यपर्वतमासाद्य वानरास्ते समारुहन्॥ **6.4.70**॥ 146

काननानि विचित्राणि नदीप्रस्रवणानि च।
पश्यन्नपि ययौ रामः सह्यस्य मलयस्य च॥ **6.4.71**॥ 147

चम्पकांस्तिलकांश्चूतानशोकान् सिन्दुवारकान्।
तिनिशान् करवीरांश्च भञ्जन्ति स्म प्लवङ्गमाः॥ **6.4.72**॥ 148

अङ्कोलांश्च करञ्जांश्च प्लक्षन्यग्रोधपादपान्।
जम्बूकामलकान् नीपान् भञ्जन्ति स्म प्लवङ्गमाः॥ **6.4.73**॥ 149

प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः।
वायुवेगप्रचलिताः पुष्पैरवकिरन्ति तान्॥ **6.4.74**॥ 150

मारुतः सुखसंस्पर्शो वाति चन्दनशीतलः।
षट्पदैरनुकूजद्भिर्वनेषु मधुगन्धिषु॥ **6.4.75**॥ 151

अधिकं शैलराजस्तु धातुभिस्तु विभूषितः।
धातुभ्यः प्रसृतो रेणुर्वायुवेगेन घट्टितः॥ **6.4.76**॥ 152

सुमहद्वानरानीकं छादयामास सर्वतः।
गिरिप्रस्थेषु रम्येषु सर्वतः सम्प्रपुष्पिताः॥ **6.4.77**॥ 153

केतक्यः सिन्दुवाराश्च वासन्त्यश्च मनोरमाः।
माधव्यो गन्धपूर्णाश्च कुन्दगुल्माश्च पुष्पिताः॥ **6.4.78**॥ 154

चिरिबिल्वा मधूकाश्च वञ्जुला बकुलास्तथा।
रञ्जकास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः॥ **6.4.79**॥ 155

चूताः पाटलिकाश्चैव कोविदाराश्च पुष्पिताः।
मुचुलिन्दार्जुनाश्चैव शिंशपाः कुटजास्तथा॥ **6.4.80**॥ 156

हिन्तालास्तिनिशाश्चैव चूर्णका नीपकास्तथा।
नीलाशोकाश्च सरला अङ्कोलाः पद्मकास्तथा॥ **6.4.81**॥ 157

प्रीयमाणैः प्लवङ्गैस्तु सर्वे पर्याकुलीकृताः।
वाप्यस्तस्मिन् गिरौ रम्याः पल्वलानि तथैव च॥ **6.4.82**॥ 158

चक्रवाकानुचरिताः कारण्डवनिषेविताः।
प्लवैः क्रौञ्चैश्च सङ्कीर्णा वराहमृगसेविताः॥ **6.4.83**॥ 159

ऋक्षैस्तरक्षुभिः सिंहैः शार्दूलैश्च भयावहैः।
व्यालैश्च बहुभिर्भीमैः सेव्यमानाः समन्ततः॥ **6.4.84**॥ 160

पद्मैः सौगन्धिकैः फुल्लैः कुमुदैश्चोत्पलैस्तथा।
वारिजैर्विविधैः पुष्पै रम्यास्तत्र जलाशयाः॥ **6.4.85**॥ 161

तस्य सानुषु कूजन्ति नानाद्विजगणास्तथा।
स्नात्वा पीत्वोदकान्यत्र जले क्रीडन्ति वानराः॥ **6.4.86**॥ 162

अन्योन्यं प्लावयन्ति स्म शैलमारुह्य वानराः।
फलान्यमृतगन्धीनि मूलानि कुसुमानि च॥ **6.4.87**॥ 163

बभञ्जुर्वानरास्तत्र पादपानां मदोत्कटाः।
द्रोणमात्रप्रमाणानि लम्बमानानि वानराः॥ **6.4.88**॥ 164

ययुः पिबन्तः स्वस्थास्ते मधूनि मधुपिङ्गलाः।
पादपानवभञ्जन्तो विकर्षन्तस्तथा लताः॥ **6.4.89**॥ 165

विधमन्तो गिरिवरान् प्रययुः प्लवगर्षभाः।
वृक्षेभ्योऽन्ये तु कपयो नदन्तो मधु दर्पिताः॥ **6.4.90**॥ 166

अन्ये वृक्षान् प्रपद्यन्ते प्रपिबन्त्यपि चापरे।
बभूव वसुधा तैस्तु सम्पूर्णा हरिपुङ्गवैः।
यथा कमलकेदारैः पक्वैरिव वसुन्धरा॥ **6.4.91**॥ 167

महेन्द्रमथ सम्प्राप्य रामो राजीवलोचनः।
आरुरोह महाबाहुः शिखरं द्रुमभूषितम्॥ **6.4.92**॥ 168

ततः शिखरमारुह्य रामो दशरथात्मजः।
कूर्ममीनसमाकीर्णमपश्यत् सलिलाशयम्॥ **6.4.93**॥ 169

ते सह्यं समतिक्रम्य मलयं च महागिरिम्।
आसेदुरानुपूर्व्येण समुद्रं भीमनिःस्वनम्॥ **6.4.94**॥ 170

अवरुह्य जगामाशु वेलावनमनुत्तमम्।
रामो रमयतां श्रेष्ठः ससुग्रीवः सलक्ष्मणः॥ **6.4.95**॥ 171

अथ धौतोपलतलां तोयौघैः सहसोत्थितैः।
वेलामासाद्य विपुलां रामो वचनमब्रवीत्॥ **6.4.96**॥ 172

एते वयमनुप्राप्ताः सुग्रीव वरुणालयम्।
इहेदानीं विचिन्ता सा या नः पूर्वमुपस्थिता॥ **6.4.97**॥ 173

अतः परमतीरोऽयं सागरः सरितां पतिः।
न चायमनुपायेन शक्यस्तरितुमर्णवः॥ **6.4.98**॥ 174

तदिहैव निवेशोऽस्तु मन्त्रः प्रस्तूयतामिह।
यथेदं वानरबलं परं पारमवाप्नुयात्॥ **6.4.99**॥ 175

इतीव स महाबाहुः सीताहरणकर्शितः।
रामः सागरमासाद्य वासमाज्ञापयत् तदा॥ **6.4.100**॥ 176

सर्वाः सेना निवेश्यन्तां वेलायां हरिपुङ्गव।
सम्प्राप्तो मन्त्रकालो नः सागरस्येह लङ्घने॥ **6.4.101**॥ 177

स्वां स्वां सेनां समुत्सृज्य मा च कश्चित् कुतो व्रजेत्।
गच्छन्तु वानराः शूरा ज्ञेयं छन्नं भयं च नः॥ **6.4.102**॥ 178

रामस्य वचनं श्रुत्वा सुग्रीवः सहलक्ष्मणः।
सेनां निवेशयत् तीरे सागरस्य द्रुमायुते॥ **6.4.103**॥ 179

विरराज समीपस्थं सागरस्य च तद् बलम्।
मधुपाण्डुजलः श्रीमान् द्वितीय इव सागरः॥ **6.4.104**॥ 180

वेलावनमुपागम्य ततस्ते हरिपुङ्गवाः।
निविष्टाश्च परं पारं काङ्क्षमाणा महोदधेः॥ **6.4.105**॥ 181

तेषां निविशमानानां सैन्यसन्नाहनिःस्वनः।
अन्तर्धाय महानादमर्णवस्य प्रशुश्रुवे॥ **6.4.106**॥ 182

सा वानराणां ध्वजिनी सुग्रीवेणाभिपालिता।
त्रिधा निविष्टा महती रामस्यार्थपराभवत्॥ **6.4.107**॥ 183

सा महार्णवमासाद्य हृष्टा वानरवाहिनी।
वायुवेगसमाधूतं पश्यमाना महार्णवम्॥ **6.4.108**॥ 184

दूरपारमसम्बाधं रक्षोगणनिषेवितम्।
पश्यन्तो वरुणावासं निषेदुर्हरियूथपाः॥ **6.4.109**॥ 185

चण्डनक्रग्राहघोरं क्षपादौ दिवसक्षये।
हसन्तमिव फेनौघैर्नृत्यन्तमिव चोर्मिभिः॥ **6.4.110**॥ 186

चन्द्रोदये समुद्भूतं प्रतिचन्द्रसमाकुलम्।
चण्डानिलमहाग्राहैः कीर्णं तिमितिमिङ्गिलैः॥ **6.4.111**॥ 187

दीप्तभोगैरिवाकीर्णं भुजङ्गैर्वरुणालयम्।
अवगाढं महासत्त्वैर्नानाशैलसमाकुलम्॥ **6.4.112**॥ 188

सुदुर्गं दुर्गमार्गं तमगाधमसुरालयम्।
मकरैर्नागभोगैश्च विगाढा वातलोलिताः।
उत्पेतुश्च निपेतुश्च प्रहृष्टा जलराशयः॥ **6.4.113**॥ 189

अग्निचूर्णमिवाविद्धं भास्वराम्बुमहोरगम्।
सुरारिनिलयं घोरं पातालविषयं सदा॥ **6.4.114**॥ 190

सागरं चाम्बरप्रख्यमम्बरं सागरोपमम्।
सागरं चाम्बरं चेति निर्विशेषमदृश्यत॥ **6.4.115**॥ 191

सम्पृक्तं नभसाप्यम्भः सम्पृक्तं च नभोऽम्भसा।
तादृग्रूपे स्म दृश्येते तारारत्नसमाकुले॥ **6.4.116**॥ 192

समुत्पतितमेघस्य वीचिमालाकुलस्य च।
विशेषो न द्वयोरासीत् सागरस्याम्बरस्य च॥ **6.4.117**॥ 193

अन्योन्यैरहताः सक्ताः सस्वनुर्भीमनिःस्वनाः।
ऊर्मयः सिन्धुराजस्य महाभेर्य इवाम्बरे॥ **6.4.118**॥ 194

रत्नौघजलसन्नादं विषक्तमिव वायुना।
उत्पतन्तमिव क्रुद्धं यादोगणसमाकुलम्॥ **6.4.119**॥ 195

ददृशुस्ते महात्मानो वाताहतजलाशयम्।
अनिलोद्धूतमाकाशे प्रवलान्तमिवोर्मिभिः॥ **6.4.120**॥ 196

ततो विस्मयमापन्ना हरयो ददृशुः स्थिताः।
भ्रान्तोर्मिजालसन्नादं प्रलोलमिव सागरम्॥ **6.4.121**॥ 197

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्थः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चमः सर्गः ॥

सीतायाः कृते श्रीरामस्य शोको विलापश्च

सा तु नीलेन विधिवत्स्वारक्षा सुसमाहिता।
सागरस्योत्तरे तीरे साधु सा विनिवेशिता ॥ **6.5.1** ॥ 198

मैन्दश्च द्विविदश्चोभौ तत्र वानरपुङ्गवौ।
विचेरतुश्च तां सेनां रक्षार्थं सर्वतोदिशम् ॥ **6.5.2** ॥ 199

निविष्टायां तु सेनायां तीरे नदनदीपतेः।
पार्श्वस्थं लक्ष्मणं दृष्ट्वा रामो वचनमब्रवीत् ॥ **6.5.3** ॥ 200

शोकश्च किल कालेन गच्छता ह्यपगच्छति।
मम चापश्यतः कान्तामहन्यहनि वर्धते ॥ **6.5.4** ॥ 201

न मे दुःखं प्रिया दूरे न मे दुःखं हृतेति च।
एतदेवानुशोचामि वयोऽस्या ह्यतिवर्तते ॥ **6.5.5** ॥ 202

वाहि वात यतः कान्ता तां स्पृष्ट्वा मामपि स्पृश।
त्वयि मे गात्रसंस्पर्शश्चन्द्रे दृष्टिसमागमः ॥ **6.5.6** ॥ 203

तन्मे दहति गात्राणि विषं पीतमिवाशये।
हा नाथेति प्रिया सा मां ह्रियमाणा यदब्रवीत् ॥ **6.5.7** ॥ 204

तद्वियोगेन्धनवता तच्चिन्ताविमलार्चिषा।
रात्रिं दिवं शरीरं मे दह्यते मदनाग्निना॥ **6.5.8**॥ 205

अवगाह्यार्णवं स्वप्स्ये सौमित्रे भवता विना।
एवं च प्रज्वलन् कामो न मा सुप्तं जले दहेत्॥ **6.5.9**॥ 206

बह्वेतत् कामयानस्य शक्यमेतेन जीवितुम्।
यदहं सा च वामोरुरेकां धरणिमाश्रितौ॥ **6.5.10**॥ 207

केदारस्येव केदारः सोदकस्य निरूदकः।
उपस्नेहेन जीवामि जीवन्तीं यच्छृणोमि ताम्॥ **6.5.11**॥ 208

कदा नु खलु सुश्रोणीं शतपत्रायतेक्षणाम्।
विजित्य शत्रून् द्रक्ष्यामि सीतां स्फीतामिव श्रियम्॥ **6.5.12**॥ 209

कदा सुचारुदन्तोष्ठं तस्याः पद्ममिवाननम्।
ईषदुन्नाम्य पास्यामि रसायनमिवातुरः॥ **6.5.13**॥ 210

तौ तस्याः सहितौ पीनौ स्तनौ तालफलोपमौ।
कदा नु खलु सोत्कम्पौ श्लिष्यन्त्या मां भजिष्यतः॥ **6.5.14**॥ 211

सा नूनमसितापाङ्गी रक्षोमध्यगता सती।
मन्नाथा नाथहीनेव त्रातारं नाधिगच्छति॥ **6.5.15**॥ 212

कथं जनकराजस्य दुहिता मम च प्रिया।
राक्षसीमध्यगा शेते स्नुषा दशरथस्य च॥ **6.5.16**॥ 213

अविक्षोभ्याणि रक्षांसि सा विधूयोत्पतिष्यति।
विधूय जलदान् नीलाञ्शशिलेखा शरत्स्विव॥ **6.5.17**॥ 214

स्वभावतनुका नूनं शोकेनानशनेन च।
भूयस्तनुतरा सीता देशकालविपर्ययात्॥ **6.5.18**॥ 215

कदा नु राक्षसेन्द्रस्य निधायोरसि सायकान्।
शोकं प्रत्याहरिष्यामि शोकमुत्सृज्य मानसम्॥ **6.5.19**॥ 216

कदा नु खलु मे साध्वी सीतामरसुतोपमा।
सोत्कण्ठा कण्ठमालम्ब्य मोक्ष्यत्यानन्दजं जलम्॥ **6.5.20**॥ 217

कदा शोकमिमं घोरं मैथिलीविप्रयोगजम्।
सहसा विप्रमोक्ष्यामि वासः शुक्लेतरं यथा॥ **6.5.21**॥ 218

एवं विलपतस्तस्य तत्र रामस्य धीमतः।
दिनक्षयान्मन्दवपुर्भास्करोऽस्तमुपागमत्॥ **6.5.22**॥ 219

आश्वासितो लक्ष्मणेन रामः सन्ध्यामुपासत।
स्मरन् कमलपत्राक्षीं सीतां शोकाकुलीकृतः॥ **6.5.23**॥ 220

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षष्ठः सर्गः ॥

कर्तव्यनिर्णयाय मन्त्रिणः प्रति समुचितसम्मतिदानार्थं रावणस्यानुरोधः

लङ्कायां तु कृतं कर्म घोरं दृष्ट्वा भयावहम्।
राक्षसेन्द्रो हनुमता शक्रेणेव महात्मना।
अब्रवीद् राक्षसान् सर्वान् ह्रिया किञ्चिदवाङ्मुखः॥ **6.6.1** ॥ 221

धर्षिता च प्रविष्टा च लङ्का दुष्प्रसहा पुरी।
तेन वानरमात्रेण दृष्टा सीता च जानकी॥ **6.6.2** ॥ 222

प्रासादो धर्षितश्चैत्यः प्रवरा राक्षसा हताः।
आविला च पुरी लङ्का सर्वा हनुमता कृता॥ **6.6.3** ॥ 223

किं करिष्यामि भद्रं वः किं वो युक्तमनन्तरम्।
उच्यतां नः समर्थं यत् कृतं च सुकृतं भवेत्॥ **6.6.4** ॥ 224

मन्त्रमूलं च विजयं प्रवदन्ति मनस्विनः।
तस्माद् वै रोचये मन्त्रं रामं प्रति महाबलाः॥ **6.6.5** ॥ 225

त्रिविधाः पुरुषा लोके उत्तमाधममध्यमाः।
तेषां तु समवेतानां गुणदोषौ वदाम्यहम्॥ **6.6.6** ॥ 226

मन्त्रस्त्रिभिर्हि संयुक्तः समर्थैर्मन्त्रनिर्णये।
मित्रैर्वापि समानार्थैर्बान्धवैरपि वाधिकैः॥ **6.6.7** ॥ 227

सहितो मन्त्रयित्वा यः कर्मारम्भान् प्रवर्तयेत्।
दैवे च कुरुते यत्नं तमाहुः पुरुषोत्तमम्॥ **6.6.8**॥ 228

एकोऽर्थं विमृशेदेको धर्मे प्रकुरुते मनः।
एकः कार्याणि कुरुते तमाहुर्मध्यमं नरम्॥ **6.6.9**॥ 229

गुणदोषौ न निश्चित्य त्यक्त्वा दैवव्यपाश्रयम्।
करिष्यामीति यः कार्यमुपेक्षेत् स नराधमः॥ **6.6.10**॥ 230

यथेमे पुरुषा नित्यमुत्तमाधममध्यमाः।
एवं मन्त्रोऽपि विज्ञेय उत्तमाधममध्यमः॥ **6.6.11**॥ 231

ऐकमत्यमुपागम्य शास्त्रदृष्टेन चक्षुषा।
मन्त्रिणो यत्र निरतास्तमाहुर्मन्त्रमुत्तमम्॥ **6.6.12**॥ 232

बह्वीरपि मतीर्गत्वा मन्त्रिणामर्थनिर्णयः।
पुनर्यत्रैकतां प्राप्तः स मन्त्रो मध्यमः स्मृतः॥ **6.6.13**॥ 233

अन्योन्यमतिमास्थाय यत्र सम्प्रतिभाष्यते।
न चैकमत्ये श्रेयोऽस्ति मन्त्रः सोऽधम उच्यते॥ **6.6.14**॥ 234

तस्मात् सुमन्त्रितं साधु भवन्तो मतिसत्तमाः।
कार्यं सम्प्रतिपद्यन्तमेतत् कृत्यं मतं मम॥ **6.6.15**॥ 235

वानराणां हि धीराणां सहस्रैः परिवारितः।
रामोऽभ्येति पुरीं लङ्कामस्माकमुपरोधकः॥ **6.6.16**॥ 236

तरिष्यति च सुव्यक्तं राघवः सागरं सुखम्।
तरसा युक्तरूपेण सानुजः सबलानुगः॥ **6.6.17**॥ 237

समुद्रमुच्छोषयति वीर्येणान्यत्करोति वा।
तस्मिन्नेवंविधे कार्ये विरुद्धे वानरैः सह।
हितं पुरे च सैन्ये च सर्वं सम्मन्त्र्यतां मम॥ **6.6.18**॥ 238

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षष्ठः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तमः सर्गः ॥

रावणेन्द्रजित्पराक्रमं वर्णयित्वा राक्षसैर्भवान् रामं विजेष्यतीति रावणाय विश्वासदापनम्

इत्युक्ता राक्षसेन्द्रेण राक्षसास्ते महाबलाः।
ऊचुः प्राञ्जलयः सर्वे रावणं राक्षसेश्वरम्॥ **6.7.1** ॥ 239

द्विषत्पक्षमविज्ञाय नीतिबाह्यास्त्वबुद्धयः।
राजन् परिघशक्त्यृष्टिशूलपट्टिशकुन्तलम्॥ **6.7.2** ॥ 240

सुमहन्नो बलं कस्माद् विषादं भजते भवान्।
त्वया भोगवतीं गत्वा निर्जिताः पन्नगा युधि॥ **6.7.3** ॥ 241

कैलासशिखरावासी यक्षैर्बहुभिरावृतः।
सुमहत्कदनं कृत्वा वश्यस्ते धनदः कृतः॥ **6.7.4** ॥ 242

स महेश्वरसख्येन श्लाघमानस्त्वया विभो।
निर्जितः समरे रोषाल्लोकपालो महाबलः॥ **6.7.5** ॥ 243

विनिपात्य च यक्षौघान् विक्षोभ्य विनिगृह्य च।
त्वया कैलासशिखराद् विमानमिदमाहृतम्॥ **6.7.6** ॥ 244

मयेन दानवेन्द्रेण त्वद्भयात् सख्यमिच्छता।
दुहिता तव भार्यार्थे दत्ता राक्षसपुङ्गव॥ **6.7.7** ॥ 245

दानवेन्द्रो महाबाहो वीर्योत्सिक्तो दुरासदः।
विगृह्य वशमानीतः कुम्भीनस्याः सुखावहः॥ **6.7.8**॥ 246

निर्जितास्ते महाबाहो नागा गत्वा रसातलम्।
वासुकिस्तक्षकः शङ्खो जटी च वशमाहृताः॥ **6.7.9**॥ 247

अक्षया बलवन्तश्च शूरा लब्धवराः पुनः।
त्वया संवत्सरं युद्ध्वा समरे दानवा विभो॥ **6.7.10**॥ 248

स्वबलं समुपाश्रित्य नीता वशमरिन्दम।
मायाश्चाधिगतास्तत्र बह्व्यो वै राक्षसाधिप॥ **6.7.11**॥ 249

शूराश्च बलवन्तश्च वरुणस्य सुता रणे।
निर्जितास्ते महाभाग चतुर्विधबलानुगाः॥ **6.7.12**॥ 250

मृत्युदण्डमहाग्राहं शाल्मलीद्रुममण्डितम्।
कालपाशमहावीचिं यमकिङ्करपन्नगम्॥ **6.7.13**॥ 251

महाज्वरेण दुर्धर्षं यमलोकमहार्णवम्।
अवगाह्य त्वया राजन् यमस्य बलसागरम्॥ **6.7.14**॥ 252

जयश्च विपुलः प्राप्तो मृत्युश्च प्रतिषेधितः।
सुयुद्धेन च ते सर्वे लोकास्तत्र सुतोषिताः॥ **6.7.15**॥ 253

क्षत्रियैर्बहुभिर्वीरैः शक्रतुल्यपराक्रमैः।
आसीद् वसुमती पूर्णा महद्भिरिव पादपैः॥ **6.7.16**॥ 254

तेषां वीर्यगुणोत्साहैर्न समो राघवो रणे।
प्रसह्य ते त्वया राजन् हताः समरदुर्जयाः॥ **6.7.17**॥ 255

तिष्ठ वा किं महाराज श्रमेण तव वानरान्।
अयमेको महाबाहुरिन्द्रजित् क्षपयिष्यति॥ **6.7.18**॥ 256

अनेन च महाराज माहेश्वरमनुत्तमम्।
इष्ट्वा यज्ञं वरो लब्धो लोके परमदुर्लभः॥ **6.7.19**॥ 257

शक्तितोमरमीनं च विनिकीर्णान्त्रशैवलम्।
गजकच्छपसम्बाधमश्वमण्डूकसङ्कुलम्॥ **6.7.20**॥ 258

रुद्रादित्यमहाग्राहं मरुद्वसुमहोरगम्।
रथाश्वगजतोयौघं पदातिपुलिनं महत्॥ **6.7.21**॥ 259

अनेन हि समासाद्य देवानां बलसागरम्।
गृहीतो दैवतपतिर्लङ्कां चापि प्रवेशितः॥ **6.7.22**॥ 260

पितामहनियोगाच्च मुक्तः शम्बरवृत्रहा।
गतस्त्रिविष्टपं राजन् सर्वदेवनमस्कृतः॥ **6.7.23**॥ 261

तमेव त्वं महाराज विसृजेन्द्रजितं सुतम्।
यावद् वानरसेनां तां सरामां नयति क्षयम्॥ **6.7.24**॥ 262

राजन्नापदयुक्तेयमागता प्राकृताज्जनात्।
हृदि नैव त्वया कार्या त्वं वधिष्यसि राघवम्॥ **6.7.25**॥ 263

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टमः सर्गः ॥

प्रहस्तदुर्मुखवज्रदंष्ट्रनिकुम्भवज्रहनुभी रावणस्य समक्षं शत्रुसेनां निपातयितुं स्वोत्साहस्य प्रदर्शनम्

ततो नीलाम्बुदप्रख्यः प्रहस्तो नाम राक्षसः।
अब्रवीत् प्राञ्जलिर्वाक्यं शूरः सेनापतिस्तदा॥ **6.8.1**॥ 264

देवदानवगन्धर्वाः पिशाचपतगोरगाः।
सर्वे धर्षयितुं शक्याः किं पुनर्मानवौ रणे॥ **6.8.2**॥ 265

सर्वे प्रमत्ता विश्वस्ता वञ्चिताः स्म हनूमता।
नहि मे जीवतो गच्छेज्जीवन् स वनगोचरः॥ **6.8.3**॥ 266

सर्वां सागरपर्यन्तां सशैलवनकाननाम्।
करोम्यवानरां भूमिमाज्ञापयतु मां भवान्॥ **6.8.4**॥ 267

रक्षां चैव विधास्यामि वानराद् रजनीचर।
नागमिष्यति ते दुःखं किञ्चिदात्मापराधजम्॥ **6.8.5**॥ 268

अब्रवीत् तु सुसङ्क्रुद्धो दुर्मुखो नाम राक्षसः।
इदं न क्षमणीयं हि सर्वेषां नः प्रधर्षणम्॥ **6.8.6**॥ 269

अयं परिभवो भूयः पुरस्यान्तःपुरस्य च।
श्रीमतो राक्षसेन्द्रस्य वानरेण प्रधर्षणम्॥ **6.8.7**॥ 270

अस्मिन् मुहूर्ते गत्वैको निवर्तिष्यामि वानरान्।
प्रविष्टान् सागरं भीममम्बरं वा रसातलम्॥ **6.8.8**॥ 271

ततोऽब्रवीत् सुसङ्क्रुद्धो वज्रदंष्ट्रो महाबलः।
प्रगृह्य परिघं घोरं मांसशोणितरूषितम्॥ **6.8.9**॥ 272

किं नो हनूमता कार्यं कृपणेन तपस्विना।
रामे तिष्ठति दुर्धर्षे सुग्रीवेऽपि सलक्ष्मणे॥ **6.8.10**॥ 273

अद्य रामं ससुग्रीवं परिघेण सलक्ष्मणम्।
आगमिष्यामि हत्वैको विक्षोभ्य हरिवाहिनीम्॥ **6.8.11**॥ 274

इदं ममापरं वाक्यं शृणु राजन् यदिच्छसि।
उपायकुशलो ह्येव जयेच्छत्रूनतन्द्रितः॥ **6.8.12**॥ 275

कामरूपधराः शूराः सुभीमा भीमदर्शनाः।
राक्षसा वा सहस्राणि राक्षसाधिप निश्चिताः॥ **6.8.13**॥ 276

काकुत्स्थमुपसङ्गम्य बिभ्रतो मानुषं वपुः।
सर्वे ह्यसम्भ्रमा भूत्वा ब्रुवन्तु रघुसत्तमम्॥ **6.8.14**॥ 277

प्रेषिता भरतेनैव भ्रात्रा तव यवीयसा।
स हि सेनां समुत्थाप्य क्षिप्रमेवोपयास्यति॥ **6.8.15**॥ 278

ततो वयमितस्तूर्णं शूलशक्तिगदाधराः।
चापबाणासिहस्ताश्च त्वरितास्तत्र यामहे॥ **6.8.16**॥ 279

आकाशे गणशः स्थित्वा हत्वा तां हरिवाहिनीम्।
अश्मशस्त्रमहावृष्ट्या प्रापयाम यमक्षयम्॥ **6.8.17**॥ 280

एवं चेदुपसर्पेतामनयं रामलक्ष्मणौ।
अवश्यमपनीतेन जहतामेव जीवितम्॥ **6.8.18**॥ 281

कौम्भकर्णिस्ततो वीरो निकुम्भो नाम वीर्यवान्।
अब्रवीत् परमक्रुद्धो रावणं लोकरावणम्॥ **6.8.19**॥ 282

सर्वे भवन्तस्तिष्ठन्तु महाराजेन सङ्गताः।
अहमेको हनिष्यामि राघवं सहलक्ष्मणम्॥ **6.8.20**॥ 283

सुग्रीवं सहनूमन्तं सर्वांश्चैवात्र वानरान्।
ततो वज्रहनुर्नाम राक्षसः पर्वतोपमः॥ **6.8.21**॥ 284

क्रुद्धः परिलिहन् सृक्कां जिह्वया वाक्यमब्रवीत्।
स्वैरं कुर्वन्तु कार्याणि भवन्तो विगतज्वराः॥ **6.8.22**॥ 285

एकोऽहं भक्षयिष्यामि तां सर्वां हरिवाहिनीम्।
स्वस्थाः क्रीडन्तु निश्चिन्ताः पिबन्तु मधु वारुणीम्॥ **6.8.23**॥ 286

अहमेको वधिष्यामि सुग्रीवं सहलक्ष्मणम्।
साङ्गदं च हनूमन्तं सर्वांश्चैवात्र वानरान्॥ **6.8.24**॥ 287

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ नवमः सर्गः ॥

श्रीरामस्याजेयतां प्रतिपाद्य दीयतामस्य मैथिलीति विभीषणस्य रावणं प्रत्यनुनयः

ततो निकुम्भो रभसः सूर्यशत्रुर्महाबलः।
सुप्तघ्नो यज्ञकोपश्च महापार्श्वमहोदरौ ॥ **6.9.1** ॥ 288

अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः।
इन्द्रजिच्च महातेजा बलवान् रावणात्मजः ॥ **6.9.2** ॥ 289

प्रहस्तोऽथ विरूपाक्षो वज्रदंष्ट्रो महाबलः।
धूम्राक्षश्चातिकायश्च दुर्मुखश्चैव राक्षसः ॥ **6.9.3** ॥ 290

परिघान् पट्टिशाञ्शूलान् प्रासाञ्शक्तिपरश्वधान्।
चापानि च सुबाणानि खड्गांश्च विपुलाम्बुभान् ॥ **6.9.4** ॥ 291

प्रगृह्य परमक्रुद्धाः समुत्पत्य च राक्षसाः।
अब्रुवन् रावणं सर्वे प्रदीप्ता इव तेजसा ॥ **6.9.5** ॥ 292

अद्य रामं वधिष्यामः सुग्रीवं च सलक्ष्मणम्।
कृपणं च हनूमन्तं लङ्का येन प्रधर्षिता ॥ **6.9.6** ॥ 293

तान् गृहीतायुधान् सर्वान् वारयित्वा विभीषणः।
अब्रवीत् प्राञ्जलिर्वाक्यं पुनः प्रत्युपवेश्य तान् ॥ **6.9.7** ॥ 294

अप्युपायैस्त्रिभिस्तात योऽर्थः प्राप्तुं न शक्यते।
तस्य विक्रमकालांस्तान् युक्तानाहुर्मनीषिणः॥ **6.9.8**॥ 295

प्रमत्तेष्वभियुक्तेषु दैवेन प्रहतेषु च।
विक्रमास्तात सिद्ध्यन्ति परीक्ष्य विधिना कृताः॥ **6.9.9**॥ 296

अप्रमत्तं कथं तं तु विजिगीषुं बले स्थितम्।
जितरोषं दुराधर्षं तं धर्षयितुमिच्छथ॥ **6.9.10**॥ 297

समुद्रं लङ्घयित्वा तु घोरं नदनदीपतिम्।
गतिं हनूमतो लोके को विद्यात् तर्कयेत वा॥ **6.9.11**॥ 298

बलान्यपरिमेयानि वीर्याणि च निशाचराः।
परेषां सहसावज्ञा न कर्तव्या कथञ्चन॥ **6.9.12**॥ 299

किं च राक्षसराजस्य रामेणापकृतं पुरा।
आजहार जनस्थानाद् यस्य भार्यां यशस्विनः॥ **6.9.13**॥ 300

खरो यद्यतिवृत्तस्तु स रामेण हतो रणे।
अवश्यं प्राणिनां प्राणा रक्षितव्या यथाबलम्॥ **6.9.14**॥ 301

एतन्निमित्तं वैदेही भयं नः सुमहद् भवेत्।
आहृता सा परित्याज्या कलहार्थे कृते नु किम्॥ **6.9.15**॥ 302

न तु क्षमं वीर्यवता तेन धर्मानुवर्तिना।
वैरं निरर्थकं कर्तुं दीयतामस्य मैथिली॥ **6.9.16**॥ 303

यावन्न सगजां साश्वां बहुरत्नसमाकुलाम्।
पुरीं दारयते बाणैर्दीयतामस्य मैथिली॥ **6.9.17**॥ 304

यावत् सुघोरा महती दुर्धर्षा हरिवाहिनी।
नावस्कन्दति नो लङ्कां तावत् सीता प्रदीयताम्॥ **6.9.18**॥ 305

विनश्येद्धि पुरी लङ्का शूराः सर्वे च राक्षसाः।
रामस्य दयिता पत्नी न स्वयं यदि दीयते॥ **6.9.19**॥ 306

प्रसादये त्वां बन्धुत्वात् कुरुष्व वचनं मम।
हितं तथ्यं त्वहं ब्रूमि दीयतामस्य मैथिली॥ **6.9.20**॥ 307

पुरा शरत्सूर्यमरीचिसन्निभान्
नवाग्रपुङ्खान् सुदृढान् नृपात्मजः।
सृजत्यमोघान् विशिखान् वधाय ते
प्रदीयतां दाशरथाय मैथिली॥ **6.9.21**॥ 308

त्यजाशु कोपं सुखधर्मनाशनं
भजस्व धर्मं रतिकीर्तिवर्धनम्।
प्रसीद जीवेम सपुत्रबान्धवाः
प्रदीयतां दाशरथाय मैथिली॥ **6.9.22**॥ 309

विभीषणवचः श्रुत्वा रावणो राक्षसेश्वरः।
विसर्जयित्वा तान् सर्वान् प्रविवेश स्वकं गृहम्॥ **6.9.23**॥ 310

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे नवमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ दशमः सर्गः ॥

रावणभवनं गत्वापशकुनभयं प्रदर्श्य सीतानिवर्तनाय रावणं प्रति विभीषणस्य प्रार्थना, तामनङ्गीकृत्य रावणेन तस्य ततो विसर्जनम्

ततः प्रत्युषसि प्राप्ते प्राप्तधर्मार्थनिश्चयः।
राक्षसाधिपतेर्वेश्म भीमकर्मा विभीषणः॥ **6.10.1** ॥ 311

शैलाग्रचयसङ्काशं शैलशृङ्गमिवोन्नतम्।
सुविभक्तमहाकक्षं महाजनपरिग्रहम्॥ **6.10.2** ॥ 312

मतिमद्भिर्महामात्रैरनुरक्तैरधिष्ठितम्।
राक्षसैराप्तपर्याप्तैः सर्वतः परिरक्षितम्॥ **6.10.3** ॥ 313

मत्तमातङ्गनिःश्वासैर्व्याकुलीकृतमारुतम्।
शङ्खघोषमहाघोषं तूर्यसम्बाधनादितम्॥ **6.10.4** ॥ 314

प्रमदाजनसम्बाधं प्रजल्पितमहापथम्।
तप्तकाञ्चननिर्यूहं भूषणोत्तमभूषितम्॥ **6.10.5** ॥ 315

गन्धर्वाणामिवावासमालयं मरुतामिव।
रत्नसञ्चयसम्बाधं भवनं भोगिनामिव॥ **6.10.6** ॥ 316

तं महाभ्रमिवादित्यस्तेजोविस्तृतरश्मिवान्।
अग्रजस्यालयं वीरः प्रविवेश महाद्युतिः॥ **6.10.7** ॥ 317

पुण्यान् पुण्याहघोषांश्च वेदविद्भिरुदाहृतान्।
शुश्राव सुमहातेजा भ्रातुर्विजयसंश्रितान्॥ **6.10.8**॥ 318

पूजितान् दधिपात्रैश्च सर्पिभिः सुमनोक्षतैः।
मन्त्रवेदविदो विप्रान् ददर्श स महाबलः॥ **6.10.9**॥ 319

स पूज्यमानो रक्षोभिर्दीप्यमानं स्वतेजसा।
आसनस्थं महाबाहुर्ववन्दे धनदानुजम्॥ **6.10.10**॥ 320

स राजदृष्टिसम्पन्नमासनं हेमभूषितम्।
जगाम समुदाचारं प्रयुज्याचारकोविदः॥ **6.10.11**॥ 321

स रावणं महात्मानं विजने मन्त्रिसन्निधौ।
उवाच हितमत्यर्थं वचनं हेतुनिश्चितम्॥ **6.10.12**॥ 322

प्रसाद्य भ्रातरं ज्येष्ठं सान्त्वेनोपस्थितक्रमः।
देशकालार्थसंवादि दृष्टलोकपरावरः॥ **6.10.13**॥ 323

यदाप्रभृति वैदेही सम्प्राप्तेह परन्तप।
तदाप्रभृति दृश्यन्ते निमित्तान्यशुभानि नः॥ **6.10.14**॥ 324

सस्फुलिङ्गः सधूमार्चिः सधूमकलुषोदयः।
मन्त्रसन्धुक्षितोऽप्यग्निर्न सम्यगभिवर्धते॥ **6.10.15**॥ 325

अग्निष्टेष्वग्निशालासु तथा ब्रह्मस्थलीषु च।
सरीसृपाणि दृश्यन्ते हव्येषु च पिपीलिकाः॥ **6.10.16**॥ 326

गवां पयांसि स्कन्नानि विमदा वरकुञ्जराः।
दीनमश्वाः प्रहेषन्ते नवग्रासाभिनन्दिनः॥ **6.10.17**॥ 327

खरोष्ट्राश्वतरा राजन् भिन्नरोमाः स्रवन्ति च।
न स्वभावेऽवतिष्ठन्ते विधानैरपि चिन्तिताः॥ **6.10.18**॥ 328

वायसाः सङ्घशः क्रूरा व्याहरन्ति समन्ततः।
समवेताश्च दृश्यन्ते विमानाग्रेषु सङ्घशः॥ **6.10.19**॥ 329

गृध्राश्च परिलीयन्ते पुरीमुपरि पिण्डिताः।
उपपन्नाश्च सन्ध्ये द्वे व्याहरन्त्यशिवं शिवाः॥ **6.10.20**॥ 330

क्रव्यादानां मृगाणां च पुरीद्वारेषु सङ्घशः।
श्रूयन्ते विपुला घोषाः सविस्फूर्जितनिःस्वनाः॥ **6.10.21**॥ 331

तदेवं प्रस्तुते कार्ये प्रायश्चित्तमिदं क्षमम्।
रोचये वीर वैदेही राघवाय प्रदीयताम्॥ **6.10.22**॥ 332

इदं च यदि वा मोहाल्लोभाद् वा व्याहृतं मया।
तत्रापि च महाराज न दोषं कर्तुमर्हसि॥ **6.10.23**॥ 333

अयं हि दोषः सर्वस्य जनस्यास्योपलक्ष्यते।
रक्षसां राक्षसीनां च पुरस्यान्तःपुरस्य च॥ **6.10.24**॥ 334

प्रापणे चास्य मन्त्रस्य निवृत्ताः सर्वमन्त्रिणः।
अवश्यं च मया वाच्यं यद् दृष्टमथवा श्रुतम्।
सम्प्रधार्य यथान्यायं तद् भवान् कर्तुमर्हति॥ **6.10.25**॥ 335

इति स्वमन्त्रिणां मध्ये भ्राता भ्रातरमूचिवान्।
रावणं रक्षसां श्रेष्ठं पथ्यमेतद् विभीषणः॥ **6.10.26**॥ 336

हितं महार्थं मृदु हेतुसंहितं
व्यतीतकालायतिसम्प्रतिक्षमम्।
निशम्य तद्वाक्यमुपस्थितज्वरः
प्रसङ्गवानुत्तरमेतदब्रवीत्॥ **6.10.27**॥ 337

भयं न पश्यामि कुतश्चिदप्यहं
न राघवः प्राप्स्यति जातु मैथिलीम्।
सुरैः सहेन्द्रैरपि सङ्गरे कथं
ममाग्रतः स्थास्यति लक्ष्मणाग्रजः॥ **6.10.28**॥ 338

इत्येवमुक्त्वा सुरसैन्यनाशनो
महाबलः संयति चण्डविक्रमः।
दशाननो भ्रातरमाप्तवादिनं
विसर्जयामास तदा विभीषणम्॥ **6.10.29**॥ 339

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे दशमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकादशः सर्गः ॥

रावणस्य तत्सभासदां च संसदि समवायः

स बभूव कृशो राजा मैथिलीकाममोहितः।
असन्मानाच्च सुहृदां पापः पापेन कर्मणा ॥ **6.11.1** ॥ 340

अतीव कामसम्पन्नो वैदेहीमनुचिन्तयन्।
अतीतसमये काले तस्मिन् वै युधि रावणः।
अमात्यैश्च सुहृद्भिश्च प्राप्तकालममन्यत ॥ **6.11.2** ॥ 341

स हेमजालविततं मणिविद्रुमभूषितम्।
उपगम्य विनीताश्वमारुरोह महारथम् ॥ **6.11.3** ॥ 342

तमास्थाय रथश्रेष्ठं महामेघसमस्वनम्।
प्रययौ रक्षसां श्रेष्ठो दशग्रीवः सभां प्रति ॥ **6.11.4** ॥ 343

असिचर्मधरा योधाः सर्वायुधधरास्ततः।
राक्षसा राक्षसेन्द्रस्य पुरस्तात् सम्प्रतस्थिरे ॥ **6.11.5** ॥ 344

नानाविकृतवेषाश्च नानाभूषणभूषिताः।
पार्श्वतः पृष्ठतश्चैनं परिवार्य ययुस्तदा ॥ **6.11.6** ॥ 345

रथैश्चातिरथाः शीघ्रं मत्तैश्च वरवारणैः।
अनूत्पेतुर्दशग्रीवमाक्रीडद्भिश्च वाजिभिः ॥ **6.11.7** ॥ 346

गदापरिघहस्ताश्च शक्तितोमरपाणयः।
परश्वधधराश्चान्ये तथान्ये शूलपाणयः।
ततस्तूर्यसहस्राणां सञ्जज्ञे निःस्वनो महान्॥ **6.11.8**॥ 347

तुमुलः शङ्खशब्दश्च सभां गच्छति रावणे।
स नेमिघोषेण महान् सहसाभिनिनादयन्॥ **6.11.9**॥ 348

राजमार्गं श्रिया जुष्टं प्रतिपेदे महारथः।
विमलं चातपत्रं च प्रगृहीतमशोभत॥ **6.11.10**॥ 349

पाण्डुरं राक्षसेन्द्रस्य पूर्णस्ताराधिपो यथा।
हेममञ्जरिगर्भे च शुद्धस्फटिकविग्रहे॥ **6.11.11**॥ 350

चामरव्यजने तस्य रेजतुः सव्यदक्षिणे।
ते कृताञ्जलयः सर्वे रथस्थं पृथिवीस्थिताः॥ **6.11.12**॥ 351

राक्षसा राक्षसश्रेष्ठं शिरोभिस्तं ववन्दिरे।
राक्षसैः स्तूयमानः सञ्जयाशीर्भिररिन्दमः॥ **6.11.13**॥ 352

आससाद महातेजाः सभां विरचितां तदा।
सुवर्णरजतास्तीर्णां विशुद्धस्फटिकान्तराम्॥ **6.11.14**॥ 353

विराजमानो वपुषा रुक्मपट्टोत्तरच्छदाम्।
तां पिशाचशतैः षड्भिरभिगुप्तां सदाप्रभाम्॥ **6.11.15**॥ 354

प्रविवेश महातेजाः सुकृतां विश्वकर्मणा।
तस्यां तु वैदूर्यमयं प्रियकाजिनसंवृतम्॥ **6.11.16**॥ 355

महत्सोपाश्रयं भेजे रावणः परमासनम्।
ततः शशासेश्वरवद्भूतान् लघुपराक्रमान्॥ **6.11.17**॥ 356

समानयत मे क्षिप्रमिहैतान् राक्षसानिति।
कृत्यमस्ति महज्जाने कर्तव्यमिति शत्रुभिः॥ **6.11.18**॥ 357

राक्षसास्तद्वचः श्रुत्वा लङ्कायां परिचक्रमुः।
अनुगेहमवस्थाय विहारशयनेषु च।
उद्यानेषु च रक्षांसि चोदयन्तो ह्यभीतवत्॥ **6.11.19**॥ 358

ते रथान्तचरा एके दृप्तानेके दृढान् हयान्।
नागानेकेऽधिरुरुहुर्जग्मुश्चैके पदातयः॥ **6.11.20**॥ 359

सा पुरी परमाकीर्णा रथकुञ्जरवाजिभिः।
सम्पतद्भिर्विरुरुचे गरुत्मद्भिरिवाम्बरम्॥ **6.11.21**॥ 360

ते वाहनान्यवस्थाय यानानि विविधानि च।
सभां पद्भिः प्रविविशुः सिंहा गिरिगुहामिव॥ **6.11.22**॥ 361

राज्ञः पादौ गृहीत्वा तु राज्ञा ते प्रतिपूजिताः।
पीठेष्वन्ये बृसीष्वन्ये भूमौ केचिदुपाविशन्॥ **6.11.23**॥ 362

ते समेत्य सभायां वै राक्षसा राजशासनात्।
यथार्हमुपतस्थुस्ते रावणं राक्षसाधिपम्॥ **6.11.24**॥ 363

मन्त्रिणश्च यथामुख्या निश्चितार्थेषु पण्डिताः।
अमात्याश्च गुणोपेताः सर्वज्ञा बुद्धिदर्शनाः॥ **6.11.25**॥ 364

समीयुस्तत्र शतशः शूराश्च बहवस्तथा।
सभायां हेमवर्णायां सर्वार्थस्य सुखाय वै॥ **6.11.26**॥ 365

ततो महात्मा विपुलं सुयुग्यं
रथं वरं हेमविचित्रिताङ्गम्।

शुभं समास्थाय ययौ यशस्वी
विभीषणः संसदमग्रजस्य ॥ **6.11.27** ॥ 366

स पूर्वजायावरजः शशंस
नामाथ पश्चाच्चरणौ ववन्दे।
शुकः प्रहस्तश्च तथैव तेभ्यो
ददौ यथार्हं पृथगासनानि ॥ **6.11.28** ॥ 367

सुवर्णनानामणिभूषणानां
सुवाससां संसदि राक्षसानाम्।
तेषां परार्घ्यागुरुचन्दनानां
स्रजां च गन्धाः प्रववुः समन्तात् ॥ **6.11.29** ॥ 368

न चुक्रुशुर्नानृतमाह कश्चित्
सभासदो नापि जजल्पुरुच्चैः।
संसिद्धार्थाः सर्व एवोग्रवीर्या
भर्तुः सर्वे ददृशुश्चाननं ते ॥ **6.11.30** ॥ 369

स रावणः शस्त्रभृतां मनस्विनां
महाबलानां समितौ मनस्वी।
तस्यां सभायां प्रभया चकाशे
मध्ये वसूनामिव वज्रहस्तः ॥ **6.11.31** ॥ 370

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकादशः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वादशः सर्गः ॥

पुर्याः परिरक्षणाय सैनिकानां नियुक्तिः सीतायां स्वीयामासक्तिं प्रतिपाद्य रावणेन तस्या हरणप्रसङ्गस्य वर्णनं भाविकर्तव्यनिर्णयाय सभासत्सम्मतेः प्रार्थनं कुम्भकर्णेन रावणं निर्भर्त्स्य समस्तशत्रुवधभारस्य स्वयमेवोत्थापनम्

स तां परिषदं कृत्स्नां समीक्ष्य समितिञ्जयः।
प्रचोदयामास तदा प्रहस्तं वाहिनीपतिम्॥ **6.12.1** ॥ 371

सेनापते यथा ते स्युः कृतविद्याश्चतुर्विधाः।
योधा नगररक्षायां तथा व्यादेष्टुमर्हसि॥ **6.12.2** ॥ 372

स प्रहस्तः प्रणीतात्मा चिकीर्षन् राजशासनम्।
विनिक्षिपद् बलं सर्वं बहिरन्तश्च मन्दिरे॥ **6.12.3** ॥ 373

ततो विनिक्षिप्य बलं सर्वं नगरगुप्तये।
प्रहस्तः प्रमुखे राज्ञो निषसाद जगाद च॥ **6.12.4** ॥ 374

विहितं बहिरन्तश्च बलं बलवतस्तव।
कुरुष्वाविमनाः क्षिप्रं यदभिप्रेतमस्ति ते॥ **6.12.5** ॥ 375

प्रहस्तस्य वचः श्रुत्वा राजा राज्यहितैषिणः।
सुखेप्सुः सुहृदां मध्ये व्याजहार स रावणः॥ **6.12.6** ॥ 376

प्रियाप्रिये सुखे दुःखे लाभालाभे हिताहिते।
धर्मकामार्थकृच्छ्रेषु यूयमर्हथ वेदितुम्॥ **6.12.7**॥ 377

सर्वकृत्यानि युष्माभिः समारब्धानि सर्वदा।
मन्त्रकर्मनियुक्तानि न जातु विफलानि मे॥ **6.12.8**॥ 378

ससोमग्रहनक्षत्रैर्मरुद्भिरिव वासवः।
भवद्भिरहमत्यर्थं वृतः श्रियमवाप्नुयाम्॥ **6.12.9**॥ 379

अहं तु खलु सर्वान् वः समर्थयितुमुद्यतः।
कुम्भकर्णस्य तु स्वप्नान्नेममर्थमचोदयम्॥ **6.12.10**॥ 380

अयं हि सुप्तः षण्मासान् कुम्भकर्णो महाबलः।
सर्वशस्त्रभृतां मुख्यः स इदानीं समुत्थितः॥ **6.12.11**॥ 381

इयं च दण्डकारण्याद् रामस्य महिषी प्रिया।
रक्षोभिश्चरितोद्देशादानीता जनकात्मजा॥ **6.12.12**॥ 382

सा मे न शय्यामारोढुमिच्छत्यलसगामिनी।
त्रिषु लोकेषु चान्या मे न सीतासदृशी तथा॥ **6.12.13**॥ 383

तनुमध्या पृथुश्रोणी शरदिन्दुनिभानना।
हेमबिम्बनिभा सौम्या मायेव मयनिर्मिता॥ **6.12.14**॥ 384

सुलोहिततलौ श्लक्ष्णौ चरणौ सुप्रतिष्ठितौ।
दृष्ट्वा ताम्रनखौ तस्या दीप्यते मे शरीरजः॥ **6.12.15**॥ 385

हुताग्नेरर्चिसङ्काशामेनां सौरीमिव प्रभाम्।
उन्नसं विमलं वल्गु वदनं चारुलोचनम्॥ **6.12.16**॥ 386

पश्यंस्तदवशस्तस्याः कामस्य वशमेयिवान्।
क्रोधहर्षसमानेन दुर्वर्णकरणेन च॥ **6.12.17**॥ 387

शोकसन्तापनित्येन कामेन कलुषीकृतः।
सा तु संवत्सरं कालं मामयाचत भामिनी॥ **6.12.18**॥ 388

प्रतीक्षमाणा भर्तारं राममायतलोचना।
तन्मया चारुनेत्रायाः प्रतिज्ञातं वचः शुभम्॥ **6.12.19**॥ 389

श्रान्तोऽहं सततं कामाद् यातो हय इवाध्वनि।
कथं सागरमक्षोभ्यं तरिष्यन्ति वनौकसः॥ **6.12.20**॥ 390

बहुसत्त्वझषाकीर्णं तौ वा दशरथात्मजौ।
अथवा कपिनैकेन कृतं नः कदनं महत्॥ **6.12.21**॥ 391

दुर्ज्ञेयाः कार्यगतयो ब्रूत यस्य यथामति।
मानुषान्नो भयं नास्ति तथापि तु विमृश्यताम्॥ **6.12.22**॥ 392

तदा देवासुरे युद्धे युष्माभिः सहितोऽजयम्।
ते मे भवन्तश्च तथा सुग्रीवप्रमुखान् हरीन्॥ **6.12.23**॥ 393

परे पारे समुद्रस्य पुरस्कृत्य नृपात्मजौ।
सीतायाः पदवीं प्राप्य सम्प्राप्तौ वरुणालयम्॥ **6.12.24**॥ 394

अदेया च यथा सीता वध्यौ दशरथात्मजौ।
भवद्भिर्मन्त्र्यतां मन्त्रः सुनीतं चाभिधीयताम्॥ **6.12.25**॥ 395

नहि शक्तिं प्रपश्यामि जगत्यन्यस्य कस्यचित्।
सागरं वानरैस्तीर्त्वा निश्चयेन जयो मम॥ **6.12.26**॥ 396

तस्य कामपरीतस्य निशम्य परिदेवितम्।
कुम्भकर्णः प्रचुक्रोध वचनं चेदमब्रवीत्॥ **6.12.27**॥ 397

यदा तु रामस्य सलक्ष्मणस्य
प्रसह्य सीता खलु सा इहाहृता।
सकृत् समीक्ष्यैव सुनिश्चितं तदा
भजेत चित्तं यमुनेव यामुनम्॥ **6.12.28**॥ 398

सर्वमेतन्महाराज कृतमप्रतिमं तव।
विधीयेत सहास्माभिरादावेवास्य कर्मणः॥ **6.12.29**॥ 399

न्यायेन राजकार्याणि यः करोति दशानन।
न स सन्तप्यते पश्चान्निश्चितार्थमतिर्नृपः॥ **6.12.30**॥ 400

अनुपायेन कर्माणि विपरीतानि यानि च।
क्रियमाणानि दुष्यन्ति हवींष्यप्रयतेष्विव॥ **6.12.31**॥ 401

यः पश्चात् पूर्वकार्याणि कर्माण्यभिचिकीर्षति।
पूर्वं चापरकार्याणि स न वेद नयानयौ॥ **6.12.32**॥ 402

चपलस्य तु कृत्येषु प्रसमीक्ष्याधिकं बलम्।
छिद्रमन्ये प्रपद्यन्ते क्रौञ्चस्य खमिव द्विजाः॥ **6.12.33**॥ 403

त्वयेदं महदारब्धं कार्यमप्रतिचिन्तितम्।
दिष्ट्या त्वां नावधीद् रामो विषमिश्रमिवामिषम्॥ **6.12.34**॥ 404

तस्मात् त्वया समारब्धं कर्म ह्यप्रतिमं परैः।
अहं समीकरिष्यामि हत्वा शत्रूंस्तवानघ॥ **6.12.35**॥ 405

अहमुत्सादयिष्यामि शत्रूंस्तव निशाचर।
यदि शक्रविवस्वन्तौ यदि पावकमारुतौ।
तावहं योधयिष्यामि कुबेरवरुणावपि॥ **6.12.36**॥ 406

गिरिमात्रशरीरस्य महापरिघयोधिनः।
नर्दतस्तीक्ष्णदंष्ट्रस्य बिभीयाद् वै पुरन्दरः॥ **6.12.37**॥ 407

पुनर्मां स द्वितीयेन शरेण निहनिष्यति।
ततोऽहं तस्य पास्यामि रुधिरं काममाश्वस॥ **6.12.38**॥ 408

वधेन वै दाशरथेः सुखावहं
जयं तवाहर्तुमहं यतिष्ये।
हत्वा च रामं सह लक्ष्मणेन
खादामि सर्वान् हरियूथमुख्यान्॥ **6.12.39**॥ 409

रमस्व कामं पिब चाग्र्यवारुणीं
कुरुष्व कार्याणि हितानि विज्वरः।
मया तु रामे गमिते यमक्षयं
चिराय सीता वशगा भविष्यति॥ **6.12.40**॥ 410

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वादशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रयोदशः सर्गः ॥

महापार्श्वेन सीतां प्रति बलात्कारं कर्तुं रावणस्य प्रोत्साहनं रावणेन शापवशात् तथाकरणे स्वकीयासमर्थतायाः प्रतिपादनं निजपराक्रमस्य प्रशंसनं च

रावणं क्रुद्धमाज्ञाय महापार्श्वो महाबलः।
मुहूर्तमनुसञ्चिन्त्य प्राञ्जलिर्वाक्यमब्रवीत्॥ **6.13.1** ॥ 411

यः खल्वपि वनं प्राप्य मृगव्यालनिषेवितम्।
न पिबेन्मधु सम्प्राप्य स नरो बालिशो भवेत्॥ **6.13.2** ॥ 412

ईश्वरस्येश्वरः कोऽस्ति तव शत्रुनिबर्हण।
रमस्व सह वैदेह्या शत्रूनाक्रम्य मूर्धसु॥ **6.13.3** ॥ 413

बलात् कुक्कुटवृत्तेन प्रवर्तस्व महाबल।
आक्रम्याक्रम्य सीतां वै तां भुङ्क्ष्व च रमस्व च॥ **6.13.4** ॥ 414

लब्धकामस्य ते पश्चादागमिष्यति किं भयम्।
प्राप्तमप्राप्तकालं वा सर्वं प्रतिविधास्यसे॥ **6.13.5** ॥ 415

कुम्भकर्णः सहास्माभिरिन्द्रजिच्च महाबलः।
प्रतिषेधयितुं शक्तौ सवज्रमपि वज्रिणम्॥ **6.13.6** ॥ 416

उपप्रदानं सान्त्वं वा भेदं वा कुशलैः कृतम्।
समतिक्रम्य दण्डेन सिद्धिमर्थेषु रोचये॥ **6.13.7** ॥ 417

इह प्राप्तान् वयं सर्वाञ्छत्रूंस्तव महाबल।
वशे शस्त्रप्रतापेन करिष्यामो न संशयः॥ **6.13.8**॥ 418

एवमुक्तस्तदा राजा महापार्श्वेन रावणः।
तस्य सम्पूजयन् वाक्यमिदं वचनमब्रवीत्॥ **6.13.9**॥ 419

महापार्श्व निबोध त्वं रहस्यं किञ्चिदात्मनः।
चिरवृत्तं तदाख्यास्ये यदवाप्तं पुरा मया॥ **6.13.10**॥ 420

पितामहस्य भवनं गच्छन्तीं पुञ्जिकस्थलाम्।
चञ्चूर्यमाणामद्राक्षमाकाशेऽग्निशिखामिव॥ **6.13.11**॥ 421

सा प्रसह्य मया भुक्ता कृता विवसना ततः।
स्वयम्भूभवनं प्राप्ता लोलिता नलिनी यथा॥ **6.13.12**॥ 422

तच्च तस्य तथा मन्ये ज्ञातमासीन्महात्मनः।
अथ सङ्कुपितो वेधा मामिदं वाक्यमब्रवीत्॥ **6.13.13**॥ 423

अद्यप्रभृति यामन्यां बलान्नारीं गमिष्यसि।
तदा ते शतधा मूर्धा फलिष्यति न संशयः॥ **6.13.14**॥ 424

इत्यहं तस्य शापस्य भीतः प्रसभमेव ताम्।
नारोहये बलात् सीतां वैदेहीं शयने शुभे॥ **6.13.15**॥ 425

सागरस्येव मे वेगो मारुतस्येव मे गतिः।
नैतद् दाशरथिर्वेद ह्यासादयति तेन माम्॥ **6.13.16**॥ 426

को हि सिंहमिवासीनं सुप्तं गिरिगुहाशये।
क्रुद्धं मृत्युमिवासीनं प्रबोधयितुमिच्छति॥ **6.13.17**॥ 427

न मत्तो निर्गतान् बाणान् द्विजिह्वान् पन्नगानिव।
रामः पश्यति सङ्ग्रामे तेन मामभिगच्छति॥ **6.13.18**॥ 428

क्षिप्रं वज्रसमैर्बाणैः शतधा कार्मुकच्युतैः।
राममादीपयिष्यामि उल्काभिरिव कुञ्जरम्॥ **6.13.19**॥ 429

तच्चास्य बलमादास्ये बलेन महता वृतः।
उदितः सविता काले नक्षत्राणां प्रभामिव॥ **6.13.20**॥ 430

न वासवेनापि सहस्रचक्षुषा
युधास्मि शक्यो वरुणेन वा पुनः।
मया त्वियं बाहुबलेन निर्जिता
पुरा पुरी वैश्रवणेन पालिता॥ **6.13.21**॥ 431

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रयोदशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्दशः सर्गः ॥

श्रीरामस्याजेयतां प्रतिपाद्य विभीषणेन रावणं प्रति सीताया रामपार्श्वे प्रेषणायैव सम्मतिदानम्

निशाचरेन्द्रस्य निशम्य वाक्यं
स कुम्भकर्णस्य च गर्जितानि।
विभीषणो राक्षसराजमुख्य -
मुवाच वाक्यं हितमर्थयुक्तम्॥ **6.14.1**॥ 432

वृतो हि बाह्वन्तरभोगराशि -
श्चिन्ताविषः सुस्मिततीक्ष्णदंष्ट्रः।
पञ्चाङ्गुलीपञ्चशिरोऽतिकायः
सीतामहाहिस्तव केन राजन्॥ **6.14.2**॥ 433

यावन्न लङ्कां समभिद्रवन्ति
बलीमुखाः पर्वतकूटमात्राः।
दंष्ट्रायुधाश्चैव नखायुधाश्च
प्रदीयतां दाशरथाय मैथिली॥ **6.14.3**॥ 434

यावन्न गृह्णन्ति शिरांसि बाणा
रामेरिता राक्षसपुङ्गवानाम्।
वज्रोपमा वायुसमानवेगाः
प्रदीयतां दाशरथाय मैथिली॥ **6.14.4**॥ 435

न कुम्भकर्णेन्द्रजितौ च राजं -
स्तथा महापार्श्वमहोदरौ वा।
निकुम्भकुम्भौ च तथातिकायः
स्थातुं समर्था युधि राघवस्य॥ **6.14.5**॥ 436

जीवंस्तु रामस्य न मोक्ष्यसे त्वं
गुप्तः सवित्राप्यथवा मरुद्भिः।
न वासवस्याङ्कगतो न मृत्यो -
र्नभो न पातालमनुप्रविष्टः॥ **6.14.6**॥ 437

निशम्य वाक्यं तु विभीषणस्य
ततः प्रहस्तो वचनं बभाषे।
न नो भयं विद्म न दैवतेभ्यो
न दानवेभ्योऽप्यथवा कदाचित्॥ **6.14.7**॥ 438

न यक्षगन्धर्वमहोरगेभ्यो
भयं न सङ्ख्ये पतगोरगेभ्यः।
कथं नु रामाद् भविता भयं नो
नरेन्द्रपुत्रात् समरे कदाचित्॥ **6.14.8**॥ 439

प्रहस्तवाक्यं त्वहितं निशम्य
विभीषणो राजहितानुकाङ्क्षी।
ततो महार्थं वचनं बभाषे
धर्मार्थकामेषु निविष्टबुद्धिः॥ **6.14.9**॥ 440

प्रहस्त राजा च महोदरश्च
त्वं कुम्भकर्णश्च यथार्थजातम्।
ब्रवीत रामं प्रति तन्न शक्यं
यथा गतिः स्वर्गमधर्मबुद्धेः॥ **6.14.10**॥ 441

वधस्तु रामस्य मया त्वया च
प्रहस्त सर्वैरपि राक्षसैर्वा।
कथं भवेदर्थविशारदस्य
महार्णवं तर्तुमिवाप्लवस्य॥ **6.14.11**॥ 442

धर्मप्रधानस्य महारथस्य
इक्ष्वाकुवंशप्रभवस्य राज्ञः।
पुरोऽस्य देवाश्च तथाविधस्य
कृत्येषु शक्तस्य भवन्ति मूढाः॥ **6.14.12**॥ 443

तीक्ष्णा न तावत् तव कङ्कपत्रा
दुरासदा राघवविप्रमुक्ताः।
भित्त्वा शरीरं प्रविशन्ति बाणाः
प्रहस्त तेनैव विकत्थसे त्वम्॥ **6.14.13**॥ 444

भित्त्वा न तावत् प्रविशन्ति कायं
प्राणान्तिकास्तेऽशनितुल्यवेगाः।
शिताः शरा राघवविप्रमुक्ताः
प्रहस्त तेनैव विकत्थसे त्वम्॥ **6.14.14**॥ 445

न रावणो नातिबलस्त्रिशीर्षो
न कुम्भकर्णस्य सुतो निकुम्भः।
न चेन्द्रजिद् दाशरथिं प्रवोढुं
त्वं वा रणे शक्रसमं समर्थः॥ **6.14.15**॥ 446

देवान्तको वापि नरान्तको वा
तथातिकायोऽतिरथो महात्मा।
अकम्पनश्चाद्रिसमानसारः
स्थातुं न शक्ता युधि राघवस्य॥ **6.14.16**॥ 447

अयं च राजा व्यसनाभिभूतो
मित्रैरमित्रप्रतिमैर्भवद्भिः।
अन्वास्यते राक्षसनाशनार्थे
तीक्ष्णः प्रकृत्या ह्यसमीक्षकारी॥ **6.14.17**॥ 448

अनन्तभोगेन सहस्रमूर्ध्ना
नागेन भीमेन महाबलेन।
बलात् परिक्षिप्तमिमं भवन्तो
राजानमुत्क्षिप्य विमोचयन्तु॥ **6.14.18**॥ 449

यावद्धि केशग्रहणात् सुहृद्भिः
समेत्य सर्वैः परिपूर्णकामैः।
निगृह्य राजा परिरक्षितव्यो
भूतैर्यथा भीमबलैर्गृहीतः॥ **6.14.19**॥ 450

सुवारिणा राघवसागरेण
प्रच्छाद्यमानस्तरसा भवद्भिः।
युक्तस्त्वयं तारयितुं समेत्य
काकुत्स्थपातालमुखे पतन् सः॥ **6.14.20**॥ 451

इदं पुरस्यास्य सराक्षसस्य
राज्ञश्च पथ्यं ससुहृज्जनस्य।
सम्यग्घि वाक्यं स्वमतं ब्रवीमि
नरेन्द्रपुत्राय ददातु मैथिलीम्॥ **6.14.21**॥ 452

परस्य वीर्यं स्वबलं च बुद्ध्वा स्थानं क्षयं चैव तथैव वृद्धिम्।
तथा स्वपक्षेऽप्यनुमृश्य बुद्ध्या वदेत् क्षमं स्वामिहितं स मन्त्री॥ **6.14.22**॥ 453

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्दशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चदशः सर्गः ॥

इन्द्रजिता विभीषणस्योपहसनं तं निर्भर्त्स्य विभीषणेन संसदि स्वकीयसमुचितसम्मतेः प्रकाशनम्

बृहस्पतेस्तुल्यमतेर्वचस्त -
न्निशम्य यत्नेन विभीषणस्य।
ततो महात्मा वचनं बभाषे
तत्रेन्द्रजिन्नैर्ऋतयूथमुख्यः॥ **6.15.1** ॥ 454

किं नाम ते तात कनिष्ठ वाक्य -
मनर्थकं वै बहुभीतवच्च।
अस्मिन् कुले योऽपि भवेन्न जातः
सोऽपीदृशं नैव वदेन्न कुर्यात्॥ **6.15.2** ॥ 455

सत्त्वेन वीर्येण पराक्रमेण
धैर्येण शौर्येण च तेजसा च।
एकः कुलेऽस्मिन् पुरुषो विमुक्तो
विभीषणस्तात कनिष्ठ एषः॥ **6.15.3** ॥ 456

किं नाम तौ मानुषराजपुत्रा -
वस्माकमेकेन हि राक्षसेन।
सुप्राकृतेनापि निहन्तुमेतौ
शक्यौ कुतो भीषयसे स्म भीरो॥ **6.15.4** ॥ 457

त्रिलोकनाथो ननु देवराजः
शक्रो मया भूमितले निविष्टः।
भयार्पिताश्चापि दिशः प्रपन्नाः
सर्वे तदा देवगणाः समग्राः॥ **6.15.5**॥ 458

ऐरावतो निःस्वनमुन्नदन् स
निपातितो भूमितले मया तु।
विकृष्य दन्तौ तु मया प्रसह्य
वित्रासिता देवगणाः समग्राः॥ **6.15.6**॥ 459

सोऽहं सुराणामपि दर्पहन्ता
दैत्योत्तमानामपि शोककर्ता।
कथं नरेन्द्रात्मजयोर्न शक्तो
मनुष्ययोः प्राकृतयोः सुवीर्यः॥ **6.15.7**॥ 460

अथेन्द्रकल्पस्य दुरासदस्य
महौजसस्तद् वचनं निशम्य।
ततो महार्थं वचनं बभाषे
विभीषणः शस्त्रभृतां वरिष्ठः॥ **6.15.8**॥ 461

न तात मन्त्रे तव निश्चयोऽस्ति
बालस्त्वमद्याप्यविपक्वबुद्धिः।
तस्मात् त्वयाप्यात्मविनाशनाय
वचोऽर्थहीनं बहु विप्रलप्तम्॥ **6.15.9**॥ 462

पुत्रप्रवादेन तु रावणस्य
त्वमिन्द्रजिन्मित्रमुखोऽसि शत्रुः।
यस्येदृशं राघवतो विनाशं
निशम्य मोहादनुमन्यसे त्वम्॥ **6.15.10**॥ 463

त्वमेव वध्यश्च सुदुर्मतिश्च
स चापि वध्यो य इहानयत् त्वाम्।
बालं दृढं साहसिकं च योऽद्य
प्रावेशयन्मन्त्रकृतां समीपम्॥ **6.15.11**॥ 464

मूढोऽप्रगल्भोऽविनयोपपन्न -
स्तीक्ष्णस्वभावोऽल्पमतिर्दुरात्मा।
मूर्खस्त्वमत्यन्तसुदुर्मतिश्च
त्वमिन्द्रजिद् बालतया ब्रवीषि॥ **6.15.12**॥ 465

को ब्रह्मदण्डप्रतिमप्रकाशा -
नर्चिष्मतः कालनिकाशरूपान्।
सहेत बाणान् यमदण्डकल्पान्
समक्षमुक्तान् युधि राघवेण॥ **6.15.13**॥ 466

धनानि रत्नानि सुभूषणानि
वासांसि दिव्यानि मणींश्च चित्रान्।
सीतां च रामाय निवेद्य देवीं
वसेम राजन्निह वीतशोकाः॥ **6.15.14**॥ 467

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चदशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षोडशः सर्गः ॥

रावणेन विभीषणस्य तिरस्करणं विभीषणेनापि रावणं निर्भर्त्स्य तत्स्थानान्निर्गमनम्

सुनिविष्टं हितं वाक्यमुक्तवन्तं विभीषणम्।
अब्रवीत् परुषं वाक्यं रावणः कालचोदितः॥ **6.16.1** ॥ 468

वसेत् सह सपत्नेन क्रुद्धेनाशीविषेण च।
न तु मित्रप्रवादेन संवसेच्छत्रुसेविना॥ **6.16.2** ॥ 469

जानामि शीलं ज्ञातीनां सर्वलोकेषु राक्षस।
हृष्यन्ति व्यसनेष्वेते ज्ञातीनां ज्ञातयः सदा॥ **6.16.3** ॥ 470

प्रधानं साधकं वैद्यं धर्मशीलं च राक्षस।
ज्ञातयोऽप्यवमन्यन्ते शूरं परिभवन्ति च॥ **6.16.4** ॥ 471

नित्यमन्योन्यसंहृष्टा व्यसनेष्वाततायिनः।
प्रच्छन्नहृदया घोरा ज्ञातयस्तु भयावहाः॥ **6.16.5** ॥ 472

श्रूयन्ते हस्तिभिर्गीताः श्लोकाः पद्मवने पुरा।
पाशहस्तान् नरान् दृष्ट्वा शृणुष्व गदतो मम॥ **6.16.6** ॥ 473

नाग्निर्नान्यानि शस्त्राणि न नः पाशा भयावहाः।
घोराः स्वार्थप्रयुक्तास्तु ज्ञातयो नो भयावहाः॥ **6.16.7** ॥ 474

उपायमेते वक्ष्यन्ति ग्रहणे नात्र संशयः।
कृत्स्नाद् भयाज्ज्ञातिभयं कुकष्टं विहितं च नः॥ **6.16.8**॥ 475

विद्यते गोषु सम्पन्नं विद्यते ज्ञातितो भयम्।
विद्यते स्त्रीषु चापल्यं विद्यते ब्राह्मणे तपः॥ **6.16.9**॥ 476

ततो नेष्टमिदं सौम्य यदहं लोकसत्कृतः।
ऐश्वर्यमभिजातश्च रिपूणां मूर्ध्नि च स्थितः॥ **6.16.10**॥ 477

यथा पुष्करपत्रेषु पतितास्तोयबिन्दवः।
न श्लेषमभिगच्छन्ति तथानार्येषु सौहृदम्॥ **6.16.11**॥ 478

यथा शरदि मेघानां सिञ्चतामपि गर्जताम्।
न भवत्यम्बुसङ्क्लेदस्तथानार्येषु सौहृदम्॥ **6.16.12**॥ 479

यथा मधुकरस्तर्षाद् रसं विन्दन्न तिष्ठति।
तथा त्वमपि तत्रैव तथानार्येषु सौहृदम्॥ **6.16.13**॥ 480

यथा मधुकरस्तर्षात् काशपुष्पं पिबन्नपि।
रसमत्र न विन्देत तथानार्येषु सौहृदम्॥ **6.16.14**॥ 481

यथा पूर्वं गजः स्नात्वा गृह्य हस्तेन वै रजः।
दूषयत्यात्मनो देहं तथानार्येषु सौहृदम्॥ **6.16.15**॥ 482

योऽन्यस्त्वेवंविधं ब्रूयाद् वाक्यमेतन्निशाचर।
अस्मिन् मुहूर्ते न भवेत् त्वां तु धिक् कुलपांसन॥ **6.16.16**॥ 483

इत्युक्तः परुषं वाक्यं न्यायवादी विभीषणः।
उत्पपात गदापाणिश्चतुर्भिः सह राक्षसैः॥ **6.16.17**॥ 484

अब्रवीच्च तदा वाक्यं जातक्रोधो विभीषणः।
अन्तरिक्षगतः श्रीमान् भ्राता वै राक्षसाधिपम्॥ **6.16.18**॥ 485

स त्वं भ्रान्तोऽसि मे राजन् ब्रूहि मां यद् यदिच्छसि।
ज्येष्ठो मान्यः पितृसमो न च धर्मपथे स्थितः।
इदं हि परुषं वाक्यं न क्षमाम्यग्रजस्य ते॥ **6.16.19**॥ 486

सुनीतं हितकामेन वाक्यमुक्तं दशानन।
न गृह्णन्त्यकृतात्मानः कालस्य वशमागताः॥ **6.16.20**॥ 487

सुलभाः पुरुषा राजन् सततं प्रियवादिनः।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः॥ **6.16.21**॥ 488

बद्धं कालस्य पाशेन सर्वभूतापहारिणः।
न नश्यन्तमुपेक्षे त्वां प्रदीप्तं शरणं यथा॥ **6.16.22**॥ 489

दीप्तपावकसङ्काशैः शितैः काञ्चनभूषणैः।
न त्वामिच्छाम्यहं द्रष्टुं रामेण निहतं शरैः॥ **6.16.23**॥ 490

शूराश्च बलवन्तश्च कृतास्त्राश्च नरा रणे।
कालाभिपन्नाः सीदन्ति यथा वालुकसेतवः॥ **6.16.24**॥ 491

तन्मर्षयतु यच्चोक्तं गुरुत्वाद्धितमिच्छता।
आत्मानं सर्वथा रक्ष पुरीं चेमां सराक्षसाम्।
स्वस्ति तेऽस्तु गमिष्यामि सुखी भव मया विना॥ **6.16.25**॥ 492

निवार्यमाणस्य मया हितैषिणा
न रोचते ते वचनं निशाचर।
परान्तकाले हि गतायुषो नरा
हितं न गृह्णन्ति सुहृद्भिरीरितम्॥ **6.16.26**॥ 493

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षोडशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तदशः सर्गः ॥

विभीषणस्य श्रीरामस्याश्रये गमनं श्रीरामेण मन्त्रिभिः सह तदर्थमाश्रयदाने विचारणं च

इत्युक्त्वा परुषं वाक्यं रावणं रावणानुजः।
आजगाम मुहूर्तेन यत्र रामः सलक्ष्मणः॥ **6.17.1** ॥ 494

तं मेरुशिखराकारं दीप्तामिव शतह्रदाम्।
गगनस्थं महीस्थास्ते ददृशुर्वानराधिपाः॥ **6.17.2** ॥ 495

ते चाप्यनुचरास्तस्य चत्वारो भीमविक्रमाः।
तेऽपि वर्मायुधोपेता भूषणोत्तमभूषिताः॥ **6.17.3** ॥ 496

स च मेघाचलप्रख्यो वज्रायुधसमप्रभः।
वरायुधधरो वीरो दिव्याभरणभूषितः॥ **6.17.4** ॥ 497

तमात्मपञ्चमं दृष्ट्वा सुग्रीवो वानराधिपः।
वानरैः सह दुर्धर्षश्चिन्तयामास बुद्धिमान्॥ **6.17.5** ॥ 498

चिन्तयित्वा मुहूर्तं तु वानरांस्तानुवाच ह।
हनुमत्प्रमुखान् सर्वानिदं वचनमुत्तमम्॥ **6.17.6** ॥ 499

एष सर्वायुधोपेतश्चतुर्भिः सह राक्षसैः।
राक्षसोभ्येति पश्यध्वमस्मान् हन्तुं न संशयः॥ **6.17.7** ॥ 500

सुग्रीवस्य वचः श्रुत्वा सर्वे ते वानरोत्तमाः।
सालानुद्यम्य शैलांश्च इदं वचनमब्रुवन्॥ **6.17.8**॥ 501

शीघ्रं व्यादिश नो राजन् वधायैषां दुरात्मनाम्।
निपतन्ति हता यावद् धरण्यामल्पचेतनाः॥ **6.17.9**॥ 502

तेषां सम्भाषमाणानामन्योन्यं स विभीषणः।
उत्तरं तीरमासाद्य खस्थ एव व्यतिष्ठत॥ **6.17.10**॥ 503

स उवाच महाप्राज्ञः स्वरेण महता महान्।
सुग्रीवं तांश्च सम्प्रेक्ष्य खस्थ एव विभीषणः॥ **6.17.11**॥ 504

रावणो नाम दुर्वृत्तो राक्षसो राक्षसेश्वरः।
तस्याहमनुजो भ्राता विभीषण इति श्रुतः॥ **6.17.12**॥ 505

तेन सीता जनस्थानाद्धृता हत्वा जटायुषम्।
रुद्धा च विवशा दीना राक्षसीभिः सुरक्षिता॥ **6.17.13**॥ 506

तमहं हेतुभिर्वाक्यैर्विविधैश्च न्यदर्शयम्।
साधु निर्यात्यतां सीता रामायेति पुनः पुनः॥ **6.17.14**॥ 507

स च न प्रतिजग्राह रावणः कालचोदितः।
उच्यमानं हितं वाक्यं विपरीत इवौषधम्॥ **6.17.15**॥ 508

सोऽहं परुषितस्तेन दासवच्चावमानितः।
त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः॥ **6.17.16**॥ 509

निवेदयत मां क्षिप्रं राघवाय महात्मने।
सर्वलोकशरण्याय विभीषणमुपस्थितम्॥ **6.17.17**॥ 510

एतत्तु वचनं श्रुत्वा सुग्रीवो लघुविक्रमः।
लक्ष्मणस्याग्रतो रामं संरब्धमिदमब्रवीत्॥ **6.17.18**॥ 511

प्रविष्टः शत्रुसैन्यं हि प्राप्तः शत्रुरतर्कितः।
निहन्यादन्तरं लब्ध्वा उलूको वायसानिव॥ **6.17.19**॥ 512

मन्त्रे व्यूहे नये चारे युक्तो भवितुमर्हसि।
वानराणां च भद्रं ते परेषां च परन्तप॥ **6.17.20**॥ 513

अन्तर्धानगता ह्येते राक्षसाः कामरूपिणः।
शूराश्च निकृतिज्ञाश्च तेषां जातु न विश्वसेत्॥ **6.17.21**॥ 514

प्रणिधी राक्षसेन्द्रस्य रावणस्य भवेदयम्।
अनुप्रविश्य सोऽस्मासु भेदं कुर्यान्न संशयः॥ **6.17.22**॥ 515

अथ वा स्वयमेवैष च्छिद्रमासाद्य बुद्धिमान्।
अनुप्रविश्य विश्वस्ते कदाचित् प्रहरेदपि॥ **6.17.23**॥ 516

मित्राटविबलं चैव मौलभृत्यबलं तथा।
सर्वमेतद् बलं ग्राह्यं वर्जयित्वा द्विषद्बलम्॥ **6.17.24**॥ 517

प्रकृत्या राक्षसो ह्येष भ्रातामित्रस्य वै प्रभो।
आगतश्च रिपुः साक्षात् कथमस्मिंश्च विश्वसेत्॥ **6.17.25**॥ 518

रावणस्यानुजो भ्राता विभीषण इति श्रुतः।
चतुर्भिः सह रक्षोभिर्भवन्तं शरणं गतः॥ **6.17.26**॥ 519

रावणेन प्रणीतं हि तमवेहि विभीषणम्।
तस्याहं निग्रहं मन्ये क्षमं क्षमवतां वर॥ **6.17.27**॥ 520

राक्षसो जिह्मया बुद्ध्या सन्दिष्टोऽयमिहागतः।
प्रहर्तुं मायया छन्नो विश्वस्ते त्वयि चानघ॥ **6.17.28**॥ 521

वध्यतामेष तीव्रेण दण्डेन सचिवैः सह।
रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः॥ **6.17.29**॥ 522

एवमुक्त्वा तु तं रामं संरब्धो वाहिनीपतिः।
वाक्यज्ञो वाक्यकुशलं ततो मौनमुपागमत्॥ **6.17.30**॥ 523

सुग्रीवस्य तु तद् वाक्यं श्रुत्वा रामो महाबलः।
समीपस्थानुवाचेदं हनुमत्प्रमुखान् कपीन्॥ **6.17.31**॥ 524

यदुक्तं कपिराजेन रावणावरजं प्रति।
वाक्यं हेतुमदत्यर्थं भवद्भिरपि च श्रुतम्॥ **6.17.32**॥ 525

सुहृदामर्थकृच्छ्रेषु युक्तं बुद्धिमता सदा।
समर्थेनोपसन्देष्टुं शाश्वतीं भूतिमिच्छता॥ **6.17.33**॥ 526

इत्येवं परिपृष्टास्ते स्वं स्वं मतमतन्द्रिताः।
सोपचारं तदा राममूचुः प्रियचिकीर्षवः॥ **6.17.34**॥ 527

अज्ञातं नास्ति ते किञ्चित् त्रिषु लोकेषु राघव।
आत्मानं पूजयन् राम पृच्छस्यस्मान् सुहृत्तया॥ **6.17.35**॥ 528

त्वं हि सत्यव्रतः शूरो धार्मिको दृढविक्रमः।
परीक्ष्यकारी स्मृतिमान् निसृष्टात्मा सुहृत्सु च॥ **6.17.36**॥ 529

तस्मादेकैकशस्तावद् ब्रुवन्तु सचिवास्तव।
हेतुतो मतिसम्पन्नाः समर्थाश्च पुनः पुनः॥ **6.17.37**॥ 530

इत्युक्ते राघवायाथ मतिमानङ्गदोऽग्रतः।
विभीषणपरीक्षार्थमुवाच वचनं हरिः॥ **6.17.38**॥ 531

शत्रोः सकाशात् सम्प्राप्तः सर्वथा तर्क्य एव हि।
विश्वासनीयः सहसा न कर्तव्यो विभीषणः॥ **6.17.39**॥ 532

छादयित्वाऽऽत्मभावं हि चरन्ति शठबुद्धयः।
प्रहरन्ति च रन्ध्रेषु सोऽनर्थः सुमहान् भवेत्॥ **6.17.40**॥ 533

अर्थानर्थौ विनिश्चित्य व्यवसायं भजेत ह।
गुणतः सङ्ग्रहं कुर्याद् दोषतस्तु विसर्जयेत्॥ **6.17.41**॥ 534

यदि दोषो महांस्तस्मिंस्त्यज्यतामविशङ्कितम्।
गुणान् वापि बहून् ज्ञात्वा सङ्ग्रहः क्रियतां नृप॥ **6.17.42**॥ 535

शरभस्त्वथ निश्चित्य सार्थं वचनमब्रवीत्।
क्षिप्रमस्मिन् नरव्याघ्र चारः प्रतिविधीयताम्॥ **6.17.43**॥ 536

प्रणिधाय हि चारेण यथावत् सूक्ष्मबुद्धिना।
परीक्ष्य च ततः कार्यो यथान्यायं परिग्रहः॥ **6.17.44**॥ 537

जाम्बवांस्त्वथ सम्प्रेक्ष्य शास्त्रबुद्ध्या विचक्षणः।
वाक्यं विज्ञापयामास गुणवद् दोषवर्जितम्॥ **6.17.45**॥ 538

बद्धवैराच्च पापाच्च राक्षसेन्द्राद् विभीषणः।
अदेशकाले सम्प्राप्तः सर्वथा शङ्क्यतामयम्॥ **6.17.46**॥ 539

ततो मैन्दस्तु सम्प्रेक्ष्य नयापनयकोविदः।
वाक्यं वचनसम्पन्नो बभाषे हेतुमत्तरम्॥ **6.17.47**॥ 540

अनुजो नाम तस्यैष रावणस्य विभीषणः।
पृच्छ्यतां मधुरेणायं शनैर्नरपतीश्वर॥ **6.17.48**॥ 541

भावमस्य तु विज्ञाय तत्त्वतस्तं करिष्यसि।
यदि दुष्टो न दुष्टो वा बुद्धिपूर्वं नरर्षभ॥ **6.17.49**॥ 542

अथ संस्कारसम्पन्नो हनूमान् सचिवोत्तमः।
उवाच वचनं श्लक्ष्णमर्थवन्मधुरं लघु॥ **6.17.50**॥ 543

न भवन्तं मतिश्रेष्ठं समर्थं वदतां वरम्।
अतिशाययितुं शक्तो बृहस्पतिरपि ब्रुवन्॥ **6.17.51**॥ 544

न वादान्नापि सङ्घर्षान्नाधिक्यान्न च कामतः।
वक्ष्यामि वचनं राजन् यथार्थं राम गौरवात्॥ **6.17.52**॥ 545

अर्थानर्थनिमित्तं हि यदुक्तं सचिवैस्तव।
तत्र दोषं प्रपश्यामि क्रिया नह्युपपद्यते॥ **6.17.53**॥ 546

ऋते नियोगात् सामर्थ्यमवबोद्धुं न शक्यते।
सहसा विनियोगोऽपि दोषवान् प्रतिभाति मे॥ **6.17.54**॥ 547

चारप्रणिहितं युक्तं यदुक्तं सचिवैस्तव।
अर्थस्यासम्भवात् तत्र कारणं नोपपद्यते॥ **6.17.55**॥ 548

अदेशकाले सम्प्राप्त इत्ययं यद् विभीषणः।
विवक्षा तत्र मेऽस्तीयं तां निबोध यथामति॥ **6.17.56**॥ 549

एष देशश्च कालश्च भवतीह यथा तथा।
पुरुषात् पुरुषं प्राप्य तथा दोषगुणावपि॥ **6.17.57**॥ 550

दौरात्म्यं रावणे दृष्ट्वा विक्रमं च तथा त्वयि।
युक्तमागमनं ह्यत्र सदृशं तस्य बुद्धितः॥ **6.17.58**॥ 551

अज्ञातरूपैः पुरुषैः स राजन् पृच्छ्यतामिति।
यदुक्तमत्र मे प्रेक्षा काचिदस्ति समीक्षिता॥ **6.17.59**॥ 552

पृच्छ्यमानो विशङ्केत सहसा बुद्धिमान् वचः।
तत्र मित्रं प्रदुष्येत मिथ्या पृष्टं सुखागतम्॥ **6.17.60**॥ 553

अशक्यं सहसा राजन् भावो बोद्धुं परस्य वै।
अन्तरेण स्वरैर्भिन्नैर्नैपुण्यं पश्यतां भृशम्॥ **6.17.61**॥ 554

न त्वस्य ब्रुवतो जातु लक्ष्यते दुष्टभावता।
प्रसन्नं वदनं चापि तस्मान्मे नास्ति संशयः॥ **6.17.62**॥ 555

अशङ्कितमतिः स्वस्थो न शठः परिसर्पति।
न चास्य दुष्टवागस्ति तस्मान्मे नास्ति संशयः॥ **6.17.63**॥ 556

आकारश्छाद्यमानोऽपि न शक्यो विनिगूहितुम्।
बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम्॥ **6.17.64**॥ 557

देशकालोपपन्नं च कार्यं कार्यविदां वर।
सफलं कुरुते क्षिप्रं प्रयोगेणाभिसंहितम्॥ **6.17.65**॥ 558

उद्योगं तव सम्प्रेक्ष्य मिथ्यावृत्तं च रावणम्।
वालिनं च हतं श्रुत्वा सुग्रीवं चाभिषेचितम्॥ **6.17.66**॥ 559

राज्यं प्रार्थयमानस्तु बुद्धिपूर्वमिहागतः।
एतावत् तु पुरस्कृत्य युज्यते तस्य सङ्ग्रहः॥ **6.17.67**॥ 560

यथाशक्ति मयोक्तं तु राक्षसस्यार्जवं प्रति।
प्रमाणं त्वं हि शेषस्य श्रुत्वा बुद्धिमतां वर॥ **6.17.68**॥ 561

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तदशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टादशः सर्गः ॥

शरणागतरक्षणस्य महत्त्वं स्वकीयं व्रतं च प्रतिपाद्य श्रीरामस्य विभीषणेन सह समागमः

अथ रामः प्रसन्नात्मा श्रुत्वा वायुसुतस्य ह।
प्रत्यभाषत दुर्धर्षः श्रुतवानात्मनि स्थितम्॥ **6.18.1** ॥ 562

ममापि च विवक्षास्ति काचित् प्रति विभीषणम्।
श्रोतुमिच्छामि तत् सर्वं भवद्भिः श्रेयसि स्थितैः॥ **6.18.2** ॥ 563

मित्रभावेन सम्प्राप्तं न त्यजेयं कथञ्चन।
दोषो यद्यपि तस्य स्यात् सतामेतदगर्हितम्॥ **6.18.3** ॥ 564

सुग्रीवस्त्वथ तद्वाक्यमाभाष्य च विमृश्य च।
ततः शुभतरं वाक्यमुवाच हरिपुङ्गवः॥ **6.18.4** ॥ 565

स दुष्टो वाप्यदुष्टो वा किमेष रजनीचरः।
ईदृशं व्यसनं प्राप्तं भ्रातरं यः परित्यजेत्॥ **6.18.5** ॥ 566

को नाम स भवेत् तस्य यमेष न परित्यजेत्।
वानराधिपतेर्वाक्यं श्रुत्वा सर्वानुदीक्ष्य तु॥ **6.18.6** ॥ 567

ईषदुत्स्मयमानस्तु लक्ष्मणं पुण्यलक्षणम्।
इति होवाच काकुत्स्थो वाक्यं सत्यपराक्रमः॥ **6.18.7** ॥ 568

अनधीत्य च शास्त्राणि वृद्धाननुपसेव्य च।
न शक्यमीदृशं वक्तुं यदुवाच हरीश्वरः॥ **6.18.8**॥ 569

अस्ति सूक्ष्मतरं किञ्चिद् यथात्र प्रतिभाति मा।
प्रत्यक्षं लौकिकं चापि वर्तते सर्वराजसु॥ **6.18.9**॥ 570

अमित्रास्तत्कुलीनाश्च प्रातिदेश्याश्च कीर्तिताः।
व्यसनेषु प्रहर्तारस्तस्मादयमिहागतः॥ **6.18.10**॥ 571

अपापास्तत्कुलीनाश्च मानयन्ति स्वकान् हितान्।
एष प्रायो नरेन्द्राणां शङ्कनीयस्तु शोभनः॥ **6.18.11**॥ 572

यस्तु दोषस्त्वया प्रोक्तो ह्यादानेऽरिबलस्य च।
तत्र ते कीर्तयिष्यामि यथाशास्त्रमिदं शृणु॥ **6.18.12**॥ 573

न वयं तत्कुलीनाश्च राज्यकाङ्क्षी च राक्षसः।
पण्डिता हि भविष्यन्ति तस्माद् ग्राह्यो विभीषणः॥ **6.18.13**॥ 574

अव्यग्राश्च प्रहृष्टाश्च ते भविष्यन्ति सङ्गताः।
प्रणादश्च महानेषोऽन्योन्यस्य भयमागतम्।
इति भेदं गमिष्यन्ति तस्माद् ग्राह्यो विभीषणः॥ **6.18.14**॥ 575

न सर्वे भ्रातरस्तात भवन्ति भरतोपमाः।
मद्विधा वा पितुः पुत्राः सुहृदो वा भवद्विधाः॥ **6.18.15**॥ 576

एवमुक्तस्तु रामेण सुग्रीवः सहलक्ष्मणः।
उत्थायेदं महाप्राज्ञः प्रणतो वाक्यमब्रवीत्॥ **6.18.16**॥ 577

रावणेन प्रणिहितं तमवेहि निशाचरम्।
तस्याहं निग्रहं मन्ये क्षमं क्षमवतां वर॥ **6.18.17**॥ 578

राक्षसो जिह्मया बुद्ध्या सन्दिष्टोऽयमिहागतः।
प्रहर्तुं त्वयि विश्वस्ते विश्वस्ते मयि वानघ॥ **6.18.18**॥ 579

लक्ष्मणे वा महाबाहो स वध्यः सचिवैः सह।
रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः॥ **6.18.19**॥ 580

एवमुक्त्वा रघुश्रेष्ठं सुग्रीवो वाहिनीपतिः।
वाक्यज्ञो वाक्यकुशलं ततो मौनमुपागमत्॥ **6.18.20**॥ 581

स सुग्रीवस्य तद् वाक्यं रामः श्रुत्वा विमृश्य च।
ततः शुभतरं वाक्यमुवाच हरिपुङ्गवम्॥ **6.18.21**॥ 582

स दुष्टो वाप्यदुष्टो वा किमेष रजनीचरः।
सूक्ष्ममप्यहितं कर्तुं मम शक्तः कथञ्चन॥ **6.18.22**॥ 583

पिशाचान् दानवान् यक्षान् पृथिव्यां चैव राक्षसान्।
अङ्गुल्यग्रेण तान् हन्यामिच्छन् हरिगणेश्वर॥ **6.18.23**॥ 584

श्रूयते हि कपोतेन शत्रुः शरणमागतः।
अर्चितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः॥ **6.18.24**॥ 585

स हि तं प्रतिजग्राह भार्याहर्तारमागतम्।
कपोतो वानरश्रेष्ठ किं पुनर्मद्विधो जनः॥ **6.18.25**॥ 586

ऋषेः कण्वस्य पुत्रेण कण्डुना परमर्षिणा।
शृणु गाथा पुरा गीता धर्मिष्ठा सत्यवादिना॥ **6.18.26**॥ 587

बद्धाञ्जलिपुटं दीनं याचन्तं शरणागतम्।
न हन्यादानृशंस्यार्थमपि शत्रुं परन्तप॥ **6.18.27**॥ 588

आर्तो वा यदि वा दृप्तः परेषां शरणं गतः।
अरिः प्राणान् परित्यज्य रक्षितव्यः कृतात्मना॥ **6.18.28**॥ 589

स चेद् भयाद् वा मोहाद् वा कामाद् वापि न रक्षति।
स्वया शक्त्या यथान्यायं तत् पापं लोकगर्हितम्॥ **6.18.29**॥ 590

विनष्टः पश्यतस्तस्य रक्षिणः शरणं गतः।
आनाय सुकृतं तस्य सर्वं गच्छेदरक्षितः॥ **6.18.30**॥ 591

एवं दोषो महानत्र प्रपन्नानामरक्षणे।
अस्वर्ग्यं चायशस्यं च बलवीर्यविनाशनम्॥ **6.18.31**॥ 592

करिष्यामि यथार्थं तु कण्डोर्वचनमुत्तमम्।
धर्मिष्ठं च यशस्यं च स्वर्ग्यं स्यात् तु फलोदये॥ **6.18.32**॥ 593

सकृदेव प्रपन्नाय तवास्मीति च याचते।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम॥ **6.18.33**॥ 594

आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया।
विभीषणो वा सुग्रीव यदि वा रावणः स्वयम्॥ **6.18.34**॥ 595

रामस्य तु वचः श्रुत्वा सुग्रीवः प्लवगेश्वरः।
प्रत्यभाषत काकुत्स्थं सौहार्देनाभिपूरितः॥ **6.18.35**॥ 596

किमत्र चित्रं धर्मज्ञ लोकनाथशिखामणे।
यत् त्वमार्यं प्रभाषेथाः सत्त्ववान् सत्पथे स्थितः॥ **6.18.36**॥ 597

मम चाप्यन्तरात्मायं शुद्धं वेत्ति विभीषणम्।
अनुमानाच्च भावाच्च सर्वतः सुपरीक्षितः॥ **6.18.37**॥ 598

तस्मात् क्षिप्रं सहास्माभिस्तुल्यो भवतु राघव।
विभीषणो महाप्राज्ञः सखित्वं चाभ्युपैतु नः॥ **6.18.38**॥ 599

ततस्तु सुग्रीववचो निशम्य तद् -
धरीश्वरेणाभिहितं नरेश्वरः।

विभीषणेनाशु जगाम सङ्गमं
पतत्रिराजेन यथा पुरन्दरः ॥ 6.18.39 ॥ 600

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टादशः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनविंशः सर्गः ॥

नभसोऽवतीर्णेन विभीषणेन श्रीरामचरणयोः शरणीकरणं श्रीरामपृष्टेन तेन रावणशक्तेः परिचयदानं रावणवधं प्रतिज्ञाय विभीषणं लङ्काराज्ये चाभिषिच्य तत्सम्मत्यैव तस्य समुद्रतटे उपवेशनम्

राघवेणाभये दत्ते सन्नतो रावणानुजः।
विभीषणो महाप्राज्ञो भूमिं समवलोकयत्॥ **6.19.1**॥ 601

खात् पपातावनिं हृष्टो भक्तैरनुचरः सह।
स तु रामस्य धर्मात्मा निपपात विभीषणः॥ **6.19.2**॥ 602

पादयोर्निपपाताथ चतुर्भिः सह राक्षसैः।
अब्रवीच्च तदा वाक्यं रामं प्रति विभीषणः॥ **6.19.3**॥ 603

धर्मयुक्तं च युक्तं च साम्प्रतं सम्प्रहर्षणम्।
अनुजो रावणस्याहं तेन चास्म्यवमानितः॥ **6.19.4**॥ 604

भवन्तं सर्वभूतानां शरण्यं शरणं गतः।
परित्यक्ता मया लङ्का मित्राणि च धनानि च॥ **6.19.5**॥ 605

भवद्गतं हि मे राज्यं जीवितं च सुखानि च।
तस्य तद् वचनं श्रुत्वा रामो वचनमब्रवीत्॥ **6.19.6**॥ 606

वचसा सान्त्वयित्वैनं लोचनाभ्यां पिबन्निव।
आख्याहि मम तत्त्वेन राक्षसानां बलाबलम्॥ **6.19.7**॥ 607

एवमुक्तं तदा रक्षो रामेणाक्लिष्टकर्मणा।
रावणस्य बलं सर्वमाख्यातुमुपचक्रमे॥ **6.19.8**॥ 608

अवध्यः सर्वभूतानां गन्धर्वोरगपक्षिणाम्।
राजपुत्र दशग्रीवो वरदानात् स्वयम्भुवः॥ **6.19.9**॥ 609

रावणानन्तरो भ्राता मम ज्येष्ठश्च वीर्यवान्।
कुम्भकर्णो महातेजाः शक्रप्रतिबलो युधि॥ **6.19.10**॥ 610

राम सेनापतिस्तस्य प्रहस्तो यदि ते श्रुतः।
कैलासे येन समरे मणिभद्रः पराजितः॥ **6.19.11**॥ 611

बद्धगोधाङ्गुलित्राणस्त्ववध्यकवचो युधि।
धनुरादाय यस्तिष्ठन्नदृश्यो भवतीन्द्रजित्॥ **6.19.12**॥ 612

सङ्ग्रामे सुमहद्व्यूहे तर्पयित्वा हुताशनम्।
अन्तर्धानगतः श्रीमानिन्द्रजिद्धन्ति राघव॥ **6.19.13**॥ 613

महोदरमहापार्श्वौ राक्षसश्चाप्यकम्पनः।
अनीकपास्तु तस्यैते लोकपालसमा युधि॥ **6.19.14**॥ 614

दशकोटिसहस्राणि रक्षसां कामरूपिणाम्।
मांसशोणितभक्ष्याणां लङ्कापुरनिवासिनाम्॥ **6.19.15**॥ 615

स तैस्तु सहितो राजा लोकपालानयोधयत्।
सह देवैस्तु ते भग्ना रावणेन दुरात्मना॥ **6.19.16**॥ 616

विभीषणस्य तु वचस्तच्छ्रुत्वा रघुसत्तमः।
अन्वीक्ष्य मनसा सर्वमिदं वचनमब्रवीत्॥ **6.19.17**॥ 617

यानि कर्मापदानानि रावणस्य विभीषण।
आख्यातानि च तत्त्वेन ह्यवगच्छामि तान्यहम्॥ **6.19.18**॥ 618

अहं हत्वा दशग्रीवं सप्रहस्तं सहात्मजम्।
राजानं त्वां करिष्यामि सत्यमेतच्छृणोतु मे॥ **6.19.19**॥ 619

रसातलं वा प्रविशेत् पातालं वापि रावणः।
पितामहसकाशं वा न मे जीवन् विमोक्ष्यते॥ **6.19.20**॥ 620

अहत्वा रावणं सङ्ख्ये सपुत्रजनबान्धवम्।
अयोध्यां न प्रवेक्ष्यामि त्रिभिस्तैर्भ्रातृभिः शपे॥ **6.19.21**॥ 621

श्रुत्वा तु वचनं तस्य रामस्याक्लिष्टकर्मणः।
शिरसाऽऽवन्द्य धर्मात्मा वक्तुमेवं प्रचक्रमे॥ **6.19.22**॥ 622

राक्षसानां वधे साह्यं लङ्कायाश्च प्रधर्षणे।
करिष्यामि यथाप्राणं प्रवेक्ष्यामि च वाहिनीम्॥ **6.19.23**॥ 623

इति ब्रुवाणं रामस्तु परिष्वज्य विभीषणम्।
अब्रवील्लक्ष्मणं प्रीतः समुद्राज्जलमानय॥ **6.19.24**॥ 624

तेन चेमं महाप्राज्ञमभिषिञ्च विभीषणम्।
राजानं रक्षसां क्षिप्रं प्रसन्ने मयि मानद॥ **6.19.25**॥ 625

एवमुक्तस्तु सौमित्रिरभ्यषिञ्चद् विभीषणम्।
मध्ये वानरमुख्यानां राजानं राजशासनात्॥ **6.19.26**॥ 626

तं प्रसादं तु रामस्य दृष्ट्वा सद्यः प्लवङ्गमाः।
प्रचुक्रुशुर्महात्मानं साधुसाध्विति चाब्रुवन्॥ **6.19.27**॥ 627

अब्रवीच्च हनूमांश्च सुग्रीवश्च विभीषणम्।
कथं सागरमक्षोभ्यं तराम वरुणालयम्।
सैन्यैः परिवृताः सर्वे वानराणां महौजसाम्॥ **6.19.28**॥ 628

उपायैरभिगच्छाम यथा नदनदीपतिम्।
तराम तरसा सर्वे ससैन्या वरुणालयम्॥ **6.19.29**॥ 629

एवमुक्तस्तु धर्मात्मा प्रत्युवाच विभीषणः।
समुद्रं राघवो राजा शरणं गन्तुमर्हति॥ **6.19.30**॥ 630

खानितः सगरेणायमप्रमेयो महोदधिः।
कर्तुमर्हति रामस्य ज्ञातेः कार्य महोदधिः॥ **6.19.31**॥ 631

एवं विभीषणेनोक्तो राक्षसेन विपश्चिता।
आजगामाथ सुग्रीवो यत्र रामः सलक्ष्मणः॥ **6.19.32**॥ 632

ततश्चाख्यातुमारेभे विभीषणवचः शुभम्।
सुग्रीवो विपुलग्रीवः सागरस्योपवेशनम्॥ **6.19.33**॥ 633

प्रकृत्या धर्मशीलस्य रामस्यास्याप्यरोचत।
सलक्ष्मणं महातेजाः सुग्रीवं च हरीश्वरम्॥ **6.19.34**॥ 634

सत्क्रियार्थं क्रियादक्षं स्मितपूर्वमभाषत।
विभीषणस्य मन्त्रोऽयं मम लक्ष्मण रोचते॥ **6.19.35**॥ 635

सुग्रीवः पण्डितो नित्यं भवान् मन्त्रविचक्षणः।
उभाभ्यां सम्प्रधार्यार्थं रोचते यत् तदुच्यताम्॥ **6.19.36**॥ 636

एवमुक्तौ ततो वीरावुभौ सुग्रीवलक्ष्मणौ।
समुदाचारसंयुक्तमिदं वचनमूचतुः॥ **6.19.37**॥ 637

किमर्थं नौ नरव्याघ्र न रोचिष्यति राघव।
विभीषणेन यत् तूक्तमस्मिन् काले सुखावहम्॥ **6.19.38**॥ 638

अबद्ध्वा सागरे सेतुं घोरेऽस्मिन् वरुणालये।
लङ्का नासादितुं शक्या सेन्द्रैरपि सुरासुरैः॥ **6.19.39**॥ 639

विभीषणस्य शूरस्य यथार्थं क्रियतां वचः।
अलं कालात्ययं कृत्वा सागरोऽयं नियुज्यताम्।
यथा सैन्येन गच्छाम पुरीं रावणपालिताम्॥ **6.19.40**॥ 640

एवमुक्तः कुशास्तीर्णे तीरे नदनदीपतेः।
संविवेश तदा रामो वेद्यामिव हुताशनः॥ **6.19.41**॥ 641

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ विंशः सर्गः ॥

शार्दूलप्रेरणया रावणेन शुकं दूतीकृत्य तद्द्वारा सुग्रीवसविधे सन्देशस्य प्रेषणम्, तत्र वानरकृता तदीया दुरवस्था, श्रीरामस्यानुग्रहेण तस्य क्लेशतो मोक्षणं सुग्रीवेण च रावणं प्रत्युत्तरदानम्

ततो निविष्टां ध्वजिनीं सुग्रीवेणाभिपालिताम्।
ददर्श राक्षसोऽभ्येत्य शार्दूलो नाम वीर्यवान्॥ **6.20.1**॥ 642

चारो राक्षसराजस्य रावणस्य दुरात्मनः।
तां दृष्ट्वा सर्वतोऽव्यग्रां प्रतिगम्य स राक्षसः॥ **6.20.2**॥ 643

आविश्य लङ्कां वेगेन राजानमिदमब्रवीत्।
एष वै वानरक्षौघो लङ्कां समभिवर्तते॥ **6.20.3**॥ 644

अगाधश्चाप्रमेयश्च द्वितीय इव सागरः।
पुत्रौ दशरथस्येमौ भ्रातरौ रामलक्ष्मणौ॥ **6.20.4**॥ 645

उत्तमौ रूपसम्पन्नौ सीतायाः पदमागतौ।
एतौ सागरमासाद्य सन्निविष्टौ महाद्युते॥ **6.20.5**॥ 646

बलं चाकाशमावृत्य सर्वतो दशयोजनम्।
तत्त्वभूतं महाराज क्षिप्रं वेदितुमर्हसि॥ **6.20.6**॥ 647

तव दूता महाराज क्षिप्रमर्हन्ति वेदितुम्।
उपप्रदानं सान्त्वं वा भेदो वात्र प्रयुज्यताम्॥ **6.20.7**॥ 648

शार्दूलस्य वचः श्रुत्वा रावणो राक्षसेश्वरः।
उवाच सहसा व्यग्रः सम्प्रधार्यार्थमात्मनः।
शुकं साधु तदा रक्षो वाक्यमर्थविदां वरम्॥ **6.20.8**॥ 649

सुग्रीवं ब्रूहि गत्वाऽऽशु राजानं वचनान्मम।
यथासन्देशमक्लीबं श्लक्ष्णया परया गिरा॥ **6.20.9**॥ 650

त्वं वै महाराजकुलप्रसूतो
महाबलश्चर्क्षरजःसुतश्च।
न कश्चनार्थस्तव नास्त्यनर्थ -
स्तथापि मे भ्रातृसमो हरीश॥ **6.20.10**॥ 651

अहं यद्यहरं भार्यां राजपुत्रस्य धीमतः।
किं तत्र तव सुग्रीव किष्किन्धां प्रति गम्यताम्॥ **6.20.11**॥ 652

नहीयं हरिभिर्लङ्का प्रासुं शक्या कथञ्चन।
देवैरपि सगन्धर्वैः किं पुनर्नरवानरैः॥ **6.20.12**॥ 653

स तदा राक्षसेन्द्रेण सन्दिष्टो रजनीचरः।
शुको विहङ्गमो भूत्वा तूर्णमाप्लुत्य चाम्बरम्॥ **6.20.13**॥ 654

स गत्वा दूरमध्वानमुपर्युपरि सागरम्।
संस्थितो ह्यम्बरे वाक्यं सुग्रीवमिदमब्रवीत्॥ **6.20.14**॥ 655

सर्वमुक्तं यथाऽऽदिष्टं रावणेन दुरात्मना।
तत् प्रापयन्तं वचनं तूर्णमाप्लुत्य वानराः॥ **6.20.15**॥ 656

प्रापद्यन्त तदा क्षिप्रं लोसुं हन्तुं च मुष्टिभिः।
सर्वैः प्लवङ्गैः प्रसभं निगृहीतो निशाचरः॥ **6.20.16**॥ 657

गगनाद् भूतले चाशु प्रतिगृह्यावतारितः।
वानरैः पीड्यमानस्तु शुको वचनमब्रवीत्॥ **6.20.17**॥ 658

न दूतान् घ्नन्ति काकुत्स्थ वार्यन्तां साधु वानराः।
यस्तु हित्वा मतं भर्तुः स्वमतं सम्प्रधारयेत्।
अनुक्तवादी दूतः सन् स दूतो वधमर्हति॥ **6.20.18**॥ 659

शुकस्य वचनं रामः श्रुत्वा तु परिदेवितम्।
उवाच मावधिष्टेति घ्नतः शाखामृगर्षभान्॥ **6.20.19**॥ 660

स च पत्रलघुर्भूत्वा हरिभिर्दर्शितेऽभये।
अन्तरिक्षे स्थितो भूत्वा पुनर्वचनमब्रवीत्॥ **6.20.20**॥ 661

सुग्रीव सत्त्वसम्पन्न महाबलपराक्रम।
किं मया खलु वक्तव्यो रावणो लोकरावणः॥ **6.20.21**॥ 662

स एवमुक्तः प्लवगाधिपस्तदा
प्लवङ्गमानामृषभो महाबलः।
उवाच वाक्यं रजनीचरस्य
चारं शुकं शुद्धमदीनसत्त्वः॥ **6.20.22**॥ 663

न मेऽसि मित्रं न तथानुकम्प्यो
न चोपकर्तासि न मे प्रियोऽसि।
अरिश्च रामस्य सहानुबन्ध -
स्ततोऽसि वालीव वधार्ह वध्यः॥ **6.20.23**॥ 664

निहन्म्यहं त्वां ससुतं सबन्धुं
सज्ञातिवर्गं रजनीचरेश।
लङ्कां च सर्वां महता बलेन
सर्वैः करिष्यामि समेत्य भस्म॥ **6.20.24**॥ 665

न मोक्ष्यसे रावण राघवस्य
सुरैः सहेन्द्रैरपि मूढ गुप्तः।
अन्तर्हितः सूर्यपथं गतोऽपि
तथैव पातालमनुप्रविष्टः।
गिरीशपादाम्बुजसङ्गतो वा
हतोऽसि रामेण सहानुजस्त्वम्॥ **6.20.25**॥ 666

तस्य ते त्रिषु लोकेषु न पिशाचं न राक्षसम्।
त्रातारं नानुपश्यामि न गन्धर्वं न चासुरम्॥ **6.20.26**॥ 667

अवधीस्त्वं जरावृद्धं गृध्रराजं जटायुषम्।
किं नु ते रामसान्निध्ये सकाशे लक्ष्मणस्य च।
हृता सीता विशालाक्षी यां त्वं गृह्य न बुध्यसे॥ **6.20.27**॥ 668

महाबलं महात्मानं दुराधर्षं सुरैरपि।
न बुध्यसे रघुश्रेष्ठं यस्ते प्राणान् हरिष्यति॥ **6.20.28**॥ 669

ततोऽब्रवीद् वालिसुतोऽप्यङ्गदो हरिसत्तमः।
नायं दूतो महाराज चारकः प्रतिभाति मे॥ **6.20.29**॥ 670

तुलितं हि बलं सर्वमनेन तव तिष्ठता।
गृह्यतां मागमल्लङ्कामेतद्धि मम रोचते॥ **6.20.30**॥ 671

ततो राज्ञा समादिष्टाः समुत्पत्य वलीमुखाः।
जगृहुश्च बबन्धुश्च विलपन्तमनाथवत्॥ **6.20.31**॥ 672

शुकस्तु वानरैश्चण्डैस्तत्र तैः सम्प्रपीडितः।
व्याचुक्रोश महात्मानं रामं दशरथात्मजम्।
लुप्येते मे बलात् पक्षौ भिद्यते मे तथाक्षिणी॥ **6.20.32**॥ 673

यां च रात्रिं मरिष्यामि जाये रात्रिं च यामहम्।
एतस्मिन्नन्तरे काले यन्मया ह्यशुभं कृतम्।
सर्वं तदुपपद्येथा जह्यां चेद् यदि जीवितम्॥ **6.20.33**॥ 674

नाघातयत् तदा रामः श्रुत्वा तत्परिदेवितम्।
वानरानब्रवीद् रामो मुच्यतां दूत आगतः॥ **6.20.34**॥ 675

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे विंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकविंशः सर्गः ॥

श्रीरामस्य समुद्रतटे कुशानास्तीर्य दिनत्रयं यावदुपवेशनं ततोऽपि स्वात्मानमदर्शयतः समुद्रस्योपरि कुपितेन श्रीरामेण बाणप्रहारेण तस्य विक्षोभणम्

ततः सागरवेलायां दर्भानास्तीर्य राघवः।
अञ्जलिं प्राङ्मुखः कृत्वा प्रतिशिश्ये महोदधेः॥ **6.21.1** ॥ 676

बाहुं भुजङ्गभोगाभमुपधायारिसूदनः।
जातरूपमयैश्चैव भूषणैर्भूषितं पुरा॥ **6.21.2** ॥ 677

मणिकाञ्चनकेयूरमुक्ताप्रवरभूषणैः।
भुजैः परमनारीणामभिमृष्टमनेकधा॥ **6.21.3** ॥ 678

चन्दनागुरुभिश्चैव पुरस्तादभिसेवितम्।
बालसूर्यप्रकाशैश्च चन्दनैरुपशोभितम्॥ **6.21.4** ॥ 679

शयने चोत्तमाङ्गेन सीतायाः शोभितं पुरा।
तक्षकस्येव सम्भोगं गङ्गाजलनिषेवितम्॥ **6.21.5** ॥ 680

संयुगे युगसङ्काशं शत्रूणां शोकवर्धनम्।
सुहृदां नन्दनं दीर्घं सागरान्तव्यपाश्रयम्॥ **6.21.6** ॥ 681

अस्यता च पुनः सव्यं ज्याघातविहतत्वचम्।
दक्षिणो दक्षिणं बाहुं महापरिघसन्निभम्॥ **6.21.7** ॥ 682

गोसहस्रप्रदातारं ह्युपधाय भुजं महत्।
अद्य मे तरणं वाथ मरणं सागरस्य वा॥ **6.21.8**॥ 683

इति रामो धृतिं कृत्वा महाबाहुर्महोदधिम्।
अधिशिश्ये च विधिवत् प्रयतो नियतो मुनिः॥ **6.21.9**॥ 684

तस्य रामस्य सुप्तस्य कुशास्तीर्णे महीतले।
नियमादप्रमत्तस्य निशास्तिस्रोऽभिजग्मतुः॥ **6.21.10**॥ 685

स त्रिरात्रोषितस्तत्र नयज्ञो धर्मवत्सलः।
उपासत तदा रामः सागरं सरितां पतिम्॥ **6.21.11**॥ 686

न च दर्शयते रूपं मन्दो रामस्य सागरः।
प्रयतेनापि रामेण यथार्हमभिपूजितः॥ **6.21.12**॥ 687

समुद्रस्य ततः क्रुद्धो रामो रक्तान्तलोचनः।
समीपस्थमुवाचेदं लक्ष्मणं शुभलक्षणम्॥ **6.21.13**॥ 688

अवलेपः समुद्रस्य न दर्शयति यः स्वयम्।
प्रशमश्च क्षमा चैव आर्जवं प्रियवादिता॥ **6.21.14**॥ 689

असामर्थ्यफला ह्येते निर्गुणेषु सतां गुणाः।
आत्मप्रशंसिनं दुष्टं धृष्टं विपरिधावकम्॥ **6.21.15**॥ 690

सर्वत्रोत्सृष्टदण्डं च लोकः सत्कुरुते नरम्।
न साम्ना शक्यते कीर्तिर्न साम्ना शक्यते यशः॥ **6.21.16**॥ 691

प्राप्तुं लक्ष्मण लोकेऽस्मिञ्जयो वा रणमूर्धनि।
अद्य मद्बाणनिर्भग्नैर्मकरैर्मकरालयम्॥ **6.21.17**॥ 692

निरुद्धतोयं सौमित्रे प्लवद्भिः पश्य सर्वतः।
भोगिनां पश्य भोगानि मया भिन्नानि लक्ष्मण॥ **6.21.18**॥ 693

महाभोगानि मत्स्यानां करिणां च करानिह।
सशङ्खशुक्तिकाजालं समीनमकरं तथा॥ **6.21.19**॥ 694

अद्य युद्धेन महता समुद्रं परिशोषये।
क्षमया हि समायुक्तं मामयं मकरालयः॥ **6.21.20**॥ 695

असमर्थं विजानाति धिक् क्षमामीदृशे जने।
न दर्शयति साम्ना मे सागरो रूपमात्मनः॥ **6.21.21**॥ 696

चापमानय सौमित्रे शरांश्चाशीविषोपमान्।
समुद्रं शोषयिष्यामि पद्भ्यां यान्तु प्लवङ्गमाः॥ **6.21.22**॥ 697

अद्याक्षोभ्यमपि क्रुद्धः क्षोभयिष्यामि सागरम्।
वेलासु कृतमर्यादं सहस्रोर्मिसमाकुलम्॥ **6.21.23**॥ 698

निर्मर्यादं करिष्यामि सायकैर्वरुणालयम्।
महार्णवं क्षोभयिष्ये महादानवसङ्कुलम्॥ **6.21.24**॥ 699

एवमुक्त्वा धनुष्पाणिः क्रोधविस्फारितेक्षणः।
बभूव रामो दुर्धर्षो युगान्ताग्निरिव ज्वलन्॥ **6.21.25**॥ 700

सम्पीड्य च धनुर्घोरं कम्पयित्वा शरैर्जगत्।
मुमोच विशिखानुग्रान् वज्रानिव शतक्रतुः॥ **6.21.26**॥ 701

ते ज्वलन्तो महावेगास्तेजसा सायकोत्तमाः।
प्रविशन्ति समुद्रस्य जलं वित्रस्तपन्नगम्॥ **6.21.27**॥ 702

तोयवेगः समुद्रस्य समीनमकरो महान्।
स बभूव महाघोरः समारुतरवस्तथा॥ **6.21.28**॥ 703

महोर्मिमालावितततः शङ्खशुक्तिसमावृतः।
सधूमः परिवृत्तोर्मिः सहसासीन्महोदधिः॥ **6.21.29**॥ 704

व्यथिताः पन्नगाश्चासन् दीप्तास्या दीप्तलोचनाः।
दानवाश्च महावीर्याः पातालतलवासिनः॥ **6.21.30**॥ 705

ऊर्मयः सिन्धुराजस्य सनक्रमकरास्तथा।
विन्ध्यमन्दरसङ्काशाः समुत्पेतुः सहस्रशः॥ **6.21.31**॥ 706

आघूर्णिततरङ्गौघः सम्भ्रान्तोरगराक्षसः।
उद्धर्तितमहाग्राहः सघोषो वरुणालयः॥ **6.21.32**॥ 707

ततस्तु तं राघवमुग्रवेगं
प्रकर्षमाणं धनुरप्रमेयम्।
सौमित्रिरुत्पत्य विनिःश्वसन्तं
मामेति चोक्त्वा धनुराललम्बे॥ **6.21.33**॥ 708

एतद्धिनापि ह्युदधेस्तवाद्य
सम्पत्स्यते वीरतमस्य कार्यम्।
भवद्विधाः क्रोधवशं न यान्ति
दीर्घं भवान् पश्यतु साधुवृत्तम्॥ **6.21.34**॥ 709

अन्तर्हितैश्चापि तथान्तरिक्षे
ब्रह्मर्षिभिश्चैव सुरर्षिभिश्च।
शब्दः कृतः कष्टमिति ब्रुवद्भि -
र्मामेति चोक्त्वा महता स्वरेण॥ **6.21.35**॥ 710

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वाविंशः सर्गः ॥

समुद्रस्य सम्मत्या नलेन सागरोपरि शतयोजनविस्तृतसेतोर्निर्माणं तेन श्रीरामप्रभृतिभिः सह वानरसेनायाः परे पारे गमनं तत्र निवेशनं च

अथोवाच रघुश्रेष्ठः सागरं दारुणं वचः।
अद्य त्वां शोषयिष्यामि सपातालं महार्णव ॥ **6.22.1** ॥ 711

शरनिर्दग्धतोयस्य परिशुष्कस्य सागर।
मया निहतसत्त्वस्य पांसुरुत्पद्यते महान् ॥ **6.22.2** ॥ 712

मत्कार्मुकविसृष्टेन शरवर्षेण सागर।
परं तीरं गमिष्यन्ति पद्भिरेव प्लवङ्गमाः ॥ **6.22.3** ॥ 713

विचिन्वन्नाभिजानासि पौरुषं नापि विक्रमम्।
दानवालय सन्तापं मत्तो नाम गमिष्यसि ॥ **6.22.4** ॥ 714

ब्राह्मेणास्त्रेण संयोज्य ब्रह्मदण्डनिभं शरम्।
संयोज्य धनुषि श्रेष्ठे विचकर्ष महाबलः ॥ **6.22.5** ॥ 715

तस्मिन् विकृष्टे सहसा राघवेण शरासने।
रोदसी सम्पफालेव पर्वताश्च चकम्पिरे ॥ **6.22.6** ॥ 716

तमश्च लोकमावव्रे दिशश्च न चकाशिरे।
प्रतिचुक्षुभिरे चाशु सरांसि सरितस्तथा ॥ **6.22.7** ॥ 717

तिर्यक् च सह नक्षत्रैः सङ्गतौ चन्द्रभास्करौ।
भास्करांशुभिरादीप्तं तमसा च समावृतम्॥ **6.22.8**॥ 718

प्रचकाशे तदाऽऽकाशमुल्काशतविदीपितम्।
अन्तरिक्षाच्च निर्घाता निर्जग्मुरतुलस्वनाः॥ **6.22.9**॥ 719

वपुःप्रकर्षेण ववुर्दिव्यमारुतपङ्क्तयः।
बभञ्ज च तदा वृक्षाञ्जलदानुद्वहन्मुहुः॥ **6.22.10**॥ 720

आरुजंश्चैव शैलाग्राञ्शिखराणि बभञ्ज च।
दिवि च स्म महामेघाः संहताः समहास्वनाः॥ **6.22.11**॥ 721

मुमुचुर्वैद्युतानग्नींस्ते महाशनयस्तदा।
यानि भूतानि दृश्यानि चुक्रुशुश्चाशनेः समम्॥ **6.22.12**॥ 722

अदृश्यानि च भूतानि मुमुचुर्भैरवस्वनम्।
शिश्यिरे चाभिभूतानि सन्त्रस्तान्युद्विजन्ति च॥ **6.22.13**॥ 723

सम्प्रविव्यथिरे चापि न च पस्पन्दिरे भयात्।
सह भूतैः सतोयोर्मिः सनागः सहराक्षसः॥ **6.22.14**॥ 724

सहसाभूत् ततो वेगाद् भीमवेगो महोदधिः।
योजनं व्यतिचक्राम वेलामन्यत्र सम्प्लवात्॥ **6.22.15**॥ 725

तं तथा समतिक्रान्तं नातिचक्राम राघवः।
समुद्धतममित्रघ्नो रामो नदनदीपतिम्॥ **6.22.16**॥ 726

ततो मध्यात् समुद्रस्य सागरः स्वयमुत्थितः।
उदयाद्रिमहाशैलान्मेरोरिव दिवाकरः॥ **6.22.17**॥ 727

पन्नगैः सह दीप्तास्यैः समुद्रः प्रत्यदृश्यत।
स्निग्धवैदूर्यसङ्काशो जाम्बूनदविभूषणः॥ **6.22.18**॥ 728

रक्तमाल्याम्बरधरः पद्मपत्रनिभेक्षणः।
सर्वपुष्पमयीं दिव्यां शिरसा धारयन् स्रजम्॥ **6.22.19**॥ 729

जातरूपमयैश्चैव तपनीयविभूषणैः।
आत्मजानां च रत्नानां भूषितो भूषणोत्तमैः॥ **6.22.20**॥ 730

धातुभिर्मण्डितः शैलो विविधैर्हिमवानिव।
एकावलीमध्यगतं तरलं पाण्डरप्रभम्॥ **6.22.21**॥ 731

विपुलेनोरसा बिभ्रत्कौस्तुभस्य सहोदरम्।
आघूर्णिततरङ्गौघः कालिकानिलसङ्कुलः॥ **6.22.22**॥ 732

गङ्गासिन्धुप्रधानाभिरापगाभिः समावृतः।
उद्धर्तितमहाग्राहः सभ्रान्तोरगराक्षसः॥ **6.22.23**॥ 733

देवतानां सुरूपाभिर्नानारूपाभिरीश्वरः।
सागरः समुपक्रम्य पूर्वमामन्त्र्य वीर्यवान्॥ **6.22.24**॥ 734

अब्रवीत् प्राञ्जलिर्वाक्यं राघवं शरपाणिनम्॥ **6.22.25**॥ 735

पृथिवी वायुराकाशमापो ज्योतिश्च राघव।
स्वभावे सौम्य तिष्ठन्ति शाश्वतं मार्गमाश्रिताः॥ **6.22.26**॥ 736

तत्स्वभावो ममाप्येष यदगाधोऽहमप्लवः।
विकारस्तु भवेद् गाध एतत् ते प्रवदाम्यहम्॥ **6.22.27**॥ 737

न कामान्न च लोभाद् वा न भयात् पार्थिवात्मज।
ग्राहनक्राकुलजलं स्तम्भयेयं कथञ्चन॥ **6.22.28**॥ 738

विधास्ये येन गन्तासि विषहिष्येऽप्यहं तथा।
न ग्राहा विधमिष्यन्ति यावत्सेना तरिष्यति।
हरीणां तरणे राम करिष्यामि यथा स्थलम्॥ **6.22.29**॥ 739

तमब्रवीत् तदा रामः शृणु मे वरुणालय।
अमोघोऽयं महाबाणः कस्मिन् देशे निपात्यताम्॥ **6.22.30**॥ 740

रामस्य वचनं श्रुत्वा तं च दृष्ट्वा महाशरम्।
महोदधिर्महातेजा राघवं वाक्यमब्रवीत्॥ **6.22.31**॥ 741

उत्तरेणावकाशोऽस्ति कश्चित् पुण्यतरो मम।
द्रुमकुल्य इति ख्यातो लोके ख्यातो यथा भवान्॥ **6.22.32**॥ 742

उग्रदर्शनकर्माणो बहवस्तत्र दस्यवः।
आभीरप्रमुखाः पापाः पिबन्ति सलिलं मम॥ **6.22.33**॥ 743

तैर्न तत्स्पर्शनं पापं सहेयं पापकर्मभिः।
अमोघः क्रियतां राम अयं तत्र शरोत्तमः॥ **6.22.34**॥ 744

तस्य तद् वचनं श्रुत्वा सागरस्य महात्मनः।
मुमोच तं शरं दीप्तं परं सागरदर्शनात्॥ **6.22.35**॥ 745

तेन तन्मरुकान्तारं पृथिव्यां किल विश्रुतम्।
निपातितः शरो यत्र वज्राशनिसमप्रभः॥ **6.22.36**॥ 746

ननाद च तदा तत्र वसुधा शल्यपीडिता।
तस्माद् व्रणमुखात् तोयमुत्पपात रसातलात्॥ **6.22.37**॥ 747

स बभूव तदा कूपो व्रण इत्येव विश्रुतः।
सततं चोत्थितं तोयं समुद्रस्येव दृश्यते॥ **6.22.38**॥ 748

अवदारणशब्दश्च दारुणः समपद्यत।
तस्मात् तद् बाणपातेन अपः कुक्षिष्वशोषयत्॥ **6.22.39**॥ 749

विख्यातं त्रिषु लोकेषु मरुकान्तारमेव च।
शोषयित्वा तु तं कुक्षिं रामो दशरथात्मजः॥ **6.22.40**॥ 750

वरं तस्मै ददौ विद्वान् मरवेऽमरविक्रमः॥ **6.22.41**॥ 751

पशव्यश्चाल्परोगश्च फलमूलरसायुतः।
बहुस्नेहो बहुक्षीरः सुगन्धिर्विविधौषधिः॥ **6.22.42**॥ 752

एवमेतैश्च संयुक्तो बहुभिः संयुतो मरुः।
रामस्य वरदानाच्च शिवः पन्था बभूव ह॥ **6.22.43**॥ 753

तस्मिन् दग्धे तदा कुक्षौ समुद्रः सरितां पतिः।
राघवं सर्वशास्त्रज्ञमिदं वचनमब्रवीत्॥ **6.22.44**॥ 754

अयं सौम्य नलो नाम तनयो विश्वकर्मणः।
पित्रा दत्तवरः श्रीमान् प्रीतिमान् विश्वकर्मणः॥ **6.22.45**॥ 755

एष सेतुं महोत्साहः करोतु मयि वानरः।
तमहं धारयिष्यामि यथा ह्येष पिता तथा॥ **6.22.46**॥ 756

एवमुक्त्वोदधिर्नष्टः समुत्थाय नलस्ततः।
अब्रवीद् वानरश्रेष्ठो वाक्यं रामं महाबलम्॥ **6.22.47**॥ 757

अहं सेतुं करिष्यामि विस्तीर्णे मकरालये।
पितुः सामर्थ्यमासाद्य तत्त्वमाह महोदधिः॥ **6.22.48**॥ 758

दण्ड एव वरो लोके पुरुषस्येति मे मतिः।
धिक् क्षमामकृतज्ञेषु सान्त्वं दानमथापि वा॥ **6.22.49**॥ 759

अयं हि सागरो भीमः सेतुकर्मदिदृक्षया।
ददौ दण्डभयाद् गाधं राघवाय महोदधिः॥ **6.22.50**॥ 760

मम मातुर्वरो दत्तो मन्दरे विश्वकर्मणा।
मया तु सदृशः पुत्रस्तव देवि भविष्यति॥ **6.22.51**॥ 761

औरसस्तस्य पुत्रोऽहं सदृशो विश्वकर्मणा।
स्मारितोऽस्म्यहमेतेन तत्त्वमाह महोदधिः।
न चाप्यहमनुक्तो वः प्रब्रूयामात्मनो गुणान्॥ **6.22.52**॥ 762

समर्थश्चाप्यहं सेतुं कर्तुं वै वरुणालये।
तस्मादद्यैव बध्नन्तु सेतुं वानरपुङ्गवाः॥ **6.22.53**॥ 763

ततो विसृष्टा रामेण सर्वतो हरिपुङ्गवाः।
उत्पेततुर्महारण्यं हृष्टाः शतसहस्रशः॥ **6.22.54**॥ 764

ते नगान् नगसङ्काशाः शाखामृगगणर्षभाः।
बभञ्जुः पादपांस्तत्र प्रचकर्षुश्च सागरम्॥ **6.22.55**॥ 765

ते सालैश्चाश्वकर्णैश्च धवैर्वंशैश्च वानराः।
कुटजैरर्जुनैस्तालैस्तिलकैस्तिनिशैरपि॥ **6.22.56**॥ 766

बिल्वकैः सप्तपर्णैश्च कर्णिकारैश्च पुष्पितैः।
चूतैश्चाशोकवृक्षैश्च सागरं समपूरयन्॥ **6.22.57**॥ 767

समूलांश्च विमूलांश्च पादपान् हरिसत्तमाः।
इन्द्रकेतूनिवोद्यम्य प्रजह्रुर्वानरास्तरून्॥ **6.22.58**॥ 768

तालान् दाडिमगुल्मांश्च नारिकेलविभीतकान्।
करीरान् बकुलान् निम्बान् समाजह्रुरितस्ततः॥ **6.22.59**॥ 769

हस्तिमात्रान् महाकायाः पाषाणांश्च महाबलाः।
पर्वतांश्च समुत्पाट्य यन्त्रैः परिवहन्ति च॥ **6.22.60**॥ 770

प्रक्षिप्यमाणैरचलैः सहसा जलमुद्धृतम्।
समुत्ससर्प चाकाशमवासर्पत् ततः पुनः॥ **6.22.61**॥ 771

समुद्रं क्षोभयामासुर्निपतन्तः समन्ततः।
सूत्राण्यन्ये प्रगृह्णन्ति ह्यायतं शतयोजनम्॥ **6.22.62**॥ 772

नलश्चक्रे महासेतुं मध्ये नदनदीपतेः।
स तदा क्रियते सेतुर्वानरैर्घोरकर्मभिः॥ **6.22.63**॥ 773

दण्डानन्ये प्रगृह्णन्ति विचिन्वन्ति तथापरे।
वानरैः शतशस्तत्र रामस्याज्ञापुरःसरैः॥ **6.22.64**॥ 774

मेघाभैः पर्वताभैश्च तृणैः काष्ठैर्बबन्धिरे।
पुष्पिताग्रैश्च तरुभिः सेतुं बध्नन्ति वानराः॥ **6.22.65**॥ 775

पाषाणांश्च गिरिप्रख्यान् गिरीणां शिखराणि च।
दृश्यन्ते परिधावन्तो गृह्य दानवसन्निभाः॥ **6.22.66**॥ 776

शिलानां क्षिप्यमाणानां शैलानां तत्र पात्यताम्।
बभूव तुमुलः शब्दस्तदा तस्मिन् महोदधौ॥ **6.22.67**॥ 777

कृतानि प्रथमेनाह्ना योजनानि चतुर्दश।
प्रहृष्टैर्गजसङ्काशैस्त्वरमाणैः प्लवङ्गमैः॥ **6.22.68**॥ 778

द्वितीयेन तथैवाह्ना योजनानि तु विंशतिः।
कृतानि प्लवगैस्तूर्णं भीमकायैर्महाबलैः॥ **6.22.69**॥ 779

अह्ना तृतीयेन तथा योजनानि तु सागरे।
त्वरमाणैर्महाकायैरेकविंशतिरेव च॥ **6.22.70**॥ 780

चतुर्थेन तथा चाह्ना द्वाविंशतिरथापि वा।
योजनानि महावेगैः कृतानि त्वरितैस्ततः॥ **6.22.71**॥ 781

पञ्चमेन तथा चाह्ना प्लवगैः क्षिप्रकारिभिः।
योजनानि त्रयोविंशत् सुवेलमधिकृत्य वै॥ **6.22.72**॥ 782

स वानरवरः श्रीमान् विश्वकर्मात्मजो बली।
बबन्ध सागरे सेतुं यथा चास्य पिता तथा॥ **6.22.73**॥ 783

स नलेन कृतः सेतुः सागरे मकरालये।
शुशुभे सुभगः श्रीमान् स्वातीपथ इवाम्बरे॥ **6.22.74**॥ 784

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
आगम्य गगने तस्थुर्द्रष्टुकामास्तदद्भुतम्॥ **6.22.75**॥ 785

दशयोजनविस्तीर्णं शतयोजनमायतम्।
ददृशुर्देवगन्धर्वा नलसेतुं सुदुष्करम्॥ **6.22.76**॥ 786

आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः।
तमचिन्त्यमसह्यं च ह्यद्भुतं लोमहर्षणम्॥ **6.22.77**॥ 787

ददृशुः सर्वभूतानि सागरे सेतुबन्धनम्।
तानि कोटिसहस्राणि वानराणां महौजसाम्॥ **6.22.78**॥ 788

बध्नन्तः सागरे सेतुं जग्मुः पारं महोदधेः।
विशालः सुकृतः श्रीमान् सुभूमिः सुसमाहितः॥ **6.22.79**॥ 789

अशोभत महान् सेतुः सीमन्त इव सागरे।
ततः पारे समुद्रस्य गदापाणिर्विभीषणः॥ **6.22.80**॥ 790

परेषामभिघातार्थमतिष्ठत् सचिवैः सह।
सुग्रीवस्तु ततः प्राह रामं सत्यपराक्रमम्॥ **6.22.81**॥ 791

हनूमन्तं त्वमारोह अङ्गदं त्वथ लक्ष्मणः।
अयं हि विपुलो वीर सागरो मकरालयः॥ **6.22.82**॥ 792

वैहायसौ युवामेतौ वानरौ धारयिष्यतः।
अग्रतस्तस्य सैन्यस्य श्रीमान् रामः सलक्ष्मणः॥ **6.22.83**॥ 793

जगाम धन्वी धर्मात्मा सुग्रीवेण समन्वितः।
अन्ये मध्येन गच्छन्ति पार्श्वतोऽन्ये प्लवङ्गमाः॥ **6.22.84**॥ 794

सलिलं प्रपतन्त्यन्ये मार्गमन्ये प्रपेदिरे।
केचिद् वैहायसगताः सुपर्णा इव पुप्लुवुः॥ **6.22.85**॥ 795

घोषेण महता घोषं सागरस्य समुच्छ्रितम्।
भीममन्तर्दधे भीमा तरन्ती हरिवाहिनी॥ **6.22.86**॥ 796

वानराणां हि सा तीर्णा वाहिनी नलसेतुना।
तीरे निविविशे राज्ञो बहुमूलफलोदके॥ **6.22.87**॥ 797

तदद्भुतं राघवकर्म दुष्करं
समीक्ष्य देवाः सह सिद्धचारणैः।
उपेत्य रामं सहसा महर्षिभि -
स्तमभ्यषिञ्चन् सुशुभैर्जलैःपृथक्॥ **6.22.88**॥ 798

जयस्व शत्रून् नरदेव मेदिनीं
ससागरां पालय शाश्वतीः समाः।
इतीव रामं नरदेवसत्कृतं
शुभैर्वचोभिर्विविधैरपूजयन्॥ **6.22.89**॥ 799

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वाविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रयोविंशः सर्गः ॥

श्रीरामेण लक्ष्मणं प्रति विनाशसूचकानां लक्षणानां वर्णनं लङ्कां प्रत्याक्रमणं च

निमित्तानि निमित्तज्ञो दृष्ट्वा लक्ष्मणपूर्वजः।
सौमित्रिं सम्परिष्वज्य इदं वचनमब्रवीत्॥ **6.23.1**॥ 800

परिगृह्योदकं शीतं वनानि फलवन्ति च।
बलौघं संविभज्येमं व्यूह्य तिष्ठेम लक्ष्मण॥ **6.23.2**॥ 801

लोकक्षयकरं भीमं भयं पश्याम्युपस्थितम्।
प्रबर्हणं प्रवीराणामृक्षवानररक्षसाम्॥ **6.23.3**॥ 802

वाताश्च कलुषा वान्ति कम्पते च वसुन्धरा।
पर्वताग्राणि वेपन्ते पतन्ति च महीरुहाः॥ **6.23.4**॥ 803

मेघाः क्रव्यादसङ्काशाः परुषाः परुषस्वनाः।
क्रूराः क्रूरं प्रवर्षन्ति मिश्रं शोणितबिन्दुभिः॥ **6.23.5**॥ 804

रक्तचन्दनसङ्काशा सन्ध्या परमदारुणा।
ज्वलतः प्रपतत्येतदादित्यादग्निमण्डलम्॥ **6.23.6**॥ 805

दीना दीनस्वराः क्रूराः सर्वतो मृगपक्षिणः।
प्रत्यादित्यं विनर्दन्ति जनयन्तो महद्भयम्॥ **6.23.7**॥ 806

रजन्यामप्रकाशस्तु सन्तापयति चन्द्रमाः।
कृष्णरक्तांशुपर्यन्तो लोकक्षय इवोदितः॥ **6.23.8**॥ 807

ह्रस्वो रूक्षोऽप्रशस्तश्च परिवेषस्तु लोहितः।
आदित्ये विमले नीलं लक्ष्म लक्ष्मण दृश्यते॥ **6.23.9**॥ 808

रजसा महता चापि नक्षत्राणि हतानि च।
युगान्तमिव लोकानां पश्य शंसन्ति लक्ष्मण॥ **6.23.10**॥ 809

काकाः श्येनास्तथा नीचा गृध्राः परिपतन्ति च।
शिवाश्चाप्यशुभान् नादान् नदन्ति सुमहाभयान्॥ **6.23.11**॥ 810

शैलैः शूलैश्च खड्गैश्च विमुक्तैः कपिराक्षसैः।
भविष्यत्यावृता भूमिर्मांसशोणितकर्दमा॥ **6.23.12**॥ 811

क्षिप्रमद्यैव दुर्धर्षां पुरीं रावणपालिताम्।
अभियाम जवेनैव सर्वैर्हरिभिरावृताः॥ **6.23.13**॥ 812

इत्येवमुक्त्वा धन्वी स रामः सङ्ग्रामधर्षणः।
प्रतस्थे पुरतो रामो लङ्कामभिमुखो विभुः॥ **6.23.14**॥ 813

सविभीषणसुग्रीवाः सर्वे ते वानरर्षभाः।
प्रतस्थिरे विनर्दन्तो धृतानां द्विषतां वधे॥ **6.23.15**॥ 814

राघवस्य प्रियार्थं तु सुतरां वीर्यशालिनाम्।
हरीणां कर्मचेष्टाभिस्तुतोष रघुनन्दनः॥ **6.23.16**॥ 815

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रयोविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्विंशः सर्गः ॥

श्रीरामेण लक्ष्मणं प्रति लङ्काशोभां वर्णयित्वा सेनां व्यूह्य स्थापयितुमादेशः, श्रीरामाज्ञया मुक्तेन शुकेन रावणमुपगम्य तदग्रे श्रीरामसैन्यशक्तेः प्राबल्यस्य वर्णनं रावणेन स्वबलस्य विकत्थनं च

सा वीरसमिती राज्ञा विरराज व्यवस्थिता।
शशिना शुभनक्षत्रा पौर्णमासीव शारदी॥ **6.24.1**॥ 816

प्रचचाल च वेगेन त्रस्ता चैव वसुन्धरा।
पीड्यमाना बलौघेन तेन सागरवर्चसा॥ **6.24.2**॥ 817

ततः शुश्रुवुराक्रुष्टं लङ्कायां काननौकसः।
भेरीमृदङ्गसङ्घुष्टं तुमुलं लोमहर्षणम्॥ **6.24.3**॥ 818

बभूवुस्तेन घोषेण संहृष्टा हरियूथपाः।
अमृष्यमाणास्तद् घोषं विनेदुर्घोषवत्तरम्॥ **6.24.4**॥ 819

राक्षसास्तत् प्लवङ्गानां शुश्रुवुस्तेऽपि गर्जितम्।
नर्दतामिव दृप्तानां मेघानामम्बरे स्वनम्॥ **6.24.5**॥ 820

दृष्ट्वा दाशरथिर्लङ्कां चित्रध्वजपताकिनीम्।
जगाम मनसा सीतां दूयमानेन चेतसा॥ **6.24.6**॥ 821

अत्र सा मृगशावाक्षी रावणेनोपरुध्यते।
अभिभूता ग्रहेणेव लोहिताङ्गेन रोहिणी॥ **6.24.7**॥ 822

दीर्घमुष्णं च निःश्वस्य समुद्वीक्ष्य च लक्ष्मणम्।
उवाच वचनं वीरस्तत्कालहितमात्मनः॥ **6.24.8**॥ 823

आलिखन्तीमिवाकाशमुत्थितां पश्य लक्ष्मण।
मनसेव कृतां लङ्कां नगाग्रे विश्वकर्मणा॥ **6.24.9**॥ 824

विमानैर्बहुभिर्लङ्का सङ्कीर्णा रचिता पुरा।
विष्णोः पदमिवाकाशं छादितं पाण्डुभिर्घनैः॥ **6.24.10**॥ 825

पुष्पितैः शोभिता लङ्का वनैश्चित्ररथोपमैः।
नानापतगसङ्घुष्टफलपुष्पोपगैः शुभैः॥ **6.24.11**॥ 826

पश्य मत्तविहङ्गानि प्रलीनभ्रमराणि च।
कोकिलाकुलखण्डानि दोधवीति शिवोऽनिलः॥ **6.24.12**॥ 827

इति दाशरथी रामो लक्ष्मणं समभाषत।
बलं च तत्र विभजच्छास्त्रदृष्टेन कर्मणा॥ **6.24.13**॥ 828

शशास कपिसेनां तां बलादादाय वीर्यवान्।
अङ्गदः सह नीलेन तिष्ठेदुरसि दुर्जयः॥ **6.24.14**॥ 829

तिष्ठेद् वानरवाहिन्या वानरौघसमावृतः।
आश्रितो दक्षिणं पार्श्वमृषभो नाम वानरः॥ **6.24.15**॥ 830

गन्धहस्तीव दुर्धर्षस्तरस्वी गन्धमादनः।
तिष्ठेद् वानरवाहिन्याः सव्यं पार्श्वमधिष्ठितः॥ **6.24.16**॥ 831

मूर्ध्नि स्थास्याम्यहं यत्तो लक्ष्मणेन समन्वितः।
जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः॥ **6.24.17**॥ 832

ऋक्षमुख्या महात्मानः कुक्षिं रक्षन्तु ते त्रयः।
जघनं कपिसेनायाः कपिराजोऽभिरक्षतु।
पश्चार्धमिव लोकस्य प्रचेतास्तेजसा वृतः॥ **6.24.18**॥ 833

सुविभक्तमहाव्यूहा महावानररक्षिता।
अनीकिनी सा विबभौ यथा द्यौः साभ्रसम्प्लवा॥ **6.24.19**॥ 834

प्रगृह्य गिरिशृङ्गाणि महतश्च महीरुहान्।
आसेदुर्वानरा लङ्कां मिमर्दयिषवो रणे॥ **6.24.20**॥ 835

शिखरैर्विकिरामैनां लङ्कां मुष्टिभिरेव वा।
इति स्म दधिरे सर्वे मनांसि हरिपुङ्गवाः॥ **6.24.21**॥ 836

ततो रामो महातेजाः सुग्रीवमिदमब्रवीत्।
सुविभक्तानि सैन्यानि शुक एष विमुच्यताम्॥ **6.24.22**॥ 837

रामस्य तु वचः श्रुत्वा वानरेन्द्रो महाबलः।
मोचयामास तं दूतं शुकं रामस्य शासनात्॥ **6.24.23**॥ 838

मोचितो रामवाक्येन वानरैश्च निपीडितः।
शुकः परमसन्त्रस्तो रक्षोधिपमुपागमत्॥ **6.24.24**॥ 839

रावणः प्रहसन्नेव शुकं वाक्यमुवाच ह।
किमिमौ ते सितौ पक्षौ लूनपक्षश्च दृश्यसे॥ **6.24.25**॥ 840

कच्चिन्नानेकचित्तानां तेषां त्वं वशमागतः।
ततः स भयसंविग्नस्तेन राज्ञाभिचोदितः।
वचनं प्रत्युवाचेदं राक्षसाधिपमुत्तमम्॥ **6.24.26**॥ 841

सागरस्योत्तरे तीरेऽब्रुवं ते वचनं तथा।
यथा सन्देशमक्लिष्टं सान्त्वयञ्श्लक्ष्णया गिरा॥ **6.24.27**॥ 842

क्रुद्धैस्तैरहमुत्प्लुत्य दृष्टमात्रः प्लवङ्गमैः।
गृहीतोऽस्म्यपि चारब्धो हन्तुं लोप्तुं च मुष्टिभिः॥ **6.24.28**॥ 843

न ते सम्भाषितुं शक्याः सम्प्रश्नोऽत्र न विद्यते।
प्रकृत्या कोपनास्तीक्ष्णा वानरा राक्षसाधिप॥ **6.24.29**॥ 844

स च हन्ता विराधस्य कबन्धस्य खरस्य च।
सुग्रीवसहितो रामः सीतायाः पदमागतः॥ **6.24.30**॥ 845

स कृत्वा सागरे सेतुं तीर्त्वा च लवणोदधिम्।
एष रक्षांसि निर्धूय धन्वी तिष्ठति राघवः॥ **6.24.31**॥ 846

ऋक्षवानरसङ्घानामनीकानि सहस्रशः।
गिरिमेघनिकाशानां छादयन्ति वसुन्धराम्॥ **6.24.32**॥ 847

राक्षसानां बलौघस्य वानरेन्द्रबलस्य च।
नैतयोर्विद्यते सन्धिर्देवदानवयोरिव॥ **6.24.33**॥ 848

पुरा प्राकारमायान्ति क्षिप्रमेकतरं कुरु।
सीतां चास्मै प्रयच्छाशु युद्धं वापि प्रदीयताम्॥ **6.24.34**॥ 849

शुकस्य वचनं श्रुत्वा रावणो वाक्यमब्रवीत्।
रोषसंरक्तनयनो निर्दहन्निव चक्षुषा॥ **6.24.35**॥ 850

यदि मां प्रति युद्धेरन् देवगन्धर्वदानवाः।
नैव सीतां प्रदास्यामि सर्वलोकभयादपि॥ **6.24.36**॥ 851

कदा समभिधावन्ति मामका राघवं शराः।
वसन्ते पुष्पितं मत्ता भ्रमरा इव पादपम्॥ **6.24.37**॥ 852

कदा शोणितदिग्धाङ्गं दीप्तैः कार्मुकविच्युतैः।
शरैरादीपयिष्यामि उल्काभिरिव कुञ्जरम्॥ **6.24.38**॥ 853

तच्चास्य बलमादास्ये बलेन महता वृतः।
ज्योतिषामिव सर्वेषां प्रभामुद्यन् दिवाकरः॥ **6.24.39**॥ 854

सागरस्येव मे वेगो मारुतस्येव मे बलम्।
न च दाशरथिर्वेद तेन मां योद्धुमिच्छति॥ **6.24.40**॥ 855

न मे तूणीशयान् बाणान् सविषानिव पन्नगान्।
रामः पश्यति सङ्ग्रामे तेन मां योद्धुमिच्छति॥ **6.24.41**॥ 856

न जानाति पुरा वीर्यं मम युद्धे स राघवः।
मम चापमयीं वीणां शरकोणैः प्रवादिताम्॥ **6.24.42**॥ 857

ज्याशब्दतुमुलां घोरामार्तगीतमहास्वनाम्।
नाराचतलसन्नादां नदीमहितवाहिनीम्।
अवगाह्य महारङ्गं वादयिष्याम्यहं रणे॥ **6.24.43**॥ 858

न वासवेनापि सहस्रचक्षुषा
युद्धेऽस्मि शक्यो वरुणेन वा स्वयम्।
यमेन वा धर्षयितुं शराग्निना
महाहवे वैश्रवणेन वा पुनः॥ **6.24.44**॥ 859

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्विंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चविंशः सर्गः ॥

रावणेन निगूढतया शुकसारणयोर्वानरसेनायां प्रेषणं, विभीषणेन तयोर्निग्रहणं, श्रीरामकृपया मोक्षणं तदीयं सन्देशमादाय ताभ्यां लङ्कां गत्वा रावणस्य प्रबोधनं च

सबले सागरं तीर्णे रामे दशरथात्मजे।
अमात्यौ रावणः श्रीमानब्रवीच्छुकसारणौ॥ **6.25.1** ॥ 860

समग्रं सागरं तीर्णं दुस्तरं वानरं बलम्।
अभूतपूर्वं रामेण सागरे सेतुबन्धनम्॥ **6.25.2** ॥ 861

सागरे सेतुबन्धं तं न श्रद्दध्यां कथञ्चन।
अवश्यं चापि सङ्ख्येयं तन्मया वानरं बलम्॥ **6.25.3** ॥ 862

भवन्तौ वानरं सैन्यं प्रविश्यानुपलक्षितौ।
परिमाणं च वीर्यं च ये च मुख्याः प्लवङ्गमाः॥ **6.25.4** ॥ 863

मन्त्रिणो ये च रामस्य सुग्रीवस्य च सम्मताः।
ये पूर्वमभिवर्तन्ते ये च शूराः प्लवङ्गमाः॥ **6.25.5** ॥ 864

स च सेतुर्यथा बद्धः सागरे सलिलार्णवे।
निवेशं च यथा तेषां वानराणां महात्मनाम्॥ **6.25.6** ॥ 865

रामस्य व्यवसायं च वीर्यं प्रहरणानि च।
लक्ष्मणस्य च वीरस्य तत्त्वतो ज्ञातुमर्हथः॥ **6.25.7** ॥ 866

कश्च सेनापतिस्तेषां वानराणां महात्मनाम्।
तच्च ज्ञात्वा यथातत्त्वं शीघ्रमागन्तुमर्हथः॥ **6.25.8**॥ 867

इति प्रतिसमादिष्टौ राक्षसौ शुकसारणौ।
हरिरूपधरौ वीरौ प्रविष्टौ वानरं बलम्॥ **6.25.9**॥ 868

ततस्तद् वानरं सैन्यमचिन्त्यं लोमहर्षणम्।
सङ्ख्यातुं नाध्यगच्छेतां तदा तौ शुकसारणौ॥ **6.25.10**॥ 869

तत् स्थितं पर्वताग्रेषु निर्झरेषु गुहासु च।
समुद्रस्य च तीरेषु वनेषूपवनेषु च।
तरमाणं च तीर्णं च तर्तुकामं च सर्वशः॥ **6.25.11**॥ 870

निविष्टं निविशच्चैव भीमनादं महाबलम्।
तद्बलार्णवमक्षोभ्यं ददृशाते निशाचरौ॥ **6.25.12**॥ 871

तौ ददर्श महातेजाः प्रतिच्छन्नौ विभीषणः।
आचचक्षे स रामाय गृहीत्वा शुकसारणौ॥ **6.25.13**॥ 872

तस्यैतौ राक्षसेन्द्रस्य मन्त्रिणौ शुकसारणौ।
लङ्कायाः समनुप्राप्तौ चारौ परपुरञ्जय॥ **6.25.14**॥ 873

तौ दृष्ट्वा व्यथितौ रामं निराशौ जीविते तथा।
कृताञ्जलिपुटौ भीतौ वचनं चेदमूचतुः॥ **6.25.15**॥ 874

आवामिहागतौ सौम्य रावणप्रहितावुभौ।
परिज्ञातुं बलं सर्वं तदिदं रघुनन्दन॥ **6.25.16**॥ 875

तयोस्तद् वचनं श्रुत्वा रामो दशरथात्मजः।
अब्रवीत् प्रहसन् वाक्यं सर्वभूतहिते रतः॥ **6.25.17**॥ 876

यदि दृष्टं बलं सर्वं वयं वा सुसमाहिताः।
यथोक्तं वा कृतं कार्यं छन्दतः प्रतिगम्यताम्॥ **6.25.18**॥ 877

अथ किञ्चिददृष्टं वा भूयस्तद् द्रष्टुमर्हथः।
विभीषणो वा कात्स्न्र्येन पुनः सन्दर्शयिष्यति॥ **6.25.19**॥ 878

न चेदं ग्रहणं प्राप्य भेतव्यं जीवितं प्रति।
न्यस्तशस्त्रौ गृहीतौ च न दूतौ वधमर्हथः॥ **6.25.20**॥ 879

प्रच्छन्नौ च विमुञ्चेमौ चारौ रात्रिञ्चरावुभौ।
शत्रुपक्षस्य सततं विभीषण विकर्षिणौ॥ **6.25.21**॥ 880

प्रविश्य महतीं लङ्कां भवद्भ्यां धनदानुजः।
वक्तव्यो रक्षसां राजा यथोक्तं वचनं मम॥ **6.25.22**॥ 881

यद् बलं त्वं समाश्रित्य सीतां मे हृतवानसि।
तद् दर्शय यथाकामं ससैन्यश्च सबान्धवः॥ **6.25.23**॥ 882

श्वः काल्ये नगरीं लङ्कां सप्राकारां सतोरणाम्।
रक्षसां च बलं पश्य शरैर्विध्वंसितं मया॥ **6.25.24**॥ 883

क्रोधं भीममहं मोक्ष्ये ससैन्ये त्वयि रावण।
श्वः काल्ये वज्रवान् वज्रं दानवेष्विव वासवः॥ **6.25.25**॥ 884

इति प्रतिसमादिष्टौ राक्षसौ शुकसारणौ।
जयेति प्रतिनन्द्यैनं राघवं धर्मवत्सलम्॥ **6.25.26**॥ 885

आगम्य नगरीं लङ्कामब्रूतां राक्षसाधिपम्।
विभीषणगृहीतौ तु वधार्थं राक्षसेश्वर॥ **6.25.27**॥ 886

दृष्ट्वा धर्मात्मना मुक्तौ रामेणामिततेजसा।
एकस्थानगता यत्र चत्वारः पुरुषर्षभाः॥ **6.25.28**॥ 887

लोकपालसमाः शूराः कृतास्त्रा दृढविक्रमाः।
रामो दाशरथिः श्रीमान् लक्ष्मणश्च विभीषणः॥ **6.25.29**॥ 888

सुग्रीवश्च महातेजा महेन्द्रसमविक्रमः।
एते शक्ताः पुरीं लङ्कां सप्राकारां सतोरणाम्॥ **6.25.30**॥ 889

उत्पाट्य सङ्क्रामयितुं सर्वे तिष्ठन्तु वानराः।
यादृशं तद्धि रामस्य रूपं प्रहरणानि च॥ **6.25.31**॥ 890

वधिष्यति पुरीं लङ्कामेकस्तिष्ठन्तु ते त्रयः।
रामलक्ष्मणगुप्ता सा सुग्रीवेण च वाहिनी।
बभूव दुर्धर्षतरा सर्वैरपि सुरासुरैः॥ **6.25.32**॥ 891

प्रहृष्टयोधा ध्वजिनी महात्मनां
वनौकसां सम्प्रति योद्धुमिच्छताम्।
अलं विरोधेन शमो विधीयतां
प्रदीयतां दाशरथाय मैथिली॥ **6.25.33**॥ 892

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षड्विंशः सर्गः ॥

सारणेन रावणं प्रति पृथक् पृथग् वानरयूथपतीनां परिचयदानम्

तद्वचः सत्यमक्लीबं सारणेनाभिभाषितम्।
निशम्य रावणो राजा प्रत्यभाषत सारणम्॥ **6.26.1**॥ 893

यदि मामभियुञ्जीरन् देवगन्धर्वदानवाः।
नैव सीतामहं दद्यां सर्वलोकभयादपि॥ **6.26.2**॥ 894

त्वं तु सौम्य परित्रस्तो हरिभिः पीडितो भृशम्।
प्रतिप्रदानमद्यैव सीतायाः साधु मन्यसे॥ **6.26.3**॥ 895

को हि नाम सपत्नो मां समरे जेतुमर्हति।
इत्युक्त्वा परुषं वाक्यं रावणो राक्षसाधिपः॥ **6.26.4**॥ 896

आरुरोह ततः श्रीमान् प्रासादं हिमपाण्डुरम्।
बहुतालसमुत्सेधं रावणोऽथ दिदृक्षया॥ **6.26.5**॥ 897

ताभ्यां चराभ्यां सहितो रावणः क्रोधमूर्च्छितः।
पश्यमानः समुद्रं तं पर्वतांश्च वनानि च॥ **6.26.6**॥ 898

ददर्श पृथिवीदेशं सुसम्पूर्णं प्लवङ्गमैः।
तदपारमसह्यं च वानराणां महाबलम्॥ **6.26.7**॥ 899

आलोक्य रावणो राजा परिपप्रच्छ सारणम्।
एषां के वानरा मुख्याः के शूराः के महाबलाः॥ **6.26.8**॥ 900

के पूर्वमभिवर्तन्ते महोत्साहाः समन्ततः।
केषां शृणोति सुग्रीवः के वा यूथपयूथपाः॥ **6.26.9**॥ 901

सारणाचक्ष्व मे सर्वं किं प्रभावाः प्लवङ्गमाः।
सारणो राक्षसेन्द्रस्य वचनं परिपृच्छतः॥ **6.26.10**॥ 902

आबभाषेऽथ मुख्यज्ञो मुख्यांस्तत्र वनौकसः।
एष योऽभिमुखो लङ्कां नर्दंस्तिष्ठति वानरः॥ **6.26.11**॥ 903

यूथपानां सहस्राणां शतेन परिवारितः।
यस्य घोषेण महता सप्राकारा सतोरणा॥ **6.26.12**॥ 904

लङ्का प्रतिहता सर्वा सशैलवनकानना।
सर्वशाखामृगेन्द्रस्य सुग्रीवस्य महात्मनः॥ **6.26.13**॥ 905

बलाग्रे तिष्ठते वीरो नीलो नामैष यूथपः।
बाहू प्रगृह्य यः पद्भ्यां महीं गच्छति वीर्यवान्॥ **6.26.14**॥ 906

लङ्कामभिमुखः कोपादभीक्ष्णं च विजृम्भते।
गिरिशृङ्गप्रतीकाशः पद्मकिञ्जल्कसन्निभः॥ **6.26.15**॥ 907

स्फोटयत्यतिसंरब्धो लाङ्गूलं च पुनः पुनः।
यस्य लाङ्गूलशब्देन स्वनन्ति प्रदिशो दश॥ **6.26.16**॥ 908

एष वानरराजेन सुग्रीवेणाभिषेचितः।
युवराजोऽङ्गदो नाम त्वामाह्वयति संयुगे॥ **6.26.17**॥ 909

वालिनः सदृशः पुत्रः सुग्रीवस्य सदा प्रियः।
राघवार्थे पराक्रान्तः शक्रार्थे वरुणो यथा॥ **6.26.18**॥ 910

एतस्य सा मतिः सर्वा यद् दृष्टा जनकात्मजा।
हनूमता वेगवता राघवस्य हितैषिणा॥ **6.26.19**॥ 911

बहूनि वानरेन्द्राणामेष यूथानि वीर्यवान्।
परिगृह्याभियाति त्वां स्वेनानीकेन मर्दितुम्॥ **6.26.20**॥ 912

अनुवालिसुतस्यापि बलेन महता वृतः।
वीरस्तिष्ठति सङ्ग्रामे सेतुहेतुरयं नलः॥ **6.26.21**॥ 913

ये तु विष्टभ्य गात्राणि क्ष्वेडयन्ति नदन्ति च।
उत्थाय च विजृम्भन्ते क्रोधेन हरिपुङ्गवाः॥ **6.26.22**॥ 914

एते दुष्प्रसहा घोराश्चण्डाश्चण्डपराक्रमाः।
अष्टौ शतसहस्राणि दशकोटिशतानि च।
य एनमनुगच्छन्ति वीराश्चन्दनवासिनः॥ **6.26.23**॥ 915

एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम्।
श्वेतो रजतसङ्काशश्चपलो भीमविक्रमः॥ **6.26.24**॥ 916

बुद्धिमान् वानरः शूरस्त्रिषु लोकेषु विश्रुतः।
तूर्णं सुग्रीवमागम्य पुनर्गच्छति वानरः॥ **6.26.25**॥ 917

विभजन् वानरीं सेनामनीकानि प्रहर्षयन्।
यः पुरा गोमतीतीरे रम्यं पर्येति पर्वतम्॥ **6.26.26**॥ 918

नाम्ना संरोचनो नाम नानानगयुतो गिरिः।
तत्र राज्यं प्रशास्त्येष कुमुदो नाम यूथपः॥ **6.26.27**॥ 919

योऽसौ शतसहस्राणि सहर्षं परिकर्षति।
यस्य वाला बहुव्यामा दीर्घलाङ्गूलमाश्रिताः॥ **6.26.28**॥ 920

ताम्राः पीताः सिताः श्वेताः प्रकीर्णा घोरदर्शनाः।
अदीनो वानरश्चण्डः सङ्ग्राममभिकाङ्क्षति।
एषोऽप्याशंसते लङ्कां स्वेनानीकेन मर्दितुम्॥ **6.26.29**॥ 921

यस्त्वेष सिंहसङ्काशः कपिलो दीर्घकेसरः।
निभृतः प्रेक्षते लङ्कां दिधक्षन्निव चक्षुषा॥ **6.26.30**॥ 922

विन्ध्यं कृष्णगिरिं सह्यं पर्वतं च सुदर्शनम्।
राजन् सततमध्यास्ते स रम्भो नाम यूथपः।
शतं शतसहस्राणां त्रिंशच्च हरिपुङ्गवाः॥ **6.26.31**॥ 923

यं यान्तं वानरा घोराश्चण्डाश्चण्डपराक्रमाः।
परिवार्यानुगच्छन्ति लङ्कां मर्दितुमोजसा॥ **6.26.32**॥ 924

यस्तु कर्णौ विवृणुते जृम्भते च पुनः पुनः।
न तु संविजते मृत्योर्न च सेनां प्रधावति॥ **6.26.33**॥ 925

प्रकम्पते च रोषेण तिर्यक् च पुनरीक्षते।
पश्य लाङ्गूलविक्षेपं क्ष्वेडत्येष महाबलः॥ **6.26.34**॥ 926

महाजवो वीतभयो रम्यं साल्वेयपर्वतम्।
राजन् सततमध्यास्ते शरभो नाम यूथपः॥ **6.26.35**॥ 927

एतस्य बलिनः सर्वे विहारा नाम यूथपाः।
राजञ्छतसहस्राणि चत्वारिंशत्तथैव च॥ **6.26.36**॥ 928

यस्तु मेघ इवाकाशं महानावृत्य तिष्ठति।
मध्ये वानरवीराणां सुराणामिव वासवः॥ **6.26.37**॥ 929

भेरीणामिव सन्नादो यस्यैष श्रूयते महान्।
घोषः शाखामृगेन्द्राणां सङ्ग्राममभिकाङ्क्षताम्॥ **6.26.38**॥ 930

एष पर्वतमध्यास्ते पारियात्रमनुत्तमम्।
युद्धे दुष्प्रसहो नित्यं पनसो नाम यूथपः॥ **6.26.39**॥ 931

एनं शतसहस्राणां शतार्धं पर्युपासते।
यूथपा यूथपश्रेष्ठं येषां यूथानि भागशः॥ **6.26.40**॥ 932

यस्तु भीमा प्रवल्गन्तीं चमूं तिष्ठति शोभयन्।
स्थितां तीरे समुद्रस्य द्वितीय इव सागरः॥ **6.26.41**॥ 933

एष दर्दुरसङ्काशो विनतो नाम यूथपः।
पिबंश्चरति यो वेणां नदीनामुत्तमां नदीम्॥ **6.26.42**॥ 934

षष्टिः शतसहस्राणि बलमस्य प्लवङ्गमाः।
त्वामाह्वयति युद्धाय क्रोधनो नाम वानरः॥ **6.26.43**॥ 935

विक्रान्ता बलवन्तश्च यथा यूथानि भागशः।
यस्तु गैरिकवर्णाभं वपुः पुष्यति वानरः॥ **6.26.44**॥ 936

अवमत्य सदा सर्वान् वानरान् बलदर्पितः।
गवयो नाम तेजस्वी त्वां क्रोधादभिवर्तते॥ **6.26.45**॥ 937

एनं शतसहस्राणि सप्ततिः पर्युपासते।
एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम्॥ **6.26.46**॥ 938

एते दुष्प्रसहा वीरा येषां सङ्ख्या न विद्यते।
यूथपा यूथपश्रेष्ठास्तेषां यूथानि भागशः॥ **6.26.47**॥ 939

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षड्विंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तविंशः सर्गः ॥

वानरसैन्यस्य प्रधानयूथपतीनां परिचयः

तांस्तु ते सम्प्रवक्ष्यामि प्रेक्षमाणस्य यूथपान्।
राघवार्थे पराक्रान्ता ये न रक्षन्ति जीवितम्॥ **6.27.1** ॥ 940

स्निग्धा यस्य बहुव्यामा दीर्घलाङ्गूलमाश्रिताः।
ताम्राः पीताः सिताः श्वेताः प्रकीर्णा घोरकर्मणः॥ **6.27.2** ॥ 941

प्रगृहीताः प्रकाशन्ते सूर्यस्येव मरीचयः।
पृथिव्यां चानुकृष्यन्ते हरो नामैष वानरः॥ **6.27.3** ॥ 942

यं पृष्ठतोऽनुगच्छन्ति शतशोऽथ सहस्रशः।
वृक्षानुद्यम्य सहसा लङ्कारोहणतत्पराः॥ **6.27.4** ॥ 943

यूथपा हरिराजस्य किङ्कराः समुपस्थिताः।
नीलानिव महामेघांस्तिष्ठतो यांस्तु पश्यसि॥ **6.27.5** ॥ 944

असिताञ्जनसङ्काशान् युद्धे सत्यपराक्रमान्।
असङ्ख्येयाननिर्देशान् परं पारमिवोदधेः॥ **6.27.6** ॥ 945

पर्वतेषु च ये केचिद् विषयेषु नदीषु च।
एते त्वामभिवर्तन्ते राजन्नृक्षाः सुदारुणाः॥ **6.27.7** ॥ 946

एषां मध्ये स्थितो राजन् भीमाक्षो भीमदर्शनः।
पर्जन्य इव जीमूतैः समन्तात् परिवारितः॥ **6.27.8**॥ 947

ऋक्षवन्तं गिरिश्रेष्ठमध्यास्ते नर्मदां पिबन्।
सर्वर्क्षाणामधिपतिर्धूम्रो नामैष यूथपः॥ **6.27.9**॥ 948

यवीयानस्य तु भ्राता पश्यैनं पर्वतोपमम्।
भ्रात्रा समानो रूपेण विशिष्टस्तु पराक्रमे॥ **6.27.10**॥ 949

स एष जाम्बवान् नाम महायूथपयूथपः।
प्रशान्तो गुरुवर्ती च सम्ग्रहारेष्वमर्षणः॥ **6.27.11**॥ 950

एतेन साह्यं तु महत् कृतं शक्रस्य धीमता।
दैवासुरे जाम्बवता लब्धाश्च बहवो वराः॥ **6.27.12**॥ 951

आरुह्य पर्वताग्रेभ्यो महाभ्रविपुलाः शिलाः।
मुञ्चन्ति विपुलाकारा न मृत्योरुद्विजन्ति च॥ **6.27.13**॥ 952

राक्षसानां च सदृशाः पिशाचानां च रोमशाः।
एतस्य सैन्या बहवो विचरन्त्यमितौजसः॥ **6.27.14**॥ 953

य एनमभिसंरब्धं प्लवमानमवस्थितम्।
प्रेक्षन्ते वानराः सर्वे स्थिता यूथपयूथपम्॥ **6.27.15**॥ 954

एष राजन् सहस्राक्षं पर्युपास्ते हरीश्वरः।
बलेन बलसंयुक्तो दम्भो नामैष यूथपः॥ **6.27.16**॥ 955

यः स्थितं योजने शैलं गच्छन् पार्श्वेन सेवते।
ऊर्ध्वं तथैव कायेन गतः प्राप्नोति योजनम्॥ **6.27.17**॥ 956

यस्मात् तु परमं रूपं चतुष्पात्सु न विद्यते।
श्रुतः सन्नादनो नाम वानराणां पितामहः॥ **6.27.18**॥ 957

येन युद्धं तदा दत्तं रणे शक्रस्य धीमता।
पराजयश्च न प्राप्तः सोऽयं यूथपयूथपः॥ **6.27.19**॥ 958

यस्य विक्रममाणस्य शक्रस्येव पराक्रमः।
एष गन्धर्वकन्यायामुत्पन्नः कृष्णवर्त्मना॥ **6.27.20**॥ 959

तदा देवासुरे युद्धे साह्यार्थं त्रिदिवौकसाम्।
यत्र वैश्रवणो राजा जम्बूमुपनिषेवते॥ **6.27.21**॥ 960

यो राजा पर्वतेन्द्राणां बहुकिन्नरसेविनाम्।
विहारसुखदो नित्यं भ्रातुस्ते राक्षसाधिप॥ **6.27.22**॥ 961

तत्रैष रमते श्रीमान् बलवान् वानरोत्तमः।
युद्धेष्वकत्थनो नित्यं क्रथनो नाम यूथपः॥ **6.27.23**॥ 962

वृतः कोटिसहस्रेण हरीणां समवस्थितः।
एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम्॥ **6.27.24**॥ 963

यो गङ्गामनुपर्येति त्रासयन् गजयूथपान्।
हस्तिनां वानराणां च पूर्ववैरमनुस्मरन्॥ **6.27.25**॥ 964

एष यूथपतिर्नेता गर्जन् गिरिगुहाशयः।
गजान् रोधयते वन्यानारुजंश्च महीरुहान्॥ **6.27.26**॥ 965

हरीणां वाहिनीमुख्यो नदीं हैमवतीमनु।
उशीरबीजमाश्रित्य मन्दरं पर्वतोत्तमम्॥ **6.27.27**॥ 966

रमते वानरश्रेष्ठो दिवि शक्र इव स्वयम्।
एनं शतसहस्राणां सहस्रमभिवर्तते॥ **6.27.28**॥ 967

वीर्यविक्रमदृप्तानां नर्दतां बाहुशालिनाम्।
स एष नेता चैतेषां वानराणां महात्मनाम्॥ **6.27.29**॥ 968

स एष दुर्धरो राजन् प्रमाथी नाम यूथपः।
वातेनेवोद्धतं मेघं यमेनमनुपश्यसि॥ **6.27.30**॥ 969

अनीकमपि संरब्धं वानराणां तरस्विनाम्।
उद्धूतमरुणाभासं पवनेन समन्ततः॥ **6.27.31**॥ 970

विवर्तमानं बहुशो यत्रैतद्बहुलं रजः।
एतेऽसितमुखा घोरा गोलाङ्गूला महाबलाः॥ **6.27.32**॥ 971

शतं शतसहस्राणि दृष्ट्वा वै सेतुबन्धनम्।
गोलाङ्गूलं महाराज गवाक्षं नाम यूथपम्॥ **6.27.33**॥ 972

परिवार्याभिनर्दन्ते लङ्कां मर्दितुमोजसा।
भ्रमराचरिता यत्र सर्वकालफलद्रुमाः॥ **6.27.34**॥ 973

यं सूर्यस्तुल्यवर्णाभमनुपर्येति पर्वतम्।
यस्य भासा सदा भान्ति तद्वर्णा मृगपक्षिणः॥ **6.27.35**॥ 974

यस्य प्रस्थं महात्मानो न त्यजन्ति महर्षयः।
सर्वकामफला वृक्षाः सदा फलसमन्विताः॥ **6.27.36**॥ 975

मधूनि च महार्हाणि यस्मिन् पर्वतसत्तमे।
तत्रैष रमते राजन् रम्ये काञ्चनपर्वते॥ **6.27.37**॥ 976

मुख्यो वानरमुख्यानां केसरी नाम यूथपः।
षष्टिर्गिरिसहस्राणि रम्याः काञ्चनपर्वताः॥ **6.27.38**॥ 977

तेषां मध्ये गिरिवरस्त्वमिवानघ रक्षसाम्।
तत्रैके कपिलाः श्वेतास्ताम्रास्या मधुपिङ्गलाः॥ **6.27.39**॥ 978

निवसन्त्यन्तिमगिरौ तीक्ष्णदंष्ट्रा नखायुधाः।
सिंहा इव चतुर्दंष्ट्रा व्याघ्रा इव दुरासदाः॥ **6.27.40**॥ 979

सर्वे वैश्वानरसमा ज्वलदाशीविषोपमाः।
सुदीर्घाञ्चितलाङ्गूला मत्तमातङ्गसन्निभाः॥ **6.27.41**॥ 980

महापर्वतसङ्काशा महाजीमूतनिःस्वनाः।
वृत्तपिङ्गलनेत्रा हि महाभीमगतिस्वनाः॥ **6.27.42**॥ 981

मर्दयन्तीव ते सर्वे तस्थुर्लङ्कां समीक्ष्य ते।
एष चैषामधिपतिर्मध्ये तिष्ठति वीर्यवान्॥ **6.27.43**॥ 982

जयार्थी नित्यमादित्यमुपतिष्ठति वीर्यवान्।
नाम्ना पृथिव्यां विख्यातो राजञ्शतबलीति यः॥ **6.27.44**॥ 983

एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम्।
विक्रान्तो बलवाञ्छूरः पौरुषे स्वे व्यवस्थितः॥ **6.27.45**॥ 984

रामप्रियार्थं प्राणानां दयां न कुरुते हरिः।
गजो गवाक्षो गवयो नलो नीलश्च वानरः॥ **6.27.46**॥ 985

एकैकमेव योधानां कोटिभिर्दशभिर्वृतः।
तथान्ये वानरश्रेष्ठा विन्ध्यपर्वतवासिनः।
न शक्यन्ते बहुत्वात् तु सङ्ख्यातुं लघुविक्रमाः॥ **6.27.47**॥ 986

सर्वे महाराज महाप्रभावाः
सर्वे महाशैलनिकाशकायाः।
सर्वे समर्थाः पृथिवीं क्षणेन
कर्तुं प्रविध्वस्तविकीर्णशैलाम्॥ **6.27.48**॥ 987

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टाविंशः सर्गः ॥

शुकेन सुग्रीवसचिवानां मैन्दद्विविदयोर्हनुमतः श्रीरामस्य लक्ष्मणस्य विभीषणस्य सुग्रीवस्य च परिचयं दत्त्वा वानरसैन्यसङ्ख्याया निरूपणं च

सारणस्य वचः श्रुत्वा रावणं राक्षसाधिपम्।
बलमादिश्य तत् सर्वं शुको वाक्यमथाब्रवीत्॥ **6.28.1** ॥ 988

स्थितान् पश्यसि यानेतान् मत्तानिव महाद्विपान्।
न्यग्रोधानिव गाङ्गेयान् सालान् हैमवतानिव॥ **6.28.2** ॥ 989

एते दुष्प्रसहा राजन् बलिनः कामरूपिणः।
दैत्यदानवसङ्काशा युद्धे देवपराक्रमाः॥ **6.28.3** ॥ 990

एषां कोटिसहस्राणि नव पञ्च च सप्त च।
तथा शङ्कुसहस्राणि तथा वृन्दशतानि च॥ **6.28.4** ॥ 991

एते सुग्रीवसचिवाः किष्किन्धानिलयाः सदा।
हरयो देवगन्धर्वैरुत्पन्नाः कामरूपिणः॥ **6.28.5** ॥ 992

यौ तौ पश्यसि तिष्ठन्तौ कुमारौ देवरूपिणौ।
मैन्दश्च द्विविदश्चैव ताभ्यां नास्ति समो युधि॥ **6.28.6** ॥ 993

ब्रह्मणा समनुज्ञातावमृतप्राशिनावुभौ।
आशंसेते यथा लङ्कामेतौ मर्दितुमोजसा॥ **6.28.7** ॥ 994

यं तु पश्यसि तिष्ठन्तं प्रभिन्नमिव कुञ्जरम्।
यो बलात् क्षोभयेत् क्रुद्धः समुद्रमपि वानरः॥ **6.28.8**॥ 995

एषोऽभिगन्ता लङ्कायां वैदेह्यास्तव च प्रभो।
एनं पश्य पुरा दृष्टं वानरं पुनरागतम्॥ **6.28.9**॥ 996

ज्येष्ठः केसरिणः पुत्रो वातात्मज इति श्रुतः।
हनूमानिति विख्यातो लङ्घितो येन सागरः॥ **6.28.10**॥ 997

कामरूपो हरिश्रेष्ठो बलरूपसमन्वितः।
अनिवार्यगतिश्चैव यथा सततगः प्रभुः॥ **6.28.11**॥ 998

उद्यन्तं भास्करं दृष्ट्वा बालः किल बुभुक्षितः।
त्रियोजनसहस्रं तु अध्वानमवतीर्य हि॥ **6.28.12**॥ 999

आदित्यमाहरिष्यामि न मे क्षुत् प्रतियास्यति।
इति निश्चित्य मनसा पुप्लवे बलदर्पितः॥ **6.28.13**॥ 1000

अनाधृष्यतमं देवमपि देवर्षिराक्षसैः।
अनासाद्यैव पतितो भास्करोदयने गिरौ॥ **6.28.14**॥ 1001

पतितस्य कपेरस्य हनुरेका शिलातले।
किञ्चिद् भिन्ना दृढहनुर्हनूमानेष तेन वै॥ **6.28.15**॥ 1002

सत्यमागमयोगेन ममैष विदितो हरिः।
नास्य शक्यं बलं रूपं प्रभावो वानुभाषितुम्॥ **6.28.16**॥ 1003

एष आशंसते लङ्कामेको मथितुमोजसा।
येन जाज्वल्यतेऽसौ वै धूमकेतुस्तवाद्य वै।
लङ्कायां निहितश्चापि कथं विस्मरसे कपिम्॥ **6.28.17**॥ 1004

यश्चैषोऽनन्तरः शूरः श्यामः पद्मनिभेक्षणः।
इक्ष्वाकूणामतिरथो लोके विश्रुतपौरुषः॥ **6.28.18**॥ 1005

यस्मिन् न चलते धर्मो यो धर्म नातिवर्तते।
यो ब्राह्ममस्त्रं वेदांश्च वेद वेदविदां वरः॥ **6.28.19**॥ 1006

यो भिन्द्याद् गगनं बाणैर्मेदिनीं वापि दारयेत्।
यस्य मृत्योरिव क्रोधः शक्रस्येव पराक्रमः॥ **6.28.20**॥ 1007

यस्य भार्या जनस्थानात् सीता चापि हृता त्वया।
स एष रामस्त्वां राजन् योद्धुं समभिवर्तते॥ **6.28.21**॥ 1008

यस्यैष दक्षिणे पार्श्वे शुद्धजाम्बूनदप्रभः।
विशालवक्षास्ताम्राक्षो नीलकुञ्चितमूर्धजः॥ **6.28.22**॥ 1009

एषो हि लक्ष्मणो नाम भ्रातुः प्रियहिते रतः।
नये युद्धे च कुशलः सर्वशस्त्रभृतां वरः॥ **6.28.23**॥ 1010

अमर्षी दुर्जयो जेता विक्रान्तश्च जयी बली।
रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः॥ **6.28.24**॥ 1011

नह्येष राघवस्यार्थे जीवितं परिरक्षति।
एषैवाशंसते युद्धे निहन्तुं सर्वराक्षसान्॥ **6.28.25**॥ 1012

यस्तु सव्यमसौ पक्षं रामस्याश्रित्य तिष्ठति।
रक्षोगणपरिक्षिप्तो राजा ह्येष विभीषणः॥ **6.28.26**॥ 1013

श्रीमता राजराजेन लङ्कायामभिषेचितः।
त्वामसौ प्रतिसंरब्धो युद्धायैषोऽभिवर्तते॥ **6.28.27**॥ 1014

यं तु पश्यसि तिष्ठन्तं मध्ये गिरिमिवाचलम्।
सर्वशाखामृगेन्द्राणां भर्तारममितौजसम्॥ **6.28.28**॥ 1015

तेजसा यशसा बुद्ध्या बलेनाभिजनेन च।
यः कपीनतिबभ्राज हिमवानिव पर्वतः॥ **6.28.29**॥ 1016

किष्किन्धां यः समध्यास्ते गुहां सगहनद्रुमाम्।
दुर्गां पर्वतदुर्गम्यां प्रधानैः सह यूथपैः॥ **6.28.30**॥ 1017

यस्यैषा काञ्चनी माला शोभते शतपुष्करा।
कान्ता देवमनुष्याणां यस्यां लक्ष्मीः प्रतिष्ठिता॥ **6.28.31**॥ 1018

एतां मालां च तारां च कपिराज्यं च शाश्वतम्।
सुग्रीवो वालिनं हत्वा रामेण प्रतिपादितः॥ **6.28.32**॥ 1019

शतं शतसहस्राणां कोटिमाहुर्मनीषिणः।
शतं कोटिसहस्राणां शङ्कुरित्यभिधीयते॥ **6.28.33**॥ 1020

शतं शङ्कुसहस्राणां महाशङ्कुरिति स्मृतः।
महाशङ्कुसहस्राणां शतं वृन्दमिहोच्यते॥ **6.28.34**॥ 1021

शतं वृन्दसहस्राणां महावृन्दमिति स्मृतम्।
महावृन्दसहस्राणां शतं पद्ममिहोच्यते॥ **6.28.35**॥ 1022

शतं पद्मसहस्राणां महापद्ममिति स्मृतम्।
महापद्मसहस्राणां शतं खर्वमिहोच्यते॥ **6.28.36**॥ 1023

शतं खर्वसहस्राणां महाखर्वमिति स्मृतम्।
महाखर्वसहस्राणां समुद्रमभिधीयते।
शतं समुद्रसाहस्रमोघ इत्यभिधीयते॥ **6.28.37**॥ 1024

शतमोघसहस्राणां महौघ इति विश्रुतः।
एवं कोटिसहस्रेण शङ्कूनां च शतेन च।
महाशङ्कुसहस्रेण तथा वृन्दशतेन च॥ **6.28.38**॥ 1025

महावृन्दसहस्रेण तथा पद्मशतेन च।
महापद्मसहस्रेण तथा खर्वशतेन च॥ **6.28.39**॥ 1026

समुद्रेण च तेनैव महौघेन तथैव च।
एष कोटिमहौघेन समुद्रसदृशेन च॥ **6.28.40**॥ 1027

विभीषणेन वीरेण सचिवैः परिवारितः।
सुग्रीवो वानरेन्द्रस्त्वां युद्धार्थमनुवर्तते।
महाबलवृतो नित्यं महाबलपराक्रमः॥ **6.28.41**॥ 1028

इमां महाराज समीक्ष्य वाहिनी -
मुपस्थितां प्रज्वलितग्रहोपमाम्।
ततः प्रयत्नः परमो विधीयतां
यथा जयः स्यान्न परैः पराभवः॥ **6.28.42**॥ 1029

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टाविंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनत्रिंशः सर्गः ॥

शुकसारणौ निर्भर्त्स्य रावणेन तयोः सभातो निष्कासनं तत्प्रहितानां गुप्तचराणां श्रीरामानुग्रहेण वानरतो मोक्षणं लङ्कायां निवर्तनं च

शुकेन तु समादिष्टान् दृष्ट्वा स हरियूथपान्।
लक्ष्मणं च महावीर्यं भुजं रामस्य दक्षिणम्॥ **6.29.1**॥ 1030

समीपस्थं च रामस्य भ्रातरं च विभीषणम्।
सर्ववानरराजं च सुग्रीवं भीमविक्रमम्॥ **6.29.2**॥ 1031

अङ्गदं चापि बलिनं वज्रहस्तात्मजात्मजम्।
हनूमन्तं च विक्रान्तं जाम्बवन्तं च दुर्जयम्॥ **6.29.3**॥ 1032

सुषेणं कुमुदं नीलं नलं च प्लवगर्षभम्।
गजं गवाक्षं शरभं मैन्दं च द्विविदं तथा॥ **6.29.4**॥ 1033

किञ्चिदाविग्नहृदयो जातक्रोधश्च रावणः।
भर्त्सयामास तौ वीरौ कथान्ते शुकसारणौ॥ **6.29.5**॥ 1034

अधोमुखौ तौ प्रणतावब्रवीच्छुकसारणौ।
रोषगद्गदया वाचा संरब्धं परुषं तथा॥ **6.29.6**॥ 1035

न तावत् सदृशं नाम सचिवैरुपजीविभिः।
विप्रियं नृपतेर्वक्तुं निग्रहे प्रग्रहे प्रभोः॥ **6.29.7**॥ 1036

रिपूणां प्रतिकूलानां युद्धार्थमभिवर्तताम्।
उभाभ्यां सदृशं नाम वक्तुमप्रस्तवे स्तवम्॥ **6.29.8**॥ 1037

आचार्या गुरवो वृद्धा वृथा वां पर्युपासिताः।
सारं यद् राजशास्त्राणामनुजीव्यं न गृह्यते॥ **6.29.9**॥ 1038

गृहीतो वा न विज्ञातो भारोऽज्ञानस्य वाह्यते।
ईदृशैः सचिवैर्युक्तो मूर्खैर्दिष्ट्या धराम्यहम्॥ **6.29.10**॥ 1039

किं नु मृत्योर्भयं नास्ति मां वक्तुं परुषं वचः।
यस्य मे शासतो जिह्वा प्रयच्छति शुभाशुभम्॥ **6.29.11**॥ 1040

अप्येव दहनं स्पृष्ट्वा वने तिष्ठन्ति पादपाः।
राजदण्डपरामृष्टास्तिष्ठन्ते नापराधिनः॥ **6.29.12**॥ 1041

हन्यामहं त्विमौ पापौ शत्रुपक्षप्रशंसिनौ।
यदि पूर्वोपकारैर्मे क्रोधो न मृदुतां व्रजेत्॥ **6.29.13**॥ 1042

अपध्वंसत नश्यध्वं सन्निकर्षादितो मम।
नहि वां हन्तुमिच्छामि स्मराम्युपकृतानि वाम्।
हतावेव कृतघ्नौ द्वौ मयि स्नेहपराङ्मुखौ॥ **6.29.14**॥ 1043

एवमुक्तौ तु सव्रीडौ तौ दृष्ट्वा शुकसारणौ।
रावणं जयशब्देन प्रतिनन्द्याभिनिःसृतौ॥ **6.29.15**॥ 1044

अब्रवीच्च दशग्रीवः समीपस्थं महोदरम्।
उपस्थापय मे शीघ्रं चारानिति निशाचरः।
महोदरस्तथोक्तस्तु शीघ्रमाज्ञापयच्चरान्॥ **6.29.16**॥ 1045

ततश्चाराः सन्त्वरिताः प्राप्ताः पार्थिवशासनात्।
उपस्थिताः प्राञ्जलयो वर्धयित्वा जयाशिषः॥ **6.29.17**॥ 1046

तानब्रवीत् ततो वाक्यं रावणो राक्षसाधिपः।
चारान् प्रत्यायिकाञ्शूरान् धीरान् विगतसाध्वसान्॥ **6.29.18**॥ 1047

इतो गच्छत रामस्य व्यवसायं परीक्षितुम्।
मन्त्रेष्वभ्यन्तरा येऽस्य प्रीत्या तेन समागताः॥ **6.29.19**॥ 1048

कथं स्वपिति जागर्ति किमद्य च करिष्यति।
विज्ञाय निपुणं सर्वमागन्तव्यमशेषतः॥ **6.29.20**॥ 1049

चारेण विदितः शत्रुः पण्डितैर्वसुधाधिपैः।
युद्धे स्वल्पेन यत्नेन समासाद्य निरस्यते॥ **6.29.21**॥ 1050

चारास्तु ते तथेत्युक्त्वा प्रहृष्टा राक्षसेश्वरम्।
शार्दूलमग्रतः कृत्वा ततश्चक्रुः प्रदक्षिणम्॥ **6.29.22**॥ 1051

ततस्तं तु महात्मानं चारा राक्षससत्तमम्।
कृत्वा प्रदक्षिणं जग्मुर्यत्र रामः सलक्ष्मणः॥ **6.29.23**॥ 1052

ते सुवेलस्य शैलस्य समीपे रामलक्ष्मणौ।
प्रच्छन्ना ददृशुर्गत्वा ससुग्रीवविभीषणौ॥ **6.29.24**॥ 1053

प्रेक्षमाणाश्चमूं तां च बभूवुर्भयविह्वलाः।
ते तु धर्मात्मना दृष्टा राक्षसेन्द्रेण राक्षसाः॥ **6.29.25**॥ 1054

विभीषणेन तत्रस्था निगृहीता यदृच्छया।
शार्दूलो ग्राहितस्त्वेकः पापोऽयमिति राक्षसः॥ **6.29.26**॥ 1055

मोचितः सोऽपि रामेण वध्यमानः प्लवङ्गमैः।
आनृशंस्येन रामेण मोचिता राक्षसाः परे॥ **6.29.27**॥ 1056

वानरैरर्दितास्ते तु विक्रान्तैर्लघुविक्रमैः।
पुनर्लङ्कामनुप्राप्ताः श्वसन्तो नष्टचेतसः॥ **6.29.28**॥ 1057

ततो दशग्रीवमुपस्थितास्तु ते
चारा बहिर्नित्यचरा निशाचराः।
गिरेः सुवेलस्य समीपवासिनं
न्यवेदयन् रामबलं महाबलाः॥ **6.29.29**॥ 1058

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिंशः सर्गः ॥

रावणप्रहितानां गुप्तचराणां शार्दूलस्य च तं प्रति वानरसेनायाः समाचारस्य बोधनं तत्रत्यप्रमुखवीराणां परिचयदानं च

ततस्तमक्षोभ्यबलं लङ्काधिपतये चराः।
सुवेले राघवं शैले निविष्टं प्रत्यवेदयन्॥ **6.30.1**॥ 1059

चाराणां रावणः श्रुत्वा प्राप्तं रामं महाबलम्।
जातोद्वेगोऽभवत् किञ्चिच्छार्दूलं वाक्यमब्रवीत्॥ **6.30.2**॥ 1060

अयथावच्च ते वर्णो दीनश्चासि निशाचर।
नासि कच्चिदमित्राणां क्रुद्धानां वशमागतः॥ **6.30.3**॥ 1061

इति तेनानुशिष्टस्तु वाचं मन्दमुदीरयन्।
तदा राक्षसशार्दूलं शार्दूलो भयविक्लवः॥ **6.30.4**॥ 1062

न ते चारयितुं शक्या राजन् वानरपुङ्गवाः।
विक्रान्ता बलवन्तश्च राघवेण च रक्षिताः॥ **6.30.5**॥ 1063

नापि सम्भाषितुं शक्याः सम्प्रश्नोऽत्र न लभ्यते।
सर्वतो रक्ष्यते पन्था वानरैः पर्वतोपमैः॥ **6.30.6**॥ 1064

प्रविष्टमात्रे ज्ञातोऽहं बले तस्मिन् विचारिते।
बलाद् गृहीतो रक्षोभिर्बहुधास्मि विचारितः॥ **6.30.7**॥ 1065

जानुभिर्मुष्टिभिर्दन्तैस्तलैश्चाभिहतो भृशम्।
परिणीतोऽस्मि हरिभिर्बलमध्ये अमर्षणैः॥ **6.30.8**॥ 1066

परिणीय च सर्वत्र नीतोऽहं रामसंसदि।
रुधिरस्राविदीनाङ्गो विह्वलश्चलितेन्द्रियः॥ **6.30.9**॥ 1067

हरिभिर्वध्यमानश्च याचमानः कृताञ्जलिः।
राघवेण परित्रातो मा मेति च यदृच्छया॥ **6.30.10**॥ 1068

एष शैलशिलाभिस्तु पूरयित्वा महार्णवम्।
द्वारमाश्रित्य लङ्काया रामस्तिष्ठति सायुधः॥ **6.30.11**॥ 1069

गरुडव्यूहमास्थाय सर्वतो हरिभिर्वृतः।
मां विसृज्य महातेजा लङ्कामेवातिवर्तते॥ **6.30.12**॥ 1070

पुरा प्राकारमायाति क्षिप्रमेकतरं कुरु।
सीतां वापि प्रयच्छाशु युद्धं वापि प्रदीयताम्॥ **6.30.13**॥ 1071

मनसा तत् तदा प्रेक्ष्य तच्छ्रुत्वा राक्षसाधिपः।
शार्दूलं सुमहद्वाक्यमथोवाच स रावणः॥ **6.30.14**॥ 1072

यदि मां प्रतियुध्यन्ते देवगन्धर्वदानवाः।
नैव सीतां प्रदास्यामि सर्वलोकभयादपि॥ **6.30.15**॥ 1073

एवमुक्त्वा महातेजा रावणः पुनरब्रवीत्।
चरिता भवता सेना केऽत्र शूराः प्लवङ्गमाः॥ **6.30.16**॥ 1074

किं प्रभाः कीदृशाः सौम्य वानरा ये दुरासदाः।
कस्य पुत्राश्च पौत्राश्च तत्त्वमाख्याहि राक्षस॥ **6.30.17**॥ 1075

तथात्र प्रतिपत्स्यामि ज्ञात्वा तेषां बलाबलम्।
अवश्यं खलु सङ्ख्यानं कर्तव्यं युद्धमिच्छता॥ **6.30.18**॥ 1076

अथैवमुक्तः शार्दूलो रावणेनोत्तमश्वरः।
इदं वचनमारेभे वक्तुं रावणसन्निधौ॥ **6.30.19**॥ 1077

अथर्क्षरजसः पुत्रो युधि राजन् सुदुर्जयः।
गद्गदस्याथ पुत्रोऽत्र जाम्बवानिति विश्रुतः॥ **6.30.20**॥ 1078

गद्गदस्याथ पुत्रोऽन्यो गुरुपुत्रः शतक्रतोः।
कदनं यस्य पुत्रेण कृतमेकेन रक्षसाम्॥ **6.30.21**॥ 1079

सुषेणश्चात्र धर्मात्मा पुत्रो धर्मस्य वीर्यवान्।
सौम्यः सोमात्मजश्चात्र राजन् दधिमुखः कपिः॥ **6.30.22**॥ 1080

सुमुखो दुर्मुखश्चात्र वेगदर्शी च वानरः।
मृत्युर्वानररूपेण नूनं सृष्टः स्वयम्भुवा॥ **6.30.23**॥ 1081

पुत्रो हुतवहस्यात्र नीलः सेनापतिः स्वयम्।
अनिलस्य तु पुत्रोऽत्र हनूमानिति विश्रुतः॥ **6.30.24**॥ 1082

नप्ता शक्रस्य दुर्धर्षो बलवानङ्गदो युवा।
मैन्दश्च द्विविदश्चोभौ बलिनावश्विसम्भवौ॥ **6.30.25**॥ 1083

पुत्रा वैवस्वतस्याथ पञ्च कालान्तकोपमाः।
गजो गवाक्षो गवयः शरभो गन्धमादनः॥ **6.30.26**॥ 1084

दश वानरकोट्यश्च शूराणां युद्धकाङ्क्षिणाम्।
श्रीमतां देवपुत्राणां शेषं नाख्यातुमुत्सहे॥ **6.30.27**॥ 1085

पुत्रो दशरथस्यैष सिंहसंहननो युवा।
दूषणो निहतो येन खरश्च त्रिशिरास्तथा॥ **6.30.28**॥ 1086

नास्ति रामस्य सदृशे विक्रमे भुवि कश्चन।
विराधो निहतो येन कबन्धश्चान्तकोपमः॥ **6.30.29**॥ 1087

वक्तुं न शक्तो रामस्य गुणान् कश्चिन्नरः क्षितौ।
जनस्थानगता येन तावन्तो राक्षसा हताः॥ **6.30.30**॥ 1088

लक्ष्मणश्चात्र धर्मात्मा मातङ्गानामिवर्षभः।
यस्य बाणपथं प्राप्य न जीवेदपि वासवः॥ **6.30.31**॥ 1089

श्वेतो ज्योतिर्मुखश्चात्र भास्करस्यात्मसम्भवौ।
वरुणस्याथ पुत्रोऽथ हेमकूटः प्लवङ्गमः॥ **6.30.32**॥ 1090

विश्वकर्मसुतो वीरो नलः प्लवगसत्तमः।
विक्रान्तो वेगवानत्र वसुपुत्रः स दुर्धरः॥ **6.30.33**॥ 1091

राक्षसानां वरिष्ठश्च तव भ्राता विभीषणः।
प्रतिगृह्य पुरीं लङ्कां राघवस्य हिते रतः॥ **6.30.34**॥ 1092

इति सर्वं समाख्यातं तथा वै वानरं बलम्।
सुवेलेऽधिष्ठितं शैले शेषकार्ये भवान् गतिः॥ **6.30.35**॥ 1093

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकत्रिंशः सर्गः ॥

श्रीरामस्य मायामयं छिन्नं मस्तकं सन्दर्श्य रावणेन सीताया मोहनम्

ततस्तमक्षोभ्यबलं लङ्कायां नृपतेश्चराः।
सुवेले राघवं शैले निविष्टं प्रत्यवेदयन्॥ **6.31.1** ॥ 1094

चाराणां रावणः श्रुत्वा प्राप्तं रामं महाबलम्।
जातोद्वेगोऽभवत् किञ्चित् सचिवानिदमब्रवीत्॥ **6.31.2** ॥ 1095

मन्त्रिणः शीघ्रमायान्तु सर्वे वै सुसमाहिताः।
अयं नो मन्त्रकालो हि सम्प्राप्त इति राक्षसाः॥ **6.31.3** ॥ 1096

तस्य तच्छासनं श्रुत्वा मन्त्रिणोऽभ्यागमन् द्रुतम्।
ततः स मन्त्रयामास राक्षसैः सचिवैः सह॥ **6.31.4** ॥ 1097

मन्त्रयित्वा तु दुर्धर्षः क्षमं यत् तदनन्तरम्।
विसर्जयित्वा सचिवान् प्रविवेश स्वमालयम्॥ **6.31.5** ॥ 1098

ततो राक्षसमादाय विद्युज्जिह्वं महाबलम्।
मायाविनं महामायं प्राविशद् यत्र मैथिली॥ **6.31.6** ॥ 1099

विद्युज्जिह्वं च मायाज्ञमब्रवीद् राक्षसाधिपः।
मोहयिष्यावहे सीतां मायया जनकात्मजाम्॥ **6.31.7** ॥ 1100

शिरो मायामयं गृह्य राघवस्य निशाचर।
मां त्वं समुपतिष्ठस्व महच्च सशरं धनुः॥ **6.31.8**॥ 1101

एवमुक्तस्तथेत्याह विद्युजिह्वो निशाचरः।
दर्शयामास तां मायां सुप्रयुक्तां स रावणे॥ **6.31.9**॥ 1102

तस्य तुष्टोऽभवद् राजा प्रददौ च विभूषणम्।
अशोकवनिकायां च सीतादर्शनलालसः॥ **6.31.10**॥ 1103

नैर्ऋतानामधिपतिः संविवेश महाबलः।
ततो दीनामदैन्यार्हां ददर्श धनदानुजः॥ **6.31.11**॥ 1104

अधोमुखीं शोकपरामुपविष्टां महीतले।
भर्तारं समनुध्यान्तीमशोकवनिकां गताम्॥ **6.31.12**॥ 1105

उपास्यमानां घोराभी राक्षसीभिरदूरतः।
उपसृत्य ततः सीतां प्रहर्षं नाम कीर्तयन्॥ **6.31.13**॥ 1106

इदं च वचनं धृष्टमुवाच जनकात्मजाम्।
सान्त्व्यमाना मया भद्रे यमाश्रित्य विमन्यसे॥ **6.31.14**॥ 1107

खरहन्ता स ते भर्ता राघवः समरे हतः।
छिन्नं ते सर्वथा मूलं दर्पश्च निहतो मया॥ **6.31.15**॥ 1108

व्यसनेनात्मनः सीते मम भार्या भविष्यसि।
विसृजैतां मतिं मूढे किं मृतेन करिष्यसि॥ **6.31.16**॥ 1109

भवस्व भद्रे भार्याणां सर्वासामीश्वरी मम।
अल्पपुण्ये निवृत्तार्थे मूढे पण्डितमानिनि।
शृणु भर्तृवधं सीते घोरं वृत्रवधं यथा॥ **6.31.17**॥ 1110

समायातः समुद्रान्तं हन्तुं मां किल राघवः।
वानरेन्द्रप्रणीतेन बलेन महता वृतः॥ **6.31.18**॥ 1111

सन्निविष्टः समुद्रस्य पीड्य तीरमथोत्तरम्।
बलेन महता रामो व्रजत्यस्तं दिवाकरे॥ **6.31.19**॥ 1112

अथाध्वनि परिश्रान्तमर्धरात्रे स्थितं बलम्।
सुखसुप्तं समासाद्य चरितं प्रथमं चरैः॥ **6.31.20**॥ 1113

तत्प्रहस्तप्रणीतेन बलेन महता मम।
बलमस्य हतं रात्रौ यत्र रामः सलक्ष्मणः॥ **6.31.21**॥ 1114

पट्टिशान् परिघांश्चक्रानृष्टीन् दण्डान् महायुधान्।
बाणजालानि शूलानि भास्वरान् कूटमुद्गरान्॥ **6.31.22**॥ 1115

यष्टीश्च तोमरान् प्रासांश्चक्राणि मुसलानि च।
उद्यम्योद्यम्य रक्षोभिर्वानरेषु निपातिताः॥ **6.31.23**॥ 1116

अथ सुप्तस्य रामस्य प्रहस्तेन प्रमाथिना।
असक्तं कृतहस्तेन शिरश्छिन्नं महासिना॥ **6.31.24**॥ 1117

विभीषणः समुत्पत्य निगृहीतो यदृच्छया।
दिशः प्रव्राजितः सैन्यैर्लक्ष्मणः प्लवगैः सह॥ **6.31.25**॥ 1118

सुग्रीवो ग्रीवया सीते भग्नया प्लवगाधिपः।
निरस्तहनुकः सीते हनूमान् राक्षसैर्हतः॥ **6.31.26**॥ 1119

जाम्बवानथ जानुभ्यामुत्पतन् निहतो युधि।
पट्टिशैर्बहुभिश्छिन्नो निकृत्तः पादपो यथा॥ **6.31.27**॥ 1120

मैन्दश्च द्विविदश्चोभौ तौ वानरवरर्षभौ।
निःश्वसन्तौ रुदन्तौ च रुधिरेण परिप्लुतौ॥ **6.31.28**॥ 1121

असिना व्यायतौ छिन्नौ मध्ये ह्यरिनिषूदनौ।
अनुश्वसिति मेदिन्यां पनसः पनसो यथा॥ **6.31.29**॥ 1122

नाराचैर्बहुभिश्छिन्नः शेते दर्यां दरीमुखः।
कुमुदस्तु महातेजा निष्कूजन् सायकैर्हतः॥ **6.31.30**॥ 1123

अङ्गदो बहुभिश्छिन्नः शरैरासाद्य राक्षसैः।
परितो रुधिरोद्गारी क्षितौ निपतितोऽङ्गदः॥ **6.31.31**॥ 1124

हरयो मथिता नागै रथजालैस्तथापरे।
शयाना मृदितास्तत्र वायुवेगैरिवाम्बुदाः॥ **6.31.32**॥ 1125

प्रसृताश्च परे त्रस्ता हन्यमाना जघन्यतः।
अनुद्रुतास्तु रक्षोभिः सिंहैरिव महाद्विपाः॥ **6.31.33**॥ 1126

सागरे पतिताः केचित् केचिद् गगनमाश्रिताः।
ऋक्षा वृक्षानुपारूढा वानरीं वृत्तिमाश्रिताः॥ **6.31.34**॥ 1127

सागरस्य च तीरेषु शैलेषु च वनेषु च।
पिङ्गलास्ते विरूपाक्षै राक्षसैर्बहवो हताः॥ **6.31.35**॥ 1128

एवं तव हतो भर्ता ससैन्यो मम सेनया।
क्षतजार्द्रं रजोध्वस्तमिदं चास्याहृतं शिरः॥ **6.31.36**॥ 1129

ततः परमदुर्धर्षो रावणो राक्षसेश्वरः।
सीतायामुपशृण्वन्त्यां राक्षसीमिदमब्रवीत्॥ **6.31.37**॥ 1130

राक्षसं क्रूरकर्माणं विद्युज्जिह्वं समानय।
येन तद्राघवशिरः सङ्ग्रामात् स्वयमाहृतम्॥ **6.31.38**॥ 1131

विद्युज्जिह्वस्तदा गृह्य शिरस्तत्सशरासनम्।
प्रणामं शिरसा कृत्वा रावणस्याग्रतः स्थितः॥ **6.31.39**॥ 1132

तमब्रवीत् ततो राजा रावणो राक्षसं स्थितम्।
विद्युज्जिह्वं महाजिह्वं समीपपरिवर्तिनम्॥ **6.31.40**॥ 1133

अग्रतः कुरु सीतायाः शीघ्रं दाशरथेः शिरः।
अवस्थां पश्चिमां भर्तुः कृपणा साधु पश्यतु॥ **6.31.41**॥ 1134

एवमुक्तं तु तद् रक्षः शिरस्तत् प्रियदर्शनम्।
उपनिक्षिप्य सीतायाः क्षिप्रमन्तरधीयत॥ **6.31.42**॥ 1135

रावणश्चापि चिक्षेप भास्वरं कार्मुकं महत्।
त्रिषु लोकेषु विख्यातं रामस्यैतदिति ब्रुवन्॥ **6.31.43**॥ 1136

इदं तत् तव रामस्य कार्मुकं ज्यासमावृतम्।
इह प्रहस्तेनानीतं तं हत्वा निशि मानुषम्॥ **6.31.44**॥ 1137

स विद्युज्जिह्वेन सहैव तच्छिरो
धनुश्च भूमौ विनिकीर्य रावणः।
विदेहराजस्य सुतां यशस्विनीं
ततोऽब्रवीत् तां भव मे वशानुगा॥ **6.31.45**॥ 1138

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वात्रिंशः सर्गः ॥

श्रीरामनिधनं मत्वा सीताया विलापः, रावणेन सभां गत्वा मन्त्रिभिः सह युद्धविषये मन्त्रणम्

सा सीता तच्छिरो दृष्ट्वा तच्च कार्मुकमुत्तमम्।
सुग्रीवप्रतिसंसर्गमाख्यातं च हनूमता॥ **6.32.1**॥ 1139

नयने मुखवर्णं च भर्तुस्तत्सदृशं मुखम्।
केशान् केशान्तदेशं च तं च चूडामणिं शुभम्॥ **6.32.2**॥ 1140

एतैः सर्वैरभिज्ञानैरभिज्ञाय सुदुःखिता।
विजगर्हेऽत्र कैकेयीं क्रोशन्ती कुररी यथा॥ **6.32.3**॥ 1141

सकामा भव कैकेयि हतोऽयं कुलनन्दनः।
कुलमुत्सादितं सर्वं त्वया कलहशीलया॥ **6.32.4**॥ 1142

आर्येण किं नु कैकेय्याः कृतं रामेण विप्रियम्।
यन्मया चीरवसनं दत्त्वा प्रव्राजितो वनम्॥ **6.32.5**॥ 1143

एवमुक्त्वा तु वैदेही वेपमाना तपस्विनी।
जगाम जगतीं बाला छिन्ना तु कदली यथा॥ **6.32.6**॥ 1144

सा मुहूर्तात् समाश्वस्य परिलभ्याथ चेतनाम्।
तच्छिरः समुपास्थाय विललापायतेक्षणा॥ **6.32.7**॥ 1145

हा हतास्मि महाबाहो वीरव्रतमनुव्रत।
इमां ते पश्चिमावस्थां गतास्मि विधवा कृता॥ **6.32.8**॥ 1146

प्रथमं मरणं नार्या भर्तुर्वैगुण्यमुच्यते।
सुवृत्तः साधुवृत्तायाः संवृत्तस्त्वं ममाग्रतः॥ **6.32.9**॥ 1147

महद् दुःखं प्रपन्नाया मग्नायाः शोकसागरे।
यो हि मामुद्यतस्त्रातुं सोऽपि त्वं विनिपातितः॥ **6.32.10**॥ 1148

सा श्वश्रूर्मम कौसल्या त्वया पुत्रेण राघव।
वत्सेनेव यथा धेनुर्विवत्सा वत्सला कृता॥ **6.32.11**॥ 1149

उद्दिष्टं दीर्घमायुस्ते दैवज्ञैरपि राघव।
अनृतं वचनं तेषामल्पायुरसि राघव॥ **6.32.12**॥ 1150

अथवा नश्यति प्रज्ञा प्राज्ञस्यापि सतस्तव।
पचत्येनं तथा कालो भूतानां प्रभवो ह्ययम्॥ **6.32.13**॥ 1151

अदृष्टं मृत्युमापन्नः कस्मात् त्वं नयशास्त्रवित्।
व्यसनानामुपायज्ञः कुशलो ह्यसि वर्जने॥ **6.32.14**॥ 1152

तथा त्वं सम्परिष्वज्य रौद्रयातिनृशंसया।
कालरात्र्या ममाच्छिद्य हृतः कमललोचन॥ **6.32.15**॥ 1153

इह शेषे महाबाहो मां विहाय तपस्विनीम्।
प्रियामिव यथा नारीं पृथिवीं पुरुषर्षभ॥ **6.32.16**॥ 1154

अर्चितं सततं यत्नाद् गन्धमाल्यैर्मया तव।
इदं ते मत्प्रियं वीर धनुः काञ्चनभूषितम्॥ **6.32.17**॥ 1155

पित्रा दशरथेन त्वं श्वशुरेण ममानघ।
सर्वैश्च पितृभिः सार्धं नूनं स्वर्गे समागतः॥ **6.32.18**॥ 1156

दिवि नक्षत्रभूतं च महत्कर्मकृतं तथा।
पुण्यं राजर्षिवंशं त्वमात्मनः समुपेक्षसे॥ **6.32.19**॥ 1157

किं मां न प्रेक्षसे राजन् किं वा न प्रतिभाषसे।
बालां बालेन सम्प्राप्तां भार्यां मां सहचारिणीम्॥ **6.32.20**॥ 1158

संश्रुतं गृह्णता पाणिं चरिष्यामीति यत् त्वया।
स्मर तन्नाम काकुत्स्थ नय मामपि दुःखिताम्॥ **6.32.21**॥ 1159

कस्मान्मामपहाय त्वं गतो गतिमतां वर।
अस्माल्लोकादमुं लोकं त्यक्त्वा मामपि दुःखिताम्॥ **6.32.22**॥ 1160

कल्याणै रुचिरं गात्रं परिष्वक्तं मयैव तु।
क्रव्यादैस्तच्छरीरं ते नूनं विपरिकृष्यते॥ **6.32.23**॥ 1161

अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः।
अग्निहोत्रेण संस्कारं केन त्वं न तु लप्स्यसे॥ **6.32.24**॥ 1162

प्रव्रज्यामुपपन्नानां त्रयाणामेकमागतम्।
परिप्रेक्ष्यति कौसल्या लक्ष्मणं शोकलालसा॥ **6.32.25**॥ 1163

स तस्याः परिपृच्छन्त्या वधं मित्रबलस्य ते।
तव चाख्यास्यते नूनं निशायां राक्षसैर्वधम्॥ **6.32.26**॥ 1164

सा त्वां सुप्तं हतं ज्ञात्वा मां च रक्षोगृहं गताम्।
हृदयेनावदीर्णेन न भविष्यति राघव॥ **6.32.27**॥ 1165

मम हेतोरनार्याया अनघः पार्थिवात्मजः।
रामः सागरमुत्तीर्य वीर्यवान् गोष्पदे हतः॥ **6.32.28**॥ 1166

अहं दाशरथेनोढा मोहात् स्वकुलपांसनी।
आर्यपुत्रस्य रामस्य भार्या मृत्युरजायत॥ **6.32.29**॥ 1167

नूनमन्यां मया जातिं वारितं दानमुत्तमम्।
याहमद्यैव शोचामि भार्या सर्वातिथेरिह॥ **6.32.30**॥ 1168

साधु घातय मां क्षिप्रं रामस्योपरि रावण।
समानय पतिं पत्न्या कुरु कल्याणमुत्तमम्॥ **6.32.31**॥ 1169

शिरसा मे शिरश्चास्य कायं कायेन योजय।
रावणानुगमिष्यामि गतिं भर्तुर्महात्मनः॥ **6.32.32**॥ 1170

इतीव दुःखसन्तप्ता विललापायतेक्षणा।
भर्तुः शिरो धनुश्चैव ददर्श जनकात्मजा॥ **6.32.33**॥ 1171

एवं लालप्यमानायां सीतायां तत्र राक्षसः।
अभिचक्राम भर्तारमनीकस्थः कृताञ्जलिः॥ **6.32.34**॥ 1172

विजयस्वार्यपुत्रेति सोऽभिवाद्य प्रसाद्य च।
न्यवेदयदनुप्राप्तं प्रहस्तं वाहिनीपतिम्॥ **6.32.35**॥ 1173

अमात्यैः सहितः सर्वैः प्रहस्तस्त्वामुपस्थितः।
तेन दर्शनकामेन अहं प्रस्थापितः प्रभो॥ **6.32.36**॥ 1174

नूनमस्ति महाराज राजभावात् क्षमान्वित।
किञ्चिदात्ययिकं कार्यं तेषां त्वं दर्शनं कुरु॥ **6.32.37**॥ 1175

एतच्छ्रुत्वा दशग्रीवो राक्षसप्रतिवेदितम्।
अशोकवनिकां त्यक्त्वा मन्त्रिणां दर्शनं ययौ॥ **6.32.38**॥ 1176

स तु सर्वं समर्थ्यैव मन्त्रिभिः कृत्यमात्मनः।
सभां प्रविश्य विदधे विदित्वा रामविक्रमम्॥ **6.32.39**॥ 1177

अन्तर्धानं तु तच्छीर्षं तच्च कार्मुकमुत्तमम्।
जगाम रावणस्यैव निर्याणसमनन्तरम्॥ **6.32.40**॥ 1178

राक्षसेन्द्रस्तु तैः सार्धं मन्त्रिभिर्भीमविक्रमैः।
समर्थयामास तदा रामकार्यविनिश्चयम्॥ **6.32.41**॥ 1179

अविदूरस्थितान् सर्वान् बलाध्यक्षान् हितैषिणः।
अब्रवीत् कालसदृशं रावणो राक्षसाधिपः॥ **6.32.42**॥ 1180

शीघ्रं भेरीनिनादेन स्फुटं कोणाहतेन मे।
समानयध्वं सैन्यानि वक्तव्यं च न कारणम्॥ **6.32.43**॥ 1181

ततस्तथेति प्रतिगृह्य तद्वच -
स्तदैव दूताः सहसा महद् बलम्।
समानयंश्चैव समागतं च ते
न्यवेदयन् भर्तरि युद्धकाङ्क्षिणि॥ **6.32.44**॥ 1182

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्वात्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रयस्त्रिंशः सर्गः ॥

सरमया सीतायाः सान्त्वनं रावणमायाया रहस्योद्घाटनं श्रीरामागमनसम्बन्धिप्रियसंवादस्य निवेदनं तदीयविजयस्य समर्थनं च

सीतां तु मोहितां दृष्ट्वा सरमा नाम राक्षसी।
आससादाथ वैदेहीं प्रियां प्रणयिनी सखीम्॥ **6.33.1** ॥ 1183

मोहितां राक्षसेन्द्रेण सीतां परमदुःखिताम्।
आश्वासयामास तदा सरमा मृदुभाषिणी॥ **6.33.2** ॥ 1184

सा हि तत्र कृता मित्रं सीतया रक्ष्यमाणया।
रक्षन्ती रावणादिष्टा सानुक्रोशा दृढव्रता॥ **6.33.3** ॥ 1185

सा ददर्श सखी सीतां सरमा नष्टचेतनाम्।
उपावृत्योत्थितां ध्वस्तां वडवामिव पांसुषु॥ **6.33.4** ॥ 1186

तां समाश्वासयामास सखीस्नेहेन सुव्रताम्।
समाश्वसिहि वैदेहि मा भूत् ते मनसो व्यथा।
उक्ता यद् रावणेन त्वं प्रत्युक्तं च स्वयं त्वया॥ **6.33.5** ॥ 1187

सखीस्नेहेन तद् भीरु मया सर्वं प्रतिश्रुतम्।
लीनया गहने शून्ये भयमुत्सृज्य रावणात्।
तव हेतोर्विशालाक्षि नहि मे रावणाद् भयम्॥ **6.33.6** ॥ 1188

स सम्भ्रान्तश्च निष्क्रान्तो यत्कृते राक्षसेश्वरः।
तत्र मे विदितं सर्वमभिनिष्क्रम्य मैथिलि॥ **6.33.7**॥ 1189

न शक्यं सौप्तिकं कर्तुं रामस्य विदितात्मनः।
वधश्च पुरुषव्याघ्रे तस्मिन् नैवोपपद्यते॥ **6.33.8**॥ 1190

न त्वेवं वानरा हन्तुं शक्याः पादपयोधिनः।
सुरा देवर्षभेणेव रामेण हि सुरक्षिताः॥ **6.33.9**॥ 1191

दीर्घवृत्तभुजः श्रीमान् महोरस्कः प्रतापवान्।
धन्वी सन्नहनोपेतो धर्मात्मा भुवि विश्रुतः॥ **6.33.10**॥ 1192

विक्रान्तो रक्षिता नित्यमात्मनश्च परस्य च।
लक्ष्मणेन सह भ्रात्रा कुलीनो नयशास्त्रवित्॥ **6.33.11**॥ 1193

हन्ता परबलौघानामचिन्त्यबलपौरुषः।
न हतो राघवः श्रीमान् सीते शत्रुनिबर्हणः॥ **6.33.12**॥ 1194

अयुक्तबुद्धिकृत्येन सर्वभूतविरोधिना।
एवं प्रयुक्ता रौद्रेण माया मायाविना त्वयि॥ **6.33.13**॥ 1195

शोकस्ते विगतः सर्वकल्याणं त्वामुपस्थितम्।
ध्रुवं त्वां भजते लक्ष्मीः प्रियं ते भवति शृणु॥ **6.33.14**॥ 1196

उत्तीर्य सागरं रामः सह वानरसेनया।
सन्निविष्टः समुद्रस्य तीरमासाद्य दक्षिणम्॥ **6.33.15**॥ 1197

दृष्टो मे परिपूर्णार्थः काकुत्स्थः सहलक्ष्मणः।
सहितैः सागरान्तस्थैर्बलैस्तिष्ठति रक्षितः॥ **6.33.16**॥ 1198

अनेन प्रेषिता ये च राक्षसा लघुविक्रमाः।
राघवस्तीर्ण इत्येवं प्रवृत्तिस्तैरिहाहृता॥ **6.33.17**॥ 1199

स तां श्रुत्वा विशालाक्षि प्रवृत्तिं राक्षसाधिपः।
एष मन्त्रयते सर्वैः सचिवैः सह रावणः॥ **6.33.18**॥ 1200

इति ब्रुवाणा सरमा राक्षसी सीतया सह।
सर्वोद्योगेन सैन्यानां शब्दं शुश्राव भैरवम्॥ **6.33.19**॥ 1201

दण्डनिर्घातवादिन्याः श्रुत्वा भेर्या महास्वनम्।
उवाच सरमा सीतामिदं मधुरभाषिणी॥ **6.33.20**॥ 1202

सन्नाहजननी ह्येषा भैरवा भीरु भेरिका।
भेरीनादं च गम्भीरं शृणु तोयदनिःस्वनम्॥ **6.33.21**॥ 1203

कल्प्यन्ते मत्तमातङ्गा युज्यन्ते रथवाजिनः।
दृश्यन्ते तुरगारूढाः प्रासहस्ताः सहस्रशः॥ **6.33.22**॥ 1204

तत्र तत्र च सन्नद्धाः सम्पतन्ति सहस्रशः।
आपूर्यन्ते राजमार्गाः सैन्यैरद्भुतदर्शनैः॥ **6.33.23**॥ 1205

वेगवद्भिर्नदद्भिश्च तोयौघैरिव सागरः।
शस्त्राणां च प्रसन्नानां चर्मणां वर्मणां तथा॥ **6.33.24**॥ 1206

रथवाजिगजानां च राक्षसेन्द्रानुयायिनाम्।
सभ्रमो रक्षसामेष हृषितानां तरस्विनाम्॥ **6.33.25**॥ 1207

प्रभां विसृजतां पश्य नानावर्णसमुत्थिताम्।
वनं निर्दहतो घर्मे यथा रूपं विभावसोः॥ **6.33.26**॥ 1208

घण्टानां शृणु निर्घोषं रथानां शृणु निःस्वनम्।
हयानां हेषमाणानां शृणु तूर्यध्वनिं तथा॥ **6.33.27**॥ 1209

उद्यतायुधहस्तानां राक्षसेन्द्रानुयायिनाम्।
सभ्रमो रक्षसामेष तुमुलो लोमहर्षणम्॥ **6.33.28**॥ 1210

श्रीस्त्वां भजति शोकघ्नी रक्षसां भयमागतम्।
रामः कमलपत्राक्षो दैत्यानामिव वासवः॥ **6.33.29**॥ 1211

अवजित्य जितक्रोधस्तमचिन्त्यपराक्रमः।
रावणं समरे हत्वा भर्ता त्वाधिगमिष्यति॥ **6.33.30**॥ 1212

विक्रमिष्यति रक्षःसु भर्ता ते सहलक्ष्मणः।
यथा शत्रुषु शत्रुघ्नो विष्णुना सह वासवः॥ **6.33.31**॥ 1213

आगतस्य हि रामस्य क्षिप्रमङ्कागतां सतीम्।
अहं द्रक्ष्यामि सिद्धार्थां त्वां शत्रौ विनिपातिते॥ **6.33.32**॥ 1214

अस्त्राण्यानन्दजानि त्वं वर्तयिष्यसि जानकि।
समागम्य परिष्वक्ता तस्योरसि महोरसः॥ **6.33.33**॥ 1215

अचिरान्मोक्ष्यते सीते देवि ते जघनं गताम्।
धृतामेकां बहून् मासान् वेणीं रामो महाबलः॥ **6.33.34**॥ 1216

तस्य दृष्ट्वा मुखं देवि पूर्णचन्द्रमिवोदितम्।
मोक्ष्यसे शोकजं वारि निर्मोकमिव पन्नगी॥ **6.33.35**॥ 1217

रावणं समरे हत्वा नचिरादेव मैथिलि।
त्वया समग्रः प्रियया सुखार्हो लप्स्यते सुखम्॥ **6.33.36**॥ 1218

सभाजिता त्वं रामेण मोदिष्यसि महात्मना।
सुवर्षेण समायुक्ता यथा सस्येन मेदिनी॥ **6.33.37**॥ 1219

गिरिवरमभितो विवर्तमानो हय इव मण्डलमाशु यः करोति।
तमिह शरणमभ्युपैहि देवि दिवसकरं प्रभवो ह्ययं प्रजानाम्॥ **6.33.38**॥ 1220

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रयस्त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुस्त्रिंशः सर्गः ॥

सीताया अनुनयेन सरमया तां प्रति मन्त्रिसहितरावणसम्बन्धिनिश्चितविचारस्य कथनम्

अथ तां जातसन्तापां तेन वाक्येन मोहिताम्।
सरमा ह्लादयामास महीं दग्धामिवाम्भसा॥ **6.34.1** ॥ 1221

ततस्तस्या हितं सख्याश्चिकीर्षन्ती सखी वचः।
उवाच काले कालज्ञा स्मितपूर्वाभिभाषिणी॥ **6.34.2** ॥ 1222

उत्सहेयमहं गत्वा त्वद्वाक्यमसितेक्षणे।
निवेद्य कुशलं रामे प्रतिच्छन्ना निवर्तितुम्॥ **6.34.3** ॥ 1223

नहि मे क्रममाणाया निरालम्बे विहायसि।
समर्थो गतिमन्वेतुं पवनो गरुडोऽपि वा॥ **6.34.4** ॥ 1224

एवं ब्रुवाणां तां सीता सरमामिदमब्रवीत्।
मधुरं श्लक्ष्णया वाचा पूर्वशोकाभिपन्नया॥ **6.34.5** ॥ 1225

समर्था गगनं गन्तुमपि च त्वं रसातलम्।
अवगच्छाद्य कर्तव्यं कर्तव्यं ते मदन्तरे॥ **6.34.6** ॥ 1226

मत्प्रियं यदि कर्तव्यं यदि बुद्धिः स्थिरा तव।
ज्ञातुमिच्छामि तं गत्वा किं करोतीति रावणः॥ **6.34.7** ॥ 1227

स हि मायाबलः क्रूरो रावणः शत्रुरावणः।
मां मोहयति दुष्टात्मा पीतमात्रेव वारुणी॥ **6.34.8**॥ 1228

तर्जापयति मां नित्यं भर्त्सापयति चासकृत्।
राक्षसीभिः सुघोराभिर्यो मां रक्षति नित्यशः॥ **6.34.9**॥ 1229

उद्विग्ना शङ्किता चास्मि न स्वस्थं च मनो मम।
तद्भयाच्चाहमुद्विग्ना अशोकवनिकां गता॥ **6.34.10**॥ 1230

यदि नाम कथा तस्य निश्चितं वापि यद् भवेत्।
निवेदयेथाः सर्वं तद् वरो मे स्यादनुग्रहः॥ **6.34.11**॥ 1231

साप्येवं ब्रुवतीं सीतां सरमा मृदुभाषिणी।
उवाच वदनं तस्याः स्पृशन्ती बाष्पविक्लवम्॥ **6.34.12**॥ 1232

एष ते यद्यभिप्रायस्तस्माद् गच्छामि जानकि।
गृह्य शत्रोरभिप्रायमुपावर्तामि मैथिलि॥ **6.34.13**॥ 1233

एवमुक्त्वा ततो गत्वा समीपं तस्य रक्षसः।
शुश्राव कथितं तस्य रावणस्य समन्त्रिणः॥ **6.34.14**॥ 1234

सा श्रुत्वा निश्चयं तस्य निश्चयज्ञा दुरात्मनः।
पुनरेवागमत् क्षिप्रमशोकवनिकां शुभाम्॥ **6.34.15**॥ 1235

सा प्रविष्टा ततस्तत्र ददर्श जनकात्मजाम्।
प्रतीक्षमाणां स्वामेव भ्रष्टपद्मामिव श्रियम्॥ **6.34.16**॥ 1236

तां तु सीता पुनः प्राप्तां सरमां प्रियभाषिणीम्।
परिष्वज्य च सुस्निग्धं ददौ च स्वयमासनम्॥ **6.34.17**॥ 1237

इहासीना सुखं सर्वमाख्याहि मम तत्त्वतः।
क्रूरस्य निश्चयं तस्य रावणस्य दुरात्मनः॥ **6.34.18**॥ 1238

एवमुक्ता तु सरमा सीतया वेपमानया।
कथितं सर्वमाचष्ट रावणस्य समन्त्रिणः॥ **6.34.19**॥ 1239

जनन्या राक्षसेन्द्रो वै त्वन्मोक्षार्थं बृहद्वचः।
अतिस्निग्धेन वैदेहि मन्त्रिवृद्धेन चोदितः॥ **6.34.20**॥ 1240

दीयतामभिसत्कृत्य मनुजेन्द्राय मैथिली।
निदर्शनं ते पर्याप्तं जनस्थाने यदद्भुतम्॥ **6.34.21**॥ 1241

लङ्घनं च समुद्रस्य दर्शनं च हनूमतः।
वधं च रक्षसां युद्धे कः कुर्यान्मानुषो युधि॥ **6.34.22**॥ 1242

एवं स मन्त्रिवृद्धैश्च मात्रा च बहुबोधितः।
न त्वामुत्सहते मोक्तुमर्थमर्थपरो यथा॥ **6.34.23**॥ 1243

नोत्सहत्यमृतो मोक्तुं युद्धे त्वामिति मैथिलि।
सामात्यस्य नृशंसस्य निश्चयो ह्येष वर्तते॥ **6.34.24**॥ 1244

तदेषा सुस्थिरा बुद्धिर्मृत्युलोभादुपस्थिता।
भयान्न शक्तस्त्वां मोक्तुमनिरस्तः स संयुगे॥ **6.34.25**॥ 1245

राक्षसानां च सर्वेषामात्मनश्च वधेन हि।
निहत्य रावणं सङ्ख्ये सर्वथा निशितैः शरैः।
प्रतिनेष्यति रामस्त्वामयोध्यामसितेक्षणे॥ **6.34.26**॥ 1246

एतस्मिन्नन्तरे शब्दो भेरीशङ्खसमाकुलः।
श्रुतो वै सर्वसैन्यानां कम्पयन् धरणीतलम्॥ **6.34.27**॥ 1247

श्रुत्वा तु तं वानरसैन्यनादं
लङ्कागता राक्षसराजभृत्याः।

हतौजसो दैन्यपरीतचेष्टाः
श्रेयो न पश्यन्ति नृपस्य दोषात्॥ **6.34.28**॥ 1248

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुस्त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चत्रिंशः सर्गः ॥

माल्यवता रावणस्य श्रीरामेण सह सन्धिकरणाय प्रबोधनम्

तेन शङ्खविमिश्रेण भेरीशब्देन नादिना।
उपयाति महाबाहू रामः परपुरञ्जयः॥ **6.35.1** ॥ 1249

तं निनादं निशम्याथ रावणो राक्षसेश्वरः।
मुहूर्तं ध्यानमास्थाय सचिवानभ्युदैक्षत॥ **6.35.2** ॥ 1250

अथ तान् सचिवांस्तत्र सर्वानाभाष्य रावणः।
सभां सन्नादयन् सर्वामित्युवाच महाबलः॥ **6.35.3** ॥ 1251

जगत्सन्तापनः क्रूरोऽगर्हयन् राक्षसेश्वरः।
तरणं सागरस्यास्य विक्रमं बलपौरुषम्॥ **6.35.4** ॥ 1252

यदुक्तवन्तो रामस्य भवन्तस्तन्मया श्रुतम्।
भवतश्चाप्यहं वेद्मि युद्धे सत्यपराक्रमान्।
तूष्णीकानीक्षतोऽन्योन्यं विदित्वा रामविक्रमम्॥ **6.35.5** ॥ 1253

ततस्तु सुमहाप्राज्ञो माल्यवान् नाम राक्षसः।
रावणस्य वचः श्रुत्वा इति मातामहोऽब्रवीत्॥ **6.35.6** ॥ 1254

विद्यास्वभिविनीतो यो राजा राजन् नयानुगः।
स शास्ति चिरमैश्वर्यमरींश्च कुरुते वशे॥ **6.35.7** ॥ 1255

सन्दधानो हि कालेन विगृह्णंश्चारिभिः सह।
स्वपक्षे वर्धनं कुर्वन्महदैश्वर्यमश्नुते॥ **6.35.8**॥ 1256

हीयमानेन कर्तव्यो राज्ञा सन्धिः समेन च।
न शत्रुमवमन्येत ज्यायान् कुर्वीत विग्रहम्॥ **6.35.9**॥ 1257

तन्मह्यं रोचते सन्धिः सह रामेण रावण।
यदर्थमभियुक्तोऽसि सीता तस्मै प्रदीयताम्॥ **6.35.10**॥ 1258

तस्य देवर्षयः सर्वे गन्धर्वाश्च जयैषिणः।
विरोधं मा गमस्तेन सन्धिस्ते तेन रोचताम्॥ **6.35.11**॥ 1259

असृजद् भगवान् पक्षौ द्वावेव हि पितामहः।
सुराणामसुराणां च धर्माधर्मौ तदाश्रयौ॥ **6.35.12**॥ 1260

धर्मो हि श्रूयते पक्ष अमराणां महात्मनाम्।
अधर्मो रक्षसां पक्षो ह्यसुराणां च राक्षस॥ **6.35.13**॥ 1261

धर्मो वै ग्रसतेऽधर्मं यदा कृतमभूद् युगम्।
अधर्मो ग्रसते धर्मं यदा तिष्यः प्रवर्तते॥ **6.35.14**॥ 1262

तत् त्वया चरता लोकान् धर्मोऽपि निहतो महान्।
अधर्मः प्रगृहीतश्च तेनास्मद् बलिनः परे॥ **6.35.15**॥ 1263

स प्रमादात् प्रवृद्धस्तेऽधर्मोऽहिर्ग्रसते हि नः।
विवर्धयति पक्षं च सुराणां सुरभावनः॥ **6.35.16**॥ 1264

विषयेषु प्रसक्तेन यत्किञ्चित्कारिणा त्वया।
ऋषीणामग्निकल्पानामुद्वेगो जनितो महान्॥ **6.35.17**॥ 1265

तेषां प्रभावो दुर्धर्षः प्रदीप्त इव पावकः।
तपसा भावितात्मानो धर्मस्यानुग्रहे रताः॥ **6.35.18**॥ 1266

मुख्यैर्यज्ञैर्यजन्त्येते तैस्तैर्यत्ते द्विजातयः।
जुह्वत्यग्नींश्च विधिवद् वेदांश्चोच्चैरधीयते॥ **6.35.19**॥ 1267

अभिभूय च रक्षांसि ब्रह्मघोषानुदीरयन्।
दिशो विप्रद्रुताः सर्वाः स्तनयित्नुरिवोष्णगे॥ **6.35.20**॥ 1268

ऋषीणामग्निकल्पानामग्निहोत्रसमुत्थितः।
आदत्ते रक्षसां तेजो धूमो व्याप्य दिशो दश॥ **6.35.21**॥ 1269

तेषु तेषु च देशेषु पुण्येष्वेव दृढव्रतैः।
चर्यमाणं तपस्तीव्रं सन्तापयति राक्षसान्॥ **6.35.22**॥ 1270

देवदानवयक्षेभ्यो गृहीतश्च वरस्त्वया।
मनुष्या वानरा ऋक्षा गोलाङ्गूला महाबलाः।
बलवन्त इहागम्य गर्जन्ति दृढविक्रमाः॥ **6.35.23**॥ 1271

उत्पातान् विविधान् दृष्ट्वा घोरान् बहुविधान् बहून्।
विनाशमनुपश्यामि सर्वेषां रक्षसामहम्॥ **6.35.24**॥ 1272

खराभिस्तनिता घोरा मेघाः प्रतिभयङ्कराः।
शोणितेनाभिवर्षन्ति लङ्कामुष्णेन सर्वतः॥ **6.35.25**॥ 1273

रुदतां वाहनानां च प्रपतन्त्यश्रुबिन्दवः।
रजोध्वस्ता विवर्णाश्च न प्रभान्ति यथापुरम्॥ **6.35.26**॥ 1274

व्याला गोमायवो गृध्रा वाश्यन्ति च सुभैरवम्।
प्रविश्य लङ्कामारामे समवायांश्च कुर्वते॥ **6.35.27**॥ 1275

कालिकाः पाण्डुरैर्दन्तैः प्रहसन्त्यग्रतः स्थिताः।
स्त्रियः स्वप्नेषु मुष्णन्त्यो गृहाणि प्रतिभाष्य च॥ **6.35.28**॥ 1276

गृहाणां बलिकर्माणि श्वानः पर्युपभुञ्जते।
खरा गोषु प्रजायन्ते मूषका नकुलेषु च॥ **6.35.29**॥ 1277

मार्जारा द्वीपिभिः सार्धं सूकराः शुनकैः सह।
किन्नरा राक्षसैश्चापि समेयुर्मानुषैः सह॥ **6.35.30**॥ 1278

पाण्डुरा रक्तपादाश्च विहगाः कालचोदिताः।
राक्षसानां विनाशाय कपोता विचरन्ति च॥ **6.35.31**॥ 1279

चीचीकूचीति वाशन्त्यः शारिका वेश्मसु स्थिताः।
पतन्ति ग्रथिताश्चापि निर्जिताः कलहैषिभिः॥ **6.35.32**॥ 1280

पक्षिणश्च मृगाः सर्वे प्रत्यादित्यं रुदन्ति ते।
करालो विकटो मुण्डः पुरुषः कृष्णपिङ्गलः॥ **6.35.33**॥ 1281

कालो गृहाणि सर्वेषां काले कालेऽन्ववेक्षते।
एतान्यन्यानि दुष्टानि निमित्तान्युत्पतन्ति च॥ **6.35.34**॥ 1282

विष्णुं मन्यामहे रामं मानुषं रूपमास्थितम्।
नहि मानुषमात्रोऽसौ राघवो दृढविक्रमः॥ **6.35.35**॥ 1283

येन बद्धः समुद्रे च सेतुः स परमाद्भुतः।
कुरुष्व नरराजेन सन्धिं रामेण रावण।
ज्ञात्वावधार्य कर्माणि क्रियतामायतिक्षमम्॥ **6.35.36**॥ 1284

इदं वचस्तस्य निगद्य माल्यवान्
परीक्ष्य रक्षोधिपतेर्मनः पुनः।
अनुत्तमेषूत्तमपौरुषो बली
बभूव तूष्णीं समवेक्ष्य रावणम्॥ **6.35.37**॥ 1285

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षट्त्रिंशः सर्गः ॥

माल्यवन्तं निर्भर्त्स्य नगरगुप्तिं विधाय रावणस्य निजान्तःपुरे गमनम्

तत् तु माल्यवतो वाक्यं हितमुक्तं दशाननः।
न मर्षयति दुष्टात्मा कालस्य वशमागतः॥ **6.36.1** ॥ 1286

स बद्ध्वा भ्रुकुटिं वक्त्रे क्रोधस्य वशमागतः।
अमर्षात् परिवृत्ताक्षो माल्यवन्तमथाब्रवीत्॥ **6.36.2** ॥ 1287

हितबुद्ध्या यदहितं वचः परुषमुच्यते।
परपक्षं प्रविश्यैव नैतच्छ्रोत्रगतं मम॥ **6.36.3** ॥ 1288

मानुषं कृपणं राममेकं शाखामृगाश्रयम्।
समर्थं मन्यसे केन त्यक्तं पित्रा वनाश्रयम्॥ **6.36.4** ॥ 1289

रक्षसामीश्वरं मां च देवानां च भयङ्करम्।
हीनं मां मन्यसे केन अहीनं सर्वविक्रमैः॥ **6.36.5** ॥ 1290

वीरद्वेषेण वा शङ्के पक्षपातेन वा रिपोः।
त्वयाहं परुषाण्युक्तो परप्रोत्साहनेन वा॥ **6.36.6** ॥ 1291

प्रभवन्तं पदस्थं हि परुषं कोऽभिभाषते।
पण्डितः शास्त्रतत्त्वज्ञो विना प्रोत्साहनेन वा॥ **6.36.7** ॥ 1292

आनीय च वनात् सीतां पद्महीनामिव श्रियम्।
किमर्थं प्रतिदास्यामि राघवस्य भयादहम्॥ **6.36.8**॥ 1293

वृतं वानरकोटीभिः ससुग्रीवं सलक्ष्मणम्।
पश्य कैश्चिदहोभिश्च राघवं निहतं मया॥ **6.36.9**॥ 1294

द्वन्द्वे यस्य न तिष्ठन्ति दैवतान्यपि संयुगे।
स कस्माद् रावणो युद्धे भयमाहारयिष्यति॥ **6.36.10**॥ 1295

द्विधा भज्येयमप्येवं न नमेयं तु कस्यचित्।
एष मे सहजो दोषः स्वभावो दुरतिक्रमः॥ **6.36.11**॥ 1296

यदि तावत् समुद्रे तु सेतुर्बद्धो यदृच्छया।
रामेण विस्मयः कोऽत्र येन ते भयमागतम्॥ **6.36.12**॥ 1297

स तु तीर्त्वार्णवं रामः सह वानरसेनया।
प्रतिजानामि ते सत्यं न जीवन् प्रतियास्यति॥ **6.36.13**॥ 1298

एवं ब्रुवाणं संरब्धं रुष्टं विज्ञाय रावणम्।
व्रीडितो माल्यवान् वाक्यं नोत्तरं प्रत्यपद्यत॥ **6.36.14**॥ 1299

जयाशिषा तु राजानं वर्धयित्वा यथोचितम्।
माल्यवानभ्यनुज्ञातो जगाम स्वं निवेशनम्॥ **6.36.15**॥ 1300

रावणस्तु सहामात्यो मन्त्रयित्वा विमृश्य च।
लङ्कायास्तु तदा गुप्तिं कारयामास राक्षसः॥ **6.36.16**॥ 1301

व्यादिदेश च पूर्वस्यां प्रहस्तं द्वारि राक्षसम्।
दक्षिणस्यां महावीर्यौ महापार्श्वमहोदरौ॥ **6.36.17**॥ 1302

पश्चिमायामथ द्वारि पुत्रमिन्द्रजितं तदा।
व्यादिदेश महामायं राक्षसैर्बहुभिर्वृतम्॥ **6.36.18**॥ 1303

उत्तरस्यां पुरद्वारि व्यादिश्य शुकसारणौ।
स्वयं चात्र गमिष्यामि मन्त्रिणस्तानुवाच ह॥ **6.36.19**॥ 1304

राक्षसं तु विरूपाक्षं महावीर्यपराक्रमम्।
मध्यमेऽस्थापयद् गुल्मे बहुभिः सह राक्षसैः॥ **6.36.20**॥ 1305

एवं विधानं लङ्कायां कृत्वा राक्षसपुङ्गवः।
कृतकृत्यमिवात्मानं मन्यते कालचोदितः॥ **6.36.21**॥ 1306

विसर्जयामास ततः स मन्त्रिणो
विधानमाज्ञाप्य पुरस्य पुष्कलम्।
जयाशिषा मन्त्रिगणेन पूजितो
विवेश सोऽन्तःपुरमृद्धिमन्महत्॥ **6.36.22**॥ 1307

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षट्त्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तत्रिंशः सर्गः ॥

विभीषणेन श्रीरामं प्रति रावणेन विहिताया लङ्कारक्षाव्यवस्थाया वर्णनं श्रीरामेण लङ्काया द्वारेष्वाक्रमणाय वानरसेनापतीनां नियुक्तिः

नरवानरराजानौ स तु वायुसुतः कपिः।
जाम्बवानृक्षराजश्च राक्षसश्च विभीषणः॥ **6.37.1** ॥ 1308

अङ्गदो वालिपुत्रश्च सौमित्रिः शरभः कपिः।
सुषेणः सहदायादो मैन्दो द्विविद एव च॥ **6.37.2** ॥ 1309

गजो गवाक्षः कुमुदो नलोऽथ पनसस्तथा।
अमित्रविषयं प्राप्ताः समवेताः समर्थयन्॥ **6.37.3** ॥ 1310

इयं सा लक्ष्यते लङ्का पुरी रावणपालिता।
सासुरोरगगन्धर्वैरमरैरपि दुर्जया॥ **6.37.4** ॥ 1311

कार्यसिद्धिं पुरस्कृत्य मन्त्रयध्वं विनिर्णये।
नित्यं सन्निहितो यत्र रावणो राक्षसाधिपः॥ **6.37.5** ॥ 1312

अथ तेषु ब्रुवाणेषु रावणावरजोऽब्रवीत्।
वाक्यमग्राम्यपदवत् पुष्कलार्थं विभीषणः॥ **6.37.6** ॥ 1313

अनलः पनसश्चैव सम्पातिः प्रमतिस्तथा।
गत्वा लङ्कां ममामात्याः पुरीं पुनरिहागताः॥ **6.37.7** ॥ 1314

भूत्वा शकुनयः सर्वे प्रविष्टाश्च रिपोर्बलम्।
विधानं विहितं यच्च तद् दृष्ट्वा समुपस्थिताः॥ **6.37.8**॥ 1315

संविधानं यथाहुस्ते रावणस्य दुरात्मनः।
राम तद् ब्रुवतः सर्वं याथातथ्येन मे शृणु॥ **6.37.9**॥ 1316

पूर्वं प्रहस्तः सबलो द्वारमासाद्य तिष्ठति।
दक्षिणं च महावीर्यौ महापार्श्वमहोदरौ॥ **6.37.10**॥ 1317

इन्द्रजित् पश्चिमं द्वारं राक्षसैर्बहुभिर्वृतः।
पट्टिशासिधनुष्मद्भिः शूलमुद्गरपाणिभिः॥ **6.37.11**॥ 1318

नानाप्रहरणैः शूरैरावृतो रावणात्मजः।
राक्षसानां सहस्रेस्तु बहुभिः शस्त्रपाणिभिः॥ **6.37.12**॥ 1319

युक्तः परमसंविग्नो राक्षसैः सह मन्त्रवित्।
उत्तरं नगरद्वारं रावणः स्वयमास्थितः॥ **6.37.13**॥ 1320

विरूपाक्षस्तु महता शूलखड्गधनुष्मता।
बलेन राक्षसैः सार्धं मध्यमं गुल्ममाश्रितः॥ **6.37.14**॥ 1321

एतानेवं विधान् गुल्मान् लङ्कायां समुदीक्ष्य ते।
मामका मन्त्रिणः सर्वे शीघ्रं पुनरिहागताः॥ **6.37.15**॥ 1322

गजानां दशसाहस्रं रथानामयुतं तथा।
हयानामयुते द्वे च साग्रकोटिश्च रक्षसाम्॥ **6.37.16**॥ 1323

विक्रान्ता बलवन्तश्च संयुगेष्वाततायिनः।
इष्टा राक्षसराजस्य नित्यमेते निशाचराः॥ **6.37.17**॥ 1324

एकैकस्यात्र युद्धार्थे राक्षसस्य विशाम्पते।
परीवारः सहस्राणां सहस्रमुपतिष्ठते॥ **6.37.18**॥ 1325

एतां प्रवृत्तिं लङ्कायां मन्त्रिप्रोक्तां विभीषणः।
एवमुक्त्वा महाबाहू राक्षसांस्तानदर्शयत्॥ **6.37.19**॥ 1326

लङ्कायां सचिवैः सर्वं रामाय प्रत्यवेदयत्।
रामं कमलपत्राक्षमिदमुत्तरमब्रवीत्॥ **6.37.20**॥ 1327

रावणावरजः श्रीमान् रामप्रियचिकीर्षया।
कुबेरं तु यदा राम रावणः प्रतियुद्ध्यति॥ **6.37.21**॥ 1328

षष्टिः शतसहस्राणि तदा निर्यान्ति राक्षसाः।
पराक्रमेण वीर्येण तेजसा सत्त्वगौरवात्।
सदृशा ह्यत्र दर्पण रावणस्य दुरात्मनः॥ **6.37.22**॥ 1329

अत्र मन्युर्न कर्तव्यः कोपये त्वां न भीषये।
समर्थो ह्यसि वीर्येण सुराणामपि निग्रहे॥ **6.37.23**॥ 1330

तद्भवांश्चतुरङ्गेण बलेन महता वृतम्।
व्यूह्येदं वानरानीकं निर्मथिष्यसि रावणम्॥ **6.37.24**॥ 1331

रावणावरजे वाक्यमेवं ब्रुवति राघवः।
शत्रूणां प्रतिघातार्थमिदं वचनमब्रवीत्॥ **6.37.25**॥ 1332

पूर्वद्वारं तु लङ्काया नीलो वानरपुङ्गवः।
प्रहस्तं प्रतियोद्धा स्याद् वानरैर्बहुभिर्वृतः॥ **6.37.26**॥ 1333

अङ्गदो वालिपुत्रस्तु बलेन महता वृतः।
दक्षिणे बाधतां द्वारे महापार्श्वमहोदरौ॥ **6.37.27**॥ 1334

हनूमान् पश्चिमद्वारं निष्पीड्य पवनात्मजः।
प्रविशत्वप्रमेयात्मा बहुभिः कपिभिर्वृतः॥ **6.37.28**॥ 1335

दैत्यदानवसङ्घानामृषीणां च महात्मनाम्।
विप्रकारप्रियः क्षुद्रो वरदानबलान्वितः॥ **6.37.29**॥ 1336

परिक्रमति यः सर्वाल्लोकान् सन्तापयन् प्रजाः।
तस्याहं राक्षसेन्द्रस्य स्वयमेव वधे धृतः॥ **6.37.30**॥ 1337

उत्तरं नगरद्वारमहं सौमित्रिणा सह।
निपीड्याभिप्रवेक्ष्यामि सबलो यत्र रावणः॥ **6.37.31**॥ 1338

वानरेन्द्रश्च बलवानृक्षराजश्च वीर्यवान्।
राक्षसेन्द्रानुजश्चैव गुल्मे भवतु मध्यमे॥ **6.37.32**॥ 1339

न चैव मानुषं रूपं कार्यं हरिभिराहवे।
एषा भवतु नः संज्ञा युद्धेऽस्मिन् वानरे बले॥ **6.37.33**॥ 1340

वानरा एव नश्चिह्नं स्वजनेऽस्मिन् भविष्यति।
वयं तु मानुषेणैव सप्त योत्स्यामहे परान्॥ **6.37.34**॥ 1341

अहमेव सह भ्रात्रा लक्ष्मणेन महौजसा।
आत्मना पञ्चमश्चायं सखा मम विभीषणः॥ **6.37.35**॥ 1342

स रामः कृत्यसिद्ध्यर्थमेवमुक्त्वा विभीषणम्।
सुवेलारोहणे बुद्धिं चकार मतिमान् प्रभुः।
रमणीयतरं दृष्ट्वा सुवेलस्य गिरेस्तटम्॥ **6.37.36**॥ 1343

ततस्तु रामो महता बलेन
प्रच्छाद्य सर्वां पृथिवीं महात्मा।
प्रहृष्टरूपोऽभिजगाम लङ्कां
कृत्वा मतिं सोऽरिवधे महात्मा॥ **6.37.37**॥ 1344

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तत्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टात्रिंशः सर्गः ॥

प्रमुखवानरैः सह सुवेलपर्वतमधिरूढस्य श्रीरामस्य तत्रैव रात्रौ निवासः

स तु कृत्वा सुवेलस्य मतिमारोहणं प्रति।
लक्ष्मणानुगतो रामः सुग्रीवमिदमब्रवीत्॥ **6.38.1** ॥ 1345

विभीषणं च धर्मज्ञमनुरक्तं निशाचरम्।
मन्त्रज्ञं च विधिज्ञं च श्लक्ष्णया परया गिरा॥ **6.38.2** ॥ 1346

सुवेलं साधु शैलेन्द्रमिमं धातुशतैश्चितम्।
अध्यारोहामहे सर्वे वत्स्यामोऽत्र निशामिमाम्॥ **6.38.3** ॥ 1347

लङ्कां चालोकयिष्यामो निलयं तस्य रक्षसः।
येन मे मरणान्ताय हृता भार्या दुरात्मना॥ **6.38.4** ॥ 1348

येन धर्मो न विज्ञातो न वृत्तं न कुलं तथा।
राक्षस्या नीचया बुद्ध्या येन तद् गर्हितं कृतम्॥ **6.38.5** ॥ 1349

तस्मिन् मे वर्तते रोषः कीर्तिते राक्षसाधमे।
यस्यापराधान्नीचस्य वधं द्रक्ष्यामि रक्षसाम्॥ **6.38.6** ॥ 1350

एको हि कुरुते पापं कालपाशवशं गतः।
नीचेनात्मापचारेण कुलं तेन विनश्यति॥ **6.38.7** ॥ 1351

एवं सम्मन्त्रयन्नेव सक्रोधो रावणं प्रति।
रामः सुवेलं वासाय चित्रसानुमुपारुहत्॥ **6.38.8**॥ 1352

पृष्ठतो लक्ष्मणश्चैनमन्वगच्छत् समाहितः।
सशरं चापमुद्यम्य सुमहद्विक्रमे रतः॥ **6.38.9**॥ 1353

तमन्वारोहत् सुग्रीवः सामात्यः सविभीषणः।
हनुमानङ्गदो नीलो मैन्दो द्विविद एव च॥ **6.38.10**॥ 1354

गजो गवाक्षो गवयः शरभो गन्धमादनः।
पनसः कुमुदश्चैव हरो रम्भश्च यूथपः॥ **6.38.11**॥ 1355

जाम्बवांश्च सुषेणश्च ऋषभश्च महामतिः।
दुर्मुखश्च महातेजास्तथा शतवलिः कपिः॥ **6.38.12**॥ 1356

एते चान्ये च बहवो वानराः शीघ्रगामिनः।
ते वायुवेगप्रवणास्तं गिरिं गिरिचारिणः॥ **6.38.13**॥ 1357

अध्यारोहन्त शतशः सुवेलं यत्र राघवः।
ते त्वदीर्घेण कालेन गिरिमारुह्य सर्वतः॥ **6.38.14**॥ 1358

ददृशुः शिखरे तस्य विषक्तामिव खे पुरीम्।
तां शुभां प्रवरद्वारां प्राकारवरशोभिताम्॥ **6.38.15**॥ 1359

लङ्कां राक्षससम्पूर्णां ददृशुर्हरियूथपाः।
प्राकारवरसंस्थैश्च तथा नीलैश्च राक्षसैः॥ **6.38.16**॥ 1360

ददृशुस्ते हरिश्रेष्ठाः प्राकारमपरं कृतम्॥ **6.38.17**॥ 1361

ते दृष्ट्वा वानराः सर्वे राक्षसान् युद्धकाङ्क्षिणः।
मुमुचुर्विविधान् नादांस्तस्य रामस्य पश्यतः॥ **6.38.18**॥ 1362

ततोऽस्तमगमत् सूर्यः सन्ध्यया प्रतिरञ्जितः।
पूर्णचन्द्रप्रदीप्ता च क्षपा समतिवर्तत॥ **6.38.19**॥ 1363

ततः स रामो हरिवाहिनीपति -
विभीषणेन प्रतिनन्द्य सत्कृतः।
सलक्ष्मणो यूथपयूथसंयुतः
सुवेलपृष्ठे न्यवसद् यथासुखम्॥ **6.38.20**॥ 1364

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टात्रिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनचत्वारिंशः सर्गः ॥

वानरैः सह श्रीरामेण सुवेलशिखराल्लङ्काया निरीक्षणम्

तां रात्रिमुषितास्तत्र सुवेले हरियूथपाः।
लङ्कायां ददृशुर्वीरा वनान्युपवनानि च ॥ **6.39.1** ॥ 1365

समसौम्यानि रम्याणि विशालान्यायतानि च।
दृष्टिरम्याणि ते दृष्ट्वा बभूवुर्जातविस्मयाः ॥ **6.39.2** ॥ 1366

चम्पकाशोकबकुलशालतालसमाकुला।
तमालवनसञ्छन्ना नागमालासमावृता ॥ **6.39.3** ॥ 1367

हिन्तालैरर्जुनैर्नीपैः सप्तपर्णैः सुपुष्पितैः।
तिलकैः कर्णिकारैश्च पाटलैश्च समन्ततः ॥ **6.39.4** ॥ 1368

शुशुभे पुष्पिताग्रैश्च लतापरिगतैर्द्रुमैः।
लङ्का बहुविधैर्दिव्यैर्यथेन्द्रस्यामरावती ॥ **6.39.5** ॥ 1369

विचित्रकुसुमोपेतै रक्तकोमलपल्लवैः।
शाद्वलैश्च तथा नीलैश्चित्राभिर्वनराजिभिः ॥ **6.39.6** ॥ 1370

गन्धाढ्यान्यतिरम्याणि पुष्पाणि च फलानि च।
धारयन्त्यगमास्तत्र भूषणानीव मानवाः ॥ **6.39.7** ॥ 1371

तच्चैत्ररथसङ्काशं मनोज्ञं नन्दनोपमम्।
वनं सर्वर्तुकं रम्यं शुशुभे षद्मदायुतम्॥ **6.39.8**॥ 1372

दात्यूहकोयष्टिबकैर्नृत्यमानैश्च बर्हिणैः।
रुतं परभृतानां च शुश्रुवे वननिर्झरे॥ **6.39.9**॥ 1373

नित्यमत्तविहङ्गानि भ्रमराचरितानि च।
कोकिलाकुलखण्डानि विहङ्गाभिरुतानि च॥ **6.39.10**॥ 1374

भृङ्गराजाधिगीतानि कुररस्वनितानि च।
कोणालकविघुष्टानि सारसाभिरुतानि च।
विविशुस्ते ततस्तानि वनान्युपवनानि च॥ **6.39.11**॥ 1375

हृष्टाः प्रमुदिता वीरा हरयः कामरूपिणः।
तेषां प्रविशतां तत्र वानराणां महौजसाम्॥ **6.39.12**॥ 1376

पुष्पसंसर्गसुरभिर्ववौ घ्राणसुखोऽनिलः।
अन्ये तु हरिवीराणां यूथान्निष्क्रम्य यूथपाः।
सुग्रीवेणाभ्यनुज्ञाता लङ्कां जग्मुः पताकिनीम्॥ **6.39.13**॥ 1377

वित्रासयन्तो विहगान् ग्लापयन्तो मृगद्विपान्।
कम्पयन्तश्च तां लङ्कां नादैः स्वैर्नदतां वराः॥ **6.39.14**॥ 1378

कुर्वन्तस्ते महावेगा महीं चरणपीडिताम्।
रजश्च सहसैवोर्ध्वं जगाम चरणोत्थितम्॥ **6.39.15**॥ 1379

ऋक्षाः सिंहाश्च महिषा वारणाश्च मृगाः खगाः।
तेन शब्देन वित्रस्ता जग्मुर्भीता दिशो दश॥ **6.39.16**॥ 1380

शिखरं तु त्रिकूटस्य प्रांशु चैकं दिविस्पृशम्।
समन्तात् पुष्पसञ्छन्नं महारजतसन्निभम्॥ **6.39.17**॥ 1381

शतयोजनविस्तीर्णं विमलं चारुदर्शनम्।
श्लक्ष्णं श्रीमन्महच्चैव दुष्प्रापं शकुनैरपि॥ **6.39.18**॥ 1382

मनसापि दुरारोहं किं पुनः कर्मणा जनैः।
निविष्टा तस्य शिखरे लङ्का रावणपालिता॥ **6.39.19**॥ 1383

दशयोजनविस्तीर्णा विंशद्योजनमायता।
सा पुरी गोपुरैरुच्चैः पाण्डुराम्बुदसन्निभैः।
काञ्चनेन च शालेन राजतेन च शोभते॥ **6.39.20**॥ 1384

प्रासादैश्च विमानैश्च लङ्का परमभूषिता।
घनैरिवातपापाये मध्यमं वैष्णवं पदम्॥ **6.39.21**॥ 1385

यस्यां स्तम्भसहस्रेण प्रासादः समलङ्कृतः।
कैलासशिखराकारो दृश्यते खमिवोल्लिखन्॥ **6.39.22**॥ 1386

चैत्यः स राक्षसेन्द्रस्य बभूव पुरभूषणम्।
शतेन रक्षसां नित्यं यः समग्रेण रक्ष्यते॥ **6.39.23**॥ 1387

मनोज्ञां काञ्चनवतीं पर्वतैरुपशोभिताम्।
नानाधातुविचित्रैश्च उद्यानैरुपशोभिताम्॥ **6.39.24**॥ 1388

नानाविहगसङ्घुष्टां नानामृगनिषेविताम्।
नानाकुसुमसम्पन्नां नानाराक्षससेविताम्॥ **6.39.25**॥ 1389

तां समृद्धां समृद्धार्थां लक्ष्मीवान् लक्ष्मणाग्रजः।
रावणस्य पुरीं रामो ददर्श सह वानरैः॥ **6.39.26**॥ 1390

तां महागृहसम्बाधां दृष्ट्वा लक्ष्मणपूर्वजः।
नगरीं त्रिदिवप्रख्यां विस्मयं प्राप वीर्यवान्॥ **6.39.27**॥ 1391

तां रत्नपूर्णां बहुसंविधानां
प्रासादमालाभिरलङ्कृतां च।
पुरीं महायन्त्रकवाटमुख्यां
ददर्श रामो महता बलेन॥ **6.39.28**॥ 1392

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चत्वारिंशः सर्गः ॥

सुग्रीवरावणयोर्मल्लयुद्धम्

ततो रामः सुवेलाग्रं योजनद्वयमण्डलम्।
उपारोहत् ससुग्रीवो हरियूथैः समन्वितः॥ **6.40.1** ॥ 1393

स्थित्वा मुहूर्तं तत्रैव दिशो दश विलोकयन्।
त्रिकूटशिखरे रम्ये निर्मितां विश्वकर्मणा॥ **6.40.2** ॥ 1394

ददर्श लङ्कां सुन्यस्तां रम्यकाननशोभिताम्।
तस्य गोपुरशृङ्गस्थं राक्षसेन्द्रं दुरासदम्॥ **6.40.3** ॥ 1395

श्वेतचामरपर्यन्तं विजयच्छत्रशोभितम्।
रक्तचन्दनसंलिप्तं रत्नाभरणभूषितम्॥ **6.40.4** ॥ 1396

नीलजीमूतसङ्काशं हेमसञ्छादिताम्बरम्।
ऐरावतविषाणाग्रैरुत्कृष्टकिणवक्षसम्॥ **6.40.5** ॥ 1397

शशलोहितरागेण संवीतं रक्तवाससा।
सन्ध्यातपेन सञ्छन्नं मेघराशिमिवाम्बरे॥ **6.40.6** ॥ 1398

पश्यतां वानरेन्द्राणां राघवस्यापि पश्यतः।
दर्शनाद् राक्षसेन्द्रस्य सुग्रीवः सहसोत्थितः॥ **6.40.7** ॥ 1399

क्रोधवेगेन संयुक्तः सत्त्वेन च बलेन च।
अचलाग्रादथोत्थाय पुप्लवे गोपुरस्थले॥ **6.40.8**॥ 1400

स्थित्वा मुहूर्तं सम्प्रेक्ष्य निर्भयेनान्तरात्मना।
तृणीकृत्य च तद् रक्षः सोऽब्रवीत् परुषं वचः॥ **6.40.9**॥ 1401

लोकनाथस्य रामस्य सखा दासोऽस्मि राक्षस।
न मया मोक्ष्यसेऽद्य त्वं पार्थिवेन्द्रस्य तेजसा॥ **6.40.10**॥ 1402

इत्युक्त्वा सहसोत्पत्य पुप्लुवे तस्य चोपरि।
आकृष्य मुकुटं चित्रं पातयामास तद् भुवि॥ **6.40.11**॥ 1403

समीक्ष्य तूर्णमायान्तं बभाषे तं निशाचरः।
सुग्रीवस्त्वं परोक्षं मे हीनग्रीवो भविष्यसि॥ **6.40.12**॥ 1404

इत्युक्त्वोत्थाय तं क्षिप्रं बाहुभ्यामाक्षिपत् तले।
कन्दुवत् स समुत्थाय बाहुभ्यामाक्षिपद्धरिः॥ **6.40.13**॥ 1405

परस्परं स्वेदविदिग्धगात्रौ
परस्परं शोणितरक्तदेहौ।
परस्परं श्लिष्टनिरुद्धचेष्टौ
परस्परं शाल्मलिकिंशुकाविव॥ **6.40.14**॥ 1406

मुष्टिप्रहारैश्च तलप्रहारै -
ररत्निघातैश्च कराग्रघातैः।
तौ चक्रतुर्युद्धमसह्यरूपं
महाबलौ राक्षसवानरेन्द्रौ॥ **6.40.15**॥ 1407

कृत्वा नियुद्धं भृशमुग्रवेगौ
कालं चिरं गोपुरवेदिमध्ये।

उत्क्षिप्य चोत्क्षिप्य विनम्य देहौ
पादक्रमाद् गोपुरवेदिलग्नौ ॥ **6.40.16** ॥ 1408

अन्योन्यमापीड्य विलग्नदेहौ
तौ पेततुः सालनिखातमध्ये।
उत्पेततुर्भूमितलं स्पृशन्तौ
स्थित्वा मुहूर्तं त्वभिनिःश्वसन्तौ ॥ **6.40.17** ॥ 1409

आलिङ्ग्य चालिङ्ग्य च बाहुयोक्त्रैः।
संयोजयामासतुराहवे तौ।
संरम्भशिक्षाबलसम्प्रयुक्तौ
सुचेरतुः सम्प्रति युद्धमार्गैः ॥ **6.40.18** ॥ 1410

शार्दूलसिंहाविव जातदंष्ट्रौ
गजेन्द्रपोताविव सम्प्रयुक्तौ।
संहत्य संवेद्य च तौ कराभ्यां
तौ पेततुर्वै युगपद् धरायाम् ॥ **6.40.19** ॥ 1411

उद्यम्य चान्योन्यमधिक्षिपन्तौ
सञ्चक्रमाते बहु युद्धमार्गे।
व्यायामशिक्षाबलसम्प्रयुक्तौ
क्लमं न तौ जग्मतुराशु वीरौ ॥ **6.40.20** ॥ 1412

बाहूत्तमैर्वारणवारणाभै -
र्निवारयन्तौ परवारणाभौ।
चिरेण कालेन भृशं प्रयुद्धौ
सञ्चेरतुर्मण्डलमार्गमाशु ॥ **6.40.21** ॥ 1413

तौ परस्परमासाद्य यत्तावन्योन्यसूदने।
मार्जाराविव भक्षार्थेऽवतस्थाते मुहर्मुहुः ॥ **6.40.22** ॥ 1414

मण्डलानि विचित्राणि स्थानानि विविधानि च।
गोमूत्रकाणि चित्राणि गतप्रत्यागतानि च॥ **6.40.23**॥ 1415

तिरश्चीनगतान्येव तथा वक्रगतानि च।
परिमोक्षं प्रहाराणां वर्जनं परिधावनम्॥ **6.40.24**॥ 1416

अभिद्रवणमाप्लावमवस्थानं सविग्रहम्।
परावृत्तमपावृत्तमपद्रुतमवप्लुतम्॥ **6.40.25**॥ 1417

उपन्यस्तमपन्यस्तं युद्धमार्गविशारदौ।
तौ विचेरतुरन्योन्यं वानरेन्द्रश्च रावणः॥ **6.40.26**॥ 1418

एतस्मिन्नन्तरे रक्षो मायाबलमथात्मनः।
आरब्धुमुपसम्पेदे ज्ञात्वा तं वानराधिपः॥ **6.40.27**॥ 1419

उत्पपात तदाऽऽकाशं जितकाशी जितक्लमः।
रावणः स्थित एवात्र हरिराजेन वञ्चितः॥ **6.40.28**॥ 1420

अथ हरिवरनाथः प्राप्तसङ्ग्रामकीर्ति -
र्निशिचरपतिमाजौ योजयित्वा श्रमेण।
गगनमतिविशालं लङ्घयित्वार्कसूनु -
र्हरिगणबलमध्ये रामपार्श्वं जगाम॥ **6.40.29**॥ 1421

इति स सवितृसूनुस्तत्र तत् कर्म कृत्वा
पवनगतिरनीकं प्राविशत् सम्प्रहृष्टः।
रघुवरनृपसूनोर्वर्धयन् युद्धहर्ष
तरुमृगगणमुख्यैः पूज्यमानो हरीन्द्रः॥ **6.40.30**॥ 1422

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकचत्वारिंशः सर्गः ॥

श्रीरामेण सुग्रीवस्य दुःसाहसाद् वारणम्, लङ्कायाश्चतुर्षु द्वारेषु वानरसैनिकानां नियुक्तिः, श्रीराम दूतस्याङ्गदस्य रावणभवने पराक्रमो वानराणामाक्रमणाद् रक्षसां भयम्

अथ तस्मिन् निमित्तानि दृष्ट्वा लक्ष्मणपूर्वजः।
सुग्रीवं सम्परिष्वज्य रामो वचनमब्रवीत्॥ **6.41.1**॥ 1423

असम्मन्त्र्य मया सार्धं तदिदं साहसं कृतम्।
एवं साहसयुक्तानि न कुर्वन्ति जनेश्वराः॥ **6.41.2**॥ 1424

संशये स्थाप्य मां चेदं बलं चेमं विभीषणम्।
कष्टं कृतमिदं वीर साहसं साहसप्रिय॥ **6.41.3**॥ 1425

इदानीं मा कृथा वीर एवंविधमरिन्दम।
त्वयि किञ्चित्समापन्ने किं कार्यं सीतया मम॥ **6.41.4**॥ 1426

भरतेन महाबाहो लक्ष्मणेन यवीयसा।
शत्रुघ्नेन च शत्रुघ्न स्वशरीरेण वा पुनः॥ **6.41.5**॥ 1427

त्वयि चानागते पूर्वमिति मे निश्चिता मतिः।
जानतश्चापि ते वीर्यं महेन्द्रवरुणोपम॥ **6.41.6**॥ 1428

हत्वाहं रावणं युद्धे सपुत्रबलवाहनम्।
अभिषिच्य च लङ्कायां विभीषणमथापि च॥ **6.41.7**॥ 1429

भरते राज्यमारोप्य त्यक्ष्ये देहं महाबल।
तमेवं वादिनं रामं सुग्रीवः प्रत्यभाषत॥ **6.41.8**॥ 1430

तव भार्यापहर्तारं दृष्ट्वा राघव रावणम्।
मर्षयामि कथं वीर जानन् विक्रममात्मनः॥ **6.41.9**॥ 1431

इत्येवं वादिनं वीरमभिनन्द्य च राघवः।
लक्ष्मणं लक्ष्मिसम्पन्नमिदं वचनमब्रवीत्॥ **6.41.10**॥ 1432

परिगृह्योदकं शीतं वनानि फलवन्ति च।
बलौघं संविभज्येमं व्यूह्य तिष्ठाम लक्ष्मण॥ **6.41.11**॥ 1433

लोकक्षयकरं भीमं भयं पश्याम्युपस्थितम्।
निबर्हणं प्रवीराणामृक्षवानररक्षसाम्॥ **6.41.12**॥ 1434

वाता हि परुषं वान्ति कम्पते च वसुन्धरा।
पर्वताग्राणि वेपन्ते नदन्ति धरणीधराः॥ **6.41.13**॥ 1435

मेघाः क्रव्यादसङ्काशाः परुषाः परुषस्वराः।
क्रूराः क्रूरं प्रवर्षन्ते मिश्रं शोणितबिन्दुभिः॥ **6.41.14**॥ 1436

रक्तचन्दनसङ्काशा सन्ध्या परमदारुणा।
ज्वलच्च निपतत्येतदादित्यादग्निमण्डलम्॥ **6.41.15**॥ 1437

आदित्यमभिवाश्यन्ति जनयन्तो महद्भयम्।
दीना दीनस्वरा घोरा अप्रशस्ता मृगद्विजाः॥ **6.41.16**॥ 1438

रजन्यामप्रकाशश्च सन्तापयति चन्द्रमाः।
कृष्णरक्तांशुपर्यन्तो यथा लोकस्य सङ्क्षये॥ **6.41.17**॥ 1439

ह्रस्वो रूक्षोऽप्रशस्तश्च परिवेषः सुलोहितः।
आदित्यमण्डले नीलं लक्ष्म लक्ष्मण दृश्यते॥ **6.41.18**॥ 1440

दृश्यन्ते न यथावच्च नक्षत्राण्यभिवर्तते।
युगान्तमिव लोकस्य पश्य लक्ष्मण शंसति॥ **6.41.19**॥ 1441

काकाः श्येनास्तथा गृध्रा नीचैः परिपतन्ति च।
शिवाश्चाप्यशुभा वाचः प्रवदन्ति महास्वनाः॥ **6.41.20**॥ 1442

शैलैः शूलैश्च खड्गैश्च विमुक्तैः कपिराक्षसैः।
भविष्यत्यावृता भूमिर्मांसशोणितकर्दमा॥ **6.41.21**॥ 1443

क्षिप्रमद्य दुराधर्षां पुरीं रावणपालिताम्।
अभियाम जवेनैव सर्वतो हरिभिर्वृताः॥ **6.41.22**॥ 1444

इत्येवं तु वदन् वीरो लक्ष्मणं लक्ष्मणाग्रजः।
तस्मादवातरच्छीघ्रं पर्वताग्रान्महाबलः॥ **6.41.23**॥ 1445

अवतीर्य तु धर्मात्मा तस्माच्छैलात् स राघवः।
परैः परमदुर्धर्षं ददर्श बलमात्मनः॥ **6.41.24**॥ 1446

सन्नह्य तु ससुग्रीवः कपिराजबलं महत्।
कालज्ञो राघवः काले संयुगायाभ्यचोदयत्॥ **6.41.25**॥ 1447

ततः काले महाबाहुर्बलेन महता वृतः।
प्रस्थितः पुरतो धन्वी लङ्कामभिमुखः पुरीम्॥ **6.41.26**॥ 1448

तं विभीषणसुग्रीवौ हनूमाञ्झाम्बवान् नलः।
ऋक्षराजस्तथा नीलो लक्ष्मणश्चान्वयुस्तदा॥ **6.41.27**॥ 1449

ततः पश्चात् सुमहती पृतनर्क्षवनौकसाम्।
प्रच्छाद्य महतीं भूमिमनुयाति स्म राघवम्॥ **6.41.28**॥ 1450

शैलशृङ्गाणि शतशः प्रवृद्धांश्च महीरुहान्।
जगृहुः कुञ्जरप्रख्या वानराः परवारणाः॥ **6.41.29**॥ 1451

तौ त्वदीर्घेण कालेन भ्रातरौ रामलक्ष्मणौ।
रावणस्य पुरीं लङ्कामासेदतुररिन्दमौ॥ **6.41.30**॥ 1452

पताकामालिनीं रम्यामुद्यानवनशोभिताम्।
चित्रवप्रां सुदुष्प्रापामुच्चैः प्राकारतोरणाम्॥ **6.41.31**॥ 1453

तां सुरैरपि दुर्धर्षां रामवाक्यप्रचोदिताः।
यथानिदेशं सम्पीड्य न्यविशन्त वनौकसः॥ **6.41.32**॥ 1454

लङ्कायास्तूत्तरद्वारं शैलशृङ्गमिवोन्नतम्।
रामः सहानुजो धन्वी जुगोप च रुरोध च॥ **6.41.33**॥ 1455

लङ्कामुपनिविष्टस्तु रामो दशरथात्मजः।
लक्ष्मणानुचरो वीरः पुरीं रावणपालिताम्॥ **6.41.34**॥ 1456

उत्तरद्वारमासाद्य यत्र तिष्ठति रावणः।
नान्यो रामाद्धि तद् द्वारं समर्थः परिरक्षितुम्॥ **6.41.35**॥ 1457

रावणाधिष्ठितं भीमं वरुणेनेव सागरम्।
सायुधै राक्षसैर्भीमैरभिगुप्तं समन्ततः॥ **6.41.36**॥ 1458

लघूनां त्रासजननं पातालमिव दानवैः।
विन्यस्तानि च योधानां बहूनि विविधानि च॥ **6.41.37**॥ 1459

ददर्शायुधजालानि तथैव कवचानि च।
पूर्वं तु द्वारमासाद्य नीलो हरिचमूपतिः॥ **6.41.38**॥ 1460

अतिष्ठत् सह मैन्देन द्विविदेन च वीर्यवान्।
अङ्गदो दक्षिणद्वारं जग्राह सुमहाबलः॥ **6.41.39**॥ 1461

ऋषभेण गवाक्षेण गजेन गवयेन च।
हनूमान् पश्चिमद्वारं ररक्ष बलवान् कपिः॥ **6.41.40**॥ 1462

प्रमाथिप्रघसाभ्यां च वीरैरन्यैश्च सङ्गतः।
मध्यमे च स्वयं गुल्मे सुग्रीवः समतिष्ठत॥ **6.41.41**॥ 1463

सह सर्वैर्हरिश्रेष्ठैः सुपर्णपवनोपमैः।
वानराणां तु षट्त्रिंशत्कोट्यः प्रख्यातयूथपाः॥ **6.41.42**॥ 1464

निपीड्योपनिविष्टाश्च सुग्रीवो यत्र वानरः।
शासनेन तु रामस्य लक्ष्मणः सविभीषणः॥ **6.41.43**॥ 1465

द्वारे द्वारे हरीणां तु कोटिं कोटीर्न्यवेशयत्।
पश्चिमेन तु रामस्य सुषेणः सहजाम्बवान्॥ **6.41.44**॥ 1466

अदूरान्मध्यमे गुल्मे तस्थौ बहुबलानुगः।
ते तु वानरशार्दूलाः शार्दूला इव दंष्ट्रिणः।
गृहीत्वा द्रुमशैलाग्रान् हृष्टा युद्धाय तस्थिरे॥ **6.41.45**॥ 1467

सर्वे विकृतलाङ्गूलाः सर्वे दंष्ट्रानखायुधाः।
सर्वे विकृतचित्राङ्गाः सर्वे च विकृताननाः॥ **6.41.46**॥ 1468

दशनागबलाः केचित् केचिद् दशगुणोत्तराः।
केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः॥ **6.41.47**॥ 1469

सन्ति चौघबलाः केचित् केचिच्छतगुणोत्तराः।
अप्रमेयबलाश्चान्ये तत्रासन् हरियूथपाः॥ **6.41.48**॥ 1470

अद्भुतश्च विचित्रश्च तेषामासीत् समागमः।
तत्र वानरसैन्यानां शलभानामिवोद्गमः॥ **6.41.49**॥ 1471

परिपूर्णमिवाकाशं सम्पूर्णेव च मेदिनी।
लङ्कामुपनिविष्टैश्च सम्पतद्भिश्च वानरैः॥ **6.41.50**॥ 1472

शतं शतसहस्राणां पृतनर्क्षवनौकसाम्।
लङ्काद्वाराण्युपाजग्मुरन्ये योद्धुं समन्ततः॥ **6.41.51**॥ 1473

आवृतः स गिरिः सर्वैस्तैः समन्तात् प्लवङ्गमैः।
अयुतानां सहस्रं च पुरीं तामभ्यवर्तत॥ **6.41.52**॥ 1474

वानरैर्बलवद्भिश्च बभूव द्रुमपाणिभिः।
सर्वतः संवृता लङ्का दुष्प्रवेशापि वायुना॥ **6.41.53**॥ 1475

राक्षसा विस्मयं जग्मुः सहसाभिनिपीडिताः।
वानरैर्मेघसङ्काशैः शक्रतुल्यपराक्रमैः॥ **6.41.54**॥ 1476

महाञ्छब्दोऽभवत् तत्र बलौघस्याभिवर्ततः।
सागरस्येव भिन्नस्य यथा स्यात् सलिलस्वनः॥ **6.41.55**॥ 1477

तेन शब्देन महता सप्राकारा सतोरणा।
लङ्का प्रचलिता सर्वा सशैलवनकानना॥ **6.41.56**॥ 1478

रामलक्ष्मणगुप्ता सा सुग्रीवेण च वाहिनी।
बभूव दुर्धर्षतरा सर्वैरपि सुरासुरैः॥ **6.41.57**॥ 1479

राघवः सन्निवेश्यैवं स्वसैन्यं रक्षसां वधे।
सम्मन्त्र्य मन्त्रिभिः सार्धं निश्चित्य च पुनः पुनः॥ **6.41.58**॥ 1480

आनन्तर्यमभिप्रेप्सुः क्रमयोगार्थतत्त्ववित्।
विभीषणस्यानुमते राजधर्ममनुस्मरन्॥ **6.41.59**॥ 1481

अङ्गदं वालितनयं समाहूयेदमब्रवीत्।
गत्वा सौम्य दशग्रीवं ब्रूहि मद्वचनात् कपे॥ **6.41.60**॥ 1482

लङ्घयित्वा पुरीं लङ्कां भयं त्यक्त्वा गतव्यथः।
भ्रष्टश्रीकं गतैश्वर्यं मुमूर्षानष्टचेतनम्॥ **6.41.61**॥ 1483

ऋषीणां देवतानां च गन्धर्वाप्सरसां तथा।
नागानामथ यक्षाणां राज्ञां च रजनीचर॥ **6.41.62**॥ 1484

यच्च पापं कृतं मोहादवलिप्तेन राक्षस।
नूनं ते विगतो दर्पः स्वयम्भूवरदानजः।
तस्य पापस्य सम्प्राप्ता व्युष्टिरद्य दुरासदा॥ **6.41.63**॥ 1485

यस्य दण्डधरस्तेऽहं दाराहरणकर्शितः।
दण्डं धारयमाणस्तु लङ्काद्वारे व्यवस्थितः॥ **6.41.64**॥ 1486

पदवीं देवतानां च महर्षीणां च राक्षस।
राजर्षीणां च सर्वेषां गमिष्यसि युधि स्थिरः॥ **6.41.65**॥ 1487

बलेन येन वै सीतां मायया राक्षसाधम।
मामतिक्रमयित्वा त्वं हृतवांस्तन्निदर्शय॥ **6.41.66**॥ 1488

अराक्षसमिमं लोकं कर्तास्मि निशितैः शरैः।
न चेच्छरणमभ्येषि तामादाय तु मैथिलीम्॥ **6.41.67**॥ 1489

धर्मात्मा राक्षसश्रेष्ठः सम्प्राप्तोऽयं विभीषणः।
लङ्कैश्वर्यमिदं श्रीमान् ध्रुवं प्राप्नोत्यकण्टकम्॥ **6.41.68**॥ 1490

नहि राज्यमधर्मेण भोक्तुं क्षणमपि त्वया।
शक्यं मूर्खसहायेन पापेनाविदितात्मना॥ **6.41.69**॥ 1491

युध्यस्व मा धृतिं कृत्वा शौर्यमालम्ब्य राक्षस।
मच्छरैस्त्वं रणे शान्तस्ततः पूतो भविष्यसि॥ **6.41.70**॥ 1492

यद्याविशसि लोकांस्त्रीन् पक्षीभूतो निशाचर।
मम चक्षुःपथं प्राप्य न जीवन् प्रतियास्यसि॥ **6.41.71**॥ 1493

ब्रवीमि त्वां हितं वाक्यं क्रियतामौर्ध्वदेहिकम्।
सुदृष्टा क्रियतां लङ्का जीवितं ते मयि स्थितम्॥ **6.41.72**॥ 1494

इत्युक्तः स तु तारेयो रामेणाक्लिष्टकर्मणा।
जगामाकाशमाविश्य मूर्तिमानिव हव्यवाट्॥ **6.41.73**॥ 1495

सोऽतिपत्य मुहूर्तेन श्रीमान् रावणमन्दिरम्।
ददर्शासीनमव्यग्रं रावणं सचिवैः सह॥ **6.41.74**॥ 1496

ततस्तस्याविदूरेण निपत्य हरिपुङ्गवः।
दीप्ताग्निसदृशस्तस्थावङ्गदः कनकाङ्गदः॥ **6.41.75**॥ 1497

तद् रामवचनं सर्वमन्यूनाधिकमुत्तमम्।
सामात्यं श्रावयामास निवेद्यात्मानमात्मना॥ **6.41.76**॥ 1498

दूतोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः।
वालिपुत्रोऽङ्गदो नाम यदि ते श्रोत्रमागतः॥ **6.41.77**॥ 1499

आह त्वां राघवो रामः कौसल्यानन्दवर्धनः।
निष्पत्य प्रतियुध्यस्व नृशंस पुरुषो भव॥ **6.41.78**॥ 1500

हन्तास्मि त्वां सहामात्यं सपुत्रज्ञातिबान्धवम्।
निरुद्विग्नास्त्रयो लोका भविष्यन्ति हते त्वयि॥ **6.41.79**॥ 1501

देवदानवयक्षाणां गन्धर्वोरगरक्षसाम्।
शत्रुमद्योद्धरिष्यामि त्वामृषीणां च कण्टकम्॥ **6.41.80**॥ 1502

विभीषणस्य चैश्वर्यं भविष्यति हते त्वयि।
न चेत् सत्कृत्य वैदेहीं प्रणिपत्य प्रदास्यसि॥ **6.41.81**॥ 1503

इत्येवं परुषं वाक्यं ब्रुवाणे हरिपुङ्गवे।
अमर्षवशमापन्नो निशाचरगणेश्वरः॥ **6.41.82**॥ 1504

ततः स रोषमापन्नः शशास सचिवांस्तदा।
गृह्यतामिति दुर्मेधा वध्यतामिति चासकृत्॥ **6.41.83**॥ 1505

रावणस्य वचः श्रुत्वा दीप्ताग्निमिव तेजसा।
जगृहुस्तं ततो घोराश्चत्वारो रजनीचराः॥ **6.41.84**॥ 1506

ग्राहयामास तारेयः स्वयमात्मानमात्मवान्।
बलं दर्शयितुं वीरो यातुधानगणे तदा॥ **6.41.85**॥ 1507

स तान् बाहुद्वयासक्तानादाय पतगानिव।
प्रासादं शैलसङ्काशमुत्पपाताङ्गदस्तदा॥ **6.41.86**॥ 1508

तस्योत्पतनवेगेन निर्धूतास्तत्र राक्षसाः।
भूमौ निपतिताः सर्वे राक्षसेन्द्रस्य पश्यतः॥ **6.41.87**॥ 1509

ततः प्रासादशिखरं शैलशृङ्गमिवोन्नतम्।
चक्राम राक्षसेन्द्रस्य वालिपुत्रः प्रतापवान्॥ **6.41.88**॥ 1510

पफाल च तदाक्रान्तं दशग्रीवस्य पश्यतः।
पुरा हिमवतः शृङ्गं वज्रेणेव विदारितम्॥ **6.41.89**॥ 1511

भङ्क्त्वा प्रासादशिखरं नाम विश्राव्य चात्मनः।
विनद्य सुमहानादमुत्पपात विहायसा॥ **6.41.90**॥ 1512

व्यथयन् राक्षसान् सर्वान् हर्षयंश्चापि वानरान्।
स वानराणां मध्ये तु रामपार्श्वमुपागतः॥ **6.41.91**॥ 1513

रावणस्तु परं चक्रे क्रोधं प्रासादधर्षणात्।
विनाशं चात्मनः पश्यन् निःश्वासपरमोऽभवत्॥ **6.41.92**॥ 1514

रामस्तु बहुभिर्हृष्टैर्विनदद्भिः प्लवङ्गमैः।
वृतो रिपुवधाकाङ्क्षी युद्धायैवाभ्यवर्तत॥ **6.41.93**॥ 1515

सुषेणस्तु महावीर्यो गिरिकूटोपमो हरिः।
बहुभिः संवृतस्तत्र वानरैः कामरूपिभिः॥ **6.41.94**॥ 1516

स तु द्वाराणि संयम्य सुग्रीववचनात् कपिः।
पर्यक्रामत दुर्धर्षो नक्षत्राणीव चन्द्रमाः॥ **6.41.95**॥ 1517

तेषामक्षौहिणिशतं समवेक्ष्य वनौकसाम्।
लङ्कामुपनिविष्टानां सागरं चाभिवर्तताम्॥ **6.41.96**॥ 1518

राक्षसा विस्मयं जग्मुस्त्रासं जग्मुस्तथापरे।
अपरे समरे हर्षाद्धर्षमेवोपपेदिरे॥ **6.41.97**॥ 1519

कृत्स्नं हि कपिभिर्व्याप्तं प्राकारपरिखान्तरम्।
ददृशू राक्षसा दीनाः प्राकारं वानरीकृतम्।
हाहाकारमकुर्वन्त राक्षसा भयमागताः॥ **6.41.98**॥ 1520

तस्मिन् महाभीषणके प्रवृत्ते
कोलाहले राक्षसराजयोधाः।
प्रगृह्य रक्षांसि महायुधानि
युगान्तवाता इव संविचेरुः॥ **6.41.99**॥ 1521

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विचत्वारिंशः सर्गः ॥

लङ्कां प्रति वानराणामाक्रमणं राक्षसैः सह सङ्ग्रामश्च

ततस्ते राक्षसास्तत्र गत्वा रावणमन्दिरम्।
न्यवेदयन् पुरीं रुद्धां रामेण सह वानरैः॥ **6.42.1** ॥ 1522

रुद्धां तु नगरीं श्रुत्वा जातक्रोधो निशाचरः।
विधानं द्विगुणं कृत्वा प्रासादं चाप्यरोहत॥ **6.42.2** ॥ 1523

स ददर्श वृतां लङ्कां सशैलवनकाननाम्।
असङ्ख्येयैर्हरिगणैः सर्वतो युद्धकाङ्क्षिभिः॥ **6.42.3** ॥ 1524

स दृष्ट्वा वानरैः सर्वैर्वसुधां कपिलीकृताम्।
कथं क्षपयितव्याः स्युरिति चिन्तापरोऽभवत्॥ **6.42.4** ॥ 1525

स चिन्तयित्वा सुचिरं धैर्यमालम्ब्य रावणः।
राघवं हरियूथांश्च ददर्शायतलोचनः॥ **6.42.5** ॥ 1526

राघवः सह सैन्येन मुदितो नाम पुप्लुवे।
लङ्कां ददर्श गुप्तां वै सर्वतो राक्षसैर्वृताम्॥ **6.42.6** ॥ 1527

दृष्ट्वा दाशरथिर्लङ्कां चित्रध्वजपताकिनीम्।
जगाम सहसा सीतां दूयमानेन चेतसा॥ **6.42.7** ॥ 1528

अत्र सा मृगशावाक्षी मत्कृते जनकात्मजा।
पीड्यते शोकसन्तप्ता कृशा स्थण्डिलशायिनी॥ **6.42.8**॥ 1529

निपीड्यमानां धर्मात्मा वैदेहीमनुचिन्तयन्।
क्षिप्रमाज्ञापयद् रामो वानरान् द्विषतां वधे॥ **6.42.9**॥ 1530

एवमुक्ते तु वचसि रामेणाक्लिष्टकर्मणा।
सङ्हर्षमाणाः प्लवगाः सिंहनादैरनादयन्॥ **6.42.10**॥ 1531

शिखरैर्विकिरामैतां लङ्कां मुष्टिभिरेव वा।
इति स्म दधिरे सर्वे मनांसि हरियूथपाः॥ **6.42.11**॥ 1532

उद्यम्य गिरिशृङ्गाणि महान्ति शिखराणि च।
तरूंश्चोत्पाट्य विविधांस्तिष्ठन्ति हरियूथपाः॥ **6.42.12**॥ 1533

प्रेक्षतो राक्षसेन्द्रस्य तान्यनीकानि भागशः।
राघवप्रियकामार्थं लङ्कामारुरुहुस्तदा॥ **6.42.13**॥ 1534

ते ताम्रवक्त्रा हेमाभा रामार्थे त्यक्तजीविताः।
लङ्कामेवाभ्यवर्तन्त सालभूधरयोधिनः॥ **6.42.14**॥ 1535

ते द्रुमैः पर्वताग्रैश्च मुष्टिभिश्च प्लवङ्गमाः।
प्राकाराग्राण्यसङ्ख्यानि ममन्थुस्तोरणानि च॥ **6.42.15**॥ 1536

परिखान् पूरयन्तश्च प्रसन्नसलिलाशयान्।
पांसुभिः पर्वताग्रैश्च तृणैः काष्ठैश्च वानराः॥ **6.42.16**॥ 1537

ततः सहस्रयूथाश्च कोटियूथाश्च यूथपाः।
कोटियूथशताश्चान्ये लङ्कामारुरुहुस्तदा॥ **6.42.17**॥ 1538

काञ्चनानि प्रमर्दन्तस्तोरणानि प्लवङ्गमाः।
कैलासशिखराग्राणि गोपुराणि प्रमथ्य च॥ **6.42.18**॥ 1539

आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः।
लङ्कां तामभिधावन्ति महावारणसन्निभाः॥ **6.42.19**॥ 1540

जयत्युरुबलो रामो लक्ष्मणश्च महाबलः।
राजा जयति सुग्रीवो राघवेणाभिपालितः॥ **6.42.20**॥ 1541

इत्येवं घोषयन्तश्च गर्जन्तश्च प्लवङ्गमाः।
अभ्यधावन्त लङ्कायाः प्राकारं कामरूपिणः॥ **6.42.21**॥ 1542

वीरबाहुः सुबाहुश्च नलश्च पनसस्तथा।
निपीड्योपनिविष्टास्ते प्राकारं हरियूथपाः।
एतस्मिन्नन्तरे चक्रुः स्कन्धावारनिवेशनम्॥ **6.42.22**॥ 1543

पूर्वद्वारं तु कुमुदः कोटिभिर्दशभिर्वृतः।
आवृत्य बलवांस्तस्थौ हरिभिर्जितकाशिभिः॥ **6.42.23**॥ 1544

सहायार्थे तु तस्यैव निविष्टः प्रघसो हरिः।
पनसश्च महाबाहुर्वानरैरभिसंवृतः॥ **6.42.24**॥ 1545

दक्षिणद्वारमासाद्य वीरः शतबलिः कपिः।
आवृत्य बलवांस्तस्थौ विंशत्या कोटिभिर्वृतः॥ **6.42.25**॥ 1546

सुषेणः पश्चिमद्वारं गत्वा तारापिता बली।
आवृत्य बलवांस्तस्थौ कोटिकोटिभिरावृतः॥ **6.42.26**॥ 1547

उत्तरद्वारमागम्य रामः सौमित्रिणा सह।
आवृत्य बलवांस्तस्थौ सुग्रीवश्च हरीश्वरः॥ **6.42.27**॥ 1548

गोलाङ्गूलो महाकायो गवाक्षो भीमदर्शनः।
वृतः कोट्या महावीर्यस्तस्थौ रामस्य पार्श्वतः॥ **6.42.28**॥ 1549

ऋक्षाणां भीमकोपानां धूम्रः शत्रुनिबर्हणः।
वृतः कोट्या महावीर्यस्तस्थौ रामस्य पार्श्वतः॥ **6.42.29**॥ 1550

सन्नद्धस्तु महावीर्यो गदापाणिर्विभीषणः।
वृतो यत्तैस्तु सचिवैस्तस्थौ यत्र महाबलः॥ **6.42.30**॥ 1551

गजो गवाक्षो गवयः शरभो गन्धमादनः।
समन्तात् परिधावन्तो ररक्षुर्हरिवाहिनीम्॥ **6.42.31**॥ 1552

ततः कोपपरीतात्मा रावणो राक्षसेश्वरः।
निर्याणं सर्वसैन्यानां द्रुतमाज्ञापयत् तदा॥ **6.42.32**॥ 1553

एतच्छ्रुत्वा तदा वाक्यं रावणस्य मुखेरितम्।
सहसा भीमनिर्घोषमुद्घुष्टं रजनीचरैः॥ **6.42.33**॥ 1554

ततः प्रबोधिता भेर्यश्चन्द्रपाण्डुरपुष्कराः।
हेमकोणैरभिहता राक्षसानां समन्ततः॥ **6.42.34**॥ 1555

विनेदुश्च महाघोषाः शङ्खाः शतसहस्रशः।
राक्षसानां सुघोराणां मुखमारुतपूरिताः॥ **6.42.35**॥ 1556

ते बभुः शुभनीलाङ्गाः सशङ्खा रजनीचराः।
विद्युन्मण्डलसन्नद्धाः सबलाका इवाम्बुदाः॥ **6.42.36**॥ 1557

निष्पतन्ति ततः सैन्या हृष्टा रावणचोदिताः।
समये पूर्यमाणस्य वेगा इव महोदधेः॥ **6.42.37**॥ 1558

ततो वानरसैन्येन मुक्तो नादः समन्ततः।
मलयः पूरितो येन ससानुप्रस्थकन्दरः॥ **6.42.38**॥ 1559

शङ्खदुन्दुभिनिर्घोषः सिंहनादस्तरस्विनाम्।
पृथिवीं चान्तरिक्षं च सागरं चाभ्यनादयत्॥ **6.42.39**॥ 1560

गजानां बृंहितैः सार्धं हयानां ह्रेषितैरपि।
रथानां नेमिनिर्घोषै रक्षसां वदनस्वनैः॥ **6.42.40**॥ 1561

एतस्मिन्नन्तरे घोरः सङ्ग्रामः समपद्यत।
रक्षसां वानराणां च यथा देवासुरे पुरा॥ **6.42.41**॥ 1562

ते गदाभिः प्रदीप्ताभिः शक्तिशूलपरश्वधैः।
निजघ्नुर्वानरान् सर्वान् कथयन्तः स्वविक्रमान्॥ **6.42.42**॥ 1563

तथा वृक्षैर्महाकायाः पर्वताग्रैश्च वानराः।
निजघ्नुस्तानि रक्षांसि नखैर्दन्तैश्च वेगिनः॥ **6.42.43**॥ 1564

राजा जयति सुग्रीव इति शब्दो महानभूत्।
राजञ्जयजयेत्युक्त्वा स्वस्वनामकथां ततः॥ **6.42.44**॥ 1565

राक्षसास्त्वपरे भीमाः प्राकारस्था महीं गतान्।
वानरान् भिन्दिपालैश्च शूलैश्चैव व्यदारयन्॥ **6.42.45**॥ 1566

वानराश्चापि सङ्क्रुद्धाः प्राकारस्थान् महीं गताः।
राक्षसान् पातयामासुः खमाप्लुत्य स्वबाहुभिः॥ **6.42.46**॥ 1567

स सम्प्रहारस्तुमुलो मांसशोणितकर्दमः।
रक्षसां वानराणां च सम्बभूवाद्भुतोपमः॥ **6.42.47**॥ 1568

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिचत्वारिंशः सर्गः ॥

द्वन्द्वयुद्धे वानरै रक्षसां पराजयः

युध्यतां तु ततस्तेषां वानराणां महात्मनाम्।
रक्षसां सम्बभूवाथ बलरोषः सुदारुणः॥ **6.43.1** ॥ 1569

ते हयैः काञ्चनापीडैर्गजैश्चाग्निशिखोपमैः।
रथैश्चादित्यसङ्काशैः कवचैश्च मनोरमैः॥ **6.43.2** ॥ 1570

निर्ययू राक्षसा वीरा नादयन्तो दिशो दश।
राक्षसा भीमकर्माणो रावणस्य जयैषिणः॥ **6.43.3** ॥ 1571

वानराणामपि चमूर्बृहती जयमिच्छताम्।
अभ्यधावत तां सेनां रक्षसां घोरकर्मणाम्॥ **6.43.4** ॥ 1572

एतस्मिन्नन्तरे तेषामन्योन्यमभिधावताम्।
रक्षसां वानराणां च द्वन्द्वयुद्धमवर्तत॥ **6.43.5** ॥ 1573

अङ्गदेनेन्द्रजित्सार्धं वालिपुत्रेण राक्षसः।
अयुध्यत महातेजास्त्र्यम्बकेण यथान्धकः॥ **6.43.6** ॥ 1574

प्रजङ्घेन च सम्पातिर्नित्यं दुर्धर्षणो रणे।
जम्बुमालिनमारब्धो हनूमानपि वानरः॥ **6.43.7** ॥ 1575

सङ्गतस्तु महाक्रोधो राक्षसो रावणानुजः।
समरे तीक्ष्णवेगेन शत्रुघ्नेन विभीषणः॥ **6.43.8**॥ 1576

तपनेन गजः सार्धं राक्षसेन महाबलः।
निकुम्भेन महातेजा नीलोऽपि समयुध्यत॥ **6.43.9**॥ 1577

वानरेन्द्रस्तु सुग्रीवः प्रघसेन सुसङ्गतः।
सङ्गतः समरे श्रीमान् विरूपाक्षेण लक्ष्मणः॥ **6.43.10**॥ 1578

अग्निकेतुः सुदुर्धर्षो रश्मिकेतुश्च राक्षसः।
सुप्तघ्नो यज्ञकोपश्च रामेण सह सङ्गताः॥ **6.43.11**॥ 1579

वज्रमुष्टिश्च मैन्देन द्विविदेनाशनिप्रभः।
राक्षसाभ्यां सुघोराभ्यां कपिमुख्यौ समागतौ॥ **6.43.12**॥ 1580

वीरः प्रतपनो घोरो राक्षसो रणदुर्धरः।
समरे तीक्ष्णवेगेन नलेन समयुध्यत॥ **6.43.13**॥ 1581

धर्मस्य पुत्रो बलवान् सुषेण इति विश्रुतः।
स विद्युन्मालिना सार्धमयुध्यत महाकपिः॥ **6.43.14**॥ 1582

वानराश्चापरे घोरा राक्षसैरपरैः सह।
द्वन्द्वं समीयुः सहसा युद्ध्वा च बहुभिः सह॥ **6.43.15**॥ 1583

तत्रासीत् सुमहद् युद्धं तुमुलं रोमहर्षणम्।
रक्षसां वानराणां च वीराणां जयमिच्छताम्॥ **6.43.16**॥ 1584

हरिराक्षसदेहेभ्यः प्रभूताः केशशाद्वलाः।
शरीरसङ्घाटवहाः प्रसुस्रुः शोणितापगाः॥ **6.43.17**॥ 1585

आजघानेन्द्रजित् क्रुद्धो वज्रेणेव शतक्रतुः।
अङ्गदं गदया वीरं शत्रुसैन्यविदारणम्॥ **6.43.18**॥ 1586

तस्य काञ्चनचित्राङ्गं रथं साश्वं ससारथिम्।
जघान गदया श्रीमानङ्गदो वेगवान् हरिः॥ **6.43.19**॥ 1587

सम्पातिस्तु प्रजङ्घेन त्रिभिर्बाणैः समाहतः।
निजघानाश्वकर्णेन प्रजङ्घं रणमूर्धनि॥ **6.43.20**॥ 1588

जम्बुमाली रथस्थस्तु रथशक्त्या महाबलः।
बिभेद समरे क्रुद्धो हनूमन्तं स्तनान्तरे॥ **6.43.21**॥ 1589

तस्य तं रथमास्थाय हनूमान् मारुतात्मजः।
प्रममाथ तलेनाशु सह तेनैव रक्षसा॥ **6.43.22**॥ 1590

नदन् प्रतपनो घोरो नलं सोऽभ्यनुधावत।
नलः प्रतपनस्याशु पातयामास चक्षुषी॥ **6.43.23**॥ 1591

भिन्नगात्रः शरैस्तीक्ष्णैः क्षिप्रहस्तेन रक्षसा।
ग्रसन्तमिव सैन्यानि प्रघसं वानराधिपः॥ **6.43.24**॥ 1592

सुग्रीवः सप्तपर्णेन निजघान जवेन च।
प्रपीड्य शरवर्षेण राक्षसं भीमदर्शनम्॥ **6.43.25**॥ 1593

निजघान विरूपाक्षं शरेणैकेन लक्ष्मणः।
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः।
सुप्तघ्नो यज्ञकोपश्च रामं निर्बिभिदुः शरैः॥ **6.43.26**॥ 1594

तेषां चतुर्णां रामस्तु शिरांसि समरे शरैः।
क्रुद्धश्चतुर्भिश्चिच्छेद घोरैरग्निशिखोपमैः॥ **6.43.27**॥ 1595

वज्रमुष्टिस्तु मैन्देन मुष्टिना निहतो रणे।
पपात सरथः साश्वः पुराट्ट इव भूतले॥ **6.43.28**॥ 1596

निकुम्भस्तु रणे नीलं नीलाञ्जनचयप्रभम्।
निर्बिभेद शरैस्तीक्ष्णैः करैर्मेघमिवांशुमान्॥ **6.43.29**॥ 1597

पुनः शरशतेनाथ क्षिप्रहस्तो निशाचरः।
बिभेद समरे नीलं निकुम्भः प्रजहास च॥ **6.43.30**॥ 1598

तस्यैव रथचक्रेण नीलो विष्णुरिवाहवे।
शिरश्चिच्छेद समरे निकुम्भस्य च सारथेः॥ **6.43.31**॥ 1599

वज्राशनिसमस्पर्शो द्विविदोऽप्यशनिप्रभम्।
जघान गिरिशृङ्गेण मिषतां सर्वरक्षसाम्॥ **6.43.32**॥ 1600

द्विविदं वानरेन्द्रं तु द्रुमयोधिनमाहवे।
शरैरशनिसङ्काशैः स विव्याधाशनिप्रभः॥ **6.43.33**॥ 1601

स शरैरभिविद्धाङ्गो द्विविदः क्रोधमूर्च्छितः।
सालेन सरथं साश्वं निजघानाशनिप्रभम्॥ **6.43.34**॥ 1602

विद्युन्माली रथस्थस्तु शरैः काञ्चनभूषणैः।
सुषेणं ताडयामास ननाद च मुहुर्मुहुः॥ **6.43.35**॥ 1603

तं रथस्थमथो दृष्ट्वा सुषेणो वानरोत्तमः।
गिरिशृङ्गेण महता रथमाशु न्यपातयत्॥ **6.43.36**॥ 1604

लाघवेन तु संयुक्तो विद्युन्माली निशाचरः।
अपक्रम्य रथात् तूर्णं गदापाणिः क्षितौ स्थितः॥ **6.43.37**॥ 1605

ततः क्रोधसमाविष्टः सुषेणो हरिपुङ्गवः।
शिलां सुमहतीं गृह्य निशाचरमभिद्रवत्॥ **6.43.38**॥ 1606

तमापतन्तं गदया विद्युन्माली निशाचरः।
वक्षस्यभिजघानाशु सुषेणं हरिपुङ्गवम्॥ **6.43.39**॥ 1607

गदाप्रहारं तं घोरमचिन्त्य प्लवगोत्तमः।
तां तूष्णीं पातयामास तस्योरसि महामृधे॥ **6.43.40**॥ 1608

शिलाप्रहाराभिहतो विद्युन्माली निशाचरः।
निष्पिष्टहृदयो भूमौ गतासुर्निपपात ह॥ **6.43.41**॥ 1609

एवं तैर्वानरैः शूरैः शूरास्ते रजनीचराः।
द्वन्द्वे विमथितास्तत्र दैत्या इव दिवौकसैः॥ **6.43.42**॥ 1610

भल्लैश्चान्यैर्गदाभिश्च शक्तितोमरसायकैः।
अपविद्धैश्चापि रथैस्तथा साङ्ग्रामिकैर्हयैः॥ **6.43.43**॥ 1611

निहतैः कुञ्जरैर्मत्तैस्तथा वानरराक्षसैः।
चक्राक्षयुगदण्डैश्च भग्नैर्धरणिसंश्रितैः॥ **6.43.44**॥ 1612

बभूवायोधनं घोरं गोमायुगणसेवितम्।
कबन्धानि समुत्पेतुर्दिक्षु वानररक्षसाम्।
विमर्दे तुमुले तस्मिन् देवासुररणोपमे॥ **6.43.45**॥ 1613

निहन्यमाना हरिपुङ्गवैस्तदा
निशाचराः शोणितगन्धमूर्च्छिताः।
पुनः सुयुद्धं तरसा समाश्रिता
दिवाकरस्यास्तमयाभिकाङ्क्षिणः॥ **6.43.46**॥ 1614

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुश्चत्वारिंशः सर्गः ॥

रात्रौ वानराणां रक्षसां च घोरं युद्धं अङ्गदेनेन्द्रजित्पराजयो मायातोऽदृश्यमानेनेन्द्रजिता श्रीरामलक्ष्मणयोर्नागपाशैर्बन्धनम्

युध्यतामेव तेषां तु तदा वानररक्षसाम्।
रविरस्तं गतो रात्रिः प्रवृत्ता प्राणहारिणी॥ **6.44.1**॥ 1615

अन्योन्यं बद्धवैराणां घोराणां जयमिच्छताम्।
सम्प्रवृत्तं निशायुद्धं तदा वानररक्षसाम्॥ **6.44.2**॥ 1616

राक्षसोऽसीति हरयो वानरोऽसीति राक्षसाः।
अन्योन्यं समरे जघ्नुस्तस्मिंस्तमसि दारुणे॥ **6.44.3**॥ 1617

हत दारय चैहीति कथं विद्रवसीति च।
एवं सुतुमुलः शब्दस्तस्मिन् सैन्ये तु शुश्रुवे॥ **6.44.4**॥ 1618

कालाः काञ्चनसन्नाहास्तस्मिंस्तमसि राक्षसाः।
सम्प्रदृश्यन्त शैलेन्द्रा दीप्तौषधिवना इव॥ **6.44.5**॥ 1619

तस्मिंस्तमसि दुष्पारे राक्षसाः क्रोधमूर्च्छिताः।
परिपेतुर्महावेगा भक्षयन्तः प्लवङ्गमान्॥ **6.44.6**॥ 1620

ते हयान् काञ्चनापीडान् ध्वजांश्चाशीविषोपमान्।
आप्लुत्य दशनैस्तीक्ष्णैर्भीमकोपा व्यदारयन्॥ **6.44.7**॥ 1621

वानरा बलिनो युद्धेऽक्षोभयन् राक्षसी चमूम्।
कुञ्जरान् कुञ्जरारोहान् पताकाध्वजिनो रथान्॥ **6.44.8**॥ 1622

चकर्षुश्च ददंशुश्च दशनैः क्रोधमूर्च्छिताः।
लक्ष्मणश्चापि रामश्च शरैराशीविषोपमैः॥ **6.44.9**॥ 1623

दृश्यादृश्यानि रक्षांसि प्रवराणि निजघ्नतुः।
तुरङ्गखुरविध्वस्तं रथनेमिसमुत्थितम्॥ **6.44.10**॥ 1624

रुरोध कर्णनेत्राणि युध्यतां धरणीरजः।
वर्तमाने तथा घोरे सङ्ग्रामे लोमहर्षणे।
रुधिरौघा महाघोरा नद्यस्तत्र विसुस्रुवुः॥ **6.44.11**॥ 1625

ततो भेरीमृदङ्गानां पणवानां च निःस्वनः।
शङ्खनेमिस्वनोन्मिश्रः सम्बभूवाद्भुतोपमः॥ **6.44.12**॥ 1626

हतानां स्तनमानानां राक्षसानां च निःस्वनः।
शस्तानां वानराणां च सम्बभूवात्र दारुणः॥ **6.44.13**॥ 1627

हतैर्वानरमुख्यैश्च शक्तिशूलपरश्वधैः।
निहतैः पर्वताकारै राक्षसैः कामरूपिभिः॥ **6.44.14**॥ 1628

शस्त्रपुष्पोपहारा च तत्रासीद् युद्धमेदिनी।
दुर्ज्ञेया दुर्निवेशा च शोणितास्त्रावकर्दमा॥ **6.44.15**॥ 1629

सा बभूव निशा घोरा हरिराक्षसहारिणी।
कालरात्रीव भूतानां सर्वेषां दुरतिक्रमा॥ **6.44.16**॥ 1630

ततस्ते राक्षसास्तत्र तस्मिंस्तमसि दारुणे।
राममेवाभ्यवर्तन्त संहृष्टाः शरवृष्टिभिः॥ **6.44.17**॥ 1631

तेषामापततां शब्दः क्रुद्धानामपि गर्जताम्।
उद्धर्त इव सप्तानां समुद्राणामभूत् स्वनः॥ **6.44.18**॥ 1632

तेषां रामः शरैः षड्भिः षड् जघान निशाचरान्।
निमेषान्तरमात्रेण शरैरग्निशिखोपमैः॥ **6.44.19**॥ 1633

यज्ञशत्रुश्च दुर्धर्षो महापार्श्वमहोदरौ।
वज्रदंष्ट्रो महाकायस्तौ चोभौ शुकसारणौ॥ **6.44.20**॥ 1634

ते तु रामेण बाणौघैः सर्वमर्मसु ताडिताः।
युद्धादपसृतास्तत्र सावशेषायुषोऽभवन्॥ **6.44.21**॥ 1635

निमेषान्तरमात्रेण घोरैरग्निशिखोपमैः।
दिशश्चकार विमलाः प्रदिशश्च महारथः॥ **6.44.22**॥ 1636

ये त्वन्ये राक्षसा वीरा रामस्याभिमुखे स्थिताः।
तेऽपि नष्टाः समासाद्य पतङ्गा इव पावकम्॥ **6.44.23**॥ 1637

सुवर्णपुङ्खैर्विशिखैः सम्पतद्भिः समन्ततः।
बभूव रजनी चित्रा खद्योतैरिव शारदी॥ **6.44.24**॥ 1638

राक्षसानां च निनदैर्भेरीणां चैव निःस्वनैः।
सा बभूव निशा घोरा भूयो घोरतराभवत्॥ **6.44.25**॥ 1639

तेन शब्देन महता प्रवृद्धेन समन्ततः।
त्रिकूटः कन्दराकीर्णः प्रव्याहरदिवाचलः॥ **6.44.26**॥ 1640

गोलाङ्गूला महाकायास्तमसा तुल्यवर्चसः।
सम्परिष्वज्य बाहुभ्यां भक्षयन् रजनीचरान्॥ **6.44.27**॥ 1641

अङ्गदस्तु रणे शत्रून् निहन्तुं समुपस्थितः।
रावणिं निजघानाशु सारथिं च हयानपि॥ **6.44.28**॥ 1642

इन्द्रजित् तु रथं त्यक्त्वा हताश्वो हतसारथिः।
अङ्गदेन महाकायस्तत्रैवान्तरधीयत॥ **6.44.29**॥ 1643

तत् कर्म वालिपुत्रस्य सर्वे देवाः सहर्षिभिः।
तुष्टुवुः पूजनार्हस्य तौ चोभौ रामलक्ष्मणौ॥ **6.44.30**॥ 1644

प्रभावं सर्वभूतानि विदुरिन्द्रजितो युधि।
ततस्ते तं महात्मानं दृष्ट्वा तुष्टाः प्रधर्षितम्॥ **6.44.31**॥ 1645

ततः प्रहृष्टाः कपयः ससुग्रीवविभीषणाः।
साधुसाध्विति नेदुश्च दृष्ट्वा शत्रुं पराजितम्॥ **6.44.32**॥ 1646

इन्द्रजित् तु तदानेन निर्जितो भीमकर्मणा।
संयुगे वालिपुत्रेण क्रोधं चक्रे सुदारुणम्॥ **6.44.33**॥ 1647

सोऽन्तर्धानगतः पापो रावणी रणकर्शितः।
ब्रह्मदत्तवरो वीरो रावणिः क्रोधमूर्च्छितः॥ **6.44.34**॥ 1648

अदृश्यो निशितान् बाणान् मुमोचाशनिवर्चसः।
रामं च लक्ष्मणं चैव घोरैर्नागमयैः शरैः॥ **6.44.35**॥ 1649

बिभेद समरे क्रुद्धः सर्वगात्रेषु राक्षसः।
मायया संवृतस्तत्र मोहयन् राघवौ युधि॥ **6.44.36**॥ 1650

अदृश्यः सर्वभूतानां कूटयोधी निशाचरः।
बबन्ध शरबन्धेन भ्रातरौ रामलक्ष्मणौ॥ **6.44.37**॥ 1651

तौ तेन पुरुषव्याघ्रौ क्रुद्धेनाशीविषैः शरैः।
सहसाभिहतौ वीरौ तदा प्रेक्षन्त वानराः॥ **6.44.38**॥ 1652

प्रकाशरूपस्तु यदा न शक्त -
स्तौ बाधितुं राक्षसराजपुत्रः।

मायां प्रयोक्तुं समुपाजगाम
बबन्ध तौ राजसुतौ दुरात्मा ॥ 6.44.39 ॥ 1653

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुश्चत्वारिंशः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चचत्वारिंशः सर्गः ॥

इन्द्रजिद्बाणैः श्रीरामलक्ष्मणयोर्विसंज्ञता वानराणां शोकश्च

स तस्य गतिमन्विच्छन् राजपुत्रः प्रतापवान्।
दिदेशातिबलो रामो दश वानरयूथपान्॥ **6.45.1** ॥ 1654

द्वौ सुषेणस्य दायादौ नीलं च प्लवगाधिपम्।
अङ्गदं वालिपुत्रं च शरभं च तरस्विनम्॥ **6.45.2** ॥ 1655

द्विविदं च हनूमन्तं सानुप्रस्थं महाबलम्।
ऋषभं चर्षभस्कन्धमादिदेश परन्तपः॥ **6.45.3** ॥ 1656

ते सम्प्रहृष्टा हरयो भीमानुद्यम्य पादपान्।
आकाशं विविशुः सर्वे मार्गमाणा दिशो दश॥ **6.45.4** ॥ 1657

तेषां वेगवतां वेगमिषुभिर्वेगवत्तरैः।
अस्त्रवित् परमास्त्रस्तु वारयामास रावणिः॥ **6.45.5** ॥ 1658

तं भीमवेगा हरयो नाराचैः क्षतविक्षताः।
अन्धकारे न ददृशुर्मेघैः सूर्यमिवावृतम्॥ **6.45.6** ॥ 1659

रामलक्ष्मणयोरेव सर्वदेहभिदः शरान्।
भृशमावेशयामास रावणिः समितिञ्जयः॥ **6.45.7** ॥ 1660

निरन्तरशरीरौ तु तावुभौ रामलक्ष्मणौ।
क्रुद्धेनेन्द्रजिता वीरौ पन्नगैः शरतां गतैः॥ **6.45.8**॥ 1661

तयोः क्षतजमार्गेण सुस्राव रुधिरं बहु।
तावुभौ च प्रकाशेते पुष्पिताविव किंशुकौ॥ **6.45.9**॥ 1662

ततः पर्यन्तरक्ताक्षो भिन्नाञ्जनचयोपमः।
रावणिर्भ्रातरौ वाक्यमन्तर्धानगतोऽब्रवीत्॥ **6.45.10**॥ 1663

युध्यमानमनालक्ष्यं शक्रोऽपि त्रिदशेश्वरः।
द्रष्टुमासादितुं वापि न शक्तः किं पुनर्युवाम्॥ **6.45.11**॥ 1664

प्रापिताविषुजालेन राघवौ कङ्कपत्रिणा।
एष रोषपरीतात्मा नयामि यमसादनम्॥ **6.45.12**॥ 1665

एवमुक्त्वा तु धर्मज्ञौ भ्रातरौ रामलक्ष्मणौ।
निर्बिभेद शितैर्बाणैः प्रजहर्ष ननाद च॥ **6.45.13**॥ 1666

भिन्नाञ्जनचयश्यामो विस्फार्य विपुलं धनुः।
भूय एव शरान् घोरान् विससर्ज महामृधे॥ **6.45.14**॥ 1667

ततो मर्मसु मर्मज्ञो मज्जयन् निशिताञ्शरान्।
रामलक्ष्मणयोर्वीरो ननाद च मुहुर्मुहुः॥ **6.45.15**॥ 1668

बद्धौ तु शरबन्धेन तावुभौ रणमूर्धनि।
निमेषान्तरमात्रेण न शेकतुरवेक्षितुम्॥ **6.45.16**॥ 1669

ततो विभिन्नसर्वाङ्गौ शरशल्याचितौ कृतौ।
ध्वजाविव महेन्द्रस्य रज्जुमुक्तौ प्रकम्पितौ॥ **6.45.17**॥ 1670

तौ सम्प्रचलितौ वीरौ मर्मभेदेन कर्शितौ।
निपेततुर्महेष्वासौ जगत्यां जगतीपती॥ **6.45.18**॥ 1671

तौ वीरशयने वीरौ शयानौ रुधिरोक्षितौ।
शरवेष्टितसर्वाङ्गावार्तौ परमपीडितौ॥ **6.45.19**॥ 1672

नह्यविद्धं तयोर्गात्रे बभूवाङ्गुलमन्तरम्।
नानिर्विण्णं न चाध्वस्तमाकराग्रादजिह्मगैः॥ **6.45.20**॥ 1673

तौ तु क्रूरेण निहतौ रक्षसा कामरूपिणा।
असृक्सुस्रुवतुस्तीव्रं जलं प्रस्रवणाविव॥ **6.45.21**॥ 1674

पपात प्रथमं रामो विद्धो मर्मसु मार्गणैः।
क्रोधादिन्द्रजिता येन पुरा शक्रो विनिर्जितः॥ **6.45.22**॥ 1675

रुक्मपुङ्खैः प्रसन्नाग्रै रजोगतिभिराशुगैः।
नाराचैरर्धनाराचैर्भल्लैरञ्जलिकैरपि।
विव्याध वत्सदन्तैश्च सिंहदंष्ट्रैः क्षुरैस्तथा॥ **6.45.23**॥ 1676

स वीरशयने शिश्येऽविज्यमाविध्य कार्मुकम्।
भिन्नमुष्टिपरीणाहं त्रिनतं रुक्मभूषितम्॥ **6.45.24**॥ 1677

बाणपातान्तरे रामं पतितं पुरुषर्षभम्।
स तत्र लक्ष्मणो दृष्ट्वा निराशो जीवितेऽभवत्॥ **6.45.25**॥ 1678

रामं कमलपत्राक्षं शरण्यं रणतोषिणम्।
शुशोच भ्रातरं दृष्ट्वा पतितं धरणीतले॥ **6.45.26**॥ 1679

हरयश्चापि तं दृष्ट्वा सन्तापं परमं गताः।
शोकार्ताश्चुक्रुशुर्घोरमश्रुपूरितलोचनाः॥ **6.45.27**॥ 1680

बद्धौ तु तौ वीरशये शयानौ
ते वानराः सम्परिवार्य तस्थुः।

समागता वायुसुतप्रमुख्या
विषादमार्ताः परमं च जग्मुः ॥ 6.45.28 ॥ 1681

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चचत्वारिंशः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षट्चत्वारिंशः सर्गः ॥

श्रीरामलक्ष्मणौ विसंज्ञौ दृष्ट्वा वानराणां शोक इन्द्रजितो हर्षोद्गारो विभीषणेन सुग्रीवस्य प्रबोधनं इन्द्रजिता लङ्कां गत्वा पितरं प्रति शत्रुवधवृत्तान्तस्य श्रावणं प्रसन्नेन रावणेन स्वपुत्रस्याभिनन्दनम्

ततो द्यां पृथिवीं चैव वीक्षमाणा वनौकसः।
ददृशुः सन्ततौ बाणैर्भ्रातरौ रामलक्ष्मणौ ॥ **6.46.1** ॥ 1682

वृष्ट्वेवोपरते देवे कृतकर्मणि राक्षसे।
आजगामाथ तं देशं ससुग्रीवो विभीषणः ॥ **6.46.2** ॥ 1683

नीलश्च द्विविदो मैन्दः सुषेणः कुमुदोऽङ्गदः।
तूर्णं हनुमता सार्धमन्वशोचन्त राघवौ ॥ **6.46.3** ॥ 1684

अचेष्टौ मन्दनिःश्वासौ शोणितेन परिप्लुतौ।
शरजालाचितौ स्तब्धौ शयानौ शरतल्पगौ ॥ **6.46.4** ॥ 1685

निःश्वसन्तौ यथा सर्पौ निश्चेष्टौ मन्दविक्रमौ।
रुधिरस्रावदिग्धाङ्गौ तपनीयाविव ध्वजौ ॥ **6.46.5** ॥ 1686

तौ वीरशयने वीरौ शयानौ मन्दचेष्टितौ।
यूथपैः स्वैः परिवृतौ बाष्पव्याकुललोचनैः ॥ **6.46.6** ॥ 1687

राघवौ पतितौ दृष्ट्वा शरजालसमन्वितौ।
बभूवुर्व्यथिताः सर्वे वानराः सविभीषणाः॥ **6.46.7**॥ 1688

अन्तरिक्षं निरीक्षन्तो दिशः सर्वाश्च वानराः।
न चैनं मायया छन्नं ददृशू रावणिं रणे॥ **6.46.8**॥ 1689

तं तु मायाप्रतिच्छन्नं माययैव विभीषणः।
वीक्षमाणो ददर्शाग्रे भ्रातुः पुत्रमवस्थितम्।
तमप्रतिमकर्माणमप्रतिद्वन्द्वमाहवे॥ **6.46.9**॥ 1690

ददर्शान्तर्हितं वीरं वरदानाद् विभीषणः।
तेजसा यशसा चैव विक्रमेण च संयुतः॥ **6.46.10**॥ 1691

इन्द्रजित् त्वात्मनः कर्म तौ शयानौ समीक्ष्य च।
उवाच परमप्रीतो हर्षयन् सर्वराक्षसान्॥ **6.46.11**॥ 1692

दूषणस्य च हन्तारौ खरस्य च महाबलौ।
सादितौ मामकैर्बाणैर्भ्रातरौ रामलक्ष्मणौ॥ **6.46.12**॥ 1693

नेमौ मोक्षयितुं शक्यावेतस्मादिषुबन्धनात्।
सर्वैरपि समागम्य सर्षिसङ्घैः सुरासुरैः॥ **6.46.13**॥ 1694

यत्कृते चिन्तयानस्य शोकार्तस्य पितुर्मम।
अस्पृष्ट्वा शयनं गात्रैस्त्रियामा याति शर्वरी॥ **6.46.14**॥ 1695

कृत्स्नेयं यत्कृते लङ्का नदी वर्षास्विवाकुला।
सोऽयं मूलहरोऽनर्थः सर्वेषां शमितो मया॥ **6.46.15**॥ 1696

रामस्य लक्ष्मणस्यैव सर्वेषां च वनौकसाम्।
विक्रमा निष्फलाः सर्वे यथा शरदि तोयदाः॥ **6.46.16**॥ 1697

एवमुक्त्वा तु तान् सर्वान् राक्षसान् परिपश्यतः।
यूथपानपि तान् सर्वांस्ताडयत् स च रावणिः॥ **6.46.17**॥ 1698

नीलं नवभिराहत्य मैन्दं सद्विविदं तथा।
त्रिभिस्त्रिभिरमित्रघ्नस्तताप परमेषुभिः॥ **6.46.18**॥ 1699

जाम्बवन्तं महेष्वासो विद्ध्वा बाणेन वक्षसि।
हनूमतो वेगवतो विससर्ज शरान् दश॥ **6.46.19**॥ 1700

गवाक्षं शरभं चैव तावप्यमितविक्रमौ।
द्वाभ्यां द्वाभ्यां महावेगो विव्याध युधि रावणिः॥ **6.46.20**॥ 1701

गोलाङ्गूलेश्वरं चैव वालिपुत्रमथाङ्गदम्।
विव्याध बहुभिर्बाणैस्त्वरमाणोऽथ रावणिः॥ **6.46.21**॥ 1702

तान् वानरवरान् भित्त्वा शरैरग्निशिखोपमैः।
ननाद बलवांस्तत्र महासत्त्वः स रावणिः॥ **6.46.22**॥ 1703

तानर्दयित्वा बाणौघैस्त्रासयित्वा च वानरान्।
प्रजहास महाबाहुर्वचनं चेदमब्रवीत्॥ **6.46.23**॥ 1704

शरबन्धेन घोरेण मया बद्धौ चमूमुखे।
सहितौ भ्रातरावेतौ निशामयत राक्षसाः॥ **6.46.24**॥ 1705

एवमुक्तास्तु ते सर्वे राक्षसाः कूटयोधिनः।
परं विस्मयमापन्नाः कर्मणा तेन हर्षिताः॥ **6.46.25**॥ 1706

विनेदुश्च महानादान् सर्वे ते जलदोपमाः।
हतो राम इति ज्ञात्वा रावणिं समपूजयन्॥ **6.46.26**॥ 1707

निष्पन्दौ तु तदा दृष्ट्वा भ्रातरौ रामलक्ष्मणौ।
वसुधायां निरुच्छ्वासौ हताविति्यन्वमन्यत॥ **6.46.27**॥ 1708

हर्षेण तु समाविष्ट इन्द्रजित् समितिञ्जयः।
प्रविवेश पुरीं लङ्कां हर्षयन् सर्वनैर्ऋतान्॥ **6.46.28**॥ 1709

रामलक्ष्मणयोर्दृष्ट्वा शरीरे सायकैश्चिते।
सर्वाणि चाङ्गोपाङ्गानि सुग्रीवं भयमाविशत्॥ **6.46.29**॥ 1710

तमुवाच परित्रस्तं वानरेन्द्रं विभीषणः।
सबाष्पवदनं दीनं शोकव्याकुललोचनम्॥ **6.46.30**॥ 1711

अलं त्रासेन सुग्रीव बाष्पवेगो निगृह्यताम्।
एवम्प्रायाणि युद्धानि विजयो नास्ति नैष्ठिकः॥ **6.46.31**॥ 1712

सभाग्यशेषतास्माकं यदि वीर भविष्यति।
मोहमेतौ प्रहास्येते महात्मानौ महाबलौ॥ **6.46.32**॥ 1713

पर्यवस्थापयात्मानमनाथं मां च वानर।
सत्यधर्माभिरक्तानां नास्ति मृत्युकृतं भयम्॥ **6.46.33**॥ 1714

एवमुक्त्वा ततस्तस्य जलक्लिन्नेन पाणिना।
सुग्रीवस्य शुभे नेत्रे प्रममार्ज विभीषणः॥ **6.46.34**॥ 1715

ततः सलिलमादाय विद्यया परिजप्य च।
सुग्रीवनेत्रे धर्मात्मा प्रममार्ज विभीषणः॥ **6.46.35**॥ 1716

विमृज्य वदनं तस्य कपिराजस्य धीमतः।
अब्रवीत् कालसम्प्राप्तमसभ्रान्तमिदं वचः॥ **6.46.36**॥ 1717

न कालः कपिराजेन्द्र वैक्लव्यमवलम्बितुम्।
अतिस्नेहोऽपि कालेऽस्मिन् मरणायोपकल्पते॥ **6.46.37**॥ 1718

तस्मादुत्सृज्य वैक्लव्यं सर्वकार्यविनाशनम्।
हितं रामपुरोगाणां सैन्यानामनुचिन्तय॥ **6.46.38**॥ 1719

अथ वा रक्ष्यतां रामो यावत्संज्ञाविपर्ययः।
लब्धसंज्ञौ हि काकुत्स्थौ भयं नौ व्यपनेष्यतः॥ **6.46.39**॥ 1720

नैतत् किञ्चन रामस्य न च रामो मुमूर्षति।
नह्येनं हास्यते लक्ष्मीर्दुर्लभा या गतायुषाम्॥ **6.46.40**॥ 1721

तस्मादाश्वासयात्मानं बलं चाश्वासय स्वकम्।
यावत् सैन्यानि सर्वाणि पुनः संस्थापयाम्यहम्॥ **6.46.41**॥ 1722

एते हि फुल्लनयनास्त्रासादागतसाध्वसाः।
कर्णे कर्णे प्रकथिता हरयो हरिसत्तम॥ **6.46.42**॥ 1723

मां तु दृष्ट्वा प्रधावन्तमनीकं सम्प्रहर्षितम्।
त्यजन्तु हरयस्त्रासं भुक्तपूर्वामिव स्रजम्॥ **6.46.43**॥ 1724

समाश्वास्य तु सुग्रीवं राक्षसेन्द्रो विभीषणः।
विद्रुतं वानरानीकं तत् समाश्वासयत् पुनः॥ **6.46.44**॥ 1725

इन्द्रिजित् तु महामायः सर्वसैन्यसमावृतः।
विवेश नगरी लङ्कां पितरं चाभ्युपागमत्॥ **6.46.45**॥ 1726

तत्र रावणमासाद्य अभिवाद्य कृताञ्जलिः।
आचचक्षे प्रियं पित्रे निहतौ रामलक्ष्मणौ॥ **6.46.46**॥ 1727

उत्पपात ततो हृष्टः पुत्रं च परिषस्वजे।
रावणो रक्षसां मध्ये श्रुत्वा शत्रू निपातितौ॥ **6.46.47**॥ 1728

उपाघ्राय च तं मूर्ध्नि पप्रच्छ प्रीतमानसः।
पृच्छते च यथावृत्तं पित्रे तस्मै न्यवेदयत्॥ **6.46.48**॥ 1729

यथा तौ शरबन्धेन निश्चेष्टौ निष्प्रभौ कृतौ॥ **6.46.49**॥ 1730

स हर्षवेगानुगतान्तरात्मा
श्रुत्वा गिरं तस्य महारथस्य।
जहौ ज्वरं दाशरथेः समुत्थं
प्रहृष्टवाचाभिनन्द पुत्रम्॥ 6.46.50॥ 1731

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षड्त्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तचत्वारिंशः सर्गः ॥

वानरैः श्रीरामलक्ष्मणयो रक्षणं रावणाज्ञया राक्षसीभिः पुष्पकेण सीताया रणभूमौ नयनं तत्र तया श्रीरामस्य सलक्ष्मणस्य दर्शनं सीताया विलापश्च

तस्मिन् प्रविष्टे लङ्कायां कृतार्थे रावणात्मजे।
राघवं परिवार्याथ ररक्षुर्वानरर्षभाः॥ **6.47.1** ॥ 1732

हनुमानङ्गदो नीलः सुषेणः कुमुदो नलः।
गजो गवाक्षो गवयः शरभो गन्धमादनः॥ **6.47.2** ॥ 1733

जाम्बवानृषभः स्कन्धो रम्भः शतबलिः पृथुः।
व्यूढानीकाश्च यत्ताश्च द्रुमानादाय सर्वतः॥ **6.47.3** ॥ 1734

वीक्षमाणा दिशः सर्वास्तिर्यगूर्ध्वं च वानराः।
तृणेष्वपि च चेष्टत्सु राक्षसा इति मेनिरे॥ **6.47.4** ॥ 1735

रावणश्चापि संहृष्टो विसृज्येन्द्रजितं सुतम्।
आजुहाव ततः सीतारक्षणी राक्षसीस्तदा॥ **6.47.5** ॥ 1736

राक्षस्यस्त्रिजटा चापि शासनात् तमुपस्थिताः।
ता उवाच ततो हृष्टो राक्षसी राक्षसाधिपः॥ **6.47.6** ॥ 1737

हताविन्द्रजिताख्यात वैदेह्या रामलक्ष्मणौ।
पुष्पकं तत्समारोप्य दर्शयध्वं रणे हतौ॥ **6.47.7** ॥ 1738

यदाश्रयादवष्टब्धा नेयं मामुपतिष्ठते।
सोऽस्या भर्ता सह भ्रात्रा निहतो रणमूर्धनि॥ **6.47.8**॥ 1739

निर्विशङ्का निरुद्विग्ना निरपेक्षा च मैथिली।
मामुपस्थास्यते सीता सर्वाभरणभूषिता॥ **6.47.9**॥ 1740

अद्य कालवशं प्राप्तं रणे रामं सलक्ष्मणम्।
अवेक्ष्य विनिवृत्ता सा चान्यां गतिमपश्यती॥ **6.47.10**॥ 1741

अनपेक्षा विशालाक्षी मामुपस्थास्यते स्वयम्।
तस्य तद् वचनं श्रुत्वा रावणस्य दुरात्मनः॥ **6.47.11**॥ 1742

राक्षस्यस्तास्तथेत्युक्त्वा जग्मुर्वै यत्र पुष्पकम्।
ततः पुष्पकमादाय राक्षस्यो रावणाज्ञया॥ **6.47.12**॥ 1743

अशोकवनिकास्थां तां मैथिलीं समुपानयन्।
तामादाय तु राक्षस्यो भर्तृशोकपराजिताम्॥ **6.47.13**॥ 1744

सीतामारोपयामासुर्विमानं पुष्पकं तदा।
ततः पुष्पकमारोप्य सीतां त्रिजटया सह॥ **6.47.14**॥ 1745

जग्मुर्दर्शयितुं तस्यै राक्षस्यो रामलक्ष्मणौ।
रावणश्चारयामास पताकाध्वजमालिनीम्॥ **6.47.15**॥ 1746

प्राघोषयत हृष्टश्च लङ्कायां राक्षसेश्वरः।
राघवो लक्ष्मणश्चैव हताविन्द्रजिता रणे॥ **6.47.16**॥ 1747

विमानेनापि गत्वा तु सीता त्रिजटया सह।
ददर्श वानराणां तु सर्वं सैन्यं निपातितम्॥ **6.47.17**॥ 1748

प्रहृष्टमनसश्चापि ददर्श पिशिताशनान्।
वानरांश्चातिदुःखार्तान् रामलक्ष्मणपार्श्वतः॥ **6.47.18**॥ 1749

ततः सीता ददर्शोभौ शयानौ शरतल्पगौ।
लक्ष्मणं चैव रामं च विसंज्ञौ शरपीडितौ॥ **6.47.19**॥ 1750

विध्वस्तकवचौ वीरौ विप्रविद्धशरासनौ।
सायकैश्छिन्नसर्वाङ्गौ शरस्तम्बमयौ क्षितौ॥ **6.47.20**॥ 1751

तौ दृष्ट्वा भ्रातरौ तत्र प्रवीरौ पुरुषर्षभौ।
शयानौ पुण्डरीकाक्षौ कुमाराविव पावकी॥ **6.47.21**॥ 1752

शरतल्पगतौ वीरौ तथाभूतौ नरर्षभौ।
दुःखार्ता करुणं सीता सुभृशं विललाप ह॥ **6.47.22**॥ 1753

भर्तारमनवद्याङ्गी लक्ष्मणं चासितेक्षणा।
प्रेक्ष्य पांसुषु चेष्टन्तौ रुरोद जनकात्मजा॥ **6.47.23**॥ 1754

सबाष्पशोकाभिहता समीक्ष्य
तौ भ्रातरौ देवसुतप्रभावौ।
वितर्कयन्ती निधनं तयोः सा
दुःखान्विता वाक्यमिदं जगाद॥ **6.47.24**॥ 1755

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टचत्वारिंशः सर्गः ॥

सीताया विलापस्त्रिजटया तस्या बोधनं श्रीरामलक्ष्मणयोर्जीवितावस्थां प्रत्याय्य ततो लङ्कायां निवर्तनं च

भर्तारं निहतं दृष्ट्वा लक्ष्मणं च महाबलम्।
विललाप भृशं सीता करुणं शोककर्शिता ॥ **6.48.1** ॥ 1756

ऊचुर्लाक्षणिका ये मां पुत्रिण्यविधवेति च।
तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ **6.48.2** ॥ 1757

यज्वनो महिषीं ये मामूचुः पत्नीं च सत्रिणः।
तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ **6.48.3** ॥ 1758

वीरपार्थिवपत्नीनां ये विदुर्भर्तृपूजिताम्।
तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ **6.48.4** ॥ 1759

ऊचुः संश्रवणे ये मां द्विजाः कार्तान्तिकाः शुभाम्।
तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ **6.48.5** ॥ 1760

इमानि खलु पद्मानि पादयोर्वै कुलस्त्रियः।
आधिराज्येऽभिषिच्यन्ते नरेन्द्रैः पतिभिः सह ॥ **6.48.6** ॥ 1761

वैधव्यं यान्ति यैर्नार्योऽलक्षणैर्भाग्यदुर्लभाः।
नात्मनस्तानि पश्यामि पश्यन्ती हतलक्षणा ॥ **6.48.7** ॥ 1762

सत्यनामानि पद्मानि स्त्रीणामुक्तानि लक्षणैः।
तान्यद्य निहते रामे वितथानि भवन्ति मे॥ **6.48.8**॥ 1763

केशाः सूक्ष्माः समा नीला भ्रुवौ चासंहते मम।
वृत्ते चारोमके जङ्घे दन्ताश्चाविरला मम॥ **6.48.9**॥ 1764

शङ्खौ नेत्रे करौ पादौ गुल्फावूरू समौ चितौ।
अनुवृत्तनखाः स्निग्धाः समाश्चाङ्गुलयो मम॥ **6.48.10**॥ 1765

स्तनौ चाविरलौ पीनौ मामकौ मग्नचूचुकौ।
मग्ना चोत्सेधनी नाभिः पार्श्वोरस्कं च मे चितम्॥ **6.48.11**॥ 1766

मम वर्णो मणिनिभो मृदून्यङ्गरुहाणि च।
प्रतिष्ठितां द्वादशभिर्मामूचुः शुभलक्षणाम्॥ **6.48.12**॥ 1767

समग्रयवमच्छिद्रं पाणिपादं च वर्णवत्।
मन्दस्मितेत्येव च मां कन्यालाक्षणिका विदुः॥ **6.48.13**॥ 1768

आधिराज्येऽभिषेको मे ब्राह्मणैः पतिना सह।
कृतान्तकुशलैरुक्तं तत् सर्वं वितथीकृतम्॥ **6.48.14**॥ 1769

शोधयित्वा जनस्थानं प्रवृत्तिमुपलभ्य च।
तीर्त्वा सागरमक्षोभ्यं भ्रातरौ गोष्पदे हतौ॥ **6.48.15**॥ 1770

ननु वारुणमाग्नेयमैन्द्रं वायव्यमेव च।
अस्त्रं ब्रह्मशिरश्चैव राघवौ प्रत्यपद्यत॥ **6.48.16**॥ 1771

अदृश्यमानेन रणे मायया वासवोपमौ।
मम नाथावनाथाया निहतौ रामलक्ष्मणौ॥ **6.48.17**॥ 1772

नहि दृष्टिपथं प्राप्य राघवस्य रणे रिपुः।
जीवन् प्रतिनिवर्तेत यद्यपि स्यान्मनोजवः॥ **6.48.18**॥ 1773

न कालस्यातिभारोऽस्ति कृतान्तश्च सुदुर्जयः।
यत्र रामः सह भ्रात्रा शेते युधि निपातितः॥ **6.48.19**॥ 1774

न शोचामि तथा रामं लक्ष्मणं च महारथम्।
नात्मानं जननीं चापि यथा श्वश्रूं तपस्विनीम्॥ **6.48.20**॥ 1775

सा तु चिन्तयते नित्यं समाप्तव्रतमागतम्।
कदा द्रक्ष्यामि सीतां च लक्ष्मणं च सराघवम्॥ **6.48.21**॥ 1776

परिदेवयमानां तां राक्षसी त्रिजटाब्रवीत्।
मा विषादं कृथा देवि भर्तायं तव जीवति॥ **6.48.22**॥ 1777

कारणानि च वक्ष्यामि महान्ति सदृशानि च।
यथेमौ जीवतो देवि भ्रातरौ रामलक्ष्मणौ॥ **6.48.23**॥ 1778

नहि कोपपरीतानि हर्षपर्युत्सुकानि च।
भवन्ति युधि योधानां मुखानि निहते पतौ॥ **6.48.24**॥ 1779

इदं विमानं वैदेहि पुष्पकं नाम नामतः।
दिव्यं त्वां धारयेन्नेदं यद्येतौ गतजीवितौ॥ **6.48.25**॥ 1780

हतवीरप्रधाना हि गतोत्साहा निरुद्यमा।
सेना भ्रमति सङ्ख्येषु हतकर्णेव नौर्जले॥ **6.48.26**॥ 1781

इयं पुनरसम्भ्रान्ता निरुद्विग्ना तपस्विनि।
सेना रक्षति काकुत्स्थौ मया प्रीत्या निवेदितौ॥ **6.48.27**॥ 1782

सा त्वं भव सुविस्रब्धा अनुमानैः सुखोदयैः।
अहतौ पश्य काकुत्स्थौ स्नेहादेतद् ब्रवीमि ते॥ **6.48.28**॥ 1783

अनृतं नोक्तपूर्वं मे न च वक्ष्यामि मैथिलि।
चारित्रसुखशीलत्वात् प्रविष्टासि मनो मम॥ **6.48.29**॥ 1784

नेमौ शक्यौ रणे जेतुं सेन्द्रैरपि सुरासुरैः।
तादृशं दर्शनं दृष्ट्वा मया चोदीरितं तव॥ **6.48.30**॥ 1785

इदं तु सुमहच्चित्रं शरैः पश्यस्व मैथिलि।
विसंज्ञौ पतितावेतौ नैव लक्ष्मीर्विमुञ्चति॥ **6.48.31**॥ 1786

प्रायेण गतसत्त्वानां पुरुषाणां गतायुषाम्।
दृश्यमानेषु वक्त्रेषु परं भवति वैकृतम्॥ **6.48.32**॥ 1787

त्यज शोकं च दुःखं च मोहं च जनकात्मजे।
रामलक्ष्मणयोरर्थे नाद्य शक्यमजीवितुम्॥ **6.48.33**॥ 1788

श्रुत्वा तु वचनं तस्याः सीता सुरसुतोपमा।
कृताञ्जलिरुवाचेमामेवमस्त्विति मैथिली॥ **6.48.34**॥ 1789

विमानं पुष्पकं तत्तु सन्निवर्त्य मनोजवम्।
दीना त्रिजटया सीता लङ्कामेव प्रवेशिता॥ **6.48.35**॥ 1790

ततस्त्रिजटया सार्धं पुष्पकादवरुह्य सा।
अशोकवनिकामेव राक्षसीभिः प्रवेशिता॥ **6.48.36**॥ 1791

प्रविश्य सीता बहुवृक्षखण्डां
तां राक्षसेन्द्रस्य विहारभूमिम्।
सम्प्रेक्ष्य सञ्चिन्त्य च राजपुत्रौ
परं विषादं समुपाजगाम॥ **6.48.37**॥ 1792

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टचत्वारिंशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनपञ्चाशः सर्गः ॥

संज्ञामुपेत्य श्रीरामस्य लक्ष्मणार्थं विलापः - प्राणान् परित्यक्तुं निश्चित्य तेन वानरान् प्रति गृहे निवर्तनायादेशस्य प्रदानम्

घोरेण शरबन्धेन बद्धौ दशरथात्मजौ।
निःश्वसन्तौ यथा नागौ शयानौ रुधिरोक्षितौ॥ **6.49.1** ॥ 1793

सर्वे ते वानरश्रेष्ठाः ससुग्रीवमहाबलाः।
परिवार्य महात्मानौ तस्थुः शोकपरिप्लुताः॥ **6.49.2** ॥ 1794

एतस्मिन्नन्तरे रामः प्रत्यबुध्यत वीर्यवान्।
स्थिरत्वात् सत्त्वयोगाच्च शरैः सन्दानितोऽपि सन्॥ **6.49.3** ॥ 1795

ततो दृष्ट्वा सरुधिरं निषण्णं गाढमर्पितम्।
भ्रातरं दीनवदनं पर्यदेवयदातुरः॥ **6.49.4** ॥ 1796

किं नु मे सीतया कार्यं लब्धया जीवितेन वा।
शयानं योऽद्य पश्यामि भ्रातरं युधि निर्जितम्॥ **6.49.5** ॥ 1797

शक्या सीतासमा नारी मर्त्यलोके विचिन्वता।
न लक्ष्मणसमो भ्राता सचिवः साम्परायिकः॥ **6.49.6** ॥ 1798

परित्यक्ष्याम्यहं प्राणान् वानराणां तु पश्यताम्।
यदि पञ्चत्वमापन्नः सुमित्रानन्दवर्धनः॥ **6.49.7** ॥ 1799

किं नु वक्ष्यामि कौसल्यां मातरं किं नु कैकयीम्।
कथमम्बां सुमित्रां च पुत्रदर्शनलालसाम्॥ **6.49.8**॥ 1800

विवत्सां वेपमानां च वेपन्तीं कुररीमिव।
कथमाश्वासयिष्यामि यदि यास्यामि तं विना॥ **6.49.9**॥ 1801

कथं वक्ष्यामि शत्रुघ्नं भरतं च यशस्विनम्।
मया सह वनं यातो विना तेनाहमागतः॥ **6.49.10**॥ 1802

उपालम्भं न शक्ष्यामि सोढुमम्बासुमित्रया।
इहैव देहं त्यक्ष्यामि नहि जीवितुमुत्सहे॥ **6.49.11**॥ 1803

धिङ्मां दुष्कृतकर्माणमनार्यं यत्कृते ह्यसौ।
लक्ष्मणः पतितः शेते शरतल्पे गतासुवत्॥ **6.49.12**॥ 1804

त्वं नित्यं सुविषण्णं मामाश्वासयसि लक्ष्मण।
गतासुर्नाद्य शक्तोऽसि मामार्तमभिभाषितुम्॥ **6.49.13**॥ 1805

येनाद्य बहवो युद्धे निहता राक्षसाः क्षितौ।
तस्यामेवाद्य शूरस्त्वं शेषे विनिहतः शरैः॥ **6.49.14**॥ 1806

शयानः शरतल्पेऽस्मिन् सशोणितपरिस्रुतः।
शरभूतस्ततो भासि भास्करोऽस्तमिव व्रजन्॥ **6.49.15**॥ 1807

बाणाभिहतमर्मत्वान्न शक्नोषीह भाषितुम्।
रुजा चाब्रुवतो यस्य दृष्टिरागेण सूच्यते॥ **6.49.16**॥ 1808

यथैव मां वनं यान्तमनुयातो महाद्युतिः।
अहमप्यनुयास्यामि तथैवैनं यमक्षयम्॥ **6.49.17**॥ 1809

इष्टबन्धुजनो नित्यं मां च नित्यमनुव्रतः।
इमामद्य गतोऽवस्थां ममानार्यस्य दुर्नयैः॥ **6.49.18**॥ 1810

सुरुष्टेनापि वीरेण लक्ष्मणेन न संस्मरे।
परुषं विप्रियं चापि श्रावितं तु कदाचन॥ **6.49.19**॥ 1811

विससर्जैकवेगेन पञ्च बाणशतानि यः।
इश्वस्त्रेष्वधिकस्तस्मात् कार्तवीर्याच्च लक्ष्मणः॥ **6.49.20**॥ 1812

अस्त्रैरस्त्राणि यो हन्याच्छक्रस्यापि महात्मनः।
सोऽयमुर्व्यां हतः शेते महार्हशयनोचितः॥ **6.49.21**॥ 1813

तत्तु मिथ्या प्रलप्तं मां प्रधक्ष्यति न संशयः।
यन्मया न कृतो राजा राक्षसानां विभीषणः॥ **6.49.22**॥ 1814

अस्मिन् मुहूर्ते सुग्रीव प्रतियातुमितोऽर्हसि।
मत्वा हीनं मया राजन् रावणोऽभिभविष्यति॥ **6.49.23**॥ 1815

अङ्गदं तु पुरस्कृत्य ससैन्यं सपरिच्छदम्।
सागरं तर सुग्रीव नीलेन च नलेन च॥ **6.49.24**॥ 1816

कृतं हि सुमहत्कर्म यदन्यैर्दुष्करं रणे।
ऋक्षराजेन तुष्यामि गोलाङ्गूलाधिपेन च॥ **6.49.25**॥ 1817

अङ्गदेन कृतं कर्म मैन्देन द्विविदेन च।
युद्धं केसरिणा सङ्ख्ये घोरं सम्पातिना कृतम्॥ **6.49.26**॥ 1818

गवयेन गवाक्षेण शरभेण गजेन च।
अन्यैश्च हरिभिर्युद्धं मदर्थे त्यक्तजीवितैः॥ **6.49.27**॥ 1819

न चातिक्रमितुं शक्यं दैवं सुग्रीव मानुषैः।
यत्तु शक्यं वयस्येन सुहृदा वा परं मम॥ **6.49.28**॥ 1820

कृतं सुग्रीव तत् सर्वं भवता धर्मभीरुणा।
मित्रकार्यं कृतमिदं भवद्भिर्वानरर्षभाः॥ **6.49.29**॥ 1821

अनुज्ञाता मया सर्वे यथेष्टं गन्तुमर्हथ।
शुश्रुवुस्तस्य ये सर्वे वानराः परिदेवितम्॥ **6.49.30**॥ 1822

वर्तयाञ्चक्रिरेऽश्रूणि नेत्रैः कृष्णेतरेक्षणाः॥ **6.49.31**॥ 1823

ततः सर्वाण्यनीकानि स्थापयित्वा विभीषणः।
आजगाम गदापाणिस्त्वरितं यत्र राघवः॥ **6.49.32**॥ 1824

तं दृष्ट्वा त्वरितं यान्तं नीलाञ्जनचयोपमम्।
वानरा दुद्रुवुः सर्वे मन्यमानास्तु रावणिम्॥ **6.49.33**॥ 1825

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चाशः सर्गः ॥

विभीषणमिन्द्रजितं मत्वा वानराणां पलायनम्, सुग्रीवस्याज्ञया जाम्बवता तेभ्यः सान्त्वनाप्रदानं विभीषणस्य विलापः, सुग्रीवेण तस्य प्रबोधनं गरुडस्यागमनं श्रीरामलक्ष्मणौ नागपाशतो मोचयित्वा तस्य पुनर्गमनं च

अथोवाच महातेजा हरिराजो महाबलः।
किमियं व्यथिता सेना मूढवातेव नौर्जले ॥ **6.50.1** ॥ 1826

सुग्रीवस्य वचः श्रुत्वा वालिपुत्रोऽङ्गदोऽब्रवीत्।
न त्वं पश्यसि रामं च लक्ष्मणं च महारथम् ॥ **6.50.2** ॥ 1827

शरजालाचितौ वीरावुभौ दशरथात्मजौ।
शरतल्पे महात्मानौ शयानौ रुधिरोक्षितौ ॥ **6.50.3** ॥ 1828

अथाब्रवीद् वानरेन्द्रः सुग्रीवः पुत्रमङ्गदम्।
नानिमित्तमिदं मन्ये भवितव्यं भयेन तु ॥ **6.50.4** ॥ 1829

विषण्णवदना ह्येते त्यक्तप्रहरणा दिशः।
पलायन्तेऽत्र हरयस्त्रासादुत्फुल्ललोचनाः ॥ **6.50.5** ॥ 1830

अन्योन्यस्य न लज्जन्ते न निरीक्षन्ति पृष्ठतः।
विप्रकर्षन्ति चान्योन्यं पतितं लङ्घयन्ति च ॥ **6.50.6** ॥ 1831

एतस्मिन्नन्तरे वीरो गदापाणिर्विभीषणः।
सुग्रीवं वर्धयामास राघवं च जयाशिषा ॥ **6.50.7** ॥ 1832

विभीषणं च सुग्रीवो दृष्ट्वा वानरभीषणम्।
ऋक्षराजं महात्मानं समीपस्थमुवाच ह॥ **6.50.8**॥ 1833

विभीषणोऽयं सम्प्राप्तो यं दृष्ट्वा वानरर्षभाः।
द्रवन्त्यायतसन्त्रासा रावणात्मजशङ्कया॥ **6.50.9**॥ 1834

शीघ्रमेतान् सुसन्त्रस्तान् बहुधा विप्रधावितान्।
पर्यवस्थापयाख्याहि विभीषणमुपस्थितम्॥ **6.50.10**॥ 1835

सुग्रीवेणैवमुक्तस्तु जाम्बवानृक्षपार्थिवः।
वानरान् सान्त्वयामास सन्निवर्त्य प्रधावतः॥ **6.50.11**॥ 1836

ते निवृत्ताः पुनः सर्वे वानरास्त्यक्तसाध्वसाः।
ऋक्षराजवचः श्रुत्वा तं च दृष्ट्वा विभीषणम्॥ **6.50.12**॥ 1837

विभीषणस्तु रामस्य दृष्ट्वा गात्रं शरैश्चितम्।
लक्ष्मणस्य तु धर्मात्मा बभूव व्यथितस्तदा॥ **6.50.13**॥ 1838

जलक्लिन्नेन हस्तेन तयोर्नेत्रे विमृज्य च।
शोकसम्पीडितमना रुरोद विललाप च॥ **6.50.14**॥ 1839

इमौ तौ सत्त्वसम्पन्नौ विक्रान्तौ प्रियसंयुगौ।
इमामवस्थां गमितौ राक्षसैः कूटयोधिभिः॥ **6.50.15**॥ 1840

भ्रातृपुत्रेण चैतेन दुष्पुत्रेण दुरात्मना।
राक्षस्या जिह्मया बुद्ध्या वञ्चितावृजुविक्रमौ॥ **6.50.16**॥ 1841

शरैरिमावलं विद्धौ रुधिरेण समुक्षितौ।
वसुधायामिमौ सुप्तौ दृश्येते शल्यकाविव॥ **6.50.17**॥ 1842

ययोर्वीर्यमुपाश्रित्य प्रतिष्ठा काङ्क्षिता मया।
ताविमौ देहनाशाय प्रसुप्तौ पुरुषर्षभौ॥ **6.50.18**॥ 1843

जीवन्नद्य विपन्नोऽस्मि नष्टराज्यमनोरथः।
प्राप्तप्रतिज्ञश्च रिपुः सकामो रावणः कृतः॥ **6.50.19**॥ 1844

एवं विलपमानं तं परिष्वज्य विभीषणम्।
सुग्रीवः सत्त्वसम्पन्नो हरिराजोऽब्रवीदिदम्॥ **6.50.20**॥ 1845

राज्यं प्राप्स्यसि धर्मज्ञ लङ्कायां नेह संशयः।
रावणः सह पुत्रेण स्वकामं नेह लप्स्यते॥ **6.50.21**॥ 1846

गरुडाधिष्ठितावेतावुभौ राघवलक्ष्मणौ।
त्यक्त्वा मोहं वधिष्येते सगणं रावणं रणे॥ **6.50.22**॥ 1847

तमेवं सान्त्वयित्वा तु समाश्वास्य तु राक्षसम्।
सुषेणं श्वशुरं पार्श्वे सुग्रीवस्तमुवाच ह॥ **6.50.23**॥ 1848

सह शूरैर्हरिगणैर्लब्धसंज्ञावरिन्दमौ।
गच्छ त्वं भ्रातरौ गृह्य किष्किन्धां रामलक्ष्मणौ॥ **6.50.24**॥ 1849

अहं तु रावणं हत्वा सपुत्रं सहबान्धवम्।
मैथिलीमानयिष्यामि शक्रो नष्टामिव श्रियम्॥ **6.50.25**॥ 1850

श्रुत्वैतद् वानरेन्द्रस्य सुषेणो वाक्यमब्रवीत्।
देवासुरं महायुद्धमनुभूतं पुरातनम्॥ **6.50.26**॥ 1851

तदा स्म दानवा देवाञ्शरसंस्पर्शकोविदान्।
निजघ्नुः शस्त्रविदुषश्छादयन्तो मुहुर्मुहुः॥ **6.50.27**॥ 1852

तानार्तान् नष्टसंज्ञांश्च गतासूंश्च बृहस्पतिः।
विद्याभिर्मन्त्रयुक्ताभिरोषधीभिश्चिकित्सति॥ **6.50.28**॥ 1853

तान्यौषधान्यानयितुं क्षीरोदं यान्तु सागरम्।
जवेन वानराः शीघ्रं सम्पातिपनसादयः॥ **6.50.29**॥ 1854

हरयस्तु विजानन्ति पार्वती ते महौषधी।
सञ्जीवकरणीं दिव्यां विशल्यां देवनिर्मिताम्॥ **6.50.30**॥ 1855

चन्द्रश्च नाम द्रोणश्च क्षीरोदे सागरोत्तमे।
अमृतं यत्र मथितं तत्र ते परमौषधी॥ **6.50.31**॥ 1856

तौ तत्र विहितौ देवैः पर्वतौ तौ महोदधौ।
अयं वायुसुतो राजन् हनूमांस्तत्र गच्छतु॥ **6.50.32**॥ 1857

एतस्मिन्नन्तरे वायुर्मेघाश्चापि सविद्युतः।
पर्यस्य सागरे तोयं कम्पयन्निव पर्वतान्॥ **6.50.33**॥ 1858

महता पक्षवातेन सर्वद्वीपमहाद्रुमाः।
निपेतुर्भग्नविटपाः सलिले लवणाम्भसि॥ **6.50.34**॥ 1859

अभवन् पन्नगास्त्रस्ता भोगिनस्तत्र वासिनः।
शीघ्रं सर्वाणि यादांसि जग्मुश्च लवणार्णवम्॥ **6.50.35**॥ 1860

ततो मुहूर्ताद् गरुडं वैनतेयं महाबलम्।
वानरा ददृशुः सर्वे ज्वलन्तमिव पावकम्॥ **6.50.36**॥ 1861

तमागतमभिप्रेक्ष्य नागास्ते विप्रदुद्रुवुः।
यैस्तु तौ पुरुषौ बद्धौ शरभूतैर्महाबलैः॥ **6.50.37**॥ 1862

ततः सुपर्णः काकुत्स्थौ स्पृष्ट्वा प्रत्यभिनन्द्य च।
विममर्श च पाणिभ्यां मुखे चन्द्रसमप्रभे॥ **6.50.38**॥ 1863

वैनतेयेन संस्पृष्टास्तयोः संरुरुहुर्व्रणाः।
सुवर्णे च तनू स्निग्धे तयोराशु बभूवतुः॥ **6.50.39**॥ 1864

तेजो वीर्यं बलं चौज उत्साहश्च महागुणाः।
प्रदर्शनं च बुद्धिश्च स्मृतिश्च द्विगुणा तयोः॥ **6.50.40**॥ 1865

तावुत्थाप्य महातेजा गरुडो वासवोपमौ।
उभौ च सस्वजे हृष्टो रामश्चैनमुवाच ह॥ **6.50.41**॥ 1866

भवत्प्रसादाद् व्यसनं रावणिप्रभवं महत्।
उपायेन व्यतिक्रान्तौ शीघ्रं च बलिनौ कृतौ॥ **6.50.42**॥ 1867

यथा तातं दशरथं यथाजं च पितामहम्।
तथा भवन्तमासाद्य हृदयं मे प्रसीदति॥ **6.50.43**॥ 1868

को भवान् रूपसम्पन्नो दिव्यस्रगनुलेपनः।
वसानो विरजे वस्त्रे दिव्याभरणभूषितः॥ **6.50.44**॥ 1869

तमुवाच महातेजा वैनतेयो महाबलः।
पतत्रिराजः प्रीतात्मा हर्षपर्याकुलेक्षणम्॥ **6.50.45**॥ 1870

अहं सखा ते काकुत्स्थ प्रियः प्राणो बहिश्चरः।
गरुत्मानिह सम्प्राप्तो युवयोः साह्यकारणात्॥ **6.50.46**॥ 1871

असुरा वा महावीर्या दानवा वा महाबलाः।
सुराश्चापि सगन्धर्वाः पुरस्कृत्य शतक्रतुम्॥ **6.50.47**॥ 1872

नेमं मोक्षयितुं शक्ताः शरबन्धं सुदारुणम्।
मायाबलादिन्द्रजिता निर्मितं क्रूरकर्मणा॥ **6.50.48**॥ 1873

एते नागाः काद्रवेयास्तीक्ष्णदंष्ट्रा विषोल्बणाः।
रक्षोमायाप्रभावेण शरभूतास्त्वदाश्रयाः॥ **6.50.49**॥ 1874

सभाग्यश्चासि धर्मज्ञ राम सत्यपराक्रम।
लक्ष्मणेन सह भ्रात्रा समरे रिपुघातिना॥ **6.50.50**॥ 1875

इमं श्रुत्वा तु वृत्तान्तं त्वरमाणोऽहमागतः।
सहसैवावयोः स्नेहात् सखित्वमनुपालयन्॥ **6.50.51**॥ 1876

मोक्षितौ च महाघोरादस्मात् सायकबन्धनात्।
अप्रमादश्च कर्तव्यो युवाभ्यां नित्यमेव हि॥ **6.50.52**॥ 1877

प्रकृत्या राक्षसाः सर्वे सङ्ग्रामे कूटयोधिनः।
शूराणां शुद्धभावानां भवतामार्जवं बलम्॥ **6.50.53**॥ 1878

तन्न विश्वसनीयं वो राक्षसानां रणाजिरे।
एतेनैवोपमानेन नित्यं जिह्या हि राक्षसाः॥ **6.50.54**॥ 1879

एवमुक्त्वा तदा रामं सुपर्णः स महाबलः।
परिष्वज्य च सुस्निग्धमाप्रष्टुमुपचक्रमे॥ **6.50.55**॥ 1880

सखे राघव धर्मज्ञ रिपूणामपि वत्सल।
अभ्यनुज्ञातुमिच्छामि गमिष्यामि यथासुखम्॥ **6.50.56**॥ 1881

न च कौतूहलं कार्यं सखित्वं प्रति राघव।
कृतकर्मा रणे वीर सखित्वं प्रतिवेत्स्यसि॥ **6.50.57**॥ 1882

बालवृद्धावशेषां तु लङ्कां कृत्वा शरोर्मिभिः।
रावणं तु रिपुं हत्वा सीतां त्वमुपलप्स्यसे॥ **6.50.58**॥ 1883

इत्येवमुक्त्वा वचनं सुपर्णः शीघ्रविक्रमः।
रामं च नीरुजं कृत्वा मध्ये तेषां वनौकसाम्॥ **6.50.59**॥ 1884

प्रदक्षिणं ततः कृत्वा परिष्वज्य च वीर्यवान्।
जगामाकाशमाविश्य सुपर्णः पवनो यथा॥ **6.50.60**॥ 1885

नीरुजौ राघवौ दृष्ट्वा ततो वानरयूथपाः।
सिंहनादं तदा नेदुर्लाङ्गूलं दुधुवुश्च ते॥ **6.50.61**॥ 1886

ततो भेरीः समाजघ्नुर्मृदङ्गांश्चाप्यवादयन्।
दध्मुः शङ्खान् सम्प्रहृष्टाः श्वेलन्त्यपि यथापुरम्॥ **6.50.62**॥ 1887

अपरे स्फोट्य विक्रान्ता वानरा नगयोधिनः।
द्रुमानुत्पाट्य विविधांस्तस्थुः शतसहस्रशः॥ **6.50.63**॥ 1888

विसृजन्तो महानादांस्त्रासयन्तो निशाचरान्।
लङ्काद्वाराण्युपाजग्मुर्योद्धुकामाः प्लवङ्गमाः॥ **6.50.64**॥ 1889

तेषां सुभीमस्तुमुलो निनादो
बभूव शाखामृगयूथपानाम्।
क्षये निदाघस्य यथा घनानां
नादः सुभीमो नदतां निशीथे॥ **6.50.65**॥ 1890

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकपञ्चाशः सर्गः ॥

श्रीरामस्य बन्धनतो मोक्षं श्रुत्वा चिन्तितेन रावणेन धूम्राक्षस्य युद्धाय प्रेषणं सेनापतिना सह तस्य नगरान्निर्गमनं च

तेषां तु तुमुलं शब्दं वानराणां महौजसाम्।
नर्दतां राक्षसैः सार्धं तदा शुश्राव रावणः॥ **6.51.1** ॥ 1891

स्निग्धगम्भीरनिर्घोषं श्रुत्वा तं निनदं भृशम्।
सचिवानां ततस्तेषां मध्ये वचनमब्रवीत्॥ **6.51.2** ॥ 1892

यथासौ सम्प्रहृष्टानां वानराणामुपस्थितः।
बहूनां सुमहान् नादो मेघानामिव गर्जताम्॥ **6.51.3** ॥ 1893

सुव्यक्तं महती प्रीतिरेतेषां नात्र संशयः।
तथाहि विपुलैर्नादैश्चुक्षुभे लवणार्णवः॥ **6.51.4** ॥ 1894

तौ तु बद्धौ शरैस्तीक्ष्णैर्भ्रातरौ रामलक्ष्मणौ।
अयं च सुमहान् नादः शङ्कां जनयतीव मे॥ **6.51.5** ॥ 1895

एवं च वचनं चोक्त्वा मन्त्रिणो राक्षसेश्वरः।
उवाच नैर्ऋतांस्तत्र समीपपरिवर्तिनः॥ **6.51.6** ॥ 1896

ज्ञायतां तूर्णमेतेषां सर्वेषां च वनौकसाम्।
शोककाले समुत्पन्ने हर्षकारणमुत्थितम्॥ **6.51.7** ॥ 1897

तथोक्तास्ते सुसम्भ्रान्ताः प्राकारमधिरुह्य च।
ददृशुः पालितां सेनां सुग्रीवेण महात्मना॥ **6.51.8**॥ 1898

तौ च मुक्तौ सुघोरेण शरबन्धेन राघवौ।
समुत्थितौ महाभागौ विषेदुः सर्वराक्षसाः॥ **6.51.9**॥ 1899

सन्त्रस्तहृदयाः सर्वे प्राकारादवरुह्य ते।
विवर्णा राक्षसा घोरा राक्षसेन्द्रमुपस्थिताः॥ **6.51.10**॥ 1900

तदप्रियं दीनमुखा रावणस्य च राक्षसाः।
कृत्स्नं निवेदयामासुर्यथावद् वाक्यकोविदाः॥ **6.51.11**॥ 1901

यौ ताविन्द्रजिता युद्धे भ्रातरौ रामलक्ष्मणौ।
निबद्धौ शरबन्धेन निष्प्रकम्पभुजौ कृतौ॥ **6.51.12**॥ 1902

विमुक्तौ शरबन्धेन दृश्येते तौ रणाजिरे।
पाशानिव गजौ छित्त्वा गजेन्द्रसमविक्रमौ॥ **6.51.13**॥ 1903

तच्छ्रुत्वा वचनं तेषां राक्षसेन्द्रो महाबलः।
चिन्ताशोकसमाक्रान्तो विवर्णवदनोऽभवत्॥ **6.51.14**॥ 1904

घोरैर्दत्तवरैर्बद्धौ शरैराशीविषोपमैः।
अमोघैः सूर्यसङ्काशैः प्रमथ्येन्द्रजिता युधि॥ **6.51.15**॥ 1905

तदस्त्रबन्धमासाद्य यदि मुक्तौ रिपू मम।
संशयस्थमिदं सर्वमनुपश्याम्यहं बलम्॥ **6.51.16**॥ 1906

निष्फलाः खलु संवृत्ताः शराः पावकतेजसः।
आदत्तं यैस्तु सङ्ग्रामे रिपूणां जीवितं मम॥ **6.51.17**॥ 1907

एवमुक्त्वा तु सङ्क्रुद्धो निःश्वसन्नुरगो यथा।
अब्रवीद् रक्षसां मध्ये धूम्राक्षं नाम राक्षसम्॥ **6.51.18**॥ 1908

बलेन महता युक्तो रक्षसां भीमविक्रम।
त्वं वधायाशु निर्याहि रामस्य सह वानरैः॥ **6.51.19**॥ 1909

एवमुक्तस्तु धूम्राक्षो राक्षसेन्द्रेण धीमता।
परिक्रम्य ततः शीघ्रं निर्जगाम नृपालयात्॥ **6.51.20**॥ 1910

अभिनिष्क्रम्य तद् द्वारं बलाध्यक्षमुवाच ह।
त्वरयस्व बलं शीघ्रं किं चिरेण युयुत्सतः॥ **6.51.21**॥ 1911

धूम्राक्षवचनं श्रुत्वा बलाध्यक्षो बलानुगः।
बलमुद्योजयामास रावणस्याज्ञया भृशम्॥ **6.51.22**॥ 1912

ते बद्धघण्टा बलिनो घोररूपा निशाचराः।
विनद्यमानाः संहृष्टा धूम्राक्षं पर्यवारयन्॥ **6.51.23**॥ 1913

विविधायुधहस्ताश्च शूलमुद्गरपाणयः।
गदाभिः पट्टिशैर्दण्डैरायसैर्मुसलैरपि॥ **6.51.24**॥ 1914

परिघैर्भिन्दिपालैश्च भल्लैः पाशैः परश्वधैः।
निर्ययू राक्षसा घोरा नर्दन्तो जलदा यथा॥ **6.51.25**॥ 1915

रथैः कवचिनस्त्वन्ये ध्वजैश्च समलङ्कृतैः।
सुवर्णजालविहितैः खरैश्च विविधाननैः॥ **6.51.26**॥ 1916

हयैः परमशीघ्रैश्च गजैश्चैव मदोत्कटैः।
निर्ययुर्नैर्ऋतव्याघ्रा व्याघ्रा इव दुरासदाः॥ **6.51.27**॥ 1917

वृकसिंहमुखैर्युक्तं खरैः कनकभूषितैः।
आरुरोह रथं दिव्यं धूम्राक्षः खरनिःस्वनः॥ **6.51.28**॥ 1918

स निर्यातो महावीर्यो धूम्राक्षो राक्षसैर्वृतः।
हसन् वै पश्चिमद्वाराद्धनूमान् यत्र तिष्ठति॥ **6.51.29**॥ 1919

रथप्रवरमास्थाय खरयुक्तं खरस्वनम्।
प्रयान्तं तु महाघोरं राक्षसं भीमदर्शनम्॥ **6.51.30**॥ 1920

अन्तरिक्षगताः क्रूराः शकुनाः प्रत्यषेधयन्।
रथशीर्षे महाभीमो गृध्रश्च निपपात ह॥ **6.51.31**॥ 1921

ध्वजाग्रे ग्रथिताश्चैव निपेतुः कुणपाशनाः।
रुधिरार्द्रो महाञ्श्वेतः कबन्धः पतितो भुवि॥ **6.51.32**॥ 1922

विस्वरं चोत्सृजन्नादान् धूम्राक्षस्य निपातितः।
ववर्ष रुधिरं देवः सञ्चचाल च मेदिनी॥ **6.51.33**॥ 1923

प्रतिलोमं ववौ वायुर्निर्घातसमनिःस्वनः।
तिमिरौघावृतास्तत्र दिशश्च न चकाशिरे॥ **6.51.34**॥ 1924

स तूत्पातांस्ततो दृष्ट्वा राक्षसानां भयावहान्।
प्रादुर्भूतान् सुघोरांश्च धूम्राक्षो व्यथितोऽभवत्।
मुमुहू राक्षसाः सर्वे धूम्राक्षस्य पुरःसराः॥ **6.51.35**॥ 1925

ततः सुभीमो बहुभिर्निशाचरै -
वृतोऽभिनिष्क्रम्य रणोत्सुको बली।
ददर्श तां राघवबाहुपालितां
महौघकल्पां बहु वानरीं चमूम्॥ **6.51.36**॥ 1926

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विपञ्चाशः सर्गः ॥

धूम्राक्षस्य युद्धं तस्य हनुमता वधश्च

धूम्राक्षं प्रेक्ष्य निर्यान्तं राक्षसं भीमविक्रमम्।
विनेदुर्वानराः सर्वे प्रहृष्टा युद्धकाङ्क्षिणः॥ **6.52.1**॥ 1927

तेषां सुतुमुलं युद्धं सञ्जज्ञे कपिरक्षसाम्।
अन्योन्यं पादपैर्घोरैर्निघ्नतां शूलमुद्गरैः॥ **6.52.2**॥ 1928

राक्षसैर्वानरा घोरा विनिकृत्ताः समन्ततः।
वानरै राक्षसाश्चापि द्रुमैर्भूमिसमीकृताः॥ **6.52.3**॥ 1929

राक्षसास्त्वभिसङ्क्रुद्धा वानरान् निशितैः शरैः।
विव्यधुर्घोरसङ्काशैः कङ्कपत्रैरजिह्मगैः॥ **6.52.4**॥ 1930

ते गदाभिश्च भीमाभिः पट्टिशैः कूटमुद्गरैः।
घोरैश्च परिघैश्चित्रैस्त्रिशूलैश्चापि संश्रितैः॥ **6.52.5**॥ 1931

विदार्यमाणा रक्षोभिर्वानरास्ते महाबलाः।
अमर्षजनितोद्धर्षाश्चक्रुः कर्माण्यभीतवत्॥ **6.52.6**॥ 1932

शरनिर्भिन्नगात्रास्ते शूलनिर्भिन्नदेहिनः।
जगृहुस्ते द्रुमांस्तत्र शिलाश्च हरियूथपाः॥ **6.52.7**॥ 1933

ते भीमवेगा हरयो नर्दमानास्ततस्ततः।
ममन्थू राक्षसान् वीरान् नामानि च बभाषिरे॥ **6.52.8**॥ 1934

तद् बभूवाद्भुतं घोरं युद्धं वानररक्षसाम्।
शिलाभिर्विविधाभिश्च बहुशाखैश्च पादपैः॥ **6.52.9**॥ 1935

राक्षसा मथिताः केचिद् वानरैर्जितकाशिभिः।
प्रवेमू रुधिरं केचिन्मुखै रुधिरभोजनाः॥ **6.52.10**॥ 1936

पार्श्वेषु दारिताः केचित् केचिद् राशीकृता द्रुमैः।
शिलाभिश्चूर्णिताः केचित् केचिद् दन्तैर्विदारिताः॥ **6.52.11**॥ 1937

ध्वजैर्विमथितैर्भग्नैः खड्गैश्च विनिपातितैः।
रथैर्विध्वंसितैः केचिद् व्यथिता रजनीचराः॥ **6.52.12**॥ 1938

गजेन्द्रैः पर्वताकारैः पर्वताग्रैर्वनौकसाम्।
मथितैर्वाजिभिः कीर्णं सारोहैर्वसुधातलम्॥ **6.52.13**॥ 1939

वानरैर्भीमविक्रान्तैराप्लुत्योत्प्लुत्य वेगितैः।
राक्षसाः करजैस्तीक्ष्णैर्मुखेषु विनिदारिताः॥ **6.52.14**॥ 1940

विषण्णवदना भूयो विप्रकीर्णशिरोरुहाः।
मूढाः शोणितगन्धेन निपेतुर्धरणीतले॥ **6.52.15**॥ 1941

अन्ये तु परमक्रुद्धा राक्षसा भीमविक्रमाः।
तलैरेवाभिधावन्ति वज्रस्पर्शसमैर्हरीन्॥ **6.52.16**॥ 1942

वानरैः पातयन्तस्ते वेगिता वेगवत्तरैः।
मुष्टिभिश्चरणैर्दन्तैः पादपैश्चावपोथिताः॥ **6.52.17**॥ 1943

सैन्यं तु विद्रुतं दृष्ट्वा धूम्राक्षो राक्षसर्षभः।
रोषेण कदनं चक्रे वानराणां युयुत्सताम्॥ **6.52.18**॥ 1944

प्रासैः प्रमथिताः केचिद् वानराः शोणितस्रवाः।
मुद्गरैराहताः केचित् पतिता धरणीतले॥ **6.52.19**॥ 1945

परिघैर्मथिताः केचिद् भिन्दिपालैश्च दारिताः।
पट्टिशैर्मथिताः केचिद् विह्वलन्तो गतासवः॥ **6.52.20**॥ 1946

केचिद् विनिहता भूमौ रुधिरार्द्रा वनौकसः।
केचिद् विद्राविता नष्टाः सङ्क्रुद्धै राक्षसैर्युधि॥ **6.52.21**॥ 1947

विभिन्नहृदयाः केचिदेकपार्श्वेन शायिताः।
विदारितास्त्रिशूलैश्च केचिदान्त्रैर्विनिःसृताः॥ **6.52.22**॥ 1948

तत् सुभीमं महद्युद्धं हरिराक्षससङ्कुलम्।
प्रबभौ शस्त्रबहुलं शिलापादपसङ्कुलम्॥ **6.52.23**॥ 1949

धनुर्ज्यातन्त्रिमधुरं हिक्काितालसमन्वितम्।
मन्दस्तनितगीतं तद् युद्धगान्धर्वमाबभौ॥ **6.52.24**॥ 1950

धूम्राक्षस्तु धनुष्पाणिर्वानरान् रणमूर्धनि।
हसन् विद्रावयामास दिशस्ताञ्छरवृष्टिभिः॥ **6.52.25**॥ 1951

धूम्राक्षेणार्दितं सैन्यं व्यथितं प्रेक्ष्य मारुतिः।
अभ्यवर्तत सङ्क्रुद्धः प्रगृह्य विपुलां शिलाम्॥ **6.52.26**॥ 1952

क्रोधाद् द्विगुणताम्राक्षः पितुस्तुल्यपराक्रमः।
शिलां तां पातयामास धूम्राक्षस्य रथं प्रति॥ **6.52.27**॥ 1953

आपतन्तीं शिलां दृष्ट्वा गदामुद्यम्य सभ्रमात्।
रथादाप्लुत्य वेगेन वसुधायां व्यतिष्ठत॥ **6.52.28**॥ 1954

सा प्रमथ्य रथं तस्य निपपात शिला भुवि।
सचक्रकूबरं साश्वं सध्वजं सशरासनम्॥ **6.52.29**॥ 1955

स भङ्क्त्वा तु रथं तस्य हनूमान् मारुतात्मजः।
रक्षसां कदनं चक्रे सस्कन्धविटपैर्द्रुमैः॥ **6.52.30**॥ 1956

विभिन्नशिरसो भूत्वा राक्षसा रुधिरोक्षिताः।
द्रुमैः प्रमथिताश्चान्ये निपेतुर्धरणीतले॥ **6.52.31**॥ 1957

विद्राव्य राक्षसं सैन्यं हनूमान् मारुतात्मजः।
गिरेः शिखरमादाय धूम्राक्षमभिदुद्रुवे॥ **6.52.32**॥ 1958

तमापतन्तं धूम्राक्षो गदामुद्यम्य वीर्यवान्।
विनर्दमानः सहसा हनूमन्तमभिद्रवत्॥ **6.52.33**॥ 1959

तस्य क्रुद्धस्य रोषेण गदां तां बहुकण्टकाम्।
पातयामास धूम्राक्षो मस्तकेऽथ हनूमतः॥ **6.52.34**॥ 1960

ताडितः स तया तत्र गदया भीमवेगया।
स कपिर्मारुतबलस्तं प्रहारमचिन्तयन्॥ **6.52.35**॥ 1961

धूम्राक्षस्य शिरोमध्ये गिरिशृङ्गमपातयत्।
स विस्फारितसर्वाङ्गो गिरिशृङ्गेण ताडितः॥ **6.52.36**॥ 1962

पपात सहसा भूमौ विकीर्ण इव पर्वतः।
धूम्राक्षं निहतं दृष्ट्वा हतशेषा निशाचराः।
त्रस्ताः प्रविविशुर्लङ्कां वध्यमानाः प्लवङ्गमैः॥ **6.52.37**॥ 1963

स तु पवनसुतो निहत्य शत्रून्
क्षतजवहाः सरितश्च संविकीर्य।

रिपुवधजनितश्रमो महात्मा
मुदमगमत् कपिभिः सुपूज्यमानः ॥ **6.52.38** ॥ 1964

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विपञ्चाशः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिपञ्चाशः सर्गः ॥

ससैन्यस्य वज्रदंष्ट्रस्य युद्धाय प्रस्थानं वानराणां राक्षसैः सह युद्धं वज्रदंष्ट्रेन वानराणामङ्गदेन रक्षसां च संहारः

धूम्राक्षं निहतं श्रुत्वा रावणो राक्षसेश्वरः।
क्रोधेन महताऽऽविष्टो निःश्वसन्नुरगो यथा ॥ **6.53.1** ॥ 1965

दीर्घमुष्णं विनिःश्वस्य क्रोधेन कलुषीकृतः।
अब्रवीद् राक्षसं क्रूरं वज्रदंष्ट्रं महाबलम् ॥ **6.53.2** ॥ 1966

गच्छ त्वं वीर निर्याहि राक्षसैः परिवारितः।
जहि दाशरथिं रामं सुग्रीवं वानरैः सह ॥ **6.53.3** ॥ 1967

तथेत्युक्त्वा द्रुततरं मायावी राक्षसेश्वरः।
निर्जगाम बलैः सार्धं बहुभिः परिवारितः ॥ **6.53.4** ॥ 1968

नागैरश्वैः खरैरुष्ट्रैः संयुक्तः सुसमाहितः।
पताकाध्वजचित्रैश्च बहुभिः समलङ्कृतः ॥ **6.53.5** ॥ 1969

ततो विचित्रकेयूरमुकुटेन विभूषितः।
तनुत्रं स समावृत्य सधनुर्निर्ययौ द्रुतम् ॥ **6.53.6** ॥ 1970

पताकालङ्कृतं दीप्तं तप्तकाञ्चनभूषितम्।
रथं प्रदक्षिणं कृत्वा समारोहच्चमूपतिः ॥ **6.53.7** ॥ 1971

ऋष्टिभिस्तोमरैश्चित्रैः श्लक्ष्णैश्च मुसलैरपि।
भिन्दिपालैश्च चापैश्च शक्तिभिः पट्टिशैरपि॥ **6.53.8**॥ 1972

खड्गैश्चक्रैर्गदाभिश्च निशितैश्च परश्वधैः।
पदातयश्च निर्यान्ति विविधाः शस्त्रपाणयः॥ **6.53.9**॥ 1973

विचित्रवाससः सर्वे दीप्ता राक्षसपुङ्गवाः।
गजा महोत्कटाः शूराश्चलन्त इव पर्वताः॥ **6.53.10**॥ 1974

ते युद्धकुशला रूढास्तोमराङ्कुशपाणिभिः।
अन्ये लक्षणसंयुक्ताः शूरारूढा महाबलाः॥ **6.53.11**॥ 1975

तद् राक्षसबलं सर्वं विप्रस्थितमशोभत।
प्रावृड्काले यथा मेघा नर्दमानाः सविद्युतः॥ **6.53.12**॥ 1976

निःसृता दक्षिणद्वारादङ्गदो यत्र यूथपः।
तेषां निष्क्रममाणानामशुभं समजायत॥ **6.53.13**॥ 1977

आकाशाद् विघनात् तीव्रा उल्काश्चाभ्यपतंस्तदा।
वमन्तः पावकज्वालाः शिवा घोरा ववाशिरे॥ **6.53.14**॥ 1978

व्याहरन्त मृगा घोरा रक्षसां निधनं तदा।
समापतन्तो योधास्तु प्रास्खलंस्तत्र दारुणम्॥ **6.53.15**॥ 1979

एतानौत्पातिकान् दृष्ट्वा वज्रदंष्ट्रो महाबलः।
धैर्यमालम्ब्य तेजस्वी निर्जगाम रणोत्सुकः॥ **6.53.16**॥ 1980

तांस्तु विद्रवतो दृष्ट्वा वानरा जितकाशिनः।
प्रणेदुः सुमहानादान् दिशः शब्देन पूरयन्॥ **6.53.17**॥ 1981

ततः प्रवृत्तं तुमुलं हरीणां राक्षसैः सह।
घोराणां भीमरूपाणामन्योन्यवधकाङ्क्षिणाम्॥ **6.53.18**॥ 1982

निष्पतन्तो महोत्साहा भिन्नदेहशिरोधराः।
रुधिरोक्षितसर्वाङ्गा न्यपतन् धरणीतले॥ **6.53.19**॥ 1983

केचिदन्योन्यमासाद्य शूराः परिघबाहवः।
चिक्षिपुर्विविधाञ्शस्त्रान् समरेष्वनिवर्तिनः॥ **6.53.20**॥ 1984

द्रुमाणां च शिलानां च शस्त्राणां चापि निःस्वनः।
श्रूयते सुमहांस्तत्र घोरो हृदयभेदनः॥ **6.53.21**॥ 1985

रथनेमिस्वनस्तत्र धनुषश्चापि घोरवत्।
शङ्खभेरीमृदङ्गानां बभूव तुमुलः स्वनः॥ **6.53.22**॥ 1986

केचिदस्त्राणि सन्त्यज्य बाहुयुद्धमकुर्वत॥ **6.53.23**॥ 1987

तलैश्च चरणैश्चापि मुष्टिभिश्च द्रुमैरपि।
जानुभिश्च हताः केचिद् भग्नदेहाश्च राक्षसाः।
शिलाभिश्चूर्णिताः केचिद् वानरैर्युद्धदुर्मदैः॥ **6.53.24**॥ 1988

वज्रदंष्ट्रो भृशं बाणै रणे वित्रासयन् हरीन्।
चचार लोकसंहारे पाशहस्त इवान्तकः॥ **6.53.25**॥ 1989

बलवन्तोऽस्त्रविदुषो नानाप्रहरणा रणे।
जघ्नुर्वानरसैन्यानि राक्षसाः क्रोधमूर्च्छिताः॥ **6.53.26**॥ 1990

जघ्ने तान् राक्षसान् सर्वान् धृष्टो वालिसुतो रणे।
क्रोधेन द्विगुणाविष्टः संवर्तक इवानलः॥ **6.53.27**॥ 1991

तान् राक्षसगणान् सर्वान् वृक्षमुद्यम्य वीर्यवान्।
अङ्गदः क्रोधताम्राक्षः सिंहः क्षुद्रमृगानिव॥ **6.53.28**॥ 1992

चकार कदनं घोरं शक्रतुल्यपराक्रमः।
अङ्गदाभिहतास्तत्र राक्षसा भीमविक्रमाः॥ **6.53.29**॥ 1993

विभिन्नशिरसः पेतुर्निकृत्ता इव पादपाः।
रथेश्चित्रैर्ध्वजैरश्वैः शरीरैर्हरिरक्षसाम्॥ **6.53.30**॥ 1994

रुधिरौघेण सञ्छन्ना भूमिर्भयकरी तदा।
हारकेयूरवस्त्रैश्च शस्त्रैश्च समलङ्कृता॥ **6.53.31**॥ 1995

भूमिर्भाति रणे तत्र शारदीव यथा निशा।
अङ्गदस्य च वेगेन तद् राक्षसबलं महत्।
प्राकम्पत तदा तत्र पवनेनाम्बुदो यथा॥ **6.53.32**॥ 1996

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुःपञ्चाशः सर्गः ॥

वज्रदंष्ट्राङ्गदयोर्युद्धमङ्गदेन तस्य वधश्च

स्वबलस्य च घातेन अङ्गदस्य बलेन च।
राक्षसः क्रोधमाविष्टो वज्रदंष्ट्रो महाबलः॥ **6.54.1** ॥ 1997

विस्फार्य च धनुर्घोरं शक्राशनिसमप्रभम्।
वानराणामनीकानि प्राकिरच्छरवृष्टिभिः॥ **6.54.2** ॥ 1998

राक्षसाश्चापि मुख्यास्ते रथेषु समवस्थिताः।
नानाप्रहरणाः शूराः प्रायुध्यन्त तदा रणे॥ **6.54.3** ॥ 1999

वानराणां च शूरास्तु ते सर्वे प्लवगर्षभाः।
अयुध्यन्त शिलाहस्ताः समवेताः समन्ततः॥ **6.54.4** ॥ 2000

तत्रायुधसहस्राणि तस्मिन्नायोधने भृशम्।
राक्षसाः कपिमुख्येषु पातयाञ्चक्रिरे तदा॥ **6.54.5** ॥ 2001

वानराश्चैव रक्षःसु गिरिवृक्षान् महाशिलाः।
प्रवीराः पातयामासुर्मत्तवारणसन्निभाः॥ **6.54.6** ॥ 2002

शूराणां युध्यमानानां समरेष्वनिवर्तिनाम्।
तद् राक्षसगणानां च सुयुद्धं समवर्तत॥ **6.54.7** ॥ 2003

प्रभिन्नशिरसः केचिच्छिन्नः पादैश्च बाहुभिः।
शस्त्रैरर्दितदेहास्तु रुधिरेण समुक्षिताः॥ **6.54.8**॥ 2004

हरयो राक्षसाश्चैव शेरते गां समाश्रिताः।
कङ्कगृध्रबलाढ्याश्च गोमायुकुलसङ्कुलाः॥ **6.54.9**॥ 2005

कबन्धानि समुत्पेतुर्भीरूणां भीषणानि वै।
भुजपाणिशिरश्छिन्नाश्छिन्नकायाश्च भूतले॥ **6.54.10**॥ 2006

वानरा राक्षसाश्चापि निपेतुस्तत्र भूतले।
ततो वानरसैन्येन हन्यमानं निशाचरम्॥ **6.54.11**॥ 2007

प्राभज्यत बलं सर्वं वज्रदंष्ट्रस्य पश्यतः।
राक्षसान् भयवित्रस्तान् हन्यमानान् प्लवङ्गमैः॥ **6.54.12**॥ 2008

दृष्ट्वा स रोषताम्राक्षो वज्रदंष्टः प्रतापवान्।
प्रविवेश धनुष्पाणिस्त्रासयन् हरिवाहिनीम्॥ **6.54.13**॥ 2009

शरैर्विदारयामास कङ्कपत्रैरजिह्मगैः।
बिभेद वानरांस्तत्र सप्ताष्टौ नव पञ्च च॥ **6.54.14**॥ 2010

विव्याध परमक्रुद्धो वज्रदंष्ट्रः प्रतापवान्।
त्रस्ताः सर्वे हरिगणाः शरैः सङ्कृत्तदेहिनः।
अङ्गदं सम्प्रधावन्ति प्रजापतिमिव प्रजाः॥ **6.54.15**॥ 2011

ततो हरिगणान् भग्नान् दृष्ट्वा वालिसुतस्तदा।
क्रोधेन वज्रदंष्ट्रं तमुदीक्षन्तमुदैक्षत॥ **6.54.16**॥ 2012

वज्रदंष्ट्रोऽङ्गदश्चोभौ योयुध्येते परस्परम्।
चेरतुः परमक्रुद्धौ हरिमत्तगजाविव॥ **6.54.17**॥ 2013

ततः शतसहस्रेण हरिपुत्रं महाबलम्।
जघान मर्मदेशेषु शरैरग्निशिखोपमैः॥ **6.54.18**॥ 2014

रुधिरोक्षितसर्वाङ्गो वालिसूनुर्महाबलः।
चिक्षेप वज्रदंष्ट्राय वृक्षं भीमपराक्रमः॥ **6.54.19**॥ 2015

दृष्ट्वा पतन्तं तं वृक्षमसभ्रान्तश्च राक्षसः।
चिच्छेद बहुधा सोऽपि मथितः प्रापतद् भुवि॥ **6.54.20**॥ 2016

तं दृष्ट्वा वज्रदंष्ट्रस्य विक्रमं प्लवगर्षभः।
प्रगृह्य विपुलं शैलं चिक्षेप च ननाद च॥ **6.54.21**॥ 2017

तमापतन्तं दृष्ट्वा स रथादाप्लुत्य वीर्यवान्।
गदापाणिरसभ्रान्तः पृथिव्यां समतिष्ठत॥ **6.54.22**॥ 2018

अङ्गदेन शिला क्षिप्ता गत्वा तु रणमूर्धनि।
सचक्रकूबरं साश्वं प्रममाथ रथं तदा॥ **6.54.23**॥ 2019

ततोऽन्यच्छिखरं गृह्य विपुलं द्रुमभूषितम्।
वज्रदंष्ट्रस्य शिरसि पातयामास वानरः॥ **6.54.24**॥ 2020

अभवच्छोणितोद्गारी वज्रदंष्ट्रः सुमूर्च्छितः।
मुहूर्तमभवन्मूढो गदामालिङ्ग्य निःश्वसन्॥ **6.54.25**॥ 2021

स लब्धसंज्ञो गदया वालिपुत्रमवस्थितम्।
जघान परमक्रुद्धो वक्षोदेशे निशाचरः॥ **6.54.26**॥ 2022

गदां त्यक्त्वा ततस्तत्र मुष्टियुद्धमकुर्वत।
अन्योन्यं जघ्नतुस्तत्र तावुभौ हरिराक्षसौ॥ **6.54.27**॥ 2023

रुधिरोद्गारिणौ तौ तु प्रहारैर्जनितश्रमौ।
बभूवतुः सुविक्रान्तावङ्गारकबुधाविव॥ **6.54.28**॥ 2024

ततः परमतेजस्वी अङ्गदः प्लवगर्षभः।
उत्पाट्य वृक्षं स्थितवानासीत् पुष्पफलैर्युतः॥ **6.54.29**॥ 2025

जग्राह चार्षभं चर्म खड्गं च विपुलं शुभम्।
किङ्किणीजालसञ्छन्नं चर्मणा च परिष्कृतम्॥ **6.54.30**॥ 2026

चित्रांश्च रुचिरान् मार्गांश्चेरतुः कपिराक्षसौ।
जघ्नतुश्च तदान्योन्यं नर्दन्तौ जयकाङ्क्षिणौ॥ **6.54.31**॥ 2027

व्रणैः सास्रैरशोभेतां पुष्पिताविव किंशुकौ।
युध्यमानौ परिश्रान्तौ जानुभ्यामवनीं गतौ॥ **6.54.32**॥ 2028

निमेषान्तरमात्रेण अङ्गदः कपिकुञ्जरः।
उदतिष्ठत दीप्ताक्षो दण्डाहत इवोरगः॥ **6.54.33**॥ 2029

निर्मलेन सुधौतेन खड्गेनास्य महच्छिरः।
जधान वज्रदंष्ट्रस्य वालिसूनुर्महाबलः॥ **6.54.34**॥ 2030

रुधिरोक्षितगात्रस्य बभूव पतितं द्विधा।
तच्च तस्य परीताक्षं शुभं खड्गहतं शिरः॥ **6.54.35**॥ 2031

वज्रदंष्ट्रं हतं दृष्ट्वा राक्षसा भयमोहिताः।
त्रस्ता ह्यभ्यद्रवन् लङ्कां वध्यमानाः प्लवङ्गमैः।
विषण्णवदना दीना ह्रिया किञ्चिदवाङ्मुखाः॥ **6.54.36**॥ 2032

निहत्य तं वज्रधरप्रभावः
स वालिसूनुः कपिसैन्यमध्ये।
जगाम हर्षं महितो महाबलः
सहस्रनेत्रस्त्रिदशैरिवावृतः॥ **6.54.37**॥ 2033

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुःपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चपञ्चाशः सर्गः ॥

रावणाज्ञयाकम्पनादीनां युद्ध आगमनं वानरैः सह तेषां घोरं युद्धं च

वज्रदंष्ट्रं हतं श्रुत्वा वालिपुत्रेण रावणः।
बलाध्यक्षमुवाचेदं कृताञ्जलिमुपस्थितम्॥ **6.55.1** ॥ 2034

शीघ्रं निर्यान्तु दुर्धर्षा राक्षसा भीमविक्रमाः।
अकम्पनं पुरस्कृत्य सर्वशस्त्रास्त्रकोविदम्॥ **6.55.2** ॥ 2035

एष शास्ता च गोप्ता च नेता च युधि सत्तमः।
भूतिकामश्च मे नित्यं नित्यं च समरप्रियः॥ **6.55.3** ॥ 2036

एष जेष्यति काकुत्स्थौ सुग्रीवं च महाबलम्।
वानरांश्चापरान् घोरान् हनिष्यति न संशयः॥ **6.55.4** ॥ 2037

परिगृह्य स तामाज्ञां रावणस्य महाबलः।
बलं सम्प्रेरयामास तदा लघुपराक्रमः॥ **6.55.5** ॥ 2038

ततो नानाप्रहरणा भीमाक्षा भीमदर्शनाः।
निष्पेतू राक्षसा मुख्या बलाध्यक्षप्रचोदिताः॥ **6.55.6** ॥ 2039

रथमास्थाय विपुलं तप्तकाञ्चनभूषणम्।
मेघाभो मेघवर्णश्च मेघस्वनमहास्वनः॥ **6.55.7** ॥ 2040

राक्षसैः संवृतो घोरैस्तदा निर्यात्यकम्पनः।
नहि कम्पयितुं शक्यः सुरैरपि महामृधे॥ **6.55.8**॥ 2041

अकम्पनस्ततस्तेषामादित्य इव तेजसा।
तस्य निर्धावमानस्य संरब्धस्य युयुत्सया॥ **6.55.9**॥ 2042

अकस्माद् दैन्यमागच्छद्धयानां रथवाहिनाम्।
व्यस्फुरन्नयनं चास्य सव्यं युद्धाभिनन्दिनः॥ **6.55.10**॥ 2043

विवर्णो मुखवर्णश्च गद्गदश्चाभवत् स्वनः।
अभवत् सुदिने काले दुर्दिनं रूक्षमारुतम्॥ **6.55.11**॥ 2044

ऊचुः खगमृगाः सर्वे वाचः क्रूरा भयावहाः।
स सिंहोपचितस्कन्धः शार्दूलसमविक्रमः॥ **6.55.12**॥ 2045

तानुत्पातानचिन्त्यैव निर्जगाम रणाजिरम्।
तथा निर्गच्छतस्तस्य रक्षसः सह राक्षसैः॥ **6.55.13**॥ 2046

बभूव सुमहान् नादः क्षोभयन्निव सागरम्।
तेन शब्देन वित्रस्ता वानराणां महाचमूः॥ **6.55.14**॥ 2047

द्रुमशैलप्रहाराणां योद्धुं समुपतिष्ठताम्।
तेषां युद्धं महारौद्रं सञ्जज्ञे कपिरक्षसाम्॥ **6.55.15**॥ 2048

रामरावणयोरर्थे समभित्यक्तदेहिनः।
सर्वे ह्यतिबलाः शूराः सर्वे पर्वतसन्निभाः॥ **6.55.16**॥ 2049

हरयो राक्षसाश्चैव परस्परजिघांसया।
तेषां विनर्दतां शब्दः संयुगेऽतितरस्विनाम्॥ **6.55.17**॥ 2050

शुश्रुवे सुमहान् कोपादन्योन्यमभिगर्जताम्।
रजश्चारुणवर्णाभं सुभीममभवद् भृशम्॥ **6.55.18**॥ 2051

उद्धृतं हरिरक्षोभिः संरुरोध दिशो दश।
अन्योन्यं रजसा तेन कौशेयोद्धतपाण्डुना॥ **6.55.19**॥ 2052

संवृतानि च भूतानि ददृशुर्न रणाजिरे।
न ध्वजो न पताका वा चर्म वा तुरगोऽपि वा॥ **6.55.20**॥ 2053

आयुधं स्यन्दनो वापि ददृशे तेन रेणुना।
शब्दश्च सुमहांस्तेषां नर्दतामभिधावताम्॥ **6.55.21**॥ 2054

श्रूयते तुमुलो युद्धे न रूपाणि चकाशिरे।
हरीनेव सुसंरुष्टा हरयो जघ्नुराहवे॥ **6.55.22**॥ 2055

राक्षसा राक्षसांश्चापि निजघ्नुस्तिमिरे तदा।
ते परांश्च विनिघ्नन्तः स्वांश्च वानरराक्षसाः॥ **6.55.23**॥ 2056

रुधिरार्द्रां तदा चक्रुर्महीं पङ्कानुलेपनाम्।
ततस्तु रुधिरौघेण सिक्तं ह्यपगतं रजः॥ **6.55.24**॥ 2057

शरीरशवसङ्कीर्णा बभूव च वसुन्धरा।
द्रुमशक्तिगदाप्रासैः शिलापरिघतोमरैः॥ **6.55.25**॥ 2058

राक्षसा हरयस्तूर्णं जघ्नुरन्योन्यमोजसा।
बाहुभिः परिघाकारैर्युध्यन्तः पर्वतोपमान्॥ **6.55.26**॥ 2059

हरयो भीमकर्माणो राक्षसाञ्जघ्नुराहवे।
राक्षसास्त्वभिसङ्क्रुद्धाः प्रासतोमरपाणयः॥ **6.55.27**॥ 2060

कपीन् निजघ्निरे तत्र शस्त्रैः परमदारुणैः।
अकम्पनः सुसङ्क्रुद्धो राक्षसानां चमूपतिः॥ **6.55.28**॥ 2061

संहर्षयति तान् सर्वान् राक्षसान् भीमविक्रमान्।
हरयस्त्वपि रक्षांसि महाद्रुममहाश्मभिः॥ **6.55.29**॥ 2062

विदारयन्त्यभिक्रम्य शस्त्राण्याच्छिद्य वीर्यतः।
एतस्मिन्नन्तरे वीरा हरयः कुमुदो नलः॥ **6.55.30**॥ 2063

मैन्दश्च द्विविदः क्रुद्धाश्चक्रुर्वेगमनुत्तमम्।
ते तु वृक्षैर्महावीरा राक्षसानां चमूमुखे॥ **6.55.31**॥ 2064

कदनं सुमहच्चक्रुर्लीलया हरिपुङ्गवाः।
ममन्थू राक्षसान् सर्वे नानाप्रहरणैर्भृशम्॥ **6.55.32**॥ 2065

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षट्पञ्चाशः सर्गः ॥

हनुमताकम्पनस्य वधः

तद् दृष्ट्वा सुमहत् कर्म कृतं वानरसत्तमैः।
क्रोधमाहारयामास युधि तीव्रमकम्पनः॥ **6.56.1** ॥ 2066

क्रोधमूर्च्छितरूपस्तु धुन्वन् परमकार्मुकम्।
दृष्ट्वा तु कर्म शत्रूणां सारथिं वाक्यमब्रवीत्॥ **6.56.2** ॥ 2067

तत्रैव तावत् त्वरितो रथं प्रापय सारथे।
एते च बलिनो घ्नन्ति सुबहून् राक्षसान् रणे॥ **6.56.3** ॥ 2068

एते च बलवन्तो वा भीमकोपाश्च वानराः।
द्रुमशैलप्रहरणास्तिष्ठन्ति प्रमुखे मम॥ **6.56.4** ॥ 2069

एतान् निहन्तुमिच्छामि समरश्लाघिनो ह्यहम्।
एतैः प्रमथितं सर्वं रक्षसां दृश्यते बलम्॥ **6.56.5** ॥ 2070

ततः प्रचलिताश्वेन रथेन रथिनां वरः।
हरीनभ्यपतद् दूराच्छरजालैरकम्पनः॥ **6.56.6** ॥ 2071

न स्थातुं वानराः शेकुः किं पुनर्योद्धुमाहवे।
अकम्पनशरैर्भग्नाः सर्व एवाभिदुद्रुवुः॥ **6.56.7** ॥ 2072

तान् मृत्युवशमापन्नानकम्पनशरानुगान्।
समीक्ष्य हनुमाञ्ज्ञातीनुपतस्थे महाबलः॥ **6.56.8**॥ 2073

तं महाप्लवगं दृष्ट्वा सर्वे ते प्लवगर्षभाः।
समेत्य समरे वीराः संहृष्टाः पर्यवारयन्॥ **6.56.9**॥ 2074

व्यवस्थितं हनूमन्तं ते दृष्ट्वा प्लवगर्षभाः।
बभूवुर्बलवन्तो हि बलवन्तमुपाश्रिताः॥ **6.56.10**॥ 2075

अकम्पनस्तु शैलाभं हनूमन्तमवस्थितम्।
महेन्द्र इव धाराभिः शरैरभिववर्ष ह॥ **6.56.11**॥ 2076

अचिन्तयित्वा बाणौघाञ्शरीरे पातितान् कपिः।
अकम्पनवधार्थाय मनो दध्रे महाबलः॥ **6.56.12**॥ 2077

स प्रहस्य महातेजा हनूमान् मारुतात्मजः।
अभिदुद्राव तद्रक्षः कम्पयन्निव मेदिनीम्॥ **6.56.13**॥ 2078

तस्याथ नर्दमानस्य दीप्यमानस्य तेजसा।
बभूव रूपं दुर्धर्षं दीप्तस्येव विभावसोः॥ **6.56.14**॥ 2079

आत्मानं त्वप्रहरणं ज्ञात्वा क्रोधसमन्वितः।
शैलमुत्पाटयामास वेगेन हरिपुङ्गवः॥ **6.56.15**॥ 2080

गृहीत्वा सुमहाशैलं पाणिनैकेन मारुतिः।
स विनद्य महानादं भ्रामयामास वीर्यवान्॥ **6.56.16**॥ 2081

ततस्तमभिदुद्राव राक्षसेन्द्रमकम्पनम्।
पुरा हि नमुचिं सङ्ख्ये वज्रेणेव पुरन्दरः॥ **6.56.17**॥ 2082

अकम्पनस्तु तद् दृष्ट्वा गिरिशृङ्गं समुद्यतम्।
दूरादेव महाबाणैरर्धचन्द्रैर्व्यदारयत्॥ **6.56.18**॥ 2083

तं पर्वताग्रमाकाशे रक्षोबाणविदारितम्।
विकीर्णं पतितं दृष्ट्वा हनूमान् क्रोधमूर्च्छितः॥ **6.56.19**॥ 2084

सोऽश्वकर्णं समासाद्य रोषदर्पान्वितो हरिः।
तूर्णमुत्पाटयामास महागिरिमिवोच्छ्रितम्॥ **6.56.20**॥ 2085

तं गृहीत्वा महास्कन्धं सोऽश्वकर्णं महाद्युतिः।
प्रगृह्य परया प्रीत्या भ्रामयामास संयुगे॥ **6.56.21**॥ 2086

प्रधावन्नुरुवेगेन बभञ्ज तरसा द्रुमान्।
हनूमान् परमक्रुद्धश्चरणैर्दारयन् महीम्॥ **6.56.22**॥ 2087

गजांश्च सगजारोहान् सरथान् रथिनस्तथा।
जघान हनुमान् धीमान् राक्षसांश्च पदातिगान्॥ **6.56.23**॥ 2088

तमन्तकमिव क्रुद्धं सद्रुमं प्राणहारिणम्।
हनूमन्तमभिप्रेक्ष्य राक्षसा विप्रदुद्रुवुः॥ **6.56.24**॥ 2089

तमापतन्तं सङ्क्रुद्धं राक्षसानां भयावहम्।
ददर्शाकम्पनो वीरश्चुक्षोभ च ननाद च॥ **6.56.25**॥ 2090

स चतुर्दशभिर्बाणैर्निशितैर्देहदारणैः।
निर्बिभेद महावीर्यं हनूमन्तमकम्पनः॥ **6.56.26**॥ 2091

स तथा विप्रकीर्णस्तु नाराचैः शितशक्तिभिः।
हनूमान् ददृशे वीरः प्ररूढ इव सानुमान्॥ **6.56.27**॥ 2092

विरराज महावीर्यो महाकायो महाबलः।
पुष्पिताशोकसङ्काशो विधूम इव पावकः॥ **6.56.28**॥ 2093

ततोऽन्यं वृक्षमुत्पाट्य कृत्वा वेगमनुत्तमम्।
शिरस्याभिजघानाशु राक्षसेन्द्रमकम्पनम्॥ **6.56.29**॥ 2094

स वृक्षेण हतस्तेन सक्रोधेन महात्मना।
राक्षसो वानरेन्द्रेण पपात च ममार च॥ **6.56.30**॥ 2095

तं दृष्ट्वा निहतं भूमौ राक्षसेन्द्रमकम्पनम्।
व्यथिता राक्षसाः सर्वे क्षितिकम्प इव द्रुमाः॥ **6.56.31**॥ 2096

त्यक्तप्रहरणाः सर्वे राक्षसास्ते पराजिताः।
लङ्कामभिययुस्त्रासाद् वानरैस्तैरभिद्रुताः॥ **6.56.32**॥ 2097

ते मुक्तकेशाः सम्भ्रान्ता भग्नमानाः पराजिताः।
भयाच्छ्रमजलैरङ्गैः प्रस्रवद्भिर्विदुद्रुवुः॥ **6.56.33**॥ 2098

अन्योन्यं ये प्रमथ्नन्तो विविशुर्नगरं भयात्।
पृष्ठतस्ते तु सम्मूढाः प्रेक्षमाणा मुहुर्मुहुः॥ **6.56.34**॥ 2099

तेषु लङ्कां प्रविष्टेषु राक्षसेषु महाबलाः।
समेत्य हरयः सर्वे हनूमन्तमपूजयन्॥ **6.56.35**॥ 2100

सोऽपि प्रवृद्धस्तान् सर्वान् हरीन् सम्प्रत्यपूजयत्।
हनूमान् सत्त्वसम्पन्नो यथार्हमनुकूलतः॥ **6.56.36**॥ 2101

विनेदुश्च यथाप्राणं हरयो जितकाशिनः।
चकृषुश्च पुनस्तत्र सप्राणानेव राक्षसान्॥ **6.56.37**॥ 2102

स वीरशोभामभजन्महाकपिः
समेत्य रक्षांसि निहत्य मारुतिः।
महासुरं भीममित्रनाशनं
विष्णुर्यथैवोरुबलं चमूमुखे॥ **6.56.38**॥ 2103

अपूजयन् देवगणास्तदा कपिं
स्वयं च रामोऽतिबलश्च लक्ष्मणः।

तथैव सुग्रीवमुखाः प्लवङ्गमा
विभीषणश्चैव महाबलस्तदा ॥ 6.56.39 ॥ 2104

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षट्पञ्चाशः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तपञ्चाशः सर्गः ॥

रावणाज्ञया प्रहस्तस्य विपुलसैन्येन सह युद्धाय प्रस्थानम्

अकम्पनवधं श्रुत्वा क्रुद्धो वै राक्षसेश्वरः।
किञ्चिद् दीनमुखश्चापि सचिवांस्तानुदैक्षत ॥ **6.57.1** ॥ 2105

स तु ध्यात्वा मुहूर्तं तु मन्त्रिभिःसंविचार्य च।
ततस्तु रावणः पूर्वदिवसे राक्षसाधिपः।
पुरीं परिययौ लङ्कां सर्वान् गुल्मानवेक्षितुम् ॥ **6.57.2** ॥ 2106

तां राक्षसगणैर्गुप्तां गुल्मैर्बहुभिरावृताम्।
ददर्श नगरीं राजा पताकाध्वजमालिनीम् ॥ **6.57.3** ॥ 2107

रुद्धां तु नगरीं दृष्ट्वा रावणो राक्षसेश्वरः।
उवाचात्महितं काले प्रहस्तं युद्धकोविदम् ॥ **6.57.4** ॥ 2108

पुरस्योपनिविष्टस्य सहसा पीडितस्य ह।
नान्ययुद्धात् प्रपश्यामि मोक्षं युद्धविशारद ॥ **6.57.5** ॥ 2109

अहं वा कुम्भकर्णो वा त्वं वा सेनापतिर्मम।
इन्द्रजिद् वा निकुम्भो वा वहेयुर्भारमीदृशम् ॥ **6.57.6** ॥ 2110

स त्वं बलमतः शीघ्रमादाय परिगृह्य च।
विजयायाभिनिर्याहि यत्र सर्वे वनौकसः ॥ **6.57.7** ॥ 2111

निर्याणादेव तूर्णं च चलिता हरिवाहिनी।
नर्दतां राक्षसेन्द्राणां श्रुत्वा नादं द्रविष्यति॥ **6.57.8**॥ 2112

चपला ह्यविनीताश्च चलचित्ताश्च वानराः।
न सहिष्यन्ति ते नादं सिंहनादमिव द्विपाः॥ **6.57.9**॥ 2113

विद्रुते च बले तस्मिन् रामः सौमित्रिणा सह।
अवशस्ते निरालम्बः प्रहस्त वशमेष्यति॥ **6.57.10**॥ 2114

आपत्संशयिता श्रेयो नात्र निःसंशयीकृता।
प्रतिलोमानुलोमं वा यत् तु नो मन्यसे हितम्॥ **6.57.11**॥ 2115

रावणेनैवमुक्तस्तु प्रहस्तो वाहिनीपतिः।
राक्षसेन्द्रमुवाचेदमसुरेन्द्रमिवोशना॥ **6.57.12**॥ 2116

राजन् मन्त्रितपूर्वं नः कुशलैः सह मन्त्रिभिः।
विवादश्चापि नो वृत्तः समवेक्ष्य परस्परम्॥ **6.57.13**॥ 2117

प्रदानेन तु सीतायाः श्रेयो व्यवसितं मया।
अप्रदाने पुनर्युद्धं दृष्टमेव तथैव नः॥ **6.57.14**॥ 2118

सोऽहं दानैश्च मानैश्च सततं पूजितस्त्वया।
सान्त्वैश्च विविधैः काले किं न कुर्यां हितं तव॥ **6.57.15**॥ 2119

नहि मे जीवितं रक्ष्यं पुत्रदारधनानि च।
त्वं पश्य मां जुहूषन्तं त्वदर्थे जीवितं युधि॥ **6.57.16**॥ 2120

एवमुक्त्वा तु भर्तारं रावणं वाहिनीपतिः।
उवाचेदं बलाध्यक्षान् प्रहस्तः पुरतः स्थितान्॥ **6.57.17**॥ 2121

समानयत मे शीघ्रं राक्षसानां महाबलम्।
मद्बाणानां तु वेगेन हतानां च रणाजिरे॥ **6.57.18**॥ 2122

अद्य तृप्यन्तु मांसादाः पक्षिणः काननौकसाम्।
तस्य तद् वचनं श्रुत्वा बलाध्यक्षा महाबलाः॥ **6.57.19**॥ 2123

बलमुद्योजयामासुस्तस्मिन् राक्षसमन्दिरे।
सा बभूव मुहूर्तेन भीमैर्नानाविधायुधैः॥ **6.57.20**॥ 2124

लङ्का राक्षसवीरैस्तैर्गजैरिव समाकुला।
हुताशनं तर्पयतां ब्राह्मणांश्च नमस्यताम्॥ **6.57.21**॥ 2125

आज्यगन्धप्रतिवहः सुरभिर्मारुतो ववौ।
स्रजश्च विविधाकारा जगृहुस्त्वभिमन्त्रिताः॥ **6.57.22**॥ 2126

सङ्ग्रामसज्जाः संहृष्टा धारयन् राक्षसास्तदा।
सधनुष्काः कवचिनो वेगादाप्लुत्य राक्षसाः॥ **6.57.23**॥ 2127

रावणं प्रेक्ष्य राजानं प्रहस्तं पर्यवारयन्।
अथामन्त्र्य तु राजानं भेरीमाहत्य भैरवाम्॥ **6.57.24**॥ 2128

आरुरोह रथं युक्तः प्रहस्तः सज्जकल्पितम्।
हयैर्महाजवैर्युक्तं सम्यक्सूतं सुसंयतम्॥ **6.57.25**॥ 2129

महाजलदनिर्घोषं साक्षाच्चन्द्रार्कभास्वरम्।
उरगध्वजदुर्धर्षं सुवरूथं स्वपस्करम्॥ **6.57.26**॥ 2130

सुवर्णजालसंयुक्तं प्रहसन्तमिव श्रिया।
ततस्तं रथमास्थाय रावणार्पितशासनः॥ **6.57.27**॥ 2131

लङ्काया निर्ययौ तूर्णं बलेन महता वृतः।
ततो दुन्दुभिनिर्घोषः पर्जन्यनिनदोपमः।
वादित्राणां च निनदः पूरयन्निव मेदिनीम्॥ **6.57.28**॥ 2132

शुश्रुवे शङ्खशब्दश्च प्रयाते वाहिनीपतौ।
निनदन्तः स्वरान् घोरान् राक्षसा जग्मुरग्रतः॥ **6.57.29**॥ 2133

भीमरूपा महाकायाः प्रहस्तस्य पुरःसराः।
नरान्तकः कुम्भहनुर्महानादः समुन्नतः।
प्रहस्तसचिवा ह्येते निर्ययुः परिवार्य तम्॥ **6.57.30**॥ 2134

व्यूढेनैव सुघोरेण पूर्वद्वारात् स निर्ययौ।
गजयूथनिकाशेन बलेन महता वृतः॥ **6.57.31**॥ 2135

सागरप्रतिमौघेन वृतस्तेन बलेन सः।
प्रहस्तो निर्ययौ क्रुद्धः कालान्तकयमोपमः॥ **6.57.32**॥ 2136

तस्य निर्याणघोषेण राक्षसानां च नर्दताम्।
लङ्कायां सर्वभूतानि विनेदुर्विकृतैः स्वरैः॥ **6.57.33**॥ 2137

व्यभ्रमाकाशमाविश्य मांसशोणितभोजनाः।
मण्डलान्यपसव्यानि खगाश्चक्रू रथं प्रति॥ **6.57.34**॥ 2138

वमन्त्यः पावकज्वालाः शिवा घोरा ववाशिरे।
अन्तरिक्षात् पपातोल्का वायुश्च परुषं ववौ॥ **6.57.35**॥ 2139

अन्योन्यमभिसंरब्धा ग्रहाश्च न चकाशिरे।
मेघाश्च खरनिर्घोषा रथस्योपरि रक्षसः॥ **6.57.36**॥ 2140

ववर्षू रुधिरं चास्य सिषिचुश्च पुरःसरान्।
केतुमूर्धनि गृध्रस्तु विलीनो दक्षिणामुखः॥ **6.57.37**॥ 2141

नदन्नुभयतः पार्श्वं समग्रां श्रियमाहरत्।
सारथेर्बहुशश्चास्य सङ्ग्राममवगाहतः॥ **6.57.38**॥ 2142

प्रतोदो न्यपतद्धस्तात् सूतस्य हयसादिनः।
निर्याणश्रीश्च या च स्याद् भास्वरा च सुदुर्लभा॥ **6.57.39**॥ 2143

सा ननाश मुहूर्तेन समे च स्खलिता हयाः।
प्रहस्तं तं हि निर्यान्तं प्रख्यातगुणपौरुषम्।
युधि नानाप्रहरणा कपिसेनाभ्यवर्तत॥ **6.57.40**॥ 2144

अथ घोषः सुतुमुलो हरीणां समजायत।
वृक्षानारुजतां चैव गुर्वीर्वै गृह्णतां शिलाः॥ **6.57.41**॥ 2145

नदतां राक्षसानां च वानराणां च गर्जताम्।
उभे प्रमुदिते सैन्ये रक्षोगणवनौकसाम्॥ **6.57.42**॥ 2146

वेगितानां समर्थानामन्योन्यवधकाङ्क्षिणाम्।
परस्परं चाह्वयतां निनादः श्रूयते महान्॥ **6.57.43**॥ 2147

ततः प्रहस्तः कपिराजवाहिनी -
मभिप्रतस्थे विजयाय दुर्मतिः।
विवृद्धवेगां च विवेश तां चमूं
यथा मुमूर्षुः शलभो विभावसुम्॥ **6.57.44**॥ 2148

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टपञ्चाशः सर्गः ॥

नीलकर्तृकः प्रहस्तस्य वधः

ततः प्रहस्तं निर्यान्तं दृष्ट्वा रणकृतोद्यमम्।
उवाच सस्मितं रामो विभीषणमरिन्दमः॥ **6.58.1** ॥ 2149

क एष सुमहाकायो बलेन महता वृतः।
आगच्छति महावेगः किंरूपबलपौरुषः॥ **6.58.2** ॥ 2150

आचक्ष्व मे महाबाहो वीर्यवन्तं निशाचरम्।
राघवस्य वचः श्रुत्वा प्रत्युवाच विभीषणः॥ **6.58.3** ॥ 2151

एष सेनापतिस्तस्य प्रहस्तो नाम राक्षसः।
लङ्कायां राक्षसेन्द्रस्य त्रिभागबलसंवृतः।
वीर्यवानस्त्रविच्छूरः सुप्रख्यातपराक्रमः॥ **6.58.4** ॥ 2152

ततः प्रहस्तं निर्यान्तं भीमं भीमपराक्रमम्।
गर्जन्तं सुमहाकायं राक्षसैरभिसंवृतम्॥ **6.58.5** ॥ 2153

ददर्श महती सेना वानराणां बलीयसाम्।
अभिसञ्जातघोषाणां प्रहस्तमभिगर्जताम्॥ **6.58.6** ॥ 2154

खड्गशक्त्यृष्टिशूलाश्च बाणानि मुसलानि च।
गदाश्च परिघाः प्रासा विविधाश्च परश्वधाः॥ **6.58.7** ॥ 2155

धनूंषि च विचित्राणि राक्षसानां जयैषिणाम्।
प्रगृहीतान्यराजन्त वानरानभिधावताम्॥ **6.58.8**॥ 2156

जगृहुः पादपांश्चापि पुष्पितांस्तु गिरींस्तथा।
शिलाश्च विपुला दीर्घा योद्धुकामाः प्लवङ्गमाः॥ **6.58.9**॥ 2157

तेषामन्योन्यमासाद्य सङ्ग्रामः सुमहानभूत्।
बहूनामश्मवृष्टिं च शरवर्षं च वर्षताम्॥ **6.58.10**॥ 2158

बहवो राक्षसा युद्धे बहून् वानरपुङ्गवान्।
वानरा राक्षसांश्चापि निजघ्नुर्बहवो बहून्॥ **6.58.11**॥ 2159

शूलैः प्रमथिताः केचित् केचित् तु परमायुधैः।
परिघैराहताः केचित् केचिच्छिन्नाः परश्वधैः॥ **6.58.12**॥ 2160

निरुच्छ्वासाः पुनः केचित् पतिता जगतीतले।
विभिन्नहृदयाः केचिदिषुसन्धानसाधिताः॥ **6.58.13**॥ 2161

केचिद् द्विधा कृताः खड्गैः स्फुरन्तः पतिता भुवि।
वानरा राक्षसैः शूरैः पार्श्वतश्च विदारिताः॥ **6.58.14**॥ 2162

वानरैश्चापि सङ्क्रुद्धै राक्षसौघाः समन्ततः।
पादपैर्गिरिशृङ्गैश्च सम्पिष्टा वसुधातले॥ **6.58.15**॥ 2163

वज्रस्पर्शतलैर्हस्तैर्मुष्टिभिश्च हता भृशम्।
वमञ्शोणितमास्येभ्यो विशीर्णदशनेक्षणाः॥ **6.58.16**॥ 2164

आर्तस्वनं च स्वनतां सिंहनादं च नर्दताम्।
बभूव तुमुलः शब्दो हरीणां रक्षसामपि॥ **6.58.17**॥ 2165

वानरा राक्षसाः क्रुद्धा वीरमार्गमनुव्रताः।
विवृत्तवदनाः क्रूराश्चक्रुः कर्माण्यभीतवत्॥ **6.58.18**॥ 2166

नरान्तकः कुम्भहनुर्महानादः समुन्नतः।
एते प्रहस्तसचिवाः सर्वे जघ्नुर्वनौकसः॥ **6.58.19**॥ 2167

तेषां निपततां शीघ्रं निघ्नतां चापि वानरान्।
द्विविदो गिरिशृङ्गेण जघानैकं नरान्तकम्॥ **6.58.20**॥ 2168

दुर्मुखः पुनरुत्थाय कपिः सविपुलद्रुमम्।
राक्षसं क्षिप्रहस्तं तु समुन्नतमपोथयत्॥ **6.58.21**॥ 2169

जाम्बवांस्तु सुसङ्क्रुद्धः प्रगृह्य महतीं शिलाम्।
पातयामास तेजस्वी महानादस्य वक्षसि॥ **6.58.22**॥ 2170

अथ कुम्भहनुस्तत्र तारेणासाद्य वीर्यवान्।
वृक्षेण महता सद्यः प्राणान् सन्त्याजयद् रणे॥ **6.58.23**॥ 2171

अमृष्यमाणस्तत्कर्म प्रहस्तो रथमास्थितः।
चकार कदनं घोरं धनुष्पाणिर्वनौकसाम्॥ **6.58.24**॥ 2172

आवर्त इव सञ्जज्ञे सेनयोरुभयोस्तदा।
क्षुभितस्याप्रमेयस्य सागरस्येव निःस्वनः॥ **6.58.25**॥ 2173

महता हि शरौघेण राक्षसो रणदुर्मदः।
अर्दयामास सङ्क्रुद्धो वानरान् परमाहवे॥ **6.58.26**॥ 2174

वानराणां शरीरैस्तु राक्षसानां च मेदिनी।
बभूवातिचिता घोरैः पर्वतैरिव संवृता॥ **6.58.27**॥ 2175

सा मही रुधिरौघेण प्रच्छन्ना सम्प्रकाशते।
सञ्छन्ना माधवे मासि पलाशैरिव पुष्पितैः॥ **6.58.28**॥ 2176

हतवीरौघवप्रां तु भग्नायुधमहाद्रुमाम्।
शोणितौघमहातोयां यमसागरगामिनीम्॥ **6.58.29**॥ 2177

यकृत्प्लीहमहापङ्कां विनिकीर्णान्त्रशैवलाम्।
भिन्नकायशिरोमीनामगावयवशाद्वलाम्॥ **6.58.30**॥ 2178

गृध्रहंसवराकीर्णां कङ्कसारससेविताम्।
मेदःफेनसमाकीर्णामार्तस्तनितनिःस्वनाम्॥ **6.58.31**॥ 2179

तां कापुरुषदुस्तारां युद्धभूमिमयीं नदीम्।
नदीमिव घनापाये हंससारससेविताम्॥ **6.58.32**॥ 2180

राक्षसाः कपिमुख्यास्ते तेरुस्तां दुस्तरां नदीम्।
यथा पद्मरजोध्वस्तां नलिनीं गजयूथपाः॥ **6.58.33**॥ 2181

ततः सृजन्तं बाणौघान् प्रहस्तं स्यन्दने स्थितम्।
ददर्श तरसा नीलो विधमन्तं प्लवङ्गमान्॥ **6.58.34**॥ 2182

उद्धूत इव वायुः खे महदभ्रबलं बलात्।
समीक्ष्याभिद्रुतं युद्धे प्रहस्तो वाहिनीपतिः॥ **6.58.35**॥ 2183

रथेनादित्यवर्णेन नीलमेवाभिदुद्रुवे।
स धनुर्धन्विनां श्रेष्ठो विकृष्य परमाहवे॥ **6.58.36**॥ 2184

नीलाय व्यसृजद् बाणान् प्रहस्तो वाहिनीपतिः।
ते प्राप्य विशिखा नीलं विनिर्भिद्य समाहिताः॥ **6.58.37**॥ 2185

महीं जग्मुर्महावेगा रोषिता इव पन्नगाः।
नीलः शरैरभिहतो निशितैर्ज्वलनोपमैः॥ **6.58.38**॥ 2186

स तं परमदुर्धर्षमापतन्तं महाकपिः।
प्रहस्तं ताडयामास वृक्षमुत्पाट्य वीर्यवान्॥ **6.58.39**॥ 2187

स तेनाभिहतः क्रुद्धो नर्दन् राक्षसपुङ्गवः।
ववर्ष शरवर्षाणि प्लवङ्गानां चमूपतौ॥ **6.58.40**॥ 2188

तस्य बाणगणानेव राक्षसस्य दुरात्मनः।
अपारयन् वारयितुं प्रत्यगृह्णान्निमीलितः।
यथैव गोवृषो वर्षं शारदं शीघ्रमागतम्॥ **6.58.41**॥ 2189

एवमेव प्रहस्तस्य शरवर्षान् दुरासदान्।
निमीलिताक्षः सहसा नीलः सेहे दुरासदान्॥ **6.58.42**॥ 2190

रोषितः शरवर्षेण सालेन महता महान्।
प्रजघान हयान् नीलः प्रहस्तस्य महाबलः॥ **6.58.43**॥ 2191

ततो रोषपरीतात्मा धनुस्तस्य दुरात्मनः।
बभञ्ज तरसा नीलो ननाद च पुनः पुनः॥ **6.58.44**॥ 2192

विधनुः स कृतस्तेन प्रहस्तो वाहिनीपतिः।
प्रगृह्य मुसलं घोरं स्यन्दनादवपुप्लुवे॥ **6.58.45**॥ 2193

तावुभौ वाहिनीमुख्यौ जातवैरौ तरस्विनौ।
स्थितौ क्षतजसिक्ताङ्गौ प्रभिन्नाविव कुञ्जरौ॥ **6.58.46**॥ 2194

उल्लिखन्तौ सुतीक्ष्णाभिर्दंष्ट्राभिरितरेतरम्।
सिंहशार्दूलसदृशौ सिंहशार्दूलचेष्टितौ॥ **6.58.47**॥ 2195

विक्रान्तविजयौ वीरौ समरेष्वनिवर्तिनौ।
काङ्क्षमाणौ यशः प्राप्तुं वृत्रवासवयोरिव॥ **6.58.48**॥ 2196

आजघान तदा नीलं ललाटे मुसलेन सः।
प्रहस्तः परमायत्तस्ततः सुस्राव शोणितम्॥ **6.58.49**॥ 2197

ततः शोणितदिग्धाङ्गः प्रगृह्य च महातरुम्।
प्रहस्तस्योरसि क्रुद्धो विससर्ज महाकपिः॥ **6.58.50**॥ 2198

तमचिन्त्यप्रहारं स प्रगृह्य मुसलं महत्।
अभिदुद्राव बलिनं बलान्नीलं प्लवङ्गमम्॥ **6.58.51**॥ 2199

तमुग्रवेगं संरब्धमापतन्तं महाकपिः।
ततः सम्प्रेक्ष्य जग्राह महावेगो महाशिलाम्॥ **6.58.52**॥ 2200

तस्य युद्धाभिकामस्य मृधे मुसलयोधिनः।
प्रहस्तस्य शिलां नीलो मूर्ध्नि तूर्णमपातयत्॥ **6.58.53**॥ 2201

नीलेन कपिमुख्येन विमुक्ता महती शिला।
बिभेद बहुधा घोरा प्रहस्तस्य शिरस्तदा॥ **6.58.54**॥ 2202

स गतासुर्गतश्रीको गतसत्त्वो गतेन्द्रियः।
पपात सहसा भूमौ छिन्नमूल इव द्रुमः॥ **6.58.55**॥ 2203

विभिन्नशिरसस्तस्य बहु सुस्राव शोणितम्।
शरीरादपि सुस्राव गिरेः प्रस्रवणं यथा॥ **6.58.56**॥ 2204

हते प्रहस्ते नीलेन तदकम्प्यं महाबलम्।
राक्षसानामहृष्टानां लङ्कामभिजगाम ह॥ **6.58.57**॥ 2205

न शेकुः समवस्थातुं निहते वाहिनीपतौ।
सेतुबन्धं समासाद्य विशीर्णं सलिलं यथा॥ **6.58.58**॥ 2206

हते तस्मिंश्चमूमुख्ये राक्षसास्ते निरुद्यमाः।
रक्षःपतिगृहं गत्वा ध्यानमूकत्वमागताः॥ **6.58.59**॥ 2207

प्राप्ताः शोकार्णवं तीव्रं विसंज्ञा इव तेऽभवन्॥ **6.58.60**॥ 2208

ततस्तु नीलो विजयी महाबलः
प्रशस्यमानः सुकृतेन कर्मणा।
समेत्य रामेण सलक्ष्मणेन च
प्रहृष्टरूपस्तु बभूव यूथपः॥ **6.58.61**॥

2209

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टपञ्चाशः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनषष्टितमः सर्गः ॥

प्रहस्तस्य वधेन दुःखितस्य रावणस्य युद्धाय प्रस्थानं तेन सहागतानां वीराणां परिचयो रावणस्य प्रहारेण सुग्रीवस्य मूर्च्छा, लक्ष्मणस्य रणभूमावागमनं हनुमद्रावणयोर्मिथस्तलप्रहारो रावणकर्तृकं नीलस्य विसंज्ञत्वम्, शक्तिप्रहारेण लक्ष्मणस्य मूर्च्छा ससंज्ञता च, श्रीरामात् पराजितस्य रावणस्य लङ्कायां प्रवेशः

तस्मिन् हते राक्षससैन्यपाले
प्लवङ्गमानामृषभेण युद्धे।
भीमायुधं सागरवेगतुल्यं
विदुद्रुवे राक्षसराजसैन्यम् ॥ **6.59.1** ॥ 2210

गत्वा तु रक्षोधिपतेः शशंसुः
सेनापतिं पावकसूनुशस्तम्।
तच्चापि तेषां वचनं निशम्य
रक्षोधिपः क्रोधवशं जगाम ॥ **6.59.2** ॥ 2211

सङ्ख्ये प्रहस्तं निहतं निशम्य
क्रोधार्दितः शोकपरीतचेताः।
उवाच तान् राक्षसयूथमुख्या -
निन्द्रो यथा निर्जरयूथमुख्यान् ॥ **6.59.3** ॥ 2212

नावज्ञा रिपवे कार्या यैरिन्द्रबलसादनः।
सूदितः सैन्यपालो मे सानुयात्रः सकुञ्जरः॥ **6.59.4**॥ 2213

सोऽहं रिपुविनाशाय विजयायाविचारयन्।
स्वयमेव गमिष्यामि रणशीर्षं तदद्भुतम्॥ **6.59.5**॥ 2214

अद्य तद् वानरानीकं रामं च सहलक्ष्मणम्।
निर्दहिष्यामि बाणौघैर्वनं दीप्तैरिवाग्निभिः।
अद्य सन्तर्पयिष्यामि पृथिवीं कपिशोणितैः॥ **6.59.6**॥ 2215

स एवमुक्त्वा ज्वलनप्रकाशं
रथं तुरङ्गोत्तमराजियुक्तम्।
प्रकाशमानं वपुषा ज्वलन्तं
समारुरोहामरराजशत्रुः॥ **6.59.7**॥ 2216

स शङ्खभेरीपणवप्रणादै -
रास्फोटितक्ष्वेडितसिंहनादैः।
पुण्यैः स्तवैश्चापि सुपूज्यमान -
स्तदा ययौ राक्षसराजमुख्यः॥ **6.59.8**॥ 2217

स शैलजीमूतनिकाशरूपै -
र्मांसाशनैः पावकदीप्तनेत्रैः।
बभौ वृतो राक्षसराजमुख्यो
भूतैर्वृतो रुद्र इवामरेशः॥ **6.59.9**॥ 2218

ततो नगर्याः सहसा महौजा
निष्क्रम्य तद् वानरसैन्यमुग्रम्।
महार्णवाभ्रस्तनितं ददर्श
समुद्यतं पादपशैलहस्तम्॥ **6.59.10**॥ 2219

तद् राक्षसानीकमतिप्रचण्ड -
मालोक्य रामो भुजगेन्द्रबाहुः।
विभीषणं शस्त्रभृतां वरिष्ठ -
मुवाच सेनानुगतः पृथुश्रीः॥ **6.59.11**॥ 2220

नानापताकाध्वजछत्रजुष्टं
प्रासासिशूलायुधशस्त्रजुष्टम्।
कस्येदमक्षोभ्यमभीरुजुष्टं
सैन्यं महेन्द्रोपमनागजुष्टम्॥ **6.59.12**॥ 2221

ततस्तु रामस्य निशम्य वाक्यं
विभीषणः शक्रसमानवीर्यः।
शशंस रामस्य बलप्रवेकं
महात्मनां राक्षसपुङ्गवानाम्॥ **6.59.13**॥ 2222

योऽसौ गजस्कन्धगतो महात्मा
नवोदितार्कोपमताम्रवक्त्रः।
सङ्कम्पयन्नागशिरोऽभ्युपैति
ह्यकम्पनं त्वेनमवेहि राजन्॥ **6.59.14**॥ 2223

योऽसौ रथस्थो मृगराजकेतु -
र्धुन्वन् धनुः शक्रधनुःप्रकाशम्।
करीव भात्युग्रविवृत्तदंष्ट्रः
स इन्द्रजिन्नाम वरप्रधानः॥ **6.59.15**॥ 2224

यश्चैष विन्ध्यास्तमहेन्द्रकल्पो
धन्वी रथस्थोऽतिरथोऽतिवीरः।
विस्फारयंश्चापमतुल्यमानं
नाम्नातिकायोऽतिविवृद्धकायः॥ **6.59.16**॥ 2225

योऽसौ नवार्कोदितताम्रचक्षु -
    रारुह्य घण्टानिनदप्रणादम्।
गजं खरं गर्जति वै महात्मा
    महोदरो नाम स एष वीरः॥ **6.59.17**॥ 2226

योऽसौ हयं काञ्चनचित्रभाण्ड -
    मारुह्य सन्ध्याभ्रगिरिप्रकाशम्।
प्रासं समुद्यम्य मरीचिनद्धं
    पिशाच एषोऽशनितुल्यवेगः॥ **6.59.18**॥ 2227

यश्चैष शूलं निशितं प्रगृह्य
    विद्युत्प्रभं किङ्करवज्रवेगम्।
वृषेन्द्रमास्थाय शशिप्रकाश -
    मायाति योऽसौ त्रिशिरा यशस्वी॥ **6.59.19**॥ 2228

असौ च जीमूतनिकाशरूपः
    कुम्भः पृथुव्यूढसुजातवक्षाः।
समाहितः पन्नगराजकेतु -
    र्विस्फारयन् याति धनुर्विधुन्वन्॥ **6.59.20**॥ 2229

यश्चैष जाम्बूनदवज्रजुष्टं
    दीप्तं सधूमं परिघं प्रगृह्य।
आयाति रक्षोबलकेतुभूतो
    योऽसौ निकुम्भोऽद्भुतघोरकर्मा॥ **6.59.21**॥ 2230

यश्चैष चापासिशरौघजुष्टं
    पताकिनं पावकदीप्तरूपम्।
रथं समास्थाय विभात्युदग्रो
    नरान्तकोऽसौ नगशृङ्गयोधी॥ **6.59.22**॥ 2231

यश्चैष नानाविधघोररूपै -
व्याघ्रोष्ट्रनागेन्द्रमृगाश्ववक्त्रैः।
भूतैर्वृतो भाति विवृत्तनेत्रै -
र्योऽसौ सुराणामपि दर्पहन्ता॥ **6.59.23**॥ 2232

यत्रैतदिन्दुप्रतिमं विभाति
च्छत्रं सितं सूक्ष्मशलाकमग्र्यम्।
अत्रैष रक्षोधिपतिर्महात्मा
भूतैर्वृतो रुद्र इवावभाति॥ **6.59.24**॥ 2233

असौ किरीटी चलकुण्डलास्यो
नगेन्द्रविन्ध्योपमभीमकायः।
महेन्द्रवैवस्वतदर्पहन्ता
रक्षोधिपः सूर्य इवावभाति॥ **6.59.25**॥ 2234

प्रत्युवाच ततो रामो विभीषणमरिन्दमः।
अहो दीप्तमहातेजा रावणो राक्षसेश्वरः॥ **6.59.26**॥ 2235

आदित्य इव दुष्प्रेक्ष्यो रश्मिभिर्भाति रावणः।
न व्यक्तं लक्षये ह्यस्य रूपं तेजःसमावृतम्॥ **6.59.27**॥ 2236

देवदानववीराणां वपुर्नैवंविधं भवेत्।
यादृशं राक्षसेन्द्रस्य वपुरेतद् विराजते॥ **6.59.28**॥ 2237

सर्वे पर्वतसङ्काशाः सर्वे पर्वतयोधिनः।
सर्वे दीप्तायुधधरा योधास्तस्य महात्मनः॥ **6.59.29**॥ 2238

विभाति रक्षोराजोऽसौ प्रदीप्तैर्भीमदर्शनैः।
भूतैः परिवृतस्तीक्ष्णैर्देहवद्भिरिवान्तकः॥ **6.59.30**॥ 2239

दिष्ट्यायमद्य पापात्मा मम दृष्टिपथं गतः।
अद्य क्रोधं विमोक्ष्यामि सीताहरणसम्भवम्॥ **6.59.31**॥ 2240

एवमुक्त्वा ततो रामो धनुरादाय वीर्यवान्।
लक्ष्मणानुचरस्तस्थौ समुद्धृत्य शरोत्तमम्॥ **6.59.32**॥ 2241

ततः स रक्षोधिपतिर्महात्मा
रक्षांसि तान्याह महाबलानि।
द्वारेषु चर्यागृहगोपुरेषु
सुनिर्वृतास्तिष्ठत निर्विशङ्काः॥ **6.59.33**॥ 2242

इहागतं मां सहितं भवद्भि -
र्वनौकसश्छिद्रमिदं विदित्वा।
शून्यां पुरी दुष्प्रसहां प्रमथ्य
प्रधर्षयेयुः सहसा समेताः॥ **6.59.34**॥ 2243

विसर्जयित्वा सचिवांस्ततस्तान्
गतेषु रक्षःसु यथानियोगम्।
व्यदारयद् वानरसागरौघं
महाझषः पूर्णमिवार्णवौघम्॥ **6.59.35**॥ 2244

तमापतन्तं सहसा समीक्ष्य
दीप्तेषुचापं युधि राक्षसेन्द्रम्।
महत् समुत्पाट्य महीधराग्रं
दुद्राव रक्षोधिपतिं हरीशः॥ **6.59.36**॥ 2245

तच्छैलशृङ्गं बहुवृक्षसानुं
प्रगृह्य चिक्षेप निशाचराय।
तमापतन्तं सहसा समीक्ष्य
चिच्छेद बाणैस्तपनीयपुङ्खैः॥ **6.59.37**॥ 2246

तस्मिन् प्रवृद्धोत्तमसानुवृक्षे
शृङ्गे विदीर्णे पतिते पृथिव्याम्।
महाहिकल्पं शरमन्तकाभं
समादधे राक्षसलोकनाथः॥ **6.59.38**॥ 2247

स तं गृहीत्वानिलतुल्यवेगं
सविस्फुलिङ्गज्वलनप्रकाशम्।
बाणं महेन्द्राशनितुल्यवेगं
चिक्षेप सुग्रीववधाय रुष्टः॥ **6.59.39**॥ 2248

स सायको रावणबाहुमुक्तः
शक्राशनिप्रख्यवपुःप्रकाशम्।
सुग्रीवमासाद्य बिभेद वेगाद्
गुहेरिता क्रौञ्चमिवोग्रशक्तिः॥ **6.59.40**॥ 2249

स सायकार्तो विपरीतचेताः
कूजन् पृथिव्यां निपपात वीरः।
तं वीक्ष्य भूमौ पतितं विसंज्ञं
नेदुः प्रहृष्टा युधि यातुधानाः॥ **6.59.41**॥ 2250

ततो गवाक्षो गवयः सुषेण -
स्त्वथर्षभो ज्योतिमुखो नलश्च।
शैलान् समुत्पाट्य विवृद्धकायाः
प्रदुद्रुवुस्तं प्रति राक्षसेन्द्रम्॥ **6.59.42**॥ 2251

तेषां प्रहारान् स चकार मोघान्
रक्षोधिपो बाणशतैः शिताग्रैः।
तान् वानरेन्द्रानपि बाणजालै -
र्बिभेद जाम्बूनदचित्रपुङ्खैः॥ **6.59.43**॥ 2252

ते वानरेन्द्रास्त्रिदशारिबाणै -
भिन्ना निपेतुर्भुवि भीमकायाः।
ततस्तु तद् वानरसैन्यमुग्रं
प्रच्छादयामास स बाणजालैः॥ **6.59.44**॥ 2253

ते वध्यमानाः पतिताश्च वीरा
नानद्यमाना भयशल्यविद्धाः।
शाखामृगा रावणसायकार्ता
जग्मुः शरण्यं शरणं स्म रामम्॥ **6.59.45**॥ 2254

ततो महात्मा स धनुर्धनुष्मान्
आदाय रामः सहसा जगाम।
तं लक्ष्मणः प्राञ्जलिरभ्युपेत्य
उवाच रामं परमार्थयुक्तम्॥ **6.59.46**॥ 2255

काममार्य सुपर्याप्तो वधायास्य दुरात्मनः।
विधमिष्याम्यहं चैतमनुजानीहि मां विभो॥ **6.59.47**॥ 2256

तमब्रवीन्महातेजा रामः सत्यपराक्रमः।
गच्छ यत्नपरश्चापि भव लक्ष्मण संयुगे॥ **6.59.48**॥ 2257

रावणो हि महावीर्यो रणेऽद्भुतपराक्रमः।
त्रैलोक्येनापि सङ्क्रुद्धो दुष्प्रसह्यो न संशयः॥ **6.59.49**॥ 2258

तस्यच्छिद्राणि मार्गस्व स्वच्छिद्राणि च लक्षय।
चक्षुषा धनुषाऽऽत्मानं गोपायस्व समाहितः॥ **6.59.50**॥ 2259

राघवस्य वचः श्रुत्वा सम्परिष्वज्य पूज्य च।
अभिवाद्य च रामाय ययौ सौमित्रिराहवे॥ **6.59.51**॥ 2260

स रावणं वारणहस्तबाहुं
ददर्श भीमोद्यतदीप्तचापम्।
प्रच्छादयन्तं शरवृष्टिजालै -
स्तान् वानरान् भिन्नविकीर्णदेहान्॥ **6.59.52**॥ 2261

तमालोक्य महातेजा हनूमान् मारुतात्मजः।
निवार्य शरजालानि विदुद्राव स रावणम्॥ **6.59.53**॥ 2262

रथं तस्य समासाद्य बाहुमुद्यम्य दक्षिणम्।
त्रासयन् रावणं धीमान् हनूमान् वाक्यमब्रवीत्॥ **6.59.54**॥ 2263

देवदानवगन्धर्वैर्यक्षैश्च सह राक्षसैः।
अवध्यत्वं त्वया प्राप्तं वानरेभ्यस्तु ते भयम्॥ **6.59.55**॥ 2264

एष मे दक्षिणो बाहुः पञ्चशाखः समुद्यतः।
विधमिष्यति ते देहे भूतात्मानं चिरोषितम्॥ **6.59.56**॥ 2265

श्रुत्वा हनूमतो वाक्यं रावणो भीमविक्रमः।
संरक्तनयनः क्रोधादिदं वचनमब्रवीत्॥ **6.59.57**॥ 2266

क्षिप्रं प्रहर निःशङ्कं स्थिरां कीर्तिमवाप्नुहि।
ततस्त्वां ज्ञातविक्रान्तं नाशयिष्यामि वानर॥ **6.59.58**॥ 2267

रावणस्य वचः श्रुत्वा वायुसूनुर्वचोऽब्रवीत्।
प्रहृतं हि मया पूर्वमक्षं तव सुतं स्मर॥ **6.59.59**॥ 2268

एवमुक्तो महातेजा रावणो राक्षसेश्वरः।
आजघानानिलसुतं तलेनोरसि वीर्यवान्॥ **6.59.60**॥ 2269

स तलाभिहतस्तेन चचाल च मुहुर्मुहुः।
स्थितो मुहूर्तं तेजस्वी स्थैर्यं कृत्वा महामतिः॥ **6.59.61**॥ 2270

आजघान च सङ्क्रुद्धस्तलेनैवामरद्विषम्।
ततः स तेनाभिहतो वानरेण महात्मना॥ **6.59.62**॥ 2271

दशग्रीवः समाधूतो यथा भूमितलेऽचलः।
सङ्ग्रामे तं तथा दृष्ट्वा रावणं तलताडितम्॥ **6.59.63**॥ 2272

ऋषयो वानराः सिद्धा नेदुर्देवाः सहासुरैः।
अथाश्वस्य महातेजा रावणो वाक्यमब्रवीत्॥ **6.59.64**॥ 2273

साधु वानर वीर्येण श्लाघनीयोऽसि मे रिपुः।
रावणेनैवमुक्तस्तु मारुतिर्वाक्यमब्रवीत्॥ **6.59.65**॥ 2274

धिगस्तु मम वीर्यस्य यत् त्वं जीवसि रावण।
सकृत् तु प्रहरेदानीं दुर्बुद्धे किं विकत्थसे॥ **6.59.66**॥ 2275

ततस्त्वां मामको मुष्टिर्नयिष्यति यमक्षयम्।
ततो मारुतिवाक्येन कोपस्तस्य प्रजज्वले॥ **6.59.67**॥ 2276

संरक्तनयनो यत्नान्मुष्टिमावृत्य दक्षिणम्।
पातयामास वेगेन वानरोरसि वीर्यवान्॥ **6.59.68**॥ 2277

हनूमान् वक्षसि व्यूढे सञ्चचाल पुनः पुनः।
विह्वलं तु तदा दृष्ट्वा हनूमन्तं महाबलम्॥ **6.59.69**॥ 2278

रथेनातिरथः शीघ्रं नीलं प्रति समभ्यगात्।
राक्षसानामधिपतिर्दशग्रीवः प्रतापवान्॥ **6.59.70**॥ 2279

पन्नगप्रतिमैर्भीमैः परमर्माभिभेदनैः।
शरैरादीपयामास नीलं हरिचमूपतिम्॥ **6.59.71**॥ 2280

स शरौघसमायस्तो नीलो हरिचमूपतिः।
करेणैकेन शैलाग्रं रक्षोधिपतयेऽसृजत्॥ **6.59.72**॥ 2281

हनूमानपि तेजस्वी समाश्वस्तो महामनाः।
विप्रेक्षमाणो युद्धेप्सुः सरोषमिदमब्रवीत्॥ **6.59.73**॥ 2282

नीलेन सह संयुक्तं रावणं राक्षसेश्वरम्।
अन्येन युध्यमानस्य न युक्तमभिधावनम्॥ **6.59.74**॥ 2283

रावणोऽथ महातेजास्तं शृङ्गं सप्तभिः शरैः।
आजघान सुतीक्ष्णाग्रैस्तद् विकीर्णं पपात ह॥ **6.59.75**॥ 2284

तद् विकीर्णं गिरेः शृङ्गं दृष्ट्वा हरिचमूपतिः।
कालाग्निरिव जज्वाल कोपेन परवीरहा॥ **6.59.76**॥ 2285

सोऽश्वकर्णद्रुमाञ्शालांश्चूतांश्चापि सुपुष्पितान्।
अन्यांश्च विविधान् वृक्षान् नीलश्चिक्षेप संयुगे॥ **6.59.77**॥ 2286

स तान् वृक्षान् समासाद्य प्रतिचिच्छेद रावणः।
अभ्यवर्षच्च घोरेण शरवर्षेण पावकिम्॥ **6.59.78**॥ 2287

अभिवृष्टः शरौघेण मेघेनेव महाचलः।
ह्रस्वं कृत्वा ततो रूपं ध्वजाग्रे निपपात ह॥ **6.59.79**॥ 2288

पावकात्मजमालोक्य ध्वजाग्रे समवस्थितम्।
जज्वाल रावणः क्रोधात् ततो नीलो ननाद च॥ **6.59.80**॥ 2289

ध्वजाग्रे धनुषश्चाग्रे किरीटाग्रे च तं हरिम्।
लक्ष्मणोऽथ हनूमांश्च रामश्चापि सुविस्मिताः॥ **6.59.81**॥ 2290

रावणोऽपि महातेजाः कपिलाघवविस्मितः।
अस्त्रमाहारयामास दीप्तमाग्नेयमद्भुतम्॥ **6.59.82**॥ 2291

ततस्ते चुक्रुशुर्हृष्टा लब्धलक्षाः प्लवङ्गमाः।
नीललाघवसभ्रान्तं दृष्ट्वा रावणमाहवे॥ **6.59.83**॥ 2292

वानराणां च नादेन संरब्धो रावणस्तदा।
सभ्रमाविष्टहृदयो न किञ्चित् प्रत्यपद्यत॥ **6.59.84**॥ 2293

आग्नेयेनापि संयुक्तं गृहीत्वा रावणः शरम्।
ध्वजशीर्षस्थितं नीलमुदैक्षत निशाचरः॥ **6.59.85**॥ 2294

ततोऽब्रवीन्महातेजा रावणो राक्षसेश्वरः।
कपे लाघवयुक्तोऽसि मायया परया सह॥ **6.59.86**॥ 2295

जीवितं खलु रक्षस्व यदि शक्तोऽसि वानर।
तानि तान्यात्मरूपाणि सृजसि त्वमनेकशः॥ **6.59.87**॥ 2296

तथापि त्वां मया मुक्तः सायकोऽस्त्रप्रयोजितः।
जीवितं परिरक्षन्तं जीविताद् भ्रंशयिष्यति॥ **6.59.88**॥ 2297

एवमुक्त्वा महाबाहू रावणो राक्षसेश्वरः।
सन्धाय बाणमस्त्रेण चमूपतिमताडयत्॥ **6.59.89**॥ 2298

सोऽस्त्रमुक्तेन बाणेन नीलो वक्षसि ताडितः।
निर्दह्यमानः सहसा स पपात महीतले॥ **6.59.90**॥ 2299

पितृमाहात्म्यसंयोगादात्मनश्चापि तेजसा।
जानुभ्यामपतद् भूमौ न तु प्राणैर्वियुज्यत॥ **6.59.91**॥ 2300

विसंज्ञं वानरं दृष्ट्वा दशग्रीवो रणोत्सुकः।
रथेनाम्बुदनादेन सौमित्रिमभिदुद्रुवे॥ **6.59.92**॥ 2301

आसाद्य रणमध्ये तं वारयित्वा स्थितो ज्वलन्।
धनुर्विस्फारयामास राक्षसेन्द्रः प्रतापवान्॥ **6.59.93**॥ 2302

तमाह सौमित्रिरदीनसत्त्वो
विस्फारयन्तं धनुरप्रमेयम्।

अवेहि मामद्य निशाचरेन्द्र
न वानरांस्त्वं प्रतियोद्धुमर्हः ॥ **6.59.94** ॥ 2303

स तस्य वाक्यं प्रतिपूर्णघोषं
ज्याशब्दमुग्रं च निशम्य राजा।
आसाद्य सौमित्रिमुपस्थितं तं
रोषान्वितं वाचमुवाच रक्षः ॥ **6.59.95** ॥ 2304

दिष्ट्यासि मे राघव दृष्टिमार्गं
प्राप्तोऽन्तगामी विपरीतबुद्धिः।
अस्मिन् क्षणे यास्यसि मृत्युलोकं
संसाद्यमानो मम बाणजालैः ॥ **6.59.96** ॥ 2305

तमाह सौमित्रिरविस्मयानो
गर्जन्तमुद्वृत्तशिताग्रदंष्ट्रम्।
राजन् न गर्जन्ति महाप्रभावा
विकत्थसे पापकृतां वरिष्ठ ॥ **6.59.97** ॥ 2306

जानामि वीर्यं तव राक्षसेन्द्र
बलं प्रतापं च पराक्रमं च।
अवस्थितोऽहं शरचापपाणि -
रागच्छ किं मोघविकत्थनेन ॥ **6.59.98** ॥ 2307

स एवमुक्तः कुपितः ससर्ज
रक्षोधिपः सप्त शरान् सुपुङ्खान्।
तान् लक्ष्मणः काञ्चनचित्रपुङ्खै -
श्चिच्छेद बाणैर्निशिताग्रधारैः ॥ **6.59.99** ॥ 2308

तान् प्रेक्षमाणः सहसा निकृत्तान्
निकृत्तभोगानिव पन्नगेन्द्रान्।

लङ्केश्वरः क्रोधवशं जगाम
ससर्ज चान्यान् निशितान् पृषत्कान्॥ **6.59.100**॥ 2309

स बाणवर्षं तु ववर्ष तीव्रं
रामानुजः कार्मुकसम्प्रयुक्तम्।
क्षुरार्धचन्द्रोत्तमकर्णिभल्लैः
शरांश्च चिच्छेद न चुक्षुभे च॥ **6.59.101**॥ 2310

स बाणजालान्यपि तानि तानि
मोघानि पश्यंस्त्रिदशारिराजः।
विसिस्मिये लक्ष्मणलाघवेन
पुनश्च बाणान् निशितान् मुमोच॥ **6.59.102**॥ 2311

स लक्ष्मणश्चापि शिताञ्शिताग्रान्
महेन्द्रतुल्योऽशनिभीमवेगान्।
सन्धाय चापे ज्वलनप्रकाशान्
ससर्ज रक्षोधिपतेर्वधाय॥ **6.59.103**॥ 2312

स तान् प्रचिच्छेद हि राक्षसेन्द्रः
शिताञ्शरांल्लक्ष्मणमाजघान।
शरेण कालाग्निसमप्रभेण
स्वयम्भुदत्तेन ललाटदेशे॥ **6.59.104**॥ 2313

स लक्ष्मणो रावणसायकार्त -
श्चचाल चापं शिथिलं प्रगृह्य।
पुनश्च संज्ञां प्रतिलभ्य कृच्छ्रा -
च्चिच्छेद चापं त्रिदशेन्द्रशत्रोः॥ **6.59.105**॥ 2314

निकृत्तचापं त्रिभिराजघान
बाणैस्तदा दाशरथिः शिताग्रैः।

स सायकार्तो विचचाल राजा
कृच्छ्राच्च संज्ञां पुनराससाद ॥ **6.59.106** ॥ 2315

स कृत्तचापः शरताडितश्च
मेदार्द्रगात्रो रुधिरावसिक्तः।
जग्राह शक्तिं स्वयमुग्रशक्तिः
स्वयम्भुदत्तां युधि देवशत्रुः ॥ **6.59.107** ॥ 2316

स तां सधूमानलसन्निकाशां
वित्रासनां संयति वानराणाम्।
चिक्षेप शक्तिं तरसा ज्वलन्तीं
सौमित्रये राक्षसराष्ट्रनाथः ॥ **6.59.108** ॥ 2317

तामापतन्तीं भरतानुजोऽस्त्रै -
र्जघान बाणैश्च हुताग्निकल्पैः।
तथापि सा तस्य विवेश शक्ति -
र्भुजान्तरं दाशरथेर्विशालम् ॥ **6.59.109** ॥ 2318

स शक्तिमाञ्शक्तिसमाहतः सन्
जज्वाल भूमौ स रघुप्रवीरः।
तं विह्वलन्तं सहसाभ्युपेत्य
जग्राह राजा तरसा भुजाभ्याम् ॥ **6.59.110** ॥ 2319

हिमवान् मन्दरो मेरुस्त्रैलोक्यं वा सहामरैः।
शक्यं भुजाभ्यामुद्धर्तुं न शक्यो भरतानुजः ॥ **6.59.111** ॥ 2320

शक्त्या ब्राह्म्या तु सौमित्रिस्ताडितोऽपि स्तनान्तरे।
विष्णोरमीमांस्यभागमात्मानं प्रत्यनुस्मरत् ॥ **6.59.112** ॥ 2321

ततो दानवदर्पघ्नं सौमित्रिं देवकण्टकः।
तं पीडयित्वा बाहुभ्यां न प्रभुर्लङ्घनेऽभवत्॥ **6.59.113**॥ 2322

ततः क्रुद्धो वायुसुतो रावणं समभिद्रवत्।
आजघानोरसि क्रुद्धो वज्रकल्पेन मुष्टिना॥ **6.59.114**॥ 2323

तेन मुष्टिप्रहारेण रावणो राक्षसेश्वरः।
जानुभ्यामगमद् भूमौ चचाल च पपात च॥ **6.59.115**॥ 2324

आस्यैश्च नेत्रैः श्रवणैः पपात रुधिरं बहु।
विघूर्णमानो निश्चेष्टो रथोपस्थ उपाविशत्॥ **6.59.116**॥ 2325

विसंज्ञो मूर्च्छितश्चासीन्न च स्थानं समालभत्।
विसंज्ञं रावणं दृष्ट्वा समरे भीमविक्रमम्॥ **6.59.117**॥ 2326

ऋषयो वानराश्चैव नेदुर्देवाश्च सासुराः।
हनूमानथ तेजस्वी लक्ष्मणं रावणार्दितम्॥ **6.59.118**॥ 2327

आनयद् राघवाभ्याशं बाहुभ्यां परिगृह्य तम्।
वायुसूनोः सुहृत्त्वेन भक्त्या परमया च सः।
शत्रूणामप्यकम्प्योऽपि लघुत्वमगमत् कपेः॥ **6.59.119**॥ 2328

तं समुत्सृज्य सा शक्तिः सौमित्रिं युधि निर्जितम्।
रावणस्य रथे तस्मिन् स्थानं पुनरुपागमत्॥ **6.59.120**॥ 2329

रावणोऽपि महातेजाः प्राप्य संज्ञां महाहवे।
आददे निशितान् बाणाञ्जग्राह च महद्धनुः॥ **6.59.121**॥ 2330

आश्वस्तश्च विशल्यश्च लक्ष्मणः शत्रुसूदनः।
विष्णोर्भागममीमांस्यमात्मानं प्रत्यनुस्मरन्॥ **6.59.122**॥ 2331

निपातितमहावीरां वानराणां महाचमूम्।
राघवस्तु रणे दृष्ट्वा रावणं समभिद्रवत्॥ **6.59.123**॥ 2332

अथैनमनुसङ्क्रम्य हनूमान् वाक्यमब्रवीत्।
मम पृष्ठं समारुह्य राक्षसं शास्तुमर्हसि॥ **6.59.124**॥ 2333

विष्णुर्यथा गरुत्मन्तमारुह्यामरवैरिणम्।
तच्छ्रुत्वा राघवो वाक्यं वायुपुत्रेण भाषितम्॥ **6.59.125**॥ 2334

अथारुरोह सहसा हनूमन्तं महाकपिम्।
रथस्थं रावणं सङ्ख्ये ददर्श मनुजाधिपः॥ **6.59.126**॥ 2335

तमालोक्य महातेजाः प्रदुद्राव स रावणम्।
वैरोचनमिव क्रुद्धो विष्णुरभ्युद्यतायुधः॥ **6.59.127**॥ 2336

ज्याशब्दमकरोत् तीव्रं वज्रनिष्पेषनिष्ठुरम्।
गिरा गम्भीरया रामो राक्षसेन्द्रमुवाच ह॥ **6.59.128**॥ 2337

तिष्ठ तिष्ठ मम त्वं हि कृत्वा विप्रियमीदृशम्।
क्व नु राक्षसशार्दूल गत्वा मोक्षमवाप्स्यसि॥ **6.59.129**॥ 2338

यदीन्द्रवैवस्वतभास्करान् वा
स्वयम्भुवैश्वानरशङ्करान् वा।
गमिष्यसि त्वं दश वा दिशोऽथवा
तथापि मे नाद्य गतो विमोक्ष्यसे॥ **6.59.130**॥ 2339

यश्चैष शक्त्या निहतस्त्वयाद्य
गच्छन् विषादं सहसाभ्युपेत्य।
स एष रक्षोगणराज मृत्युः
सपुत्रपौत्रस्य तवाद्य युद्धे॥ **6.59.131**॥ 2340

एतेन चात्यद्भुतदर्शनानि
शरैर्जनस्थानकृतालयानि।
चतुर्दशान्यात्तवरायुधानि
रक्षःसहस्राणि निषूदितानि॥ **6.59.132**॥ 2341

राघवस्य वचः श्रुत्वा राक्षसेन्द्रो महाबलः।
वायुपुत्रं महावेगं वहन्तं राघवं रणे॥ **6.59.133**॥ 2342

रोषेण महताऽऽविष्टः पूर्ववैरमनुस्मरन्।
आजघान शरैर्दीप्तैः कालानलशिखोपमैः॥ **6.59.134**॥ 2343

राक्षसेनाहवे तस्य ताडितस्यापि सायकैः।
स्वभावतेजोयुक्तस्य भूयस्तेजोऽभ्यवर्धत॥ **6.59.135**॥ 2344

ततो रामो महातेजा रावणेन कृतव्रणम्।
दृष्ट्वा प्लवगशार्दूलं क्रोधस्य वशमेयिवान्॥ **6.59.136**॥ 2345

तस्याभिसङ्क्रम्य रथं सचक्रं
साश्वध्वजच्छत्रमहापताकम्।
ससारथिं साशनिशूलखड्गं
रामः प्रचिच्छेद शितैः शराग्रैः॥ **6.59.137**॥ 2346

अथेन्द्रशत्रुं तरसा जघान
बाणेन वज्राशनिसन्निभेन।
भुजान्तरे व्यूढसुजातरूपे
वज्रेण मेरुं भगवानिवेन्द्रः॥ **6.59.138**॥ 2347

यो वज्रपाताशनिसन्निपाता -
न्न चुक्षुभे नापि चचाल राजा।

स रामबाणाभिहतो भृशार्त -
श्चचाल चापं च मुमोच वीरः॥ **6.59.139**॥ 2348

तं विह्वलन्तं प्रसमीक्ष्य रामः
समाददे दीप्तमथार्धचन्द्रम्।
तेनार्कवर्णं सहसा किरीटं
चिच्छेद रक्षोधिपतेर्महात्मा॥ **6.59.140**॥ 2349

तं निर्विषाशीविषसन्निकाशं
शान्तार्चिषं सूर्यमिवाप्रकाशम्।
गतश्रियं कृत्तकिरीटकूट -
मुवाच रामो युधि राक्षसेन्द्रम्॥ **6.59.141**॥ 2350

कृतं त्वया कर्म महत् सुभीमं
हतप्रवीरश्च कृतस्त्वयाहम्।
तस्मात् परिश्रान्त इति व्यवस्य
न त्वां शरैर्मृत्युवशं नयामि॥ **6.59.142**॥ 2351

प्रयाहि जानामि रणार्दितस्त्वं
प्रविश्य रात्रिञ्चरराज लङ्काम्।
आश्वस्य निर्याहि रथी च धन्वी
तदा बलं प्रेक्ष्यसि मे रथस्थः॥ **6.59.143**॥ 2352

स एवमुक्तो हतदर्पहर्षो
निकृत्तचापः स हताश्वसूतः।
शरार्दितो भग्नमहाकिरीटो
विवेश लङ्कां सहसा स्म राजा॥ **6.59.144**॥ 2353

तस्मिन् प्रविष्टे रजनीचरेन्द्रे
महाबले दानवदेवशत्रौ।

हरीन् विशल्यान् सह लक्ष्मणेन
चकार रामः परमाहवाग्रे ॥ **6.59.145** ॥ 2354

तस्मिन् प्रभग्ने त्रिदशेन्द्रशत्रौ
सुरासुरा भूतगणा दिशश्च।
ससागराः सर्षिमहोरगाश्च
तथैव भूम्यम्बुचराः प्रहृष्टाः ॥ **6.59.146** ॥ 2355

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनषष्टितमः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षष्टितमः सर्गः ॥

स्वपराजयेन विषण्णस्य रावणस्यादेशेन सुप्तस्य कुम्भकर्णस्य प्रबोधनं तं दृष्ट्वा वानराणां भयं च

स प्रविश्य पुरीं लङ्कां रामबाणभयार्दितः।
भग्नदर्पस्तदा राजा बभूव व्यथितेन्द्रियः॥ **6.60.1** ॥ 2356

मातङ्ग इव सिंहेन गरुडेनेव पन्नगः।
अभिभूतोऽभवद् राजा राघवेण महात्मना॥ **6.60.2** ॥ 2357

ब्रह्मदण्डप्रतीकानां विद्युच्चलितवर्चसाम्।
स्मरन् राघवबाणानां विव्यथे राक्षसेश्वरः॥ **6.60.3** ॥ 2358

स काञ्चनमयं दिव्यमाश्रित्य परमासनम्।
विप्रेक्षमाणो रक्षांसि रावणो वाक्यमब्रवीत्॥ **6.60.4** ॥ 2359

सर्वं तत् खलु मे मोघं यत् तप्तं परमं तपः।
यत् समानो महेन्द्रेण मानुषेण विनिर्जितः॥ **6.60.5** ॥ 2360

इदं तद् ब्रह्मणो घोरं वाक्यं मामभ्युपस्थितम्।
मानुषेभ्यो विजानीहि भयं त्वमिति तत्तथा॥ **6.60.6** ॥ 2361

देवदानवगन्धर्वैर्यक्षराक्षसपन्नगैः।
अवध्यत्वं मया प्रोक्तं मानुषेभ्यो न याचितम्॥ **6.60.7** ॥ 2362

तमिमं मानुषं मन्ये रामं दशरथात्मजम्।
इक्ष्वाकुकुलजातेन अनरण्येन यत् पुरा॥ **6.60.8**॥ 2363

उत्पत्स्यति हि मद्वंशपुरुषो राक्षसाधम।
यस्त्वां सपुत्रं सामात्यं सबलं साश्वसारथिम्॥ **6.60.9**॥ 2364

निहनिष्यति सङ्ग्रामे त्वां कुलाधम दुर्मते।
शप्तोऽहं वेदवत्या च यथा सा धर्षिता पुरा॥ **6.60.10**॥ 2365

सेयं सीता महाभागा जाता जनकनन्दिनी।
उमा नन्दीश्वरश्चापि रम्भा वरुणकन्यका॥ **6.60.11**॥ 2366

यथोक्तास्तन्मया प्राप्तं न मिथ्या ऋषिभाषितम्।
एतदेव समागम्य यत्नं कर्तुमिहार्हथ॥ **6.60.12**॥ 2367

राक्षसाश्चापि तिष्ठन्तु चर्यागोपुरमूर्धसु।
स चाप्रतिमगाम्भीर्यो देवदानवदर्पहा॥ **6.60.13**॥ 2368

ब्रह्मशापाभिभूतस्तु कुम्भकर्णो विबोध्यताम्।
समरे जितमात्मानं प्रहस्तं च निषूदितम्॥ **6.60.14**॥ 2369

ज्ञात्वा रक्षोबलं भीममादिदेश महाबलः।
द्वारेषु यत्नः क्रियतां प्राकारश्चाधिरुह्यताम्॥ **6.60.15**॥ 2370

निद्रावशसमाविष्टः कुम्भकर्णो विबोध्यताम्।
सुखं स्वपिति निश्चिन्तः कामोपहतचेतनः॥ **6.60.16**॥ 2371

नव सप्त दशाष्टौ च मासान् स्वपिति राक्षसः।
मन्त्रं कृत्वा प्रसुप्तोऽयमितस्तु नवमेऽहनि॥ **6.60.17**॥ 2372

तं तु बोधयत क्षिप्रं कुम्भकर्णं महाबलम्।
स हि सङ्ख्ये महाबाहुः ककुदं सर्वरक्षसाम्।
वानरान् राजपुत्रौ च क्षिप्रमेव हनिष्यति॥ **6.60.18**॥ 2373

एष केतुः परं सङ्ख्ये मुख्यो वै सर्वरक्षसाम्।
कुम्भकर्णः सदा शेते मूढो ग्राम्यसुखे रतः॥ **6.60.19**॥ 2374

रामेणाभिनिरस्तस्य सङ्ग्रामेऽस्मिन् सुदारुणे।
भविष्यति न मे शोकः कुम्भकर्णे विबोधिते॥ **6.60.20**॥ 2375

किं करिष्याम्यहं तेन शक्रतुल्यबलेन हि।
ईदृशे व्यसने घोरे यो न साह्याय कल्पते॥ **6.60.21**॥ 2376

ते तु तद् वचनं श्रुत्वा राक्षसेन्द्रस्य राक्षसाः।
जग्मुः परमसम्भ्रान्ताः कुम्भकर्णनिवेशनम्॥ **6.60.22**॥ 2377

ते रावणसमादिष्टा मांसशोणितभोजनाः।
गन्धं माल्यं महद्भक्ष्यमादाय सहसा ययुः॥ **6.60.23**॥ 2378

तां प्रविश्य महाद्वारां सर्वतो योजनायताम्।
कुम्भकर्णगुहां रम्यां पुष्पगन्धप्रवाहिनीम्॥ **6.60.24**॥ 2379

कुम्भकर्णस्य निःश्वासादवधूता महाबलाः।
प्रतिष्ठमानाः कृच्छ्रेण यत्नात् प्रविविशुर्गुहाम्॥ **6.60.25**॥ 2380

तां प्रविश्य गुहां रम्यां रत्नकाञ्चनकुट्टिमाम्।
ददृशुर्नैर्ऋतव्याघ्राः शयानं भीमविक्रमम्॥ **6.60.26**॥ 2381

ते तु तं विकृतं सुप्तं विकीर्णमिव पर्वतम्।
कुम्भकर्णं महानिद्रं समेताः प्रत्यबोधयन्॥ **6.60.27**॥ 2382

ऊर्ध्वलोमाञ्चिततनुं श्वसन्तमिव पन्नगम्।
भ्रामयन्तं विनिःश्वासैः शयानं भीमविक्रमम्॥ **6.60.28**॥ 2383

भीमनासापुटं तं तु पातालविपुलाननम्।
शयने न्यस्तसर्वाङ्गं मेदोरुधिरगन्धिनम्॥ **6.60.29**॥ 2384

काञ्चनाङ्गदनद्धाङ्गं किरीटेनार्कवर्चसम्।
ददृशुर्नैर्ऋतव्याघ्रं कुम्भकर्णमरिन्दमम्॥ **6.60.30**॥ 2385

ततश्चक्रुर्महात्मानः कुम्भकर्णस्य चाग्रतः।
भूतानां मेरुसङ्काशं राशिं परमतर्पणम्॥ **6.60.31**॥ 2386

मृगाणां महिषाणां च वराहाणां च सञ्चयान्।
चक्रुर्नैर्ऋतशार्दूला राशिमन्नस्य चाद्भुतम्॥ **6.60.32**॥ 2387

ततः शोणितकुम्भांश्च मांसानि विविधानि च।
पुरस्तात् कुम्भकर्णस्य चक्रुस्त्रिदशशत्रवः॥ **6.60.33**॥ 2388

लिलिपुश्च परार्ध्येन चन्दनेन परन्तपम्।
दिव्यैराश्वासयामासुर्माल्यैर्गन्धैश्च गन्धिभिः॥ **6.60.34**॥ 2389

धूपगन्धांश्च ससृजुस्तुष्टुवुश्च परन्तपम्।
जलदा इव चानेदुर्यातुधानास्ततस्ततः॥ **6.60.35**॥ 2390

शङ्खांश्च पूरयामासुः शशाङ्कसदृशप्रभान्।
तुमुलं युगपच्चापि विनेदुश्चाप्यमर्षिताः॥ **6.60.36**॥ 2391

नेदुरास्फोटयामासुश्चिक्षिपुस्ते निशाचराः।
कुम्भकर्णविबोधार्थं चक्रुस्ते विपुलं स्वरम्॥ **6.60.37**॥ 2392

सशङ्खभेरीपणवप्रणादं
सास्फोटितक्ष्वेलितसिंहनादम्।

दिशो द्रवन्तस्त्रिदिवं किरन्तः
श्रुत्वा विहङ्गाः सहसा निपेतुः ॥ **6.60.38** ॥ 2393

यदा भृशं तैर्निनदैर्महात्मा
न कुम्भकर्णो बुबुधे प्रसुप्तः।
ततो भुशुण्डीर्मुसलानि सर्वे
रक्षोगणास्ते जगृहुर्गदाश्च ॥ **6.60.39** ॥ 2394

तं शैलशृङ्गैर्मुसलैर्गदाभि -
र्वक्षःस्थले मुद्गरमुष्टिभिश्च।
सुखप्रसुप्तं भुवि कुम्भकर्णं
रक्षास्युदग्राणि तदा निजघ्नुः ॥ **6.60.40** ॥ 2395

तस्य निःश्वासवातेन कुम्भकर्णस्य रक्षसः।
राक्षसाः कुम्भकर्णस्य स्थातुं शेकुर्न चाग्रतः ॥ **6.60.41** ॥ 2396

ततः परिहिता गाढं राक्षसा भीमविक्रमाः।
मृदङ्गपणवान् भेरीः शङ्खकुम्भगणांस्तथा ॥ **6.60.42** ॥ 2397

दश राक्षससाहस्रं युगपत्पर्यवारयत्।
नीलाञ्जनचयाकारं ते तु तं प्रत्यबोधयन् ॥ **6.60.43** ॥ 2398

अभिघ्नन्तो नदन्तश्च न च सम्बुबुधे तदा।
यदा चैनं न शेकुस्ते प्रतिबोधयितुं तदा ॥ **6.60.44** ॥ 2399

ततो गुरुतरं यत्नं दारुणं समुपाक्रमन्।
अश्वानुष्ट्रान् खरान् नागाञ्जघ्नुर्दण्डकशाङ्कुशैः ॥ **6.60.45** ॥ 2400

भेरीशङ्खमृदङ्गांश्च सर्वप्राणैरवादयन्।
निजघ्नुश्चास्य गात्राणि महाकाष्ठकटङ्करैः ॥ **6.60.46** ॥ 2401

मुद्गरैर्मुसलैश्चापि सर्वप्राणसमुद्यतैः।
तेन नादेन महता लङ्का सर्वा प्रपूरिता।
सपर्वतवना सर्वा सोऽपि नैव प्रबुध्यते॥ **6.60.47**॥ 2402

ततो भेरीसहस्रं तु युगपत् समहन्यत।
मृष्टकाञ्चनकोणानामसक्तानां समन्ततः॥ **6.60.48**॥ 2403

एवमप्यतिनिद्रस्तु यदा नैव प्रबुध्यते।
शापस्य वशमापन्नस्ततः क्रुद्धा निशाचराः॥ **6.60.49**॥ 2404

ततः कोपसमाविष्टाः सर्वे भीमपराक्रमाः।
तद् रक्षो बोधयिष्यन्तश्चक्रुरन्ये पराक्रमम्॥ **6.60.50**॥ 2405

अन्ये भेरीः समाजघ्नुरन्ये चक्रुर्महास्वनम्।
केशानन्ये प्रलुलुपुः कर्णानन्ये दशन्ति च॥ **6.60.51**॥ 2406

उदकुम्भशतानन्ये समसिञ्चन्त कर्णयोः।
न कुम्भकर्णः पस्पन्दे महानिद्रावशं गतः॥ **6.60.52**॥ 2407

अन्ये च बलिनस्तस्य कूटमुद्गरपाणयः।
मूर्ध्नि वक्षसि गात्रेषु पातयन् कूटमुद्गरान्॥ **6.60.53**॥ 2408

रज्जुबन्धनबद्धाभिः शतघ्नीभिश्च सर्वतः।
वध्यमानो महाकायो न प्राबुध्यत राक्षसः॥ **6.60.54**॥ 2409

वारणानां सहस्रं च शरीरेऽस्य प्रधावितम्।
कुम्भकर्णस्तदा बुद्ध्वा स्पर्शं परमबुध्यत॥ **6.60.55**॥ 2410

स पात्यमानैर्गिरिशृङ्गवृक्षै -
रचिन्तयंस्तान् विपुलान् प्रहारान्।

निद्राक्षयात् क्षुद्भयपीडितश्च
विजृम्भमाणः सहसोत्पपात ॥ **6.60.56** ॥ 2411

स नागभोगाचलशृङ्गकल्पौ
विक्षिप्य बाहू जितवज्रसारौ।
विवृत्य वक्त्रं वडवामुखाभं
निशाचरोऽसौ विकृतं जजृम्भे ॥ **6.60.57** ॥ 2412

तस्य जाजृम्भमाणस्य वक्त्रं पातालसन्निभम्।
ददृशे मेरुशृङ्गाग्रे दिवाकर इवोदितः ॥ **6.60.58** ॥ 2413

स जृम्भमाणोऽतिबलः प्रबुद्धस्तु निशाचरः।
निःश्वासश्चास्य सञ्जज्ञे पर्वतादिव मारुतः ॥ **6.60.59** ॥ 2414

रूपमुत्तिष्ठतस्तस्य कुम्भकर्णस्य तद् बभौ।
युगान्ते सर्वभूतानि कालस्येव दिधक्षतः ॥ **6.60.60** ॥ 2415

तस्य दीप्ताग्निसदृशे विद्युत्सदृशवर्चसी।
ददृशाते महानेत्रे दीप्ताविव महाग्रहौ ॥ **6.60.61** ॥ 2416

ततस्त्वदर्शयन् सर्वान् भक्ष्यांश्च विविधान् बहून्।
वराहान् महिषांश्चैव बभक्ष स महाबलः ॥ **6.60.62** ॥ 2417

आदद् बुभुक्षितो मांसं शोणितं तृषितोऽपिबत्।
मेदःकुम्भांश्च मद्यांश्च पपौ शक्ररिपुस्तदा ॥ **6.60.63** ॥ 2418

ततस्तृप्त इति ज्ञात्वा समुत्पेतुर्निशाचराः।
शिरोभिश्च प्रणम्यैनं सर्वतः पर्यवारयन् ॥ **6.60.64** ॥ 2419

निद्राविशदनेत्रस्तु कलुषीकृतलोचनः।
चारयन् सर्वतो दृष्टिं तान् ददर्श निशाचरान् ॥ **6.60.65** ॥ 2420

स सर्वान् सान्त्वयामास नैर्ऋतान् नैर्ऋतर्षभः।
बोधनाद् विस्मितश्चापि राक्षसानिदमब्रवीत्॥ **6.60.66**॥ 2421

किमर्थमहमादृत्य भवद्भिः प्रतिबोधितः।
कच्चित् सुकुशलं राज्ञो भयं वा नेह किञ्चन॥ **6.60.67**॥ 2422

अथवा ध्रुवमन्येभ्यो भयं परमुपस्थितम्।
यदर्थमेव त्वरितैर्भवद्भिः प्रतिबोधितः॥ **6.60.68**॥ 2423

अद्य राक्षसराजस्य भयमुत्पाटयाम्यहम्।
दारयिष्ये महेन्द्रं वा शीतयिष्ये तथानलम्॥ **6.60.69**॥ 2424

न ह्यल्पकारणे सुप्तं बोधयिष्यति मादृशम्।
तदाख्यातार्थतत्त्वेन मत्प्रबोधनकारणम्॥ **6.60.70**॥ 2425

एवं ब्रुवाणं संरब्धं कुम्भकर्णमरिन्दमम्।
यूपाक्षः सचिवो राज्ञः कृताञ्जलिरभाषत॥ **6.60.71**॥ 2426

न नो देवकृतं किञ्चिद् भयमस्ति कदाचन।
मानुषान्नो भयं राजंस्तुमुलं सम्प्रबाधते॥ **6.60.72**॥ 2427

न दैत्यदानवेभ्यो वा भयमस्ति न नः क्वचित्।
यादृशं मानुषं राजन् भयमस्मानुपस्थितम्॥ **6.60.73**॥ 2428

वानरैः पर्वताकारैर्लङ्केयं परिवारिता।
सीताहरणसन्तप्ताद् रामान्नस्तुमुलं भयम्॥ **6.60.74**॥ 2429

एकेन वानरेणेयं पूर्वं दग्धा महापुरी।
कुमारो निहतश्चाक्षः सानुयात्रः सकुञ्जरः॥ **6.60.75**॥ 2430

स्वयं रक्षोधिपश्चापि पौलस्त्यो देवकण्टकः।
व्रजेति संयुगे मुक्तो रामेणादित्यवर्चसा॥ **6.60.76**॥ 2431

यन्न देवैः कृतो राजा नापि दैत्यैर्न दानवैः।
कृतः स इह रामेण विमुक्तः प्राणसंशयात्॥ **6.60.77**॥ 2432

स यूपाक्षवचः श्रुत्वा भ्रातुर्युधि पराभवम्।
कुम्भकर्णो विवृत्ताक्षो यूपाक्षमिदमब्रवीत्॥ **6.60.78**॥ 2433

सर्वमद्यैव यूपाक्ष हरिसैन्यं सलक्ष्मणम्।
राघवं च रणे जित्वा ततो द्रक्ष्यामि रावणम्॥ **6.60.79**॥ 2434

राक्षसांस्तर्पयिष्यामि हरीणां मांसशोणितैः।
रामलक्ष्मणयोश्चापि स्वयं पास्यामि शोणितम्॥ **6.60.80**॥ 2435

तत् तस्य वाक्यं ब्रुवतो निशम्य
सगर्वितं रोषविवृद्धदोषम्।
महोदरो नैर्ऋतयोधमुख्यः
कृताञ्जलिर्वाक्यमिदं बभाषे॥ **6.60.81**॥ 2436

रावणस्य वचः श्रुत्वा गुणदोषौ विमृश्य च।
पश्चादपि महाबाहो शत्रून् युधि विजेष्यसि॥ **6.60.82**॥ 2437

महोदरवचः श्रुत्वा राक्षसैः परिवारितः।
कुम्भकर्णो महातेजाः सम्प्रतस्थे महाबलः॥ **6.60.83**॥ 2438

सुप्तमुत्थाप्य भीमाक्षं भीमरूपपराक्रमम्।
राक्षसास्त्वरिता जग्मुर्दशग्रीवनिवेशनम्॥ **6.60.84**॥ 2439

तेऽभिगम्य दशग्रीवमासीनं परमासने।
ऊचुर्बद्धाञ्जलिपुटाः सर्व एव निशाचराः॥ **6.60.85**॥ 2440

कुम्भकर्णः प्रबुद्धोऽसौ भ्राता ते राक्षसेश्वर।
कथं तत्रैव निर्यातु द्रक्ष्यसे तमिहागतम्॥ **6.60.86**॥ 2441

रावणस्त्वब्रवीद्धृष्टो राक्षसांस्तानुपस्थितान्।
द्रष्टुमेनमिहेच्छामि यथान्यायं च पूज्यताम्॥ **6.60.87**॥ 2442

तथेत्युक्त्वा तु ते सर्वे पुनरागम्य राक्षसाः।
कुम्भकर्णमिदं वाक्यमूचू रावणचोदिताः॥ **6.60.88**॥ 2443

द्रष्टुं त्वां काङ्क्षते राजा सर्वराक्षसपुङ्गवः।
गमने क्रियतां बुद्धिर्भ्रातरं सम्प्रहर्षय॥ **6.60.89**॥ 2444

कुम्भकर्णस्तु दुर्धर्षो भ्रातुराज्ञाय शासनम्।
तथेत्युक्त्वा महावीर्यः शयनादुत्पपात ह॥ **6.60.90**॥ 2445

प्रक्षाल्य वदनं हृष्टः स्नातः परमहर्षितः।
पिपासुस्त्वरयामास पानं बलसमीरणम्॥ **6.60.91**॥ 2446

ततस्ते त्वरितास्तत्र राक्षसा रावणाज्ञया।
मद्यं भक्ष्यांश्च विविधान् क्षिप्रमेवोपहारयन्॥ **6.60.92**॥ 2447

पीत्वा घटसहस्रे द्वे गमनायोपचक्रमे।
ईषत्समुत्कटो मत्तस्तेजोबलसमन्वितः॥ **6.60.93**॥ 2448

कुम्भकर्णो बभौ रुष्टः कालान्तकयमोपमः।
भ्रातुः स भवनं गच्छन् रक्षोबलसमन्वितः।
कुम्भकर्णः पदन्यासैरकम्पयत मेदिनीम्॥ **6.60.94**॥ 2449

स राजमार्गं वपुषा प्रकाशयन्
सहस्ररश्मिर्धरणीमिवांशुभिः।
जगाम तत्राञ्जलिमालया वृतः
शतक्रतुर्गेहमिव स्वयम्भुवः॥ **6.60.95**॥ 2450

तं राजमार्गस्थममित्रघातिनं
वनौकसस्ते सहसा बहिः स्थिताः।
दृष्ट्वाप्रमेयं गिरिशृङ्गकल्पं
वितत्रसुस्ते सह यूथपालैः॥ **6.60.96**॥ 2451

केचिच्छरण्यं शरणं स्म रामं
व्रजन्ति केचिद् व्यथिताः पतन्ति।
केचिद् दिशश्च व्यथिताः पतन्ति
केचिद् भयार्ता भुवि शेरते स्म॥ **6.60.97**॥ 2452

तमद्रिशृङ्गप्रतिमं किरीटिनं
स्पृशन्तमादित्यमिवात्मतेजसा।
वनौकसः प्रेक्ष्य विवृद्धमद्भुतं
भयार्दिता दुद्रुविरे यतस्ततः॥ **6.60.98**॥ 2453

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकषष्टितमः सर्गः ॥

विभीषणेन श्रीरामं प्रति कुम्भकर्णस्य परिचयदानं श्रीरामस्याज्ञया युद्धार्थं वानराणां लङ्काद्वारेषु समवस्थानम्

ततो रामो महातेजा धनुरादाय वीर्यवान्।
किरीटिनं महाकायं कुम्भकर्णं ददर्श ह॥ **6.61.1**॥ 2454

तं दृष्ट्वा राक्षसश्रेष्ठं पर्वताकारदर्शनम्।
क्रममाणमिवाकाशं पुरा नारायणं यथा॥ **6.61.2**॥ 2455

सतोयाम्बुदसङ्काशं काञ्चनाङ्गदभूषणम्।
दृष्ट्वा पुनः प्रदुद्राव वानराणां महाचमूः॥ **6.61.3**॥ 2456

विद्रुतां वाहिनीं दृष्ट्वा वर्धमानं च राक्षसम्।
सविस्मितमिदं रामो विभीषणमुवाच ह॥ **6.61.4**॥ 2457

कोऽसौ पर्वतसङ्काशः किरीटी हरिलोचनः।
लङ्कायां दृश्यते वीरः सविद्युदिव तोयदः॥ **6.61.5**॥ 2458

पृथिव्यां केतुभूतोऽसौ महानेकोऽत्र दृश्यते।
यं दृष्ट्वा वानराः सर्वे विद्रवन्ति ततस्ततः॥ **6.61.6**॥ 2459

आचक्ष्व सुमहान् कोऽसौ रक्षो वा यदि वासुरः।
न मयैवंविधं भूतं दृष्टपूर्वं कदाचन॥ **6.61.7**॥ 2460

सम्पृष्टो राजपुत्रेण रामेणाक्लिष्टकर्मणा।
विभीषणो महाप्राज्ञः काकुत्स्थमिदमब्रवीत्॥ **6.61.8**॥ 2461

येन वैवस्वतो युद्धे वासवश्च पराजितः।
सैष विश्रवसः पुत्रः कुम्भकर्णः प्रतापवान्।
अस्य प्रमाणसदृशो राक्षसोऽन्यो न विद्यते॥ **6.61.9**॥ 2462

एतेन देवा युधि दानवाश्च
यक्षा भुजङ्गाः पिशिताशनाश्च।
गन्धर्वविद्याधरकिन्नराश्च
सहस्रशो राघव सम्प्रभग्नाः॥ **6.61.10**॥ 2463

शूलपाणिं विरूपाक्षं कुम्भकर्णं महाबलम्।
हन्तुं न शेकुस्त्रिदशाः कालोऽयमिति मोहिताः॥ **6.61.11**॥ 2464

प्रकृत्या ह्येष तेजस्वी कुम्भकर्णो महाबलः।
अन्येषां राक्षसेन्द्राणां वरदानकृतं बलम्॥ **6.61.12**॥ 2465

बालेन जातमात्रेण क्षुधार्तेन महात्मना।
भक्षितानि सहस्राणि प्रजानां सुबहून्यपि॥ **6.61.13**॥ 2466

तेषु सम्भक्ष्यमाणेषु प्रजा भयनिपीडिताः।
यान्ति स्म शरणं शक्रं तमप्यर्थं न्यवेदयन्॥ **6.61.14**॥ 2467

स कुम्भकर्णं कुपितो महेन्द्रो
जघान वज्रेण शितेन वज्री।
स शक्रवज्राभिहतो महात्मा
चचाल कोपाच्च भृशं ननाद॥ **6.61.15**॥ 2468

तस्य नानद्यमानस्य कुम्भकर्णस्य रक्षसः।
श्रुत्वा निनादं वित्रस्ताः प्रजा भूयो वितत्रसुः॥ **6.61.16**॥ 2469

ततः क्रुद्धो महेन्द्रस्य कुम्भकर्णो महाबलः।
निष्कृष्यैरावताद् दन्तं जघानोरसि वासवम्॥ **6.61.17**॥ 2470

कुम्भकर्णप्रहारार्तो विजज्वाल स वासवः।
ततो विषेदुः सहसा देवा ब्रह्मर्षिदानवाः॥ **6.61.18**॥ 2471

प्रजाभिः सह शक्रश्च ययौ स्थानं स्वयम्भुवः।
कुम्भकर्णस्य दौरात्म्यं शशंसुस्ते प्रजापतेः॥ **6.61.19**॥ 2472

प्रजानां भक्षणं चापि देवानां चापि धर्षणम्।
आश्रमध्वंसनं चापि परस्त्रीहरणं भृशम्॥ **6.61.20**॥ 2473

एवं प्रजा यदि त्वेष भक्षयिष्यति नित्यशः।
अचिरेणैव कालेन शून्यो लोको भविष्यति॥ **6.61.21**॥ 2474

वासवस्य वचः श्रुत्वा सर्वलोकपितामहः।
रक्षांस्यावाहयामास कुम्भकर्णं ददर्श ह॥ **6.61.22**॥ 2475

कुम्भकर्णं समीक्ष्यैव वितत्रास प्रजापतिः।
कुम्भकर्णमथाश्वस्तः स्वयम्भूरिदमब्रवीत्॥ **6.61.23**॥ 2476

ध्रुवं लोकविनाशाय पौलस्त्येनासि निर्मितः।
तस्मात् त्वमद्यप्रभृति मृतकल्पः शयिष्यसे॥ **6.61.24**॥ 2477

ब्रह्मशापाभिभूतोऽथ निपपाताग्रतः प्रभोः।
ततः परमसम्भ्रान्तो रावणो वाक्यमब्रवीत्॥ **6.61.25**॥ 2478

प्रवृद्धः काञ्चनो वृक्षः फलकाले निकृत्यते।
न नप्तारं स्वकं न्याय्यं शप्तुमेवं प्रजापते॥ **6.61.26**॥ 2479

न मिथ्यावचनश्च त्वं स्वप्स्यत्येव न संशयः।
कालस्तु क्रियतामस्य शयने जागरे तथा॥ **6.61.27**॥ 2480

रावणस्य वचः श्रुत्वा स्वयम्भूरिदमब्रवीत्।
शयिता ह्येष षण्मासमेकाहं जागरिष्यति॥ **6.61.28**॥ 2481

एकेनाह्ना त्वसौ वीरश्चरन् भूमिं बुभुक्षितः।
व्यात्तास्यो भक्षयेल्लोकान् संवृद्ध इव पावकः॥ **6.61.29**॥ 2482

सोऽसौ व्यसनमापन्नः कुम्भकर्णमबोधयत्।
त्वत्पराक्रमभीतश्च राजा सम्प्रति रावणः॥ **6.61.30**॥ 2483

स एष निर्गतो वीरः शिबिराद् भीमविक्रमः।
वानरान् भृशसङ्क्रुद्धो भक्षयन् परिधावति॥ **6.61.31**॥ 2484

कुम्भकर्णं समीक्ष्यैव हरयोऽद्य प्रदुद्रुवुः।
कथमेनं रणे क्रुद्धं वारयिष्यन्ति वानराः॥ **6.61.32**॥ 2485

उच्यन्तां वानराः सर्वे यन्त्रमेतत् समुच्छ्रितम्।
इति विज्ञाय हरयो भविष्यन्तीह निर्भयाः॥ **6.61.33**॥ 2486

विभीषणवचः श्रुत्वा हेतुमत् सुमुखोद्गतम्।
उवाच राघवो वाक्यं नीलं सेनापतिं तदा॥ **6.61.34**॥ 2487

गच्छ सैन्यानि सर्वाणि व्यूह्य तिष्ठस्व पावके।
द्वाराण्यादाय लङ्कायाश्चर्याश्चास्याथ सङ्क्रमान्॥ **6.61.35**॥ 2488

शैलशृङ्गाणि वृक्षांश्च शिलाश्चाप्युपसंहरन्।
भवन्तः सायुधाः सर्वे वानराः शैलपाणयः॥ **6.61.36**॥ 2489

राघवेण समादिष्टो नीलो हरिचमूपतिः।
शशास वानरानीकं यथावत् कपिकुञ्जरः॥ **6.61.37**॥ 2490

ततो गवाक्षः शरभो हनूमानङ्गदस्तथा।
शैलशृङ्गाणि शैलाभा गृहीत्वा द्वारमभ्ययुः॥ **6.61.38**॥ 2491

रामवाक्यमुपश्रुत्य हरयो जितकाशिनः।
पादपैरर्दयन् वीरा वानराः परवाहिनीम्॥ **6.61.39**॥ 2492

ततो हरीणां तदनीकमुग्रं
रराज शैलोद्यतवृक्षहस्तम्।
गिरेः समीपानुगतं यथैव
महन्महाम्भोधरजालमुग्रम्॥ **6.61.40**॥ 2493

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विषष्टितमः सर्गः ॥

कुम्भकर्णस्य रावणगृहे प्रवेशो रामाद् भयं सूचयित्वा रावणेन तस्य शत्रुसेनासंहरणाय प्रेषणम्

स तु राक्षसशार्दूलो निद्रामदसमाकुलः।
राजमार्गं श्रिया जुष्टं ययौ विपुलविक्रमः॥ **6.62.1** ॥ 2494

राक्षसानां सहस्रैश्च वृतः परमदुर्जयः।
गृहेभ्यः पुष्पवर्षेण कीर्यमाणस्तदा ययौ॥ **6.62.2** ॥ 2495

स हेमजालविततं भानुभास्वरदर्शनम्।
ददर्श विपुलं रम्यं राक्षसेन्द्रनिवेशनम्॥ **6.62.3** ॥ 2496

स तत्तदा सूर्य इवाभ्रजालं
प्रविश्य रक्षोधिपतेर्निवेशम्।
ददर्श दूरेऽग्रजमासनस्थं
स्वयम्भुवं शक्र इवासनस्थम्॥ **6.62.4** ॥ 2497

भ्रातुः स भवनं गच्छन् रक्षोगणसमन्वितः।
कुम्भकर्णः पदन्यासैरकम्पयत मेदिनीम्॥ **6.62.5** ॥ 2498

सोऽभिगम्य गृहं भ्रातुः कक्ष्यामभिविगाह्य च।
ददर्शोद्विग्नमासीनं विमाने पुष्पके गुरुम्॥ **6.62.6** ॥ 2499

अथ दृष्ट्वा दशग्रीवः कुम्भकर्णमुपस्थितम्।
तूर्णमुत्थाय संहृष्टः सन्निकर्षमुपानयत्॥ **6.62.7**॥ 2500

अथासीनस्य पर्यङ्के कुम्भकर्णो महाबलः।
भ्रातुर्ववन्दे चरणौ किं कृत्यमिति चाब्रवीत्॥ **6.62.8**॥ 2501

उत्पत्य चैनं मुदितो रावणः परिषस्वजे।
स भ्रात्रा सम्परिष्वक्तो यथावच्चाभिनन्दितः॥ **6.62.9**॥ 2502

कुम्भकर्णः शुभं दिव्यं प्रतिपेदे वरासनम्।
स तदासनमाश्रित्य कुम्भकर्णो महाबलः॥ **6.62.10**॥ 2503

संरक्तनयनः क्रोधाद् रावणं वाक्यमब्रवीत्।
किमर्थमहमादृत्य त्वया राजन् प्रबोधितः॥ **6.62.11**॥ 2504

शंस कस्माद् भयं तेऽत्र को वा प्रेतो भविष्यति।
भ्रातरं रावणः क्रुद्धं कुम्भकर्णमवस्थितम्॥ **6.62.12**॥ 2505

रोषेण परिवृत्ताभ्यां नेत्राभ्यां वाक्यमब्रवीत्।
अद्य ते सुमहान् कालः शयानस्य महाबल॥ **6.62.13**॥ 2506

सुषुप्तस्त्वं न जानीषे मम रामकृतं भयम्।
एष दाशरथिः श्रीमान् सुग्रीवसहितो बली॥ **6.62.14**॥ 2507

समुद्रं लङ्घयित्वा तु मूलं नः परिकृन्तति।
हन्त पश्यस्व लङ्कायां वनान्युपवनानि च॥ **6.62.15**॥ 2508

सेतुना सुखमागत्य वानरैकार्णवं कृतम्।
ये राक्षसा मुख्यतमा हतास्ते वानरैर्युधि॥ **6.62.16**॥ 2509

वानराणां क्षयं युद्धे न पश्यामि कथञ्चन।
न चापि वानरा युद्धे जितपूर्वाः कदाचन॥ **6.62.17**॥ 2510

तदेतद् भयमुत्पन्नं त्रायस्वेह महाबल।
नाशय त्वमिमानद्य तदर्थं बोधितो भवान्॥ **6.62.18**॥ 2511

सर्वक्षपितकोशं च स त्वमभ्युपपद्य माम्।
त्रायस्वेमां पुरीं लङ्कां बालवृद्धावशेषिताम्॥ **6.62.19**॥ 2512

भ्रातुरर्थे महाबाहो कुरु कर्म सुदुष्करम्।
मयैवं नोक्तपूर्वो हि भ्राता कश्चित् परन्तप॥ **6.62.20**॥ 2513

त्वय्यस्ति मम च स्नेहः परा सम्भावना च मे।
देवासुरेषु युद्धेषु बहुशो राक्षसर्षभ॥ **6.62.21**॥ 2514

त्वया देवाः प्रतिव्यूह्य निर्जिताश्चासुरा युधि॥ **6.62.22**॥ 2515

तदेतत् सर्वमातिष्ठ वीर्यं भीमपराक्रम।
नहि ते सर्वभूतेषु दृश्यते सदृशो बली॥ **6.62.23**॥ 2516

कुरुष्व मे प्रियहितमेतदुत्तमं
यथाप्रियं प्रियरण बान्धवप्रिय।
स्वतेजसा व्यथय सपत्नवाहिनीं
शरद्घनं पवन इवोद्यतो महान्॥ **6.62.24**॥ 2517

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिषष्टितमः सर्गः ॥

कुम्भकर्णस्य रावणं प्रति तत्कुकृत्यनिमित्तक उपालम्भस्तं सान्त्वयित्वा स्वकीययुद्धविषयकोत्साहस्य तेन प्रकटनं च

तस्य राक्षसराजस्य निशम्य परिदेवितम्।
कुम्भकर्णो बभाषेदं वचनं प्रजहास च॥ **6.63.1** ॥ 2518

दृष्टो दोषो हि योऽस्माभिः पुरा मन्त्रविनिर्णये।
हितेष्वनभियुक्तेन सोऽयमासादितस्त्वया॥ **6.63.2** ॥ 2519

शीघ्रं खल्वभ्युपेतं त्वां फलं पापस्य कर्मणः।
निरयेष्वेव पतनं यथा दुष्कृतकर्मणः॥ **6.63.3** ॥ 2520

प्रथमं वै महाराज कृत्यमेतदचिन्तितम्।
केवलं वीर्यदर्पेण नानुबन्धो विचारितः॥ **6.63.4** ॥ 2521

यः पश्चात्पूर्वकार्याणि कुर्यादैश्वर्यमास्थितः।
पूर्वं चोत्तरकार्याणि न स वेद नयानयौ॥ **6.63.5** ॥ 2522

देशकालविहीनानि कर्माणि विपरीतवत्।
क्रियमाणानि दुष्यन्ति हवींष्यप्रयतेष्विव॥ **6.63.6** ॥ 2523

त्रयाणां पञ्चधा योगं कर्मणां यः प्रपद्यते।
सचिवैः समयं कृत्वा स सम्यग् वर्तते पथि॥ **6.63.7** ॥ 2524

यथागमं च यो राजा समयं च चिकीर्षति।
बुध्यते सचिवैर्बुद्ध्या सुहृदश्चानुपश्यति॥ **6.63.8**॥ 2525

धर्ममर्थं हि कामं वा सर्वान् वा रक्षसां पते।
भजेत पुरुषः काले त्रीणि द्वन्द्वानि वा पुनः॥ **6.63.9**॥ 2526

त्रिषु चैतेषु यच्छ्रेष्ठं श्रुत्वा तन्नावबुध्यते।
राजा वा राजमात्रो वा व्यर्थं तस्य बहुश्रुतम्॥ **6.63.10**॥ 2527

उपप्रदानं सान्त्वं च भेदं काले च विक्रमम्।
योगं च रक्षसां श्रेष्ठ तावुभौ च नयानयौ॥ **6.63.11**॥ 2528

काले धर्मार्थकामान् यः सम्मन्त्र्य सचिवैः सह।
निषेवेतात्मवान् लोके न स व्यसनमाप्नुयात्॥ **6.63.12**॥ 2529

हितानुबन्धमालोक्य कुर्यात् कार्यमिहात्मनः।
राजा सहार्थतत्त्वज्ञैः सचिवैर्बुद्धिजीविभिः॥ **6.63.13**॥ 2530

अनभिज्ञाय शास्त्रार्थान् पुरुषाः पशुबुद्धयः।
प्रागल्भ्याद् वक्तुमिच्छन्ति मन्त्रिष्वभ्यन्तरीकृताः॥ **6.63.14**॥ 2531

अशास्त्रविदुषां तेषां कार्यं नाभिहितं वचः।
अर्थशास्त्रानभिज्ञानां विपुलां श्रियमिच्छताम्॥ **6.63.15**॥ 2532

अहितं च हिताकारं धाष्ट्र्याज्जल्पन्ति ये नराः।
अवश्यं मन्त्रबाह्यास्ते कर्तव्याः कृत्यदूषकाः॥ **6.63.16**॥ 2533

विनाशयन्तो भर्तारं सहिताः शत्रुभिर्बुधैः।
विपरीतानि कृत्यानि कारयन्तीह मन्त्रिणः॥ **6.63.17**॥ 2534

तान् भर्ता मित्रसङ्काशानमित्रान् मन्त्रनिर्णये।
व्यवहारेण जानीयात् सचिवानुपसंहितान्॥ **6.63.18**॥ 2535

चपलस्येह कृत्यानि सहसानुप्रधावतः।
छिद्रमन्ये प्रपद्यन्ते क्रौञ्चस्य खमिव द्विजाः॥ **6.63.19**॥ 2536

यो हि शत्रुमवज्ञाय आत्मानं नाभिरक्षति।
अवाप्नोति हि सोऽनर्थान् स्थानाच्च व्यवरोप्यते॥ **6.63.20**॥ 2537

यदुक्तमिह ते पूर्वं प्रियया मेऽनुजेन च।
तदेव नो हितं वाक्यं यथेच्छसि तथा कुरु॥ **6.63.21**॥ 2538

तत् तु श्रुत्वा दशग्रीवः कुम्भकर्णस्य भाषितम्।
भ्रुकुटिं चैव सञ्चक्रे क्रुद्धश्चैनमभाषत॥ **6.63.22**॥ 2539

मान्यो गुरुरिवाचार्यः किं मां त्वमनुशाससे।
किमेवं वाक्श्रमं कृत्वा यद् युक्तं तद् विधीयताम्॥ **6.63.23**॥ 2540

विभ्रमाच्चित्तमोहाद् वा बलवीर्याश्रयेण वा।
नाभिपन्नमिदानीं यद् व्यर्था तस्य पुनः कथा॥ **6.63.24**॥ 2541

अस्मिन् काले तु यद् युक्तं तदिदानीं विचिन्त्यताम्।
गतं तु नानुशोचन्ति गतं तु गतमेव हि॥ **6.63.25**॥ 2542

ममापनयजं दोषं विक्रमेण समीकुरु।
यदि खल्वस्ति मे स्नेहो विक्रमं वाधिगच्छसि॥ **6.63.26**॥ 2543

यदि कार्यं ममैतत्ते हृदि कार्यतमं मतम्।
स सुहृद् यो विपन्नार्थं दीनमभ्युपपद्यते॥ **6.63.27**॥ 2544

स बन्धुर्योऽपनीतेषु साहाय्यायोपकल्पते।
तमथैवं ब्रुवाणं स वचनं धीरदारुणम्॥ **6.63.28**॥ 2545

रुष्टोऽयमिति विज्ञाय शनैः श्लक्ष्णमुवाच ह।
अतीव हि समालक्ष्य भ्रातरं क्षुभितेन्द्रियम्॥ **6.63.29**॥ 2546

कुम्भकर्णः शनैर्वाक्यं बभाषे परिसान्त्वयन्।
शृणु राजन्नवहितो मम वाक्यमरिन्दम॥ **6.63.30**॥ 2547

अलं राक्षसराजेन्द्र सन्तापमुपपद्य ते।
रोषं च सम्परित्यज्य स्वस्थो भवितुमर्हसि॥ **6.63.31**॥ 2548

नैतन्मनसि कर्तव्यं मयि जीवति पार्थिव।
तमहं नाशयिष्यामि यत् कृते परितप्यते॥ **6.63.32**॥ 2549

अवश्यं तु हितं वाच्यं सर्वावस्थं मया तव।
बन्धुभावादभिहितं भ्रातृस्नेहाच्च पार्थिव॥ **6.63.33**॥ 2550

सदृशं यच्च कालेऽस्मिन् कर्तुं स्नेहेन बन्धुना।
शत्रूणां कदनं पश्य क्रियमाणं मया रणे॥ **6.63.34**॥ 2551

अद्य पश्य महाबाहो मया समरमूर्धनि।
हते रामे सह भ्रात्रा द्रवन्तीं हरिवाहिनीम्॥ **6.63.35**॥ 2552

अद्य रामस्य तद् दृष्ट्वा मयाऽऽनीतं रणाच्छिरः।
सुखी भव महाबाहो सीता भवतु दुःखिता॥ **6.63.36**॥ 2553

अद्य रामस्य पश्यन्तु निधनं सुमहत् प्रियम्।
लङ्कायां राक्षसाः सर्वे ये ते निहतबान्धवाः॥ **6.63.37**॥ 2554

अद्य शोकपरीतानां स्वबन्धुवधशोचिनाम्।
शत्रोर्युधि विनाशेन करोम्यश्रुप्रमार्जनम्॥ **6.63.38**॥ 2555

अद्य पर्वतसङ्काशं ससूर्यमिव तोयदम्।
विकीर्णं पश्य समरे सुग्रीवं प्लवगेश्वरम्॥ **6.63.39**॥ 2556

कथं च राक्षसैरेभिर्मया च परिसान्त्वितः।
जिघांसुभिर्दाशरथिं व्यथसे त्वं सदानघ॥ **6.63.40**॥ 2557

मां निहत्य किल त्वां हि निहनिष्यति राघवः।
नाहमात्मनि सन्तापं गच्छेयं राक्षसाधिप॥ **6.63.41**॥ 2558

कामं त्विदानीमपि मां व्यादिश त्वं परन्तप।
न परः प्रेक्षणीयस्ते युद्धायातुलविक्रम॥ **6.63.42**॥ 2559

अहमुत्सादयिष्यामि शत्रूंस्तव महाबलान्।
यदि शक्रो यदि यमो यदि पावकमारुतौ॥ **6.63.43**॥ 2560

तानहं योधयिष्यामि कुबेरवरुणावपि।
गिरिमात्रशरीरस्य शितशूलधरस्य मे॥ **6.63.44**॥ 2561

नर्दतस्तीक्ष्णदंष्ट्रस्य बिभीयाद् वै पुरन्दरः।
अथ वा त्यक्तशस्त्रस्य मृद्वतस्तरसा रिपून्॥ **6.63.45**॥ 2562

न मे प्रतिमुखः कश्चित् स्थातुं शक्तो जिजीविषुः।
नैव शक्त्या न गदया नासिना निशितैः शरैः॥ **6.63.46**॥ 2563

हस्ताभ्यामेव संरभ्य हनिष्यामि सवज्रिणम्।
यदि मे मुष्टिवेगं स राघवोऽद्य सहिष्यति॥ **6.63.47**॥ 2564

ततः पास्यन्ति बाणौघा रुधिरं राघवस्य मे।
चिन्तया तप्यसे राजन् किमर्थं मयि तिष्ठति॥ **6.63.48**॥ 2565

सोऽहं शत्रुविनाशाय तव निर्यातुमुद्यतः।
मुञ्च रामाद् भयं घोरं निहनिष्यामि संयुगे॥ **6.63.49**॥ 2566

राघवं लक्ष्मणं चैव सुग्रीवं च महाबलम्।
हनूमन्तं च रक्षोघ्नं येन लङ्का प्रदीपिता॥ **6.63.50**॥ 2567

हरींश्च भक्षयिष्यामि संयुगे समुपस्थिते।
असाधारणमिच्छामि तव दातुं महद् यशः॥ **6.63.51**॥ 2568

यदि चेन्द्राद् भयं राजन् यदि चापि स्वयम्भुवः।
ततोऽहं नाशयिष्यामि नैशं तम इवांशुमान्॥ **6.63.52**॥ 2569

अपि देवाः शयिष्यन्ते मयि क्रुद्धे महीतले।
यमं च शमयिष्यामि भक्षयिष्यामि पावकम्॥ **6.63.53**॥ 2570

आदित्यं पातयिष्यामि सनक्षत्रं महीतले।
शतक्रतुं वधिष्यामि पास्यामि वरुणालयम्॥ **6.63.54**॥ 2571

पर्वतांश्चूर्णयिष्यामि दारयिष्यामि मेदिनीम्।
दीर्घकालं प्रसुप्तस्य कुम्भकर्णस्य विक्रमम्॥ **6.63.55**॥ 2572

अद्य पश्यन्तु भूतानि भक्ष्यमाणानि सर्वशः।
न त्विदं त्रिदिवं सर्वमाहारो मम पूर्यते॥ **6.63.56**॥ 2573

वधेन ते दाशरथेः सुखार्हं
सुखं समाहर्तुमहं व्रजामि।
निहत्य रामं सह लक्ष्मणेन
खादामि सर्वान् हरियूथमुख्यान्॥ **6.63.57**॥ 2574

रमस्व राजन् पिब चाद्य वारुणीं
कुरुष्व कृत्यानि विनीयतां ज्वरः।
मयाद्य रामे गमिते यमक्षयं
चिराय सीता वशगा भविष्यति॥ **6.63.58**॥ 2575

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुःषष्टितमः सर्गः ॥

कुम्भकर्णं प्रत्याक्षिप्य महोदरेण युद्धं विनैवाभीष्टवस्तुनो लाभोपायस्य कथनम्

तदुक्तमतिकायस्य बलिनो बाहुशालिनः।
कुम्भकर्णस्य वचनं श्रुत्वोवाच महोदरः॥ **6.64.1** ॥ 2576

कुम्भकर्ण कुले जातो धृष्टः प्राकृतदर्शनः।
अवलिप्तो न शक्नोषि कृत्यं सर्वत्र वेदितुम्॥ **6.64.2** ॥ 2577

नहि राजा न जानीते कुम्भकर्ण नयानयौ।
त्वं तु कैशोरकाद् धृष्टः केवलं वक्तुमिच्छसि॥ **6.64.3** ॥ 2578

स्थानं वृद्धिं च हानिं च देशकालविधानवित्।
आत्मनश्च परेषां च बुध्यते राक्षसर्षभः॥ **6.64.4** ॥ 2579

यत् त्वशक्यं बलवता वक्तुं प्राकृतबुद्धिना।
अनुपासितवृद्धेन कः कुर्यात् तादृशं बुधः॥ **6.64.5** ॥ 2580

यांस्तु धर्मार्थकामांस्त्वं ब्रवीषि पृथगाश्रयान्।
अवबोद्धुं स्वभावेन नहि लक्षणमस्ति तान्॥ **6.64.6** ॥ 2581

कर्म चैव हि सर्वेषां कारणानां प्रयोजनम्।
श्रेयः पापीयसां चात्र फलं भवति कर्मणाम्॥ **6.64.7** ॥ 2582

निःश्रेयसफलावेव धर्मार्थावितरावपि।
अधर्मानर्थयोः प्राप्तं फलं च प्रत्यवायिकम्॥ **6.64.8**॥ 2583

ऐहलौकिकपारक्यं कर्म पुम्भिर्निषेव्यते।
कर्माण्यपि तु कल्यानि लभते काममास्थितः॥ **6.64.9**॥ 2584

तत्र क्लृप्तमिदं राज्ञा हृदि कार्यं मतं च नः।
शत्रौ हि साहसं यत् तत् किमिवात्रापनीयते॥ **6.64.10**॥ 2585

एकस्यैवाभियाने तु हेतुर्यः प्राहृतस्त्वया।
तत्राप्यनुपपन्नं ते वक्ष्यामि यदसाधु च॥ **6.64.11**॥ 2586

येन पूर्वं जनस्थाने बहवोऽतिबला हताः।
राक्षसा राघवं तं त्वं कथमेको जयिष्यसि॥ **6.64.12**॥ 2587

ये पूर्वं निर्जितास्तेन जनस्थाने महौजसः।
राक्षसांस्तान् पुरे सर्वान् भीतानद्य न पश्यसि॥ **6.64.13**॥ 2588

तं सिंहमिव सङ्क्रुद्धं रामं दशरथात्मजम्।
सर्पं सुप्तमहो बुद्ध्वा प्रबोधयितुमिच्छसि॥ **6.64.14**॥ 2589

ज्वलन्तं तेजसा नित्यं क्रोधेन च दुरासदम्।
कस्तं मृत्युमिवासह्यमासादयितुमर्हति॥ **6.64.15**॥ 2590

संशयस्थमिदं सर्वं शत्रोः प्रतिसमासने।
एकस्य गमनं तात नहि मे रोचते भृशम्॥ **6.64.16**॥ 2591

हीनार्थस्तु समृद्धार्थं को रिपुं प्राकृतं यथा।
निश्चितं जीवितत्यागे वशमानेतुमिच्छति॥ **6.64.17**॥ 2592

यस्य नास्ति मनुष्येषु सदृशो राक्षसोत्तम।
कथमाशंससे योद्धं तुल्येनेन्द्रविवस्वतोः॥ **6.64.18**॥ 2593

एवमुक्त्वा तु संरब्धं कुम्भकर्णं महोदरः।
उवाच रक्षसां मध्ये रावणं लोकरावणम्॥ **6.64.19**॥ 2594

लब्ध्वा पुरस्ताद् वैदेहीं किमर्थं त्वं विलम्बसे।
यदीच्छसि तदा सीता वशगा ते भविष्यति॥ **6.64.20**॥ 2595

दृष्टः कश्चिदुपायो मे सीतोपस्थानकारकः।
रुचितश्चेत् स्वया बुद्ध्या राक्षसेन्द्र ततः शृणु॥ **6.64.21**॥ 2596

अहं द्विजिह्वः संह्लादी कुम्भकर्णो वितर्दनः।
पञ्च रामवधायैते निर्यान्तीत्यवघोषय॥ **6.64.22**॥ 2597

ततो गत्वा वयं युद्धं दास्यामस्तस्य यत्नतः।
जेष्यामो यदि ते शत्रून् नोपायैः कार्यमस्ति नः॥ **6.64.23**॥ 2598

अथ जीवति नः शत्रुर्वयं च कृतसंयुगाः।
ततः समभिपत्स्यामो मनसा यत् समीक्षितम्॥ **6.64.24**॥ 2599

वयं युद्धादिहैष्यामो रुधिरेण समुक्षिताः।
विदार्य स्वतनुं बाणै रामनामाङ्कितैः शरैः॥ **6.64.25**॥ 2600

भक्षितो राघवोऽस्माभिर्लक्ष्मणश्चेति वादिनः।
ततः पादौ ग्रहीष्यामस्त्वं नः कामं प्रपूरय॥ **6.64.26**॥ 2601

ततोऽवघोषय पुरे गजस्कन्धेन पार्थिव।
हतो रामः सह भ्रात्रा ससैन्य इति सर्वतः॥ **6.64.27**॥ 2602

प्रीतो नाम ततो भूत्वा भृत्यानां त्वमरिन्दम।
भोगांश्च परिवारांश्च कामान् वसु च दापय॥ **6.64.28**॥ 2603

ततो माल्यानि वासांसि वीराणामनुलेपनम्।
पेयं च बहु योधेभ्यः स्वयं च मुदितः पिब॥ **6.64.29**॥ 2604

ततोऽस्मिन् बहुलीभूते कौलीने सर्वतो गते।
भक्षितः ससुहृद् रामो राक्षसैरिति विश्रुते॥ **6.64.30**॥ 2605

प्रविश्याश्वास्य चापि त्वं सीतां रहसि सान्त्वयन्।
धनधान्यैश्च कामैश्च रत्नैश्चैनां प्रलोभय॥ **6.64.31**॥ 2606

अनयोपधया राजन् भूयः शोकानुबन्धया।
अकामा त्वद्वशं सीता नष्टनाथा गमिष्यति॥ **6.64.32**॥ 2607

रमणीयं हि भर्तारं विनष्टमधिगम्य सा।
नैराश्यात् स्त्रीलघुत्वाच्च त्वद्वशं प्रतिपत्स्यते॥ **6.64.33**॥ 2608

सा पुरा सुखसंवृद्धा सुखार्हा दुःखकर्शिता।
त्वय्यधीनं सुखं ज्ञात्वा सर्वथैव गमिष्यति॥ **6.64.34**॥ 2609

एतत् सुनीतं मम दर्शनेन
रामं हि दृष्ट्वैव भवेदनर्थः।
इहैव ते सेत्स्यति मोत्सुको भू-
र्महानयुद्धेन सुखस्य लाभः॥ **6.64.35**॥ 2610

अनष्टसैन्यो ह्यनवाप्तसंशयो
रिपुं त्वयुद्धेन जयञ्जनाधिपः।
यशश्च पुण्यं च महान्महीपते
श्रियं च कीर्तिं च चिरं समश्नुते॥ **6.64.36**॥ 2611

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुःषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चषष्टितमः सर्गः ॥

कुम्भकर्णस्य रणयात्रा

स तथोक्तस्तु निर्भर्त्स्य कुम्भकर्णो महोदरम्।
अब्रवीद् राक्षसश्रेष्ठं भ्रातरं रावणं ततः॥ **6.65.1** ॥ 2612

सोऽहं तव भयं घोरं वधात् तस्य दुरात्मनः।
रामस्याद्य प्रमार्जामि निर्वैरो हि सुखी भव॥ **6.65.2** ॥ 2613

गर्जन्ति न वृथा शूरा निर्जला इव तोयदाः।
पश्य सम्पद्यमानं तु गर्जितं युधि कर्मणा॥ **6.65.3** ॥ 2614

न मर्षयन्ति चात्मानं सम्भावयितुमात्मना।
अदर्शयित्वा शूरास्तु कर्म कुर्वन्ति दुष्करम्॥ **6.65.4** ॥ 2615

विक्लवानां ह्यबुद्धीनां राज्ञां पण्डितमानिनाम्।
रोचते त्वद्वचो नित्यं कथ्यमानं महोदर॥ **6.65.5** ॥ 2616

युद्धे कापुरुषैर्नित्यं भवद्भिः प्रियवादिभिः।
राजानमनुगच्छद्भिः सर्वं कृत्यं विनाशितम्॥ **6.65.6** ॥ 2617

राजशेषा कृता लङ्का क्षीणः कोशो बलं हतम्।
राजानमिममासाद्य सुहृच्चिह्नममित्रकम्॥ **6.65.7** ॥ 2618

एष निर्याम्यहं युद्धमुद्यतः शत्रुनिर्जये।
दुर्नयं भवतामद्य समीकर्तुं महाहवे॥ **6.65.8**॥ 2619

एवमुक्तवतो वाक्यं कुम्भकर्णस्य धीमतः।
प्रत्युवाच ततो वाक्यं प्रहसन् राक्षसाधिपः॥ **6.65.9**॥ 2620

महोदरोऽयं रामात् तु परित्रस्तो न संशयः।
न हि रोचयते तात युद्धं युद्धविशारद॥ **6.65.10**॥ 2621

कश्चिन्मे त्वत्समो नास्ति सौहृदेन बलेन च।
गच्छ शत्रुवधाय त्वं कुम्भकर्ण जयाय च॥ **6.65.11**॥ 2622

शयानः शत्रुनाशार्थं भवान् सम्बोधितो मया।
अयं हि कालः सुमहान् राक्षसानामरिन्दम॥ **6.65.12**॥ 2623

सङ्गच्छ शूलमादाय पाशहस्त इवान्तकः।
वानरान् राजपुत्रौ च भक्षयादित्यतेजसौ॥ **6.65.13**॥ 2624

समालोक्य तु ते रूपं विद्रविष्यन्ति वानराः।
रामलक्ष्मणयोश्चापि हृदये प्रस्फुटिष्यतः॥ **6.65.14**॥ 2625

एवमुक्त्वा महातेजाः कुम्भकर्णं महाबलम्।
पुनर्जातमिवात्मानं मेने राक्षसपुङ्गवः॥ **6.65.15**॥ 2626

कुम्भकर्णबलाभिज्ञो जानंस्तस्य पराक्रमम्।
बभूव मुदितो राजा शशाङ्क इव निर्मलः॥ **6.65.16**॥ 2627

इत्येवमुक्तः संहृष्टो निर्जगाम महाबलः।
राज्ञस्तु वचनं श्रुत्वा योद्धमुद्युक्तवांस्तदा॥ **6.65.17**॥ 2628

आददे निशितं शूलं वेगाच्छत्रुनिबर्हणः।
सर्वं कालायसं दीप्तं तप्तकाञ्चनभूषणम्॥ **6.65.18**॥ 2629

इन्द्राशनिसमप्रख्यं वज्रप्रतिमगौरवम्।
देवदानवगन्धर्वयक्षपन्नगसूदनम्॥ **6.65.19**॥ 2630

रक्तमाल्यमहादामं स्वतश्चोद्गतपावकम्।
आदाय विपुलं शूलं शत्रुशोणितरञ्जितम्॥ **6.65.20**॥ 2631

कुम्भकर्णो महातेजा रावणं वाक्यमब्रवीत्।
गमिष्याम्यहमेकाकी तिष्ठत्विह बलं मम॥ **6.65.21**॥ 2632

अद्य तान् क्षुधितः क्रुद्धो भक्षयिष्यामि वानरान्।
कुम्भकर्णवचः श्रुत्वा रावणो वाक्यमब्रवीत्॥ **6.65.22**॥ 2633

सैन्यैः परिवृतो गच्छ शूलमुद्गरपाणिभिः।
वानरा हि महात्मानः शूराः सुव्यवसायिनः॥ **6.65.23**॥ 2634

एकाकिनं प्रमत्तं वा नयेयुर्दशनैः क्षयम्।
तस्मात् परमदुर्धर्षः सैन्यैः परिवृतो व्रज।
रक्षसामहितं सर्वं शत्रुपक्षं निषूदय॥ **6.65.24**॥ 2635

अथासनात् समुत्पत्य स्रजं मणिकृतान्तराम्।
आबबन्ध महातेजाः कुम्भकर्णस्य रावणः॥ **6.65.25**॥ 2636

अङ्गदान्यङ्गुलीवेष्टान् वराण्याभरणानि च।
हारं च शशिसङ्काशमाबबन्ध महात्मनः॥ **6.65.26**॥ 2637

दिव्यानि च सुगन्धीनि माल्यदामानि रावणः।
गात्रेषु सज्जयामास श्रोत्रयोश्चास्य कुण्डले॥ **6.65.27**॥ 2638

काञ्चनाङ्गदकेयूरनिष्काभरणभूषितः।
कुम्भकर्णो बृहत्कर्णः सुहुतोऽग्निरिवाबभौ॥ **6.65.28**॥ 2639

श्रोणीसूत्रेण महता मेचकेन व्यराजत।
अमृतोत्पादने नद्धो भुजङ्गेनेव मन्दरः॥ **6.65.29**॥ 2640

स काञ्चनं भारसहं निवातं
विद्युत्प्रभं दीप्तमिवात्मभासा।
आवध्यमानः कवचं रराज
सन्ध्याभ्रसंवीत इवाद्रिराजः॥ **6.65.30**॥ 2641

सर्वाभरणसर्वाङ्गः शूलपाणिः स राक्षसः।
त्रिविक्रमकृतोत्साहो नारायण इवाबभौ॥ **6.65.31**॥ 2642

भ्रातरं सम्परिष्वज्य कृत्वा चापि प्रदक्षिणम्।
प्रणम्य शिरसा तस्मै प्रतस्थे स महाबलः॥ **6.65.32**॥ 2643

तमाशीर्भिः प्रशस्ताभिः प्रेषयामास रावणः।
शङ्खदुन्दुभिनिर्घोषैः सैन्यैश्चापि वरायुधैः॥ **6.65.33**॥ 2644

तं गजैश्च तुरङ्गैश्च स्यन्दनैश्चाम्बुदस्वनैः।
अनुजग्मुर्महात्मानो रथिनो रथिनां वरम्॥ **6.65.34**॥ 2645

सर्पैरुष्ट्रैः खरैश्चैव सिंहद्विपमृगद्विजैः।
अनुजग्मुश्च तं घोरं कुम्भकर्णं महाबलम्॥ **6.65.35**॥ 2646

स पुष्पवर्षैरवकीर्यमाणो
धृतातपत्रः शितशूलपाणिः।
मदोत्कटः शोणितगन्धमत्तो
विनिर्ययौ दानवदेवशत्रुः॥ **6.65.36**॥ 2647

पदातयश्च बहवो महानादा महाबलाः।
अन्वयू राक्षसा भीमा भीमाक्षाः शस्त्रपाणयः॥ **6.65.37**॥ 2648

रक्ताक्षाः सुबहुव्यामा नीलाञ्जनचयोपमाः।
शूलानुद्यम्य खड्गांश्च निशितांश्च परश्वधान्॥ **6.65.38**॥ 2649

भिन्दिपालांश्च परिघान् गदाश्च मुसलानि च।
तालस्कन्धांश्च विपुलान् क्षेपणीयान् दुरासदान्॥ **6.65.39**॥ 2650

अथान्यद्भपुरादाय दारुणं घोरदर्शनम्।
निष्पपात महातेजाः कुम्भकर्णो महाबलः॥ **6.65.40**॥ 2651

धनुःशतपरीणाहः स षड्गतसमुच्छ्रितः।
रौद्रः शकटचक्राक्षो महापर्वतसन्निभः॥ **6.65.41**॥ 2652

सन्निपत्य च रक्षांसि दग्धशैलोपमो महान्।
कुम्भकर्णो महावक्त्रः प्रहसन्निदमब्रवीत्॥ **6.65.42**॥ 2653

अद्य वानरमुख्यानां तानि यूथानि भागशः।
निर्दहिष्यामि सङ्क्रुद्धः पतङ्गानिव पावकः॥ **6.65.43**॥ 2654

नापराध्यन्ति मे कामं वानरा वनचारिणः।
जातिरस्मद्विधानां सा पुरोद्यानविभूषणम्॥ **6.65.44**॥ 2655

पुररोधस्य मूलं तु राघवः सहलक्ष्मणः।
हते तस्मिन् हतं सर्वं तं वधिष्यामि संयुगे॥ **6.65.45**॥ 2656

एवं तस्य ब्रुवाणस्य कुम्भकर्णस्य राक्षसाः।
नादं चक्रुर्महाघोरं कम्पयन्त इवार्णवम्॥ **6.65.46**॥ 2657

तस्य निष्पततस्तूर्णं कुम्भकर्णस्य धीमतः।
बभूवुर्घोररूपाणि निमित्तानि समन्ततः॥ **6.65.47**॥ 2658

उल्काशनियुता मेघा बभूवुर्गर्दभारुणाः।
ससागरवना चैव वसुधा समकम्पत॥ **6.65.48**॥ 2659

घोररूपाः शिवा नेदुः सज्वालकवलैर्मुखैः।
मण्डलान्यपसव्यानि बबन्धुश्च विहङ्गमाः॥ **6.65.49**॥ 2660

निष्पपात च गृध्रोऽस्य शूले वै पथि गच्छतः।
प्रास्फुरन्नयनं चास्य सव्यो बाहुरकम्पत॥ **6.65.50**॥ 2661

निष्पपात तदा चोल्का ज्वलन्ती भीमनिःस्वना।
आदित्यो निष्प्रभश्चासीन्न वाति च सुखोऽनिलः॥ **6.65.51**॥ 2662

अचिन्तयन् महोत्पातानुदितान् रोमहर्षणान्।
निर्ययौ कुम्भकर्णस्तु कृतान्तबलचोदितः॥ **6.65.52**॥ 2663

स लङ्घयित्वा प्राकारं पद्भ्यां पर्वतसन्निभः।
ददर्शाभ्रघनप्रख्यं वानरानीकमद्भुतम्॥ **6.65.53**॥ 2664

ते दृष्ट्वा राक्षसश्रेष्ठं वानराः पर्वतोपमम्।
वायुनुन्ना इव घना ययुः सर्वा दिशस्तदा॥ **6.65.54**॥ 2665

तद् वानरानीकमतिप्रचण्डं
दिशो द्रवद्भिन्नमिवाभ्रजालम्।
स कुम्भकर्णः समवेक्ष्य हर्षा -
न्ननाद भूयो घनवद्घनाभः॥ **6.65.55**॥ 2666

ते तस्य घोरं निनदं निशम्य
यथा निनादं दिवि वारिदस्य।
पेतुर्धरण्यां बहवः प्लवङ्गा
निकृत्तमूला इव शालवृक्षाः॥ **6.65.56**॥ 2667

विपुलपरिघवान् स कुम्भकर्णो
रिपुनिधनाय विनिःसृतो महात्मा।

कपिगणभयमाददत् सुभीमं
प्रभुरिव किङ्करदण्डवान् युगान्ते ॥ **6.65.57** ॥ 2668

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चषष्टितमः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षट्षष्टितमः सर्गः ॥

कुम्भकर्णभयात् पलायमानानां वानराणामङ्गदेन प्रोत्साहनमावाहनं च कुम्भकर्णेन कपीनां संहारः पुनर्वानरसैनिकानां पलायनमङ्गदेन प्रबोध्य तेषां पुनः प्रत्यावर्तनं च

स लङ्घयित्वा प्राकारं गिरिकूटोपमो महान्।
निर्ययौ नगरात् तूर्णं कुम्भकर्णो महाबलः॥ **6.66.1** ॥ 2669

ननाद च महानादं समुद्रमभिनादयन्।
विजयन्निव निर्घातान् विधमन्निव पर्वतान्॥ **6.66.2** ॥ 2670

तमवध्यं मघवता यमेन वरुणेन वा।
प्रेक्ष्य भीमाक्षमायान्तं वानरा विप्रदुद्रुवुः॥ **6.66.3** ॥ 2671

तांस्तु विप्रद्रुतान् दृष्ट्वा राजपुत्रोऽङ्गदोऽब्रवीत्।
नलं नीलं गवाक्षं च कुमुदं च महाबलम्॥ **6.66.4** ॥ 2672

आत्मनस्तानि विस्मृत्य वीर्याण्यभिजनानि च।
क्व गच्छत भयत्रस्ताः प्राकृता हरयो यथा॥ **6.66.5** ॥ 2673

साधु सौम्या निवर्तध्वं किं प्राणान् परिरक्षथ।
नालं युद्धाय वै रक्षो महतीयं विभीषिका॥ **6.66.6** ॥ 2674

महतीमुत्थितामेनां राक्षसानां विभीषिकाम्।
विक्रमाद् विधमिष्यामो निवर्तध्वं प्लवङ्गमाः॥ **6.66.7** ॥ 2675

कृच्छ्रेण तु समाश्वस्य सङ्गम्य च ततस्ततः।
वृक्षान् गृहीत्वा हरयः सम्प्रतस्थू रणाजिरे॥ **6.66.8**॥ 2676

ते निवर्त्य तु संरब्धाः कुम्भकर्णं वनौकसः।
निजघ्नुः परमक्रुद्धाः समदा इव कुञ्जराः॥ **6.66.9**॥ 2677

प्रांशुभिर्गिरिशृङ्गैश्च शिलाभिश्च महाबलाः।
पादपैः पुष्पिताग्रैश्च हन्यमानो न कम्पते॥ **6.66.10**॥ 2678

तस्य गात्रेषु पतिता भिद्यन्ते बहवः शिलाः।
पादपाः पुष्पिताग्राश्च भग्नाः पेतुर्महीतले॥ **6.66.11**॥ 2679

सोऽपि सैन्यानि सङ्क्रुद्धो वानराणां महौजसाम्।
ममन्थ परमायत्तो वनान्यग्निरिवोत्थितः॥ **6.66.12**॥ 2680

लोहितार्दास्तु बहवः शेरते वानरर्षभाः।
निरस्ताः पतिता भूमौ ताम्रपुष्पा इव द्रुमाः॥ **6.66.13**॥ 2681

लङ्घयन्तः प्रधावन्तो वानरा नावलोकयन्।
केचित् समुद्रे पतिताः केचिद् गगनमास्थिताः॥ **6.66.14**॥ 2682

वध्यमानास्तु ते वीरा राक्षसेन च लीलया।
सागरं येन ते तीर्णाः पथा तेनैव दुद्रुवुः॥ **6.66.15**॥ 2683

ते स्थलानि तदा निम्नं विवर्णवदना भयात्।
ऋक्षा वृक्षान् समारूढाः केचित् पर्वतमाश्रिताः॥ **6.66.16**॥ 2684

ममज्जुरर्णवे केचिद् गुहाः केचित् समाश्रिताः।
निपेतुः केचिदपरे केचिन्नैवावतस्थिरे।
केचिद् भूमौ निपतिताः केचित् सुप्ता मृता इव॥ **6.66.17**॥ 2685

तान् समीक्ष्याङ्गदो भग्नान् वानरानिदमब्रवीत्।
अवतिष्ठत युध्यामो निवर्तध्वं प्लवङ्गमाः॥ **6.66.18**॥ 2686

भग्नानां वो न पश्यामि परिक्रम्य महीमिमाम्।
स्थानं सर्वे निवर्तध्वं किं प्राणान् परिरक्षथ॥ **6.66.19**॥ 2687

निरायुधानां क्रमतामसङ्गगतिपौरुषाः।
दारा ह्युपहसिष्यन्ति स वै घातः सुजीवताम्॥ **6.66.20**॥ 2688

कुलेषु जाताः सर्वेऽस्मिन् विस्तीर्णेषु महत्सु च।
क्व गच्छत भयत्रस्ताः प्राकृता हरयो यथा।
अनार्याः खलु यद्भीतास्त्यक्त्वा वीर्यं प्रधावत॥ **6.66.21**॥ 2689

विकत्थनानि वो यानि भवद्भिर्जनसंसदि।
तानि वः क्व नु यातानि सोदग्राणि हितानि च॥ **6.66.22**॥ 2690

भीरोः प्रवादाः श्रूयन्ते यस्तु जीवति धिक्कृतः।
मार्गः सत्पुरुषैर्जुष्टः सेव्यतां त्यज्यतां भयम्॥ **6.66.23**॥ 2691

शयामहे वा निहताः पृथिव्यामल्पजीविताः।
प्राप्नुयामो ब्रह्मलोकं दुष्प्रापं च कुयोधिभिः॥ **6.66.24**॥ 2692

अवाप्नुयामः कीर्तिं वा निहत्वा शत्रुमाहवे।
निहता वीरलोकस्य भोक्ष्यामो वसु वानराः॥ **6.66.25**॥ 2693

न कुम्भकर्णः काकुत्स्थं दृष्ट्वा जीवन् गमिष्यति।
दीप्यमानमिवासाद्य पतङ्गो ज्वलनं यथा॥ **6.66.26**॥ 2694

पलायनेन चोद्दिष्टाः प्राणान् रक्षामहे वयम्।
एकेन बहवो भग्ना यशो नाशं गमिष्यति॥ **6.66.27**॥ 2695

एवं ब्रुवाणं तं शूरमङ्गदं कनकाङ्गदम्।
द्रवमाणास्ततो वाक्यमूचुः शूरविगर्हितम्॥ **6.66.28**॥ 2696

कृतं नः कदनं घोरं कुम्भकर्णेन रक्षसा।
न स्थानकालो गच्छामो दयितं जीवितं हि नः॥ **6.66.29**॥ 2697

एतावदुक्त्वा वचनं सर्वे ते भेजिरे दिशः।
भीमं भीमाक्षमायान्तं दृष्ट्वा वानरयूथपाः॥ **6.66.30**॥ 2698

द्रवमाणास्तु ते वीरा अङ्गदेन बलीमुखाः।
सान्त्वनैश्चानुमानैश्च ततः सर्वे निवर्तिताः॥ **6.66.31**॥ 2699

प्रहर्षमुपनीताश्च वालिपुत्रेण धीमता।
आज्ञाप्रतीक्षास्तस्थुश्च सर्वे वानरयूथपाः॥ **6.66.32**॥ 2700

ऋषभशरभमैन्दधूम्रनीलाः।
कुमुदसुषेणगवाक्षरम्भताराः।
द्विविदपनसवायुपुत्रमुख्या -
स्त्वरिततराभिमुखं रणं प्रयाताः॥ **6.66.33**॥ 2701

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षट्षष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तषष्टितमः सर्गः ॥

कुम्भकर्णकर्तृकं घोरं युद्धं श्रीरामेण तस्य वधश्च

ते निवृत्ता महाकायाः श्रुत्वाङ्गदवचस्तदा।
नैष्ठिकीं बुद्धिमास्थाय सर्वे सङ्ग्रामकाङ्क्षिणः॥ **6.67.1** ॥ 2702

समुदीरितवीर्यास्ते समारोपितविक्रमाः।
पर्यवस्थापिता वाक्यैरङ्गदेन बलीयसा॥ **6.67.2** ॥ 2703

प्रयाताश्च गता हर्षं मरणे कृतनिश्चयाः।
चक्रुः सुतुमुलं युद्धं वानरास्त्यक्तजीविताः॥ **6.67.3** ॥ 2704

अथ वृक्षान् महाकायाः सानूनि सुमहान्ति च।
वानरास्तूर्णमुद्यम्य कुम्भकर्णमभिद्रवन्॥ **6.67.4** ॥ 2705

कुम्भकर्णः सुसङ्क्रुद्धो गदामुद्यम्य वीर्यवान्।
धर्षयन् स महाकायः समन्ताद् व्यक्षिपद् रिपून्॥ **6.67.5** ॥ 2706

शतानि सप्त चाष्टौ च सहस्राणि च वानराः।
प्रकीर्णाः शेरते भूमौ कुम्भकर्णेन ताडिताः॥ **6.67.6** ॥ 2707

षोडशाष्टौ च दश च विंशत्रिंशत्तथैव च।
परिक्षिप्य च बाहुभ्यां खादन् स परिधावति।
भक्षयन् भृशसङ्क्रुद्धो गरुडः पन्नगानिव॥ **6.67.7** ॥ 2708

कृच्छ्रेण च समाश्वस्ताः सङ्गम्य च ततस्ततः।
वृक्षाद्रिहस्ता हरयस्तस्थुः सङ्ग्राममूर्धनि॥ **6.67.8**॥ 2709

ततः पर्वतमुत्पाट्य द्विविदः प्लवगर्षभः।
दुद्राव गिरिशृङ्गाभं विलम्ब इव तोयदः॥ **6.67.9**॥ 2710

तं समुत्पाट्य चिक्षेप कुम्भकर्णाय वानरः।
तमप्राप्य महाकायं तस्य सैन्येऽपतत् ततः॥ **6.67.10**॥ 2711

ममर्दाश्वान् गजांश्चापि रथांश्चापि गजोत्तमान्।
तानि चान्यानि रक्षांसि एवं चान्यद्विरेः शिरः॥ **6.67.11**॥ 2712

तच्छैलवेगाभिहतं हताश्वं हतसारथिम्।
रक्षसां रुधिरक्लिन्नं बभूवायोधनं महत्॥ **6.67.12**॥ 2713

रथिनो वानरेन्द्राणां शरैः कालान्तकोपमैः।
शिरांसि नर्दतां जह्रुः सहसा भीमनिःस्वनाः॥ **6.67.13**॥ 2714

वानराश्च महात्मानः समुत्पाट्य महाद्रुमान्।
रथानश्वान् गजानुष्ट्रान् राक्षसानभ्यसूदयन्॥ **6.67.14**॥ 2715

हनूमाञ्शैलशृङ्गाणि शिलाश्च विविधान् द्रुमान्।
ववर्ष कुम्भकर्णस्य शिरस्यम्बरमास्थितः॥ **6.67.15**॥ 2716

तानि पर्वतशृङ्गाणि शूलेन स बिभेद ह।
बभञ्ज वृक्षवर्षं च कुम्भकर्णो महाबलः॥ **6.67.16**॥ 2717

ततो हरीणां तदनीकमुग्रं
दुद्राव शूलं निशितं प्रगृह्य।
तस्थौ स तस्यापततः परस्ता -
न्महीधराग्रं हनुमान् प्रगृह्य॥ **6.67.17**॥ 2718

स कुम्भकर्णं कुपितो जघान
वेगेन शैलोत्तमभीमकायम्।
सञ्चुक्षुभे तेन तदाभिभूतो
मेदार्द्रगात्रो रुधिरावसिक्तः॥ **6.67.18**॥ 2719

स शूलमाविध्य तडित्प्रकाशं
गिरिं यथा प्रज्वलिताग्निशृङ्गम्।
बाह्वन्तरे मारुतिमाजघान
गुहोऽचलं क्रौञ्चमिवोग्रशक्त्या॥ **6.67.19**॥ 2720

स शूलनिर्भिन्नमहाभुजान्तरः
प्रविह्वलः शोणितमुद्वमन् मुखात्।
ननाद भीमं हनुमान् महाहवे
युगान्तमेघस्तनितस्वनोपमम्॥ **6.67.20**॥ 2721

ततो विनेदुः सहसा प्रहृष्टा
रक्षोगणास्तं व्यथितं समीक्ष्य।
प्लवङ्गमास्तु व्यथिता भयार्ताः
प्रदुद्रुवुः संयति कुम्भकर्णात्॥ **6.67.21**॥ 2722

ततस्तु नीलो बलवान् पर्यवस्थापयन् बलम्।
प्रविचिक्षेप शैलाग्रं कुम्भकर्णाय धीमते॥ **6.67.22**॥ 2723

तदापतन्तं सम्प्रेक्ष्य मुष्टिनाभिजघान ह।
मुष्टिप्रहाराभिहतं तच्छैलाग्रं व्यशीर्यत।
सविस्फुलिङ्गं सज्वालं निपपात महीतले॥ **6.67.23**॥ 2724

ऋषभः शरभो नीलो गवाक्षो गन्धमादनः।
पञ्च वानरशार्दूलाः कुम्भकर्णमुपाद्रवन्॥ **6.67.24**॥ 2725

शैलैर्वृक्षैस्तलैः पादैर्मुष्टिभिश्च महाबलाः।
कुम्भकर्णं महाकायं निजघ्नुः सर्वतो युधि॥ **6.67.25**॥ 2726

स्पर्शानिव प्रहारांस्तान् वेदयानो न विव्यथे।
ऋषभं तु महावेगं बाहुभ्यां परिषस्वजे॥ **6.67.26**॥ 2727

कुम्भकर्णभुजाभ्यां तु पीडितो वानरर्षभः।
निपपातर्षभो भीमः प्रमुखागतशोणितः॥ **6.67.27**॥ 2728

मुष्टिना शरभं हत्वा जानुना नीलमाहवे।
आजघान गवाक्षं तु तलेनेन्द्ररिपुस्तदा।
पादेनाभ्यहनत् क्रुद्धस्तरसा गन्धमादनम्॥ **6.67.28**॥ 2729

दत्तप्रहारव्यथिता मुमुहुः शोणितोक्षिताः।
निपेतुस्ते तु मेदिन्यां निकृत्ता इव किंशुकाः॥ **6.67.29**॥ 2730

तेषु वानरमुख्येषु पातितेषु महात्मसु।
वानराणां सहस्राणि कुम्भकर्णं प्रदुद्रुवुः॥ **6.67.30**॥ 2731

तं शैलमिव शैलाभाः सर्वे तु प्लवगर्षभाः।
समारुह्य समुत्पत्य ददंशुश्च महाबलाः॥ **6.67.31**॥ 2732

तं नखैर्दशनैश्चापि मुष्टिभिर्बाहुभिस्तथा।
कुम्भकर्णं महाबाहुं निजघ्नुः प्लवगर्षभाः॥ **6.67.32**॥ 2733

स वानरसहस्रेस्तु विचितः पर्वतोपमः।
रराज राक्षसव्याघ्रो गिरिरात्मरुहैरिव॥ **6.67.33**॥ 2734

बाहुभ्यां वानरान् सर्वान् प्रगृह्य स महाबलः।
भक्षयामास सङ्क्रुद्धो गरुडः पन्नगानिव॥ **6.67.34**॥ 2735

प्रक्षिप्ताः कुम्भकर्णेन वक्त्रे पातालसन्निभे।
नासापुटाभ्यां सञ्जग्मुः कर्णाभ्यां चैव वानराः॥ **6.67.35**॥ 2736

भक्षयन् भृशसङ्क्रुद्धो हरीन् पर्वतसन्निभः।
बभञ्ज वानरान् सर्वान् सङ्क्रुद्धो राक्षसोत्तमः॥ **6.67.36**॥ 2737

मांसशोणितसङ्क्लेदां कुर्वन् भूमिं स राक्षसः।
चचार हरिसैन्येषु कालाग्निरिव मूर्च्छितः॥ **6.67.37**॥ 2738

वज्रहस्तो यथा शक्रः पाशहस्त इवान्तकः।
शूलहस्तो बभौ युद्धे कुम्भकर्णो महाबलः॥ **6.67.38**॥ 2739

यथा शुष्काण्यरण्यानि ग्रीष्मे दहति पावकः।
तथा वानरसैन्यानि कुम्भकर्णो ददाह सः॥ **6.67.39**॥ 2740

ततस्ते वध्यमानास्तु हतयूथाः प्लवङ्गमाः।
वानरा भयसंविग्ना विनेदुर्विकृतैः स्वरैः॥ **6.67.40**॥ 2741

अनेकशो वध्यमानाः कुम्भकर्णेन वानराः।
राघवं शरणं जग्मुर्व्यथिता भिन्नचेतसः॥ **6.67.41**॥ 2742

प्रभग्नान् वानरान् दृष्ट्वा वज्रहस्तात्मजात्मजः।
अभ्यधावत वेगेन कुम्भकर्णं महाहवे॥ **6.67.42**॥ 2743

शैलशृङ्गं महद् गृह्य विनदन् स मुहुर्मुहुः।
त्रासयन् राक्षसान् सर्वान् कुम्भकर्णपदानुगान्॥ **6.67.43**॥ 2744

चिक्षेप शैलशिखरं कुम्भकर्णस्य मूर्धनि।
स तेनाभिहतो मूर्ध्नि शैलेनेन्द्ररिपुस्तदा॥ **6.67.44**॥ 2745

कुम्भकर्णः प्रजज्वाल क्रोधेन महता तदा।
सोऽभ्यधावत वेगेन वालिपुत्रममर्षणः॥ **6.67.45**॥ 2746

कुम्भकर्णो महानादस्त्रासयन् सर्ववानरान्।
शूलं ससर्ज वै रोषादङ्गदे तु महाबलः॥ **6.67.46**॥ 2747

तदापतन्तं बलवान् युद्धमार्गविशारदः।
लाघवान्मोक्षयामास बलवान् वानरर्षभः॥ **6.67.47**॥ 2748

उत्पत्य चैनं तरसा तलेनोरस्यताडयत्।
स तेनाभिहतः कोपात् प्रमुमोहाचलोपमः॥ **6.67.48**॥ 2749

स लब्धसंज्ञोऽतिबलो मुष्टिं सङ्गृह्य राक्षसः।
अपहस्तेन चिक्षेप विसंज्ञः स पपात ह॥ **6.67.49**॥ 2750

तस्मिन् प्लवगशार्दूले विसंज्ञे पतिते भुवि।
तच्छूलं समुपादाय सुग्रीवमभिदुद्रुवे॥ **6.67.50**॥ 2751

तमापतन्तं सम्प्रेक्ष्य कुम्भकर्णं महाबलम्।
उत्पपात तदा वीरः सुग्रीवो वानराधिपः॥ **6.67.51**॥ 2752

स पर्वताग्रमुत्क्षिप्य समाविध्य महाकपिः।
अभिदुद्राव वेगेन कुम्भकर्णं महाबलम्॥ **6.67.52**॥ 2753

तमापतन्तं सम्प्रेक्ष्य कुम्भकर्णः प्लवङ्गमम्।
तस्थौ विवृत्तसर्वाङ्गो वानरेन्द्रस्य सम्मुखः॥ **6.67.53**॥ 2754

कपिशोणितदिग्धाङ्गं भक्षयन्तं महाकपीन्।
कुम्भकर्णं स्थितं दृष्ट्वा सुग्रीवो वाक्यमब्रवीत्॥ **6.67.54**॥ 2755

पातिताश्च त्वया वीराः कृतं कर्म सुदुष्करम्।
भक्षितानि च सैन्यानि प्राप्तं ते परमं यशः॥ **6.67.55**॥ 2756

त्यज तद् वानरानीकं प्राकृतैः किं करिष्यसि।
सहस्वैकं निपातं मे पर्वतस्यास्य राक्षस॥ **6.67.56**॥ 2757

तद् वाक्यं हरिराजस्य सत्त्वधैर्यसमन्वितम्।
श्रुत्वा राक्षसशार्दूलः कुम्भकर्णोऽब्रवीद् वचः॥ **6.67.57**॥ 2758

प्रजापतेस्तु पौत्रस्त्वं तथैवर्क्षरजःसुतः।
धृतिपौरुषसम्पन्नस्तस्माद् गर्जसि वानर॥ **6.67.58**॥ 2759

स कुम्भकर्णस्य वचो निशम्य
व्याविध्य शैलं सहसा मुमोच।
तेनाजधानोरसि कुम्भकर्णं
शैलेन वज्राशनिसन्निभेन॥ **6.67.59**॥ 2760

तच्छैलशृङ्गं सहसा विभिन्नं
भुजान्तरे तस्य तदा विशाले।
ततो विषेदुः सहसा प्लवङ्गा
रक्षोगणाश्चापि मुदा विनेदुः॥ **6.67.60**॥ 2761

स शैलशृङ्गाभिहतश्चुकोप
ननाद रोषाच्च विवृत्य वक्त्रम्।
व्याविध्य शूलं स तडित्प्रकाशं
चिक्षेप हर्यृक्षपतेर्वधाय॥ **6.67.61**॥ 2762

तत् कुम्भकर्णस्य भुजप्रणुन्नं
शूलं शितं काञ्चनधामयष्टिम्।
क्षिप्रं समुत्पत्य निगृह्य दोर्भ्यां
बभञ्ज वेगेन सुतोऽनिलस्य॥ **6.67.62**॥ 2763

कृतं भारसहस्रस्य शूलं कालायसं महत्।
बभञ्ज जानुमारोप्य तदा हृष्टः प्लवङ्गमः॥ **6.67.63**॥ 2764

शूलं भग्नं हनुमता दृष्ट्वा वानरवाहिनी।
हृष्टा ननाद बहुशः सर्वतश्चापि दुद्रुवे॥ **6.67.64**॥ 2765

बभूवाथ परित्रस्तो राक्षसो विमुखोऽभवत्।
सिंहनादं च ते चक्रुः प्रहृष्टा वनगोचराः।
मारुतिं पूजयाञ्चक्रुर्दृष्ट्वा शूलं तथागतम्॥ **6.67.65**॥ 2766

स तत् तथा भग्नमवेक्ष्य शूलं
चुकोप रक्षोधिपतिर्महात्मा।
उत्पाट्य लङ्कामलयात् स शृङ्गं
जघान सुग्रीवमुपेत्य तेन॥ **6.67.66**॥ 2767

स शैलशृङ्गाभिहतो विसंज्ञः
पपात भूमौ युधि वानरेन्द्रः।
तं वीक्ष्य भूमौ पतितं विसंज्ञं
नेदुः प्रहृष्टा युधि यातुधानाः॥ **6.67.67**॥ 2768

समभ्युपेत्याद्भुतघोरवीर्यं
स कुम्भकर्णो युधि वानरेन्द्रम्।
जहार सुग्रीवमभिप्रगृह्य
यथानिलो मेघमिव प्रचण्डः॥ **6.67.68**॥ 2769

स तं महामेघनिकाशरूप -
मुत्पाट्य गच्छन् युधि कुम्भकर्णः।
रराज मेरुप्रतिमानरूपो
मेरुर्यथा व्युच्छ्रितघोरशृङ्गः॥ **6.67.69**॥ 2770

ततस्तमादाय जगाम वीरः
संस्तूयमानो युधि राक्षसेन्द्रः।
शृण्वन् निनादं त्रिदिवालयानां
प्लवङ्गराजग्रहविस्मितानाम्॥ **6.67.70**॥ 2771

ततस्तमादाय तदा स मेने
हरीन्द्रमिन्द्रोपममिन्द्रवीर्यः।
अस्मिन् हते सर्वमिदं हतं स्यात्
सराघवं सैन्यमितीन्द्रशत्रुः॥ **6.67.71**॥ 2772

विद्रुतां वाहिनीं दृष्ट्वा वानराणामितस्ततः।
कुम्भकर्णेन सुग्रीवं गृहीतं चापि वानरम्॥ **6.67.72**॥ 2773

हनूमांश्चिन्तयामास मतिमान् मारुतात्मजः।
एवं गृहीते सुग्रीवे किं कर्तव्यं मया भवेत्॥ **6.67.73**॥ 2774

यद्धि न्याय्यं मया कर्तुं तत् करिष्याम्यसंशयम्।
भूत्वा पर्वतसङ्काशो नाशयिष्यामि राक्षसम्॥ **6.67.74**॥ 2775

मया हते संयति कुम्भकर्णे
महाबले मुष्टिविशीर्णदेहे।
विमोचिते वानरपार्थिवे च
भवन्तु हृष्टाः प्लवगाः समग्राः॥ **6.67.75**॥ 2776

अथवा स्वयमप्येष मोक्षं प्राप्स्यति वानरः।
गृहीतोऽयं यदि भवेत् त्रिदशैः सासुरोरगैः॥ **6.67.76**॥ 2777

मन्ये न तावदात्मानं बुध्यते वानराधिपः।
शैलप्रहाराभिहतः कुम्भकर्णेन संयुगे॥ **6.67.77**॥ 2778

अयं मुहूर्तात् सुग्रीवो लब्धसंज्ञो महाहवे।
आत्मनो वानराणां च यत् पथ्यं तत् करिष्यति॥ **6.67.78**॥ 2779

मया तु मोक्षितस्यास्य सुग्रीवस्य महात्मनः।
अप्रीतिश्च भवेत् कष्टा कीर्तिनाशश्च शाश्वतः॥ **6.67.79**॥ 2780

तस्मान्मुहूर्तं काङ्क्षिष्ये विक्रमं मोक्षितस्य तु।
भिन्नं च वानरानीकं तावदाश्वासयाम्यहम्॥ **6.67.80**॥ 2781

इत्येवं चिन्तयित्वाथ हनूमान् मारुतात्मजः।
भूयः संस्तम्भयामास वानराणां महाचमूम्॥ **6.67.81**॥ 2782

स कुम्भकर्णोऽथ विवेश लङ्कां
स्फुरन्तमादाय महाहरिं तम्।
विमानचर्यागृहगोपुरस्थैः
पुष्पाग्र्यवर्षैरभिपूज्यमानः॥ **6.67.82**॥ 2783

लाजगन्धोदवर्षैस्तु सेच्यमानः शनैः शनैः।
राजवीथ्यास्तु शीतत्वात् संज्ञां प्राप महाबलः॥ **6.67.83**॥ 2784

ततः स संज्ञामुपलभ्य कृच्छ्राद्
बलीयसस्तस्य भुजान्तरस्थः।
अवेक्षमाणः पुरराजमार्गं
विचिन्तयामास मुहुर्महात्मा॥ **6.67.84**॥ 2785

एवं गृहीतेन कथं नु नाम
शक्यं मया सम्प्रतिकर्तुमद्य।
तथा करिष्यामि यथा हरीणां
भविष्यतीष्टं च हितं च कार्यम्॥ **6.67.85**॥ 2786

ततः कराग्रैः सहसा समेत्य
राजा हरीणाममरेन्द्रशत्रोः।
खरैश्च कर्णौ दशनैश्च नासां
ददंश पादैर्विददार पार्श्वौ॥ **6.67.86**॥ 2787

स कुम्भकर्णो हृतकर्णनासो
विदारितस्तेन रदैर्नखैश्च।
रोषाभिभूतः क्षतजार्द्रगात्रः
सुग्रीवमाविध्य पिपेष भूमौ॥ **6.67.87**॥ 2788

स भूतले भीमबलाभिपिष्टः
सुरारिभिस्तैरभिहन्यमानः।
जगाम खं कन्दुकवज्जवेन
पुनश्च रामेण समाजगाम॥ **6.67.88**॥ 2789

कर्णनासाविहीनस्तु कुम्भकर्णो महाबलः।
रराज शोणितोत्सिक्तो गिरिः प्रस्रवणैरिव॥ **6.67.89**॥ 2790

शोणितार्द्रो महाकायो राक्षसो भीमदर्शनः।
युद्धायाभिमुखो भूयो मनश्चक्रे निशाचरः॥ **6.67.90**॥ 2791

अमर्षाच्छोणितोद्गारी शुशुभे रावणानुजः।
नीलाञ्जनचयप्रख्यः ससन्ध्य इव तोयदः॥ **6.67.91**॥ 2792

गते च तस्मिन् सुरराजशत्रुः
क्रोधात् प्रदुद्राव रणाय भूयः।
अनायुधोऽस्मीति विचिन्त्य रौद्रो
घोरं तदा मुद्गरमाससाद॥ **6.67.92**॥ 2793

ततः स पुर्याः सहसा महौजा
निष्क्रम्य तद् वानरसैन्यमुग्रम्।
बभक्ष रक्षो युधि कुम्भकर्णः
प्रजा युगान्ताग्निरिव प्रवृद्धः॥ **6.67.93**॥ 2794

बुभुक्षितः शोणितमांसगृध्नुः
प्रविश्य तद् वानरसैन्यमुग्रम्।
चखाद रक्षांसि हरीन् पिशाचा -
न्नृक्षांश्च मोहाद् युधि कुम्भकर्णः।
यथैव मृत्युर्हरते युगान्ते
स भक्षयामास हरींश्च मुख्यान्॥ **6.67.94**॥ 2795

एकं द्वौ त्रीन् बहून् क्रुद्धो वानरान् सह राक्षसैः।
समादायैकहस्तेन प्रचिक्षेप त्वरन् मुखे॥ **6.67.95**॥ 2796

सम्प्रस्रवंस्तदा मेदः शोणितं च महाबलः।
वध्यमानो नगेन्द्राग्रैर्भक्षयामास वानरान्॥ **6.67.96**॥ 2797

ते भक्ष्यमाणा हरयो रामं जग्मुस्तदा गतिम्।
कुम्भकर्णो भृशं क्रुद्धः कपीन् खादन् प्रधावति॥ **6.67.97**॥ 2798

शतानि सप्त चाष्टौ च विंशत्त्रिंशत् तथैव च।
सम्परिष्वज्य बाहुभ्यां खादन् विपरिधावति॥ **6.67.98**॥ 2799

मेदोवसाशोणितदिग्धगात्रः
कर्णावसक्तग्रथितान्त्रमालः।
ववर्ष शूलानि सुतीक्ष्णदंष्ट्रः
कालो युगान्तस्थ इव प्रवृद्धः॥ **6.67.99**॥ 2800

तस्मिन् काले सुमित्रायाः पुत्रः परबलार्दनः।
चकार लक्ष्मणः क्रुद्धो युद्धं परपुरञ्जयः॥ **6.67.100**॥ 2801

स कुम्भकर्णस्य शराञ्शरीरे सप्त वीर्यवान्।
निचखानाददे चान्यान् विससर्ज च लक्ष्मणः॥ **6.67.101**॥ 2802

पीड्यमानस्तदस्त्रं तु विशेषं तत् स राक्षसः।
ततश्चुकोप बलवान् सुमित्रानन्दवर्धनः॥ **6.67.102**॥ 2803

अथास्य कवचं शुभ्रं जाम्बूनदमयं शुभम्।
प्रच्छादयामास शरैः सन्ध्याभ्रमिव मारुतः॥ **6.67.103**॥ 2804

नीलाञ्जनचयप्रख्यः शरैः काञ्चनभूषणैः।
आपीड्यमानः शुशुभे मेघैः सूर्य इवांशुमान्॥ **6.67.104**॥ 2805

ततः स राक्षसो भीमः सुमित्रानन्दवर्धनम्।
सावज्ञमेव प्रोवाच वाक्यं मेघौघनिःस्वनः॥ **6.67.105**॥ 2806

अन्तकस्याप्यकष्टेन युधि जेतारमाहवे।
युध्यता मामभीतेन ख्यापिता वीरता त्वया॥ **6.67.106**॥ 2807

प्रगृहीतायुधस्येह मृत्योरिव महामृधे।
तिष्ठन्नप्यग्रतः पूज्यः किमु युद्धप्रदायकः॥ **6.67.107**॥ 2808

ऐरावतं समारूढो वृतः सर्वामरैः प्रभुः।
नैव शक्रोऽपि समरे स्थितपूर्वः कदाचन॥ **6.67.108**॥ 2809

अद्य त्वयाहं सौमित्रे बालेनापि पराक्रमैः।
तोषितो गन्तुमिच्छामि त्वामनुज्ञाप्य राघवम्॥ **6.67.109**॥ 2810

यत् तु वीर्यबलोत्साहैस्तोषितोऽहं रणे त्वया।
राममेवैकमिच्छामि हन्तुं यस्मिन् हते हतम्॥ **6.67.110**॥ 2811

रामे मयात्र निहते येऽन्ये स्थास्यन्ति संयुगे।
तानहं योधयिष्यामि स्वबलेन प्रमाथिना॥ **6.67.111**॥ 2812

इत्युक्तवाक्यं तद् रक्षः प्रोवाच स्तुतिसंहितम्।
मृधे घोरतरं वाक्यं सौमित्रिः प्रहसन्निव॥ **6.67.112**॥ 2813

यस्त्वं शक्रादिभिर्देवैरसह्यः प्राप्य पौरुषम्।
तत् सत्यं नान्यथा वीर दृष्टस्तेऽद्य पराक्रमः॥ **6.67.113**॥ 2814

एष दाशरथी रामस्तिष्ठत्यद्रिरिवाचलः।
इति श्रुत्वा ह्यनादृत्य लक्ष्मणं स निशाचरः॥ **6.67.114**॥ 2815

अतिक्रम्य च सौमित्रिं कुम्भकर्णो महाबलः।
राममेवाभिदुद्राव कम्पयन्निव मेदिनीम्॥ **6.67.115**॥ 2816

अथ दाशरथी रामो रौद्रमस्त्रं प्रयोजयन्।
कुम्भकर्णस्य हृदये ससर्ज निशिताञ्शरान्॥ **6.67.116**॥ 2817

तस्य रामेण विद्धस्य सहसाभिप्रधावतः।
अङ्गारमिश्राः क्रुद्धस्य मुखान्निश्चेरुरर्चिषः॥ **6.67.117**॥ 2818

रामास्त्रविद्धो घोरं वै नर्दन् राक्षसपुङ्गवः।
अभ्यधावत सङ्क्रुद्धो हरीन् विद्रावयन् रणे॥ **6.67.118**॥ 2819

तस्योरसि निमग्नास्ते शरा बर्हिणवाससः।
हस्ताच्चास्य परिभ्रष्टा गदा चोर्व्यां पपात ह॥ **6.67.119**॥ 2820

आयुधानि च सर्वाणि विप्रकीर्यन्त भूतले।
स निरायुधमात्मानं यदा मेने महाबलः॥ **6.67.120**॥ 2821

मुष्टिभ्यां च कराभ्यां च चकार कदनं महत्।
स बाणैरतिविद्धाङ्गः क्षतजेन समुक्षितः।
रुधिरं परिसुस्राव गिरिः प्रस्रवणं यथा॥ **6.67.121**॥ 2822

स तीव्रेण च कोपेन रुधिरेण च मूर्च्छितः।
वानरान् राक्षसानृक्षान् खादन् स परिधावति॥ **6.67.122**॥ 2823

अथ शृङ्गं समाविध्य भीमं भीमपराक्रमः।
चिक्षेप राममुद्दिश्य बलवानन्तकोपमः॥ **6.67.123**॥ 2824

अप्राप्तमन्तरा रामः सप्तभिस्तमजिह्मगैः।
चिच्छेद गिरिशृङ्गं तं पुनः सन्धाय कार्मुकम्॥ **6.67.124**॥ 2825

ततस्तु रामो धर्मात्मा तस्य शृङ्गं महत् तदा।
शरैः काञ्चनचित्राङ्गैश्चिच्छेद भरताग्रजः॥ **6.67.125**॥ 2826

तन्मेरुशिखराकारं द्योतमानमिव श्रिया।
द्वे शते वानराणां च पतमानमपातयत्॥ **6.67.126**॥ 2827

तस्मिन् काले स धर्मात्मा लक्ष्मणो राममब्रवीत्।
कुम्भकर्णवधे युक्तो योगान् परिमृशन् बहून्॥ **6.67.127**॥ 2828

नैवायं वानरान् राजन् न विजानाति राक्षसान्।
मत्तः शोणितगन्धेन स्वान् परांश्चैव खादति॥ **6.67.128**॥ 2829

साध्वेनमधिरोहन्तु सर्वतो वानरर्षभाः।
यूथपाश्च यथा मुख्यास्तिष्ठन्त्वस्मिन् समन्ततः॥ **6.67.129**॥ 2830

अद्यायं दुर्मतिः काले गुरुभारप्रपीडितः।
प्रचरन् राक्षसो भूमौ नान्यान् हन्यात् प्लवङ्गमान्॥ **6.67.130**॥ 2831

तस्य तद् वचनं श्रुत्वा राजपुत्रस्य धीमतः।
ते समारुरुहुर्हृष्टाः कुम्भकर्णं महाबलाः॥ **6.67.131**॥ 2832

कुम्भकर्णस्तु सङ्क्रुद्धः समारूढः प्लवङ्गमैः।
व्यधूनयत् तान् वेगेन दुष्टहस्तीव हस्तिपान्॥ **6.67.132**॥ 2833

तान् दृष्ट्वा निर्धुतान् रामो रुष्टोऽयमिति राक्षसम्।
समुत्पपात वेगेन धनुरुत्तममाददे॥ **6.67.133**॥ 2834

क्रोधरक्तेक्षणो धीरो निर्दहन्निव चक्षुषा।
राघवो राक्षसं वेगादभिदुद्राव वेगितः।
यूथपान् हर्षयन् सर्वान् कुम्भकर्णबलार्दितान्॥ **6.67.134**॥ 2835

स चापमादाय भुजङ्गकल्पं
दृढज्यमुग्रं तपनीयचित्रम्।
हरीन् समाश्वास्य समुत्पपात
रामो निबद्धोत्तमतूणबाणः॥ **6.67.135**॥ 2836

स वानरगणैस्तैस्तु वृतः परमदुर्जयैः।
लक्ष्मणानुचरो वीरः सम्प्रतस्थे महाबलः॥ **6.67.136**॥ 2837

स ददर्श महात्मानं किरीटिनमरिन्दमम्।
शोणिताप्लुतरक्ताक्षं कुम्भकर्णं महाबलः॥ **6.67.137**॥ 2838

सर्वान् समभिधावन्तं यथा रुष्टं दिशागजम्।
मार्गमाणं हरीन् क्रुद्धं राक्षसैः परिवारितम्॥ **6.67.138**॥ 2839

विन्ध्यमन्दरसङ्काशं काञ्चनाङ्गदभूषणम्।
स्रवन्तं रुधिरं वक्त्राद् वर्षमेघमिवोत्थितम्॥ **6.67.139**॥ 2840

जिह्वया परिलिह्यन्तं सृक्किणी शोणितोक्षिते।
मृद्नन्तं वानरानीकं कालान्तकयमोपमम्॥ **6.67.140**॥ 2841

तं दृष्ट्वा राक्षसश्रेष्ठं प्रदीप्तानलवर्चसम्।
विस्फारयामास तदा कार्मुकं पुरुषर्षभः॥ **6.67.141**॥ 2842

स तस्य चापनिर्घोषात् कुपितो राक्षसर्षभः।
अमृष्यमाणस्तं घोषमभिदुद्राव राघवम्॥ **6.67.142**॥ 2843

ततस्तु वातोद्धतमेघकल्पं
भुजङ्गराजोत्तमभोगबाहुः।
तमापतन्तं धरणीधराभ -
मुवाच रामो युधि कुम्भकर्णम्॥ **6.67.143**॥ 2844

आगच्छ रक्षोऽधिप मा विषाद -
मवस्थितोऽहं प्रगृहीतचापः।
अवेहि मां शक्रसपत्न रामं
मया मुहूर्ताद् भविता विचेताः॥ **6.67.144**॥ 2845

रामोऽयमिति विज्ञाय जहास विकृतस्वनम्।
अभ्यधावत सङ्क्रुद्धो हरीन् विद्रावयन् रणे॥ **6.67.145**॥ 2846

दारयन्निव सर्वेषां हृदयानि वनौकसाम्।
प्रहस्य विकृतं भीमं स मेघस्तनितोपमम्॥ **6.67.146**॥ 2847

कुम्भकर्णो महातेजा राघवं वाक्यमब्रवीत्।
नाहं विराधो विज्ञेयो न कबन्धः खरो न च।
न वाली न च मारीचः कुम्भकर्णः समागतः॥ **6.67.147**॥ 2848

पश्य मे मुद्गरं भीमं सर्वं कालायसं महत्।
अनेन निर्जिता देवा दानवाश्च पुरा मया॥ **6.67.148**॥ 2849

विकर्णनास इति मां नावज्ञातुं त्वमर्हसि।
स्वल्पापि हि न मे पीडा कर्णनासाविनाशनात्॥ **6.67.149**॥ 2850

दर्शयेक्ष्वाकुशार्दूल वीर्यं गात्रेषु मेऽनघ।
ततस्त्वां भक्षयिष्यामि दृष्टपौरुषविक्रमम्॥ **6.67.150**॥ 2851

स कुम्भकर्णस्य वचो निशम्य
रामः सुपुङ्खान् विससर्ज बाणान्।
तैराहतो वज्रसमप्रवेगै -
र्न चुक्षुभे न व्यथते सुरारिः॥ **6.67.151**॥ 2852

यैः सायकैः सालवरा निकृत्ता
वाली हतो वानरपुङ्गवश्च।
ते कुम्भकर्णस्य तदा शरीरं
वज्रोपमा न व्यथयाम्प्रचक्रुः॥ **6.67.152**॥ 2853

स वारिधारा इव सायकांस्तान्
पिबञ्शरीरेण महेन्द्रशत्रुः।
जघान रामस्य शरप्रवेगं
व्याविध्य तं मुद्गरमुग्रवेगम्॥ **6.67.153**॥ 2854

ततस्तु रक्षः क्षतजानुलिप्तं
वित्रासनं देवमहाचमूनाम्।
व्याविध्य तं मुद्गरमुग्रवेगं
विद्रावयामास चमूं हरीणाम्॥ **6.67.154**॥ 2855

वायव्यमादाय ततोऽपरास्त्रं
रामः प्रचिक्षेप निशाचराय।
समुद्गरं तेन जहार बाहुं
स कृत्तबाहुस्तुमुलं ननाद॥ **6.67.155**॥ 2856

स तस्य बाहुर्गिरिशृङ्गकल्पः
समुद्गरो राघवबाणकृत्तः।
पपात तस्मिन् हरिराजसैन्ये
जघान तां वानरवाहिनीं च॥ **6.67.156**॥ 2857

ते वानरा भग्नहतावशेषाः
पर्यन्तमाश्रित्य तदा विषण्णाः।
प्रपीडिताङ्गा ददृशुः सुघोरं
नरेन्द्ररक्षोऽधिपसन्निपातम्॥ **6.67.157**॥ 2858

स कुम्भकर्णोऽस्त्रनिकृत्तबाहु -
र्महासिकृत्ताग्र इवाचलेन्द्रः।
उत्पाटयामास करेण वृक्षं
ततोऽभिदुद्राव रणे नरेन्द्रम्॥ **6.67.158**॥ 2859

तं तस्य बाहुं सहतालवृक्षं
समुद्यतं पन्नगभोगकल्पम्।
ऐन्द्रास्त्रयुक्तेन जघान रामो
बाणेन जाम्बूनदचित्रितेन॥ **6.67.159**॥ 2860

स कुम्भकर्णस्य भुजो निकृत्तः
पपात भूमौ गिरिसन्निकाशः।
विचेष्टमानो निजघान वृक्षा -
ञ्शैलाञ्शिलावानरराक्षसांश्च॥ **6.67.160**॥ 2861

तं छिन्नबाहुं समवेक्ष्य रामः
समापतन्तं सहसा नदन्तम्।
द्वावर्धचन्द्रौ निशितौ प्रगृह्य
चिच्छेद पादौ युधि राक्षसस्य॥ **6.67.161**॥ 2862

तौ तस्य पादौ प्रदिशो दिशश्च
गिरेर्गुहाश्चैव महार्णवं च।
लङ्कां च सेनां कपिराक्षसानां
विनादयन्तौ विनिपेततुश्च॥ **6.67.162**॥ 2863

निकृत्तबाहुर्विनिकृत्तपादो
विदार्य वक्त्रं वडवामुखाभम्।
दुद्राव रामं सहसाभिगर्जन्
राहुर्यथा चन्द्रमिवान्तरिक्षे॥ **6.67.163**॥ 2864

अपूरयत् तस्य मुखं शिताग्रै
रामः शरैर्हेमपिनद्धपुङ्खैः।
सम्पूर्णवक्त्रो न शशाक वक्तुं
चुकूज कृच्छ्रेण मुमूर्च्छ चापि॥ **6.67.164**॥ 2865

अथाददे सूर्यमरीचिकल्पं
स ब्रह्मदण्डान्तककालकल्पम्।
अरिष्टमैन्द्रं निशितं सुपुङ्खं
रामः शरं मारुततुल्यवेगम्॥ **6.67.165**॥ 2866

तं वज्रजाम्बूनदचारुपुङ्खं
प्रदीप्तसूर्यज्वलनप्रकाशम्।
महेन्द्रवज्राशनितुल्यवेगं
रामः प्रचिक्षेप निशाचराय॥ **6.67.166**॥ 2867

स सायको राघवबाहुचोदितो
दिशःस्वभासा दश सम्प्रकाशयन्।
विधूमवैश्वानरभीमदर्शनो
जगाम शक्राशनिभीमविक्रमः॥ **6.67.167**॥ 2868

स तन्महापर्वतकूटसन्निभं
सुवृत्तदंष्ट्रं चलचारुकुण्डलम्।
चकर्त रक्षोऽधिपतेः शिरस्तदा
यथैव वृत्रस्य पुरा पुरन्दरः॥ **6.67.168**॥ 2869

कुम्भकर्णशिरो भाति कुण्डलालङ्कृतं महत्।
आदित्येऽभ्युदिते रात्रौ मध्यस्थ इव चन्द्रमाः॥ **6.67.169**॥ 2870

तद् रामबाणाभिहतं पपात
रक्षःशिरः पर्वतसन्निकाशम्।
बभञ्ज चर्यागृहगोपुराणि
प्राकारमुच्चं तमपातयच्च॥ **6.67.170**॥ 2871

तच्चातिकायं हिमवत् प्रकाशं
रक्षस्तदा तोयनिधौ पपात।
ग्राहान् परान् मीनवरान् भुजङ्गान्
ममर्द भूमिं च तथा विवेश॥ **6.67.171**॥ 2872

तस्मिन् हते ब्राह्मणदेवशत्रौ
महाबले संयति कुम्भकर्णे।
चचाल भूर्भूमिधराश्च सर्वे
हर्षाच्च देवास्तुमुलं प्रणेदुः॥ **6.67.172**॥ 2873

ततस्तु देवर्षिमहर्षिपन्नगाः
सुराश्च भूतानि सुपर्णगुह्यकाः।

सयक्षगन्धर्वगणा नभोगताः
प्रहर्षिता रामपराक्रमेण ॥ **6.67.173** ॥ 2874

ततस्तु ते तस्य वधेन भूरिणा
मनस्विनो नैर्ऋतराजबान्धवाः।
विनेदुरुच्चैर्व्यथिता रघूत्तमं
हरिं समीक्ष्यैव यथा मतङ्गजाः ॥ **6.67.174** ॥ 2875

स देवलोकस्य तमो निहत्य
सूर्यो यथा राहुमुखाद् विमुक्तः।
तथा व्यभासीद्धरिसैन्यमध्ये
निहत्य रामो युधि कुम्भकर्णम् ॥ **6.67.175** ॥ 2876

प्रहर्षमीयुर्बहवश्च वानराः
प्रबुद्धपद्मप्रतिमैरिवाननैः।
अपूजयन् राघवमिष्टभागिनं
हते रिपौ भीमबले नृपात्मजम् ॥ **6.67.176** ॥ 2877

स कुम्भकर्णं सुरसैन्यमर्दनं
महत्सु युद्धेषु कदाचनाजितम्।
ननन्द हत्वा भरताग्रजो रणे
महासुरं वृत्रमिवामराधिपः ॥ **6.67.177** ॥ 2878

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तषष्टितमः सर्गः ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टषष्टितमः सर्गः ॥

कुम्भकर्णवधं श्रुत्वा रावणस्य विलापः

कुम्भकर्णं हतं दृष्ट्वा राघवेण महात्मना।
राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन्॥ **6.68.1**॥ 2879

राजन् स कालसङ्काशः संयुक्तः कालकर्मणा।
विद्राव्य वानरीं सेनां भक्षयित्वा च वानरान्॥ **6.68.2**॥ 2880

प्रतपित्वा मुहूर्तं तु प्रशान्तो रामतेजसा।
कायेनार्धप्रविष्टेन समुद्रं भीमदर्शनम्॥ **6.68.3**॥ 2881

निकृत्तनासाकर्णेन विक्षरद्रुधिरेण च।
रुद्ध्वा द्वारं शरीरेण लङ्कायाः पर्वतोपमः॥ **6.68.4**॥ 2882

कुम्भकर्णस्तव भ्राता काकुत्स्थशरपीडितः।
अगण्डभूतो विवृतो दावदग्ध इव द्रुमः॥ **6.68.5**॥ 2883

श्रुत्वा विनिहतं सङ्ख्ये कुम्भकर्णं महाबलम्।
रावणः शोकसन्तप्तो मुमोह च पपात च॥ **6.68.6**॥ 2884

पितृव्यं निहतं श्रुत्वा देवान्तकनरान्तकौ।
त्रिशिराश्चातिकायश्च रुरुदुः शोकपीडिताः॥ **6.68.7**॥ 2885

भ्रातरं निहतं श्रुत्वा रामेणाक्लिष्टकर्मणा।
महोदरमहापार्श्वौ शोकाक्रान्तौ बभूवतुः॥ **6.68.8**॥ 2886

ततः कृच्छ्रात् समासाद्य संज्ञां राक्षसपुङ्गवः।
कुम्भकर्णवधाद् दीनो विललापाकुलेन्द्रियः॥ **6.68.9**॥ 2887

हा वीर रिपुदर्पघ्न कुम्भकर्ण महाबल।
त्वं मां विहाय वै दैवाद् यातोऽसि यमसादनम्॥ **6.68.10**॥ 2888

मम शल्यमनुद्धृत्य बान्धवानां महाबल।
शत्रुसैन्यं प्रताप्यैकः क्व मां सन्त्यज्य गच्छसि॥ **6.68.11**॥ 2889

इदानीं खल्वहं नास्मि यस्य मे पतितो भुजः।
दक्षिणोऽयं समाश्रित्य न बिभेमि सुरासुरात्॥ **6.68.12**॥ 2890

कथमेवंविधो वीरो देवदानवदर्पहा।
कालाग्निप्रतिमो ह्यद्य राघवेण रणे हतः॥ **6.68.13**॥ 2891

यस्य ते वज्रनिष्पेषो न कुर्याद् व्यसनं सदा।
स कथं रामबाणार्तः प्रसुप्तोऽसि महीतले॥ **6.68.14**॥ 2892

एते देवगणाः सार्धमृषिभिर्गगने स्थिताः।
निहतं त्वां रणे दृष्ट्वा निनदन्ति प्रहर्षिताः॥ **6.68.15**॥ 2893

ध्रुवमद्यैव संहृष्टा लब्धलक्षाः प्लवङ्गमाः।
आरोक्ष्यन्तीह दुर्गाणि लङ्काद्वाराणि सर्वशः॥ **6.68.16**॥ 2894

राज्येन नास्ति मे कार्यं किं करिष्यामि सीतया।
कुम्भकर्णविहीनस्य जीविते नास्ति मे मतिः॥ **6.68.17**॥ 2895

यद्यहं भ्रातृहन्तारं न हन्मि युधि राघवम्।
ननु मे मरणं श्रेयो न चेदं व्यर्थजीवितम्॥ **6.68.18**॥ 2896

अद्यैव तं गमिष्यामि देशं यत्रानुजो मम।
नहि भ्रातॄन् समुत्सृज्य क्षणं जीवितुमुत्सहे॥ **6.68.19**॥ 2897

देवा हि मां हसिष्यन्ति दृष्ट्वा पूर्वापकारिणम्।
कथमिन्द्रं जयिष्यामि कुम्भकर्ण हते त्वयि॥ **6.68.20**॥ 2898

तदिदं मामनुप्राप्तं विभीषणवचः शुभम्।
यदज्ञानान्मया तस्य न गृहीतं महात्मनः॥ **6.68.21**॥ 2899

विभीषणवचस्तावत् कुम्भकर्णप्रहस्तयोः।
विनाशोऽयं समुत्पन्नो मां व्रीडयति दारुणः॥ **6.68.22**॥ 2900

तस्यायं कर्मणः प्राप्तो विपाको मम शोकदः।
यन्मया धार्मिकः श्रीमान् स निरस्तो विभीषणः॥ **6.68.23**॥ 2901

इति बहुविधमाकुलान्तरात्मा
कृपणमतीव विलप्य कुम्भकर्णम्।
न्यपतदपि दशाननो भृशार्त -
स्तमनुजमिन्द्ररिपुं हतं विदित्वा॥ **6.68.24**॥ 2902

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टषष्टितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनसप्ततितमः सर्गः ॥

रावणस्य पुत्राणां बन्धूनां च युद्धाय प्रस्थानमङ्गदेन नरान्तकस्य वधश्च

एवं विलपमानस्य रावणस्य दुरात्मनः।
श्रुत्वा शोकाभिभूतस्य त्रिशिरा वाक्यमब्रवीत्॥ **6.69.1**॥ 2903

एवमेव महावीर्यो हतो नस्तातमध्यमः।
न तु सत्पुरुषा राजन् विलपन्ति यथा भवान्॥ **6.69.2**॥ 2904

नूनं त्रिभुवनस्यापि पर्याप्तस्त्वमसि प्रभो।
स कस्मात् प्राकृत इव शोचस्यात्मानमीदृशम्॥ **6.69.3**॥ 2905

ब्रह्मदत्तास्ति ते शक्तिः कवचं सायको धनुः।
सहस्रखरसंयुक्तो रथो मेघसमस्वनः॥ **6.69.4**॥ 2906

त्वयासकृद्धि शस्त्रेण विशस्ता देवदानवाः।
स सर्वायुधसम्पन्नो राघवं शास्तुमर्हसि॥ **6.69.5**॥ 2907

कामं तिष्ठ महाराज निर्गमिष्याम्यहं रणे।
उद्धरिष्यामि ते शत्रून् गरुडः पन्नगानिव॥ **6.69.6**॥ 2908

शम्बरो देवराजेन नरको विष्णुना यथा।
तथाद्य शयिता रामो मया युधि निपातितः॥ **6.69.7**॥ 2909

श्रुत्वा त्रिशिरसो वाक्यं रावणो राक्षसाधिपः।
पुनर्जातमिवात्मानं मन्यते कालचोदितः॥ **6.69.8**॥ 2910

श्रुत्वा त्रिशिरसो वाक्यं देवान्तकनरान्तकौ।
अतिकायश्च तेजस्वी बभूवुर्युद्धहर्षिताः॥ **6.69.9**॥ 2911

ततोऽहमहमित्येवं गर्जन्तो नैर्ऋतर्षभाः।
रावणस्य सुता वीराः शक्रतुल्यपराक्रमाः॥ **6.69.10**॥ 2912

अन्तरिक्षगताः सर्वे सर्वे मायाविशारदाः।
सर्वे त्रिदशदर्पघ्नाः सर्वे समरदुर्मदाः॥ **6.69.11**॥ 2913

सर्वे सुबलसम्पन्नाः सर्वे विस्तीर्णकीर्तयः।
सर्वे समरमासाद्य न श्रूयन्ते स्म निर्जिताः॥ **6.69.12**॥ 2914

देवैरपि सगन्धर्वैः सकिन्नरमहोरगैः।
सर्वेऽस्त्रविदुषो वीराः सर्वे युद्धविशारदाः।
सर्वे प्रवरविज्ञानाः सर्वे लब्धवरास्तथा॥ **6.69.13**॥ 2915

स तैस्तथा भास्करतुल्यवर्चसैः
सुतैर्वृतः शत्रुबलश्रियार्दनैः।
रराज राजा मघवान् यथामरै -
र्वृतो महादानवदर्पनाशनैः॥ **6.69.14**॥ 2916

स पुत्रान् सम्परिष्वज्य भूषयित्वा च भूषणैः।
आशीर्भिश्च प्रशस्ताभिः प्रेषयामास वै रणे॥ **6.69.15**॥ 2917

युद्धोन्मत्तं च मत्तं च भ्रातरौ चापि रावणः।
रक्षणार्थं कुमाराणां प्रेषयामास संयुगे॥ **6.69.16**॥ 2918

तेऽभिवाद्य महात्मानं रावणं लोकरावणम्।
कृत्वा प्रदक्षिणं चैव महाकायाः प्रतस्थिरे॥ **6.69.17**॥ 2919

सर्वौषधीभिर्गन्धैश्च समालभ्य महाबलाः।
निर्जग्मुर्नैर्ऋतश्रेष्ठाः षडेते युद्धकाङ्क्षिणः॥ **6.69.18**॥ 2920

त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ।
महोदरमहापार्श्वौ निर्जग्मुः कालचोदिताः॥ **6.69.19**॥ 2921

ततः सुदर्शनं नागं नीलजीमूतसन्निभम्।
ऐरावतकुले जातमारुरोह महोदरः॥ **6.69.20**॥ 2922

सर्वायुधसमायुक्तस्तूणीभिश्चाप्यलङ्कृतः।
रराज गजमास्थाय सवितेवास्तमूर्धनि॥ **6.69.21**॥ 2923

हयोत्तमसमायुक्तं सर्वायुधसमाकुलम्।
आरुरोह रथश्रेष्ठं त्रिशिरा रावणात्मजः॥ **6.69.22**॥ 2924

त्रिशिरा रथमास्थाय विरराज धनुर्धरः।
सविद्युदुल्कः सज्वालः सेन्द्रचाप इवाम्बुदः॥ **6.69.23**॥ 2925

त्रिभिः किरीटैस्त्रिशिराः शुशुभे स रथोत्तमे।
हिमवानिव शैलेन्द्रस्त्रिभिः काञ्चनपर्वतैः॥ **6.69.24**॥ 2926

अतिकायोऽतितेजस्वी राक्षसेन्द्रसुतस्तदा।
आरुरोह रथश्रेष्ठं श्रेष्ठः सर्वधनुष्मताम्॥ **6.69.25**॥ 2927

सुचक्राक्षं सुसंयुक्तं स्वनुकर्षं सुकूबरम्।
तूणीबाणासनैर्दीप्तं प्रासासिपरिघाकुलम्॥ **6.69.26**॥ 2928

स काञ्चनविचित्रेण किरीटेन विराजता।
भूषणैश्च बभौ मेरुः प्रभाभिरिव भासयन्॥ **6.69.27**॥ 2929

स रराज रथे तस्मिन् राजसूनुर्महाबलः।
वृतो नैर्ऋतशार्दूलैर्वज्रपाणिरिवामरैः॥ **6.69.28**॥ 2930

हयमुच्चैःश्रवःप्रख्यं श्वेतं कनकभूषणम्।
मनोजवं महाकायमारुरोह नरान्तकः॥ **6.69.29**॥ 2931

गृहीत्वा प्रासमुल्काभं विरराज नरान्तकः।
शक्तिमादाय तेजस्वी गुहः शिखिगतो यथा॥ **6.69.30**॥ 2932

देवान्तकः समादाय परिघं हेमभूषणम्।
परिगृह्य गिरिं दोर्भ्यां वपुर्विष्णोर्विडम्बयन्॥ **6.69.31**॥ 2933

महापार्श्वो महातेजा गदामादाय वीर्यवान्।
विरराज गदापाणिः कुबेर इव संयुगे॥ **6.69.32**॥ 2934

ते प्रतस्थुर्महात्मानोऽमरावत्याः सुरा इव।
तान् गजैश्च तुरङ्गैश्च रथैश्चाम्बुदनिःस्वनैः॥ **6.69.33**॥ 2935

अनूत्पेतुर्महात्मानो राक्षसाः प्रवरायुधाः।
ते विरेजुर्महात्मानः कुमाराः सूर्यवर्चसः॥ **6.69.34**॥ 2936

किरीटिनः श्रिया जुष्टा ग्रहा दीप्ता इवाम्बरे।
प्रगृहीता बभौ तेषां शस्त्राणामावलिः सिता॥ **6.69.35**॥ 2937

शरदभ्रप्रतीकाशा हंसावलिरिवाम्बरे।
मरणं वापि निश्चित्य शत्रूणां वा पराजयम्॥ **6.69.36**॥ 2938

इति कृत्वा मतिं वीराः सञ्जग्मुः संयुगार्थिनः।
जगर्जुश्च प्रणेदुश्च चिक्षिपुश्चापि सायकान्॥ **6.69.37**॥ 2939

जगृहुश्च महात्मानो निर्यान्तो युद्धदुर्मदाः।
क्ष्वेडितास्फोटितानां वै सञ्चचालेव मेदिनी॥ **6.69.38**॥ 2940

रक्षसां सिंहनादैश्च संस्फोटितमिवाम्बरम्।
तेऽभिनिष्क्रम्य मुदिता राक्षसेन्द्रा महाबलाः॥ **6.69.39**॥ 2941

ददृशुर्वानरानीकं समुद्यतशिलानगम्।
हरयोऽपि महात्मानो ददृशू राक्षसं बलम्॥ **6.69.40**॥ 2942

हस्त्यश्वरथसम्बाधं किङ्किणीशतनादितम्।
नीलजीमूतसङ्काशं समुद्यतमहायुधम्॥ **6.69.41**॥ 2943

दीप्तानलरविप्रख्यैर्नैर्ऋतैः सर्वतो वृतम्।
तद् दृष्ट्वा बलमायातं लब्धलक्षाः प्लवङ्गमाः॥ **6.69.42**॥ 2944

समुद्यतमहाशैलाः सम्प्रणेदुर्मुहुर्मुहुः।
अमृष्यमाणा रक्षांसि प्रतिनर्दन्त वानराः॥ **6.69.43**॥ 2945

ततः समुत्कृष्टरवं निशम्य
रक्षोगणा वानरयूथपानाम्।
अमृष्यमाणाः परहर्षमुग्रं
महाबला भीमतरं प्रणेदुः॥ **6.69.44**॥ 2946

ते राक्षसबलं घोरं प्रविश्य हरियूथपाः।
विचेरुरुद्यतैः शैलैर्नगाः शिखरिणो यथा॥ **6.69.45**॥ 2947

केचिदाकाशमाविश्य केचिदुर्व्यां प्लवङ्गमाः।
रक्षःसैन्येषु सङ्क्रुद्धाः केचिद् द्रुमशिलायुधाः॥ **6.69.46**॥ 2948

द्रुमांश्च विपुलस्कन्धान् गृह्य वानरपुङ्गवाः।
तद् युद्धमभवद् घोरं रक्षोवानरसङ्कुलम्॥ **6.69.47**॥ 2949

ते पादपशिलाशैलैश्चक्रुर्वृष्टिमनूपमाम्।
बाणौघैर्वार्यमाणाश्च हरयो भीमविक्रमाः॥ **6.69.48**॥ 2950

सिंहनादान् विनेदुश्च रणे राक्षसवानराः।
शिलाभिश्चूर्णयामासुर्यातुधानान् प्लवङ्गमाः॥ **6.69.49**॥ 2951

निर्जघ्नुः संयुगे क्रुद्धाः कवचाभरणावृतान्।
केचिद् रथगतान् वीरान् गजवाजिगतानपि॥ **6.69.50**॥ 2952

निर्जघ्नुः सहसाऽऽप्लुत्य यातुधानान् प्लवङ्गमाः।
शैलशृङ्गान्विताङ्गास्ते मुष्टिभिर्वान्तलोचनाः॥ **6.69.51**॥ 2953

चेलुः पेतुश्च नेदुश्च तत्र राक्षसपुङ्गवाः।
राक्षसाश्च शरैस्तीक्ष्णैर्बिभिदुः कपिकुञ्जरान्॥ **6.69.52**॥ 2954

शूलमुद्गरखड्गैश्च जघ्नुः प्रासैश्च शक्तिभिः।
अन्योन्यं पातयामासुः परस्परजयैषिणः॥ **6.69.53**॥ 2955

रिपुशोणितदिग्धाङ्गास्तत्र वानरराक्षसाः।
ततः शैलैश्च खड्गैश्च विसृष्टैर्हरिराक्षसैः॥ **6.69.54**॥ 2956

मुहूर्तेनावृता भूमिरभवच्छोणितोक्षिता।
विकीर्णैः पर्वताकारै रक्षोभिरभिमर्दितैः।
आसीद् वसुमती पूर्णा तदा युद्धमदान्वितैः॥ **6.69.55**॥ 2957

आक्षिप्ताः क्षिप्यमाणाश्च भग्नशैलाश्च वानराः।
पुनरङ्गैस्तदा चक्रुरासन्ना युद्धमद्भुतम्॥ **6.69.56**॥ 2958

वानरान् वानरैरेव जघ्नुस्ते नैर्ऋतर्षभाः।
राक्षसान् राक्षसैरेव जघ्नुस्ते वानरा अपि॥ **6.69.57**॥ 2959

आक्षिप्य च शिलाः शैलाञ्जघ्नुस्ते राक्षसास्तदा।
तेषां चाच्छिद्य शस्त्राणि जघ्नू रक्षांसि वानराः॥ **6.69.58**॥ 2960

निर्जघ्नुः शैलशृङ्गैश्च बिभिदुश्च परस्परम्।
सिंहनादान् विनेदुश्च रणे राक्षसवानराः॥ **6.69.59**॥ 2961

छिन्नवर्मतनुत्राणा राक्षसा वानरैर्हताः।
रुधिरं प्रसृतास्तत्र रससारमिव द्रुमाः॥ **6.69.60**॥ 2962

रथेन च रथं चापि वारणेनापि वारणम्।
हयेन च हयं केचिन्निर्जघ्नुर्वानरा रणे॥ **6.69.61**॥ 2963

क्षुरप्रैरर्धचन्द्रैश्च भल्लैश्च निशितैः शरैः।
राक्षसा वानरेन्द्राणां बिभिदुः पादपाञ्शिलाः॥ **6.69.62**॥ 2964

विकीर्णाः पर्वतास्तैश्च द्रुमच्छिन्नैश्च संयुगे।
हतैश्च कपिरक्षोभिर्दुर्गमा वसुधाभवत्॥ **6.69.63**॥ 2965

ते वानरा गर्वितहृष्टचेष्टाः
सङ्ग्राममासाद्य भयं विमुच्य।
युद्धं स्म सर्वे सह राक्षसैस्ते
नानायुधाश्चक्रुरदीनसत्त्वाः॥ **6.69.64**॥ 2966

तस्मिन् प्रवृत्ते तुमुले विमर्दे
प्रहृष्यमाणेषु वलीमुखेषु।
निपात्यमानेषु च राक्षसेषु
महर्षयो देवगणाश्च नेदुः॥ **6.69.65**॥ 2967

ततो हयं मारुततुल्यवेग -
मारुह्य शक्तिं निशितां प्रगृह्य।
नरान्तको वानरसैन्यमुग्रं
महार्णवं मीन इवाविवेश॥ **6.69.66**॥ 2968

स वानरान् सप्त शतानि वीरः
प्रासेन दीप्तेन विनिर्बिभेद।
एकः क्षणेनेन्द्ररिपुर्महात्मा
जघान सैन्यं हरिपुङ्गवानाम्॥ **6.69.67**॥ 2969

ददृशुश्च महात्मानं हयपृष्ठप्रतिष्ठितम्।
चरन्तं हरिसैन्येषु विद्याधरमहर्षयः॥ **6.69.68**॥ 2970

स तस्य ददृशे मार्गो मांसशोणितकर्दमः।
पतितैः पर्वताकारैर्वानरैरभिसंवृतः॥ **6.69.69**॥ 2971

यावद् विक्रमितुं बुद्धिं चक्रुः प्लवगपुङ्गवाः।
तावदेतानतिक्रम्य निर्बिभेद नरान्तकः॥ **6.69.70**॥ 2972

ज्वलन्तं प्रासमुद्यम्य सङ्ग्रामाग्रे नरान्तकः।
ददाह हरिसैन्यानि वनानीव विभावसुः॥ **6.69.71**॥ 2973

यावदुत्पाटयामासुर्वृक्षाञ्शैलान् वनौकसः।
तावत् प्रासहताः पेतुर्वज्रकृत्ता इवाचलाः॥ **6.69.72**॥ 2974

दिक्षु सर्वासु बलवान् विचचार नरान्तकः।
प्रमृद्नन् सर्वतो युद्धे प्रावृड्काले यथानिलः॥ **6.69.73**॥ 2975

न शेकुर्धावितुं वीरा न स्थातुं स्पन्दितुं भयात्।
उत्पतन्तं स्थितं यान्तं सर्वान् विव्याध वीर्यवान्॥ **6.69.74**॥ 2976

एकेनान्तककल्पेन प्रासेनादित्यतेजसा।
भग्नानि हरिसैन्यानि निपेतुर्धरणीतले॥ **6.69.75**॥ 2977

वज्रनिष्पेषसदृशं प्रासस्याभिनिपातनम्।
न शेकुर्वानराः सोढुं ते विनेदुर्महास्वनम्॥ **6.69.76**॥ 2978

पततां हरिवीराणां रूपाणि प्रचकाशिरे।
वज्रभिन्नाग्रकूटानां शैलानां पततामिव॥ **6.69.77**॥ 2979

ये तु पूर्वं महात्मानः कुम्भकर्णेन पातिताः।
ते स्वस्था वानरश्रेष्ठाः सुग्रीवमुपतस्थिरे॥ **6.69.78**॥ 2980

प्रेक्षमाणः स सुग्रीवो ददृशे हरिवाहिनीम्।
नरान्तकभयत्रस्तां विद्रवन्तीं यतस्ततः॥ **6.69.79**॥ 2981

विद्रुतां वाहिनीं दृष्ट्वा स ददर्श नरान्तकम्।
गृहीतप्रासमायान्तं हयपृष्ठप्रतिष्ठितम्॥ **6.69.80**॥ 2982

दृष्ट्वोवाच महातेजाः सुग्रीवो वानराधिपः।
कुमारमङ्गदं वीरं शक्रतुल्यपराक्रमम्॥ **6.69.81**॥ 2983

गच्छैनं राक्षसं वीरं योऽसौ तुरगमास्थितः।
क्षोभयन्तं हरिबलं क्षिप्रं प्राणैर्वियोजय॥ **6.69.82**॥ 2984

स भर्तुर्वचनं श्रुत्वा निष्पपाताङ्गदस्तदा।
अनीकान्मेघसङ्काशादंशुमानिव वीर्यवान्॥ **6.69.83**॥ 2985

शैलसङ्घातसङ्काशो हरीणामुत्तमोऽङ्गदः।
रराजाङ्गदसन्नद्धः सधातुरिव पर्वतः॥ **6.69.84**॥ 2986

निरायुधो महातेजाः केवलं नखदंष्ट्रवान्।
नरान्तकमभिक्रम्य वालिपुत्रोऽब्रवीद् वचः॥ **6.69.85**॥ 2987

तिष्ठ किं प्राकृतैरेभिर्हरिभिस्त्वं करिष्यसि।
अस्मिन् वज्रसमस्पर्शं प्रासं क्षिप्र ममोरसि॥ **6.69.86**॥ 2988

अङ्गदस्य वचः श्रुत्वा प्रचुक्रोध नरान्तकः।
सन्दश्य दशनैरोष्ठं निःश्वस्य च भुजङ्गवत्।
अभिगम्याङ्गदं क्रुद्धो वालिपुत्रं नरान्तकः॥ **6.69.87**॥ 2989

स प्रासमाविध्य तदाङ्गदाय
समुज्ज्वलन्तं सहसोत्ससर्ज।
स वालिपुत्रोरसि वज्रकल्पे
बभूव भग्नो न्यपतच्च भूमौ॥ **6.69.88**॥ 2990

तं प्रासमालोक्य तदा विभग्नं
सुपर्णकृत्तोरगभोगकल्पम्।
तलं समुद्यम्य स वालिपुत्र -
स्तुरङ्गमस्याभिजघान मूर्ध्नि॥ **6.69.89**॥ 2991

निमग्नपादः स्फुटिताक्षितारो
निष्क्रान्तजिह्वोऽचलसन्निकाशः।
स तस्य वाजी निपपात भूमौ
तलप्रहारेण विकीर्णमूर्धा॥ **6.69.90**॥ 2992

नरान्तकः क्रोधवशं जगाम
हतं तुरङ्गं पतितं समीक्ष्य।
स मुष्टिमुद्यम्य महाप्रभावो
जघान शीर्षे युधि वालिपुत्रम्॥ **6.69.91**॥ 2993

अथाङ्गदो मुष्टिविशीर्णमूर्धा
सुस्राव तीव्रं रुधिरं भृशोष्णम्।
मुहुर्विजज्वाल मुमोह चापि
संज्ञां समासाद्य विसिस्मिये च॥ **6.69.92**॥ 2994

अथाङ्गदो मृत्युसमानवेगं
संवर्त्य मुष्टिं गिरिशृङ्गकल्पम्।
निपातयामास तदा महात्मा
नरान्तकस्योरसि वालिपुत्रः॥ **6.69.93**॥ 2995

स मुष्टिनिर्भिन्ननिमग्नवक्षा
ज्वाला वमञ्शोणितदिग्धगात्रः।
नरान्तको भूमितले पपात
यथाचलो वज्रनिपातभग्नः॥ **6.69.94**॥ 2996

तदान्तरिक्षे त्रिदशोत्तमानां
वनौकसां चैव महाप्रणादः।
बभूव तस्मिन् निहतेऽग्र्यवीर्ये
नरान्तके वालिसुतेन सङ्ख्ये॥ **6.69.95**॥ 2997

अथाङ्गदो राममनःप्रहर्षणं
सुदुष्करं तत् कृतवान् हि विक्रमम्।
विसिष्मिये सोऽप्यति वीर्यविक्रमः
पुनश्च युद्धे स बभूव हर्षितः॥ **6.69.96**॥ 2998

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्ततितमः सर्गः ॥

हनुमता देवान्तकत्रिशिरसोर्वधो नीलेन महोदरस्यर्षभेण महापार्श्वस्य च वधः

नरान्तकं हतं दृष्ट्वा चुक्रुशुर्नैर्ऋतर्षभाः।
देवान्तकस्त्रिमूर्धा च पौलस्त्यश्च महोदरः॥ **6.70.1** ॥ 2999

आरूढो मेघसङ्काशं वारणेन्द्रं महोदरः।
वालिपुत्रं महावीर्यमभिदुद्राव वेगवान्॥ **6.70.2** ॥ 3000

भ्रातृव्यसनसन्तप्तस्तदा देवान्तको बली।
आदाय परिघं घोरमङ्गदं समभिद्रवत्॥ **6.70.3** ॥ 3001

रथमादित्यसङ्काशं युक्तं परमवाजिभिः।
आस्थाय त्रिशिरा वीरो वालिपुत्रमथाभ्यगात्॥ **6.70.4** ॥ 3002

स त्रिभिर्देवदर्पघ्नै राक्षसेन्द्रैरभिद्रुतः।
वृक्षमुत्पाटयामास महाविटपमङ्गदः॥ **6.70.5** ॥ 3003

देवान्तकाय तं वीरश्चिक्षेप सहसाङ्गदः।
महावृक्षं महाशाखं शक्रो दीप्तामिवाशनिम्॥ **6.70.6** ॥ 3004

त्रिशिरास्तं प्रचिच्छेद शरैराशीविषोपमैः।
स वृक्षं कृत्तमालोक्य उत्पपात तदाङ्गदः॥ **6.70.7** ॥ 3005

स ववर्ष ततो वृक्षाञ्शिलाश्च कपिकुञ्जरः।
तान् प्रचिच्छेद सङ्क्रुद्धस्त्रिशिरा निशितैः शरैः॥ **6.70.8**॥ 3006

परिघाग्रेण तान् वृक्षान् बभञ्ज स महोदरः।
त्रिशिराश्चाङ्गदं वीरमभिदुद्राव सायकैः॥ **6.70.9**॥ 3007

गजेन समभिद्रुत्य वालिपुत्रं महोदरः।
जघानोरसि सङ्क्रुद्धस्तोमरैर्वज्रसन्निभैः॥ **6.70.10**॥ 3008

देवान्तकश्च सङ्क्रुद्धः परिघेण तदाङ्गदम्।
उपगम्याभिहत्याशु व्यपचक्राम वेगवान्॥ **6.70.11**॥ 3009

स त्रिभिर्नैर्ऋतश्रेष्ठैर्युगपत् समभिद्रुतः।
न विव्यथे महातेजा वालिपुत्रः प्रतापवान्॥ **6.70.12**॥ 3010

स वेगवान् महावेगं कृत्वा परमदुर्जयः।
तलेन समभिद्रुत्य जघानास्य महागजम्॥ **6.70.13**॥ 3011

तस्य तेन प्रहारेण नागराजस्य संयुगे।
पेततुर्नयने तस्य विननाश स कुञ्जरः॥ **6.70.14**॥ 3012

विषाणं चास्य निष्कृष्य वालिपुत्रो महाबलः।
देवान्तकमभिद्रुत्य ताडयामास संयुगे॥ **6.70.15**॥ 3013

स विह्वलस्तु तेजस्वी वातोद्धूत इव द्रुमः।
लाक्षारससवर्णं च सुस्राव रुधिरं महत्॥ **6.70.16**॥ 3014

अथाश्वास्य महातेजाः कृच्छ्राद् देवान्तको बली।
आविध्य परिघं वेगादाजघान तदाङ्गदम्॥ **6.70.17**॥ 3015

परिघाभिहतश्चापि वानरेन्द्रात्मजस्तदा।
जानुभ्यां पतितो भूमौ पुनरेवोत्पपात ह॥ **6.70.18**॥ 3016

तमुत्पतन्तं त्रिशिरास्त्रिभिर्बाणैरजिह्मगैः।
घोरैर्हरिपतेः पुत्रं ललाटेऽभिजघान ह॥ **6.70.19**॥ 3017

ततोऽङ्गदं परिक्षिप्तं त्रिभिर्नैर्ऋतपुङ्गवैः।
हनूमानथ विज्ञाय नीलश्चापि प्रतस्थतुः॥ **6.70.20**॥ 3018

ततश्चिक्षेप शैलाग्रं नीलस्त्रिशिरसे तदा।
तद् रावणसुतो धीमान् बिभेद निशितैः शरैः॥ **6.70.21**॥ 3019

तद्बाणशतनिर्भिन्नं विदारितशिलातलम्।
सविस्फुलिङ्गं सज्वालं निपपात गिरेः शिरः॥ **6.70.22**॥ 3020

स विजृम्भितमालोक्य हर्षाद् देवान्तको बली।
परिघेणाभिदुद्राव मारुतात्मजमाहवे॥ **6.70.23**॥ 3021

तमापतन्तमुत्पत्य हनूमान् कपिकुञ्जरः।
आजघान तदा मूर्ध्नि वज्रकल्पेन मुष्टिना॥ **6.70.24**॥ 3022

शिरसि प्राहरद् वीरस्तदा वायुसुतो बली।
नादेनाकम्पयच्चैव राक्षसान् स महाकपिः॥ **6.70.25**॥ 3023

स मुष्टिनिष्पिष्टविभिन्नमूर्धा
निर्वान्तदन्ताक्षिविलम्बिजिह्वः।
देवान्तको राक्षसराजसूनु -
र्गतासुरुर्व्यां सहसा पपात॥ **6.70.26**॥ 3024

तस्मिन् हते राक्षसयोधमुख्ये
महाबले संयति देवशत्रौ।

क्रुद्धस्त्रिशीर्षा निशितास्त्रमुग्रं
ववर्ष नीलोरसि बाणवर्षम्॥ **6.70.27**॥ 3025

महोदरस्तु सङ्क्रुद्धः कुञ्जरं पर्वतोपमम्।
भूयः समधिरुह्याशु मन्दरं रश्मिवानिव॥ **6.70.28**॥ 3026

ततो बाणमयं वर्षं नीलस्योपर्यपातयत्।
गिरौ वर्षं तडिच्चक्रचापवानिव तोयदः॥ **6.70.29**॥ 3027

ततः शरौघैरभिवृष्यमाणो
विभिन्नगात्रः कपिसैन्यपालः।
नीलो बभूवाथ विसृष्टगात्रो
विष्टम्भितस्तेन महाबलेन॥ **6.70.30**॥ 3028

ततस्तु नीलः प्रतिलब्धसंज्ञः
शैलं समुत्पाट्य सवृक्षखण्डम्।
ततः समुत्पत्य महोग्रवेगो
महोदरं तेन जघान मूर्ध्नि॥ **6.70.31**॥ 3029

ततः स शैलाभिनिपातभग्नो
महोदरस्तेन महाद्विपेन।
व्यामोहितो भूमितले गतासुः
पपात वज्राभिहतो यथाद्रिः॥ **6.70.32**॥ 3030

पितृव्यं निहतं दृष्ट्वा त्रिशिराश्चापमाददे।
हनूमन्तं च सङ्क्रुद्धो विव्याध निशितैः शरैः॥ **6.70.33**॥ 3031

स वायुसूनुः कुपितश्चिक्षेप शिखरं गिरेः।
त्रिशिरास्तच्छरैस्तीक्ष्णैर्बिभेद बहुधा बली॥ **6.70.34**॥ 3032

तद् व्यर्थं शिखरं दृष्ट्वा द्रुमवर्षं तदा कपिः।
विससर्ज रणे तस्मिन् रावणस्य सुतं प्रति॥ **6.70.35**॥ 3033

तमापतन्तमाकाशे द्रुमवर्षं प्रतापवान्।
त्रिशिरा निशितैर्बाणैश्चिच्छेद च ननाद च॥ **6.70.36**॥ 3034

हनूमांस्तु समुत्पत्य हयं त्रिशिरसस्तदा।
विददार नखैः क्रुद्धो नागेन्द्रं मृगराडिव॥ **6.70.37**॥ 3035

अथ शक्तिं समासाद्य कालरात्रिमिवान्तकः।
चिक्षेपानिलपुत्राय त्रिशिरा रावणात्मजः॥ **6.70.38**॥ 3036

दिवः क्षिप्तामिवोल्कां तां शक्तिं क्षिप्तामसङ्गताम्।
गृहीत्वा हरिशार्दूलो बभञ्ज च ननाद च॥ **6.70.39**॥ 3037

तां दृष्ट्वा घोरसङ्काशां शक्तिं भग्नां हनूमता।
प्रहृष्टा वानरगणा विनेदुर्जलदा यथा॥ **6.70.40**॥ 3038

ततः खड्गं समुद्यम्य त्रिशिरा राक्षसोत्तमः।
निचखान तदा खड्गं वानरेन्द्रस्य वक्षसि॥ **6.70.41**॥ 3039

खड्गप्रहाराभिहतो हनूमान् मारुतात्मजः।
आजघान त्रिमूर्धानं तलेनोरसि वीर्यवान्॥ **6.70.42**॥ 3040

स तलाभिहतस्तेन स्रस्तहस्तायुधो भुवि।
निपपात महातेजास्त्रिशिरास्त्यक्तचेतनः॥ **6.70.43**॥ 3041

स तस्य पततः खड्गं तमाच्छिद्य महाकपिः।
ननाद गिरिसङ्काशस्त्रासयन् सर्वराक्षसान्॥ **6.70.44**॥ 3042

अमृष्यमाणस्तं घोषमुत्पपात निशाचरः।
उत्पत्य च हनूमन्तं ताडयामास मुष्टिना॥ **6.70.45**॥ 3043

तेन मुष्टिप्रहारेण सञ्चुकोप महाकपिः।
कुपितश्च निजग्राह किरीटे राक्षसर्षभम्॥ **6.70.46**॥ 3044

स तस्य शीर्षाण्यसिना शितेन
किरीटजुष्टानि सकुण्डलानि।
क्रुद्धः प्रचिच्छेद सुतोऽनिलस्य
त्वष्टुः सुतस्येव शिरांसि शक्रः॥ **6.70.47**॥ 3045

तान्यायताक्षाण्यगसन्निभानि
प्रदीप्तवैश्वानरलोचनानि।
पेतुः शिरांसीन्द्ररिपोः पृथिव्यां
ज्योतींषि मुक्तानि यथार्कमार्गात्॥ **6.70.48**॥ 3046

तस्मिन् हते देवरिपौ त्रिशीर्षे
हनूमता शक्रपराक्रमेण।
नेदुः प्लवङ्गाः प्रचचाल भूमी
रक्षांस्यथो दुद्रुविरे समन्तात्॥ **6.70.49**॥ 3047

हतं त्रिशिरसं दृष्ट्वा तथैव च महोदरम्।
हतौ प्रेक्ष्य दुराधर्षौ देवान्तकनरान्तकौ॥ **6.70.50**॥ 3048

चुकोप परमामर्षी मत्तो राक्षसपुङ्गवः।
जग्राहार्चिष्मतीं चापि गदां सर्वायसीं तदा॥ **6.70.51**॥ 3049

हेमपट्टपरिक्षिप्तां मांसशोणितफेनिलाम्।
विराजमानां विपुलां शत्रुशोणिततर्पिताम्॥ **6.70.52**॥ 3050

तेजसा सम्प्रदीप्ताग्रां रक्तमाल्यविभूषिताम्।
ऐरावतमहापद्मसार्वभौमभयावहाम्॥ **6.70.53**॥ 3051

गदामादाय सङ्क्रुद्धो मत्तो राक्षसपुङ्गवः।
हरीन् समभिदुद्राव युगान्ताग्निरिव ज्वलन्॥ **6.70.54**॥ 3052

अथर्षभः समुत्पत्य वानरो रावणानुजम्।
मत्तानीकमुपागम्य तस्थौ तस्याग्रतो बली॥ **6.70.55**॥ 3053

तं पुरस्तात् स्थितं दृष्ट्वा वानरं पर्वतोपमम्।
आजघानोरसि क्रुद्धो गदया वज्रकल्पया॥ **6.70.56**॥ 3054

स तयाभिहतस्तेन गदया वानरर्षभः।
भिन्नवक्षाः समाधूतः सुस्राव रुधिरं बहु॥ **6.70.57**॥ 3055

स सम्प्राप्य चिरात् संज्ञामृषभो वानरेश्वरः।
क्रुद्धो विस्फुरमाणौष्ठो महापार्श्वमुदैक्षत॥ **6.70.58**॥ 3056

स वेगवान् वेगवदभ्युपेत्य
तं राक्षसं वानरवीरमुख्यः।
संवर्त्य मुष्टिं सहसा जघान
बाह्वन्तरे शैलनिकाशरूपः॥ **6.70.59**॥ 3057

स कृत्तमूलः सहसेव वृक्षः
क्षितौ पपात क्षतजोक्षिताङ्गः।
तां चास्य घोरां यमदण्डकल्पां
गदां प्रगृह्याशु तदा ननाद॥ **6.70.60**॥ 3058

मुहूर्तमासीत् स गतासुकल्पः
प्रत्यागतात्मा सहसा सुरारिः।
उत्पत्य सन्ध्याभ्रसमानवर्ण -
स्तं वारिराजात्मजमाजघान॥ **6.70.61**॥ 3059

स मूर्च्छितो भूमितले पपात
मुहूर्तमुत्पत्य पुनः ससंज्ञः।
तामेव तस्याद्रिवराद्रिकल्पां
गदां समाविध्य जघान सङ्ख्ये॥ **6.70.62**॥ 3060

सा तस्य रौद्रा समुपेत्य देहं
रौद्रस्य देवाध्वरविप्रशत्रोः।
बिभेद वक्षः क्षतजं च भूरि
सुस्राव धात्वभ्भ इवाद्रिराजः॥ **6.70.63**॥ 3061

अभिदुद्राव वेगेन गदां तस्य महात्मनः।
तां गृहीत्वा गदां भीमामाविध्य च पुनः पुनः॥ **6.70.64**॥ 3062

मत्तानीकं महात्मा स जघान रणमूर्धनि।
स स्वया गदया भग्नो विशीर्णदशनेक्षणः॥ **6.70.65**॥ 3063

निपपात तदा मत्तो वज्राहत इवाचलः।
विशीर्णनयने भूमौ गतसत्त्वे गतायुषि।
पतिते राक्षसे तस्मिन् विद्रुतं राक्षसं बलम्॥ **6.70.66**॥ 3064

तस्मिन् हते भ्रातरि रावणस्य
तन्नैर्ऋतानां बलमर्णवाभम्।
त्यक्तायुधं केवलजीवितार्थं
दुद्राव भिन्नार्णवसन्निकाशम्॥ **6.70.67**॥ 3065

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकसप्ततितमः सर्गः ॥

अतिकायस्य घोरं युद्धं लक्ष्मणेन तस्य वधश्च

स्वबलं व्यथितं दृष्ट्वा तुमुलं लोमहर्षणम्।
भ्रातॄंश्च निहतान् दृष्ट्वा शक्रतुल्यपराक्रमान्॥ **6.71.1**॥ 3066

पितृव्यौ चापि सन्दृश्य समरे सन्निपातितौ।
युद्धोन्मत्तं च मत्तं च भ्रातरौ राक्षसोत्तमौ॥ **6.71.2**॥ 3067

चुकोप च महातेजा ब्रह्मदत्तवरो युधि।
अतिकायोऽद्रिसङ्काशो देवदानवदर्पहा॥ **6.71.3**॥ 3068

स भास्करसहस्रस्य सङ्घातमिव भास्वरम्।
रथमारुह्य शक्रारिरभिदुद्राव वानरान्॥ **6.71.4**॥ 3069

स विस्फार्य तदा चापं किरीटी मृष्टकुण्डलः।
नाम संश्रावयामास ननाद च महास्वनम्॥ **6.71.5**॥ 3070

तेन सिंहप्रणादेन नामविश्रावणेन च।
ज्याशब्देन च भीमेन त्रासयामास वानरान्॥ **6.71.6**॥ 3071

ते दृष्ट्वा देहमाहात्म्यं कुम्भकर्णोऽयमुत्थितः।
भयार्ता वानराः सर्वे संश्रयन्ते परस्परम्॥ **6.71.7**॥ 3072

ते तस्य रूपमालोक्य यथा विष्णोस्त्रिविक्रमे।
भयाद् वानरयोधास्ते विद्रवन्ति ततस्ततः॥ **6.71.8**॥ 3073

तेऽतिकायं समासाद्य वानरा मूढचेतसः।
शरण्यं शरणं जग्मुर्लक्ष्मणाग्रजमाहवे॥ **6.71.9**॥ 3074

ततोऽतिकायं काकुत्स्थो रथस्थं पर्वतोपमम्।
ददर्श धन्विनं दूराद् गर्जन्तं कालमेघवत्॥ **6.71.10**॥ 3075

स तं दृष्ट्वा महाकायं राघवस्तु सुविस्मितः।
वानरान् सान्त्वयित्वा च विभीषणमुवाच ह॥ **6.71.11**॥ 3076

कोऽसौ पर्वतसङ्काशो धनुष्मान् हरिलोचनः।
युक्ते हयसहस्रेण विशाले स्यन्दने स्थितः॥ **6.71.12**॥ 3077

य एष निशितैः शूलैः सुतीक्ष्णैः प्रासतोमरैः।
अर्चिष्मद्भिर्वृतो भाति भूतैरिव महेश्वरः॥ **6.71.13**॥ 3078

कालजिह्वाप्रकाशाभिर्य एषोऽभिविराजते।
आवृतो रथशक्तीभिर्विद्युद्भिरिव तोयदः॥ **6.71.14**॥ 3079

धनूंषि चास्य सज्जानि हेमपृष्ठानि सर्वशः।
शोभयन्ति रथश्रेष्ठं शक्रचापमिवाम्बरम्॥ **6.71.15**॥ 3080

य एष रक्षःशार्दूलो रणभूमिं विराजयन्।
अभ्येति रथिनां श्रेष्ठो रथेनादित्यवर्चसा॥ **6.71.16**॥ 3081

ध्वजशृङ्गप्रतिष्ठेन राहुणाभिविराजते।
सूर्यरश्मिप्रभैर्बाणैर्दिशो दश विराजयन्॥ **6.71.17**॥ 3082

त्रिनतं मेघनिर्हादं हेमपृष्ठमलङ्कृतम्।
शतक्रतुधनुःप्रख्यं धनुश्चास्य विराजते॥ **6.71.18**॥ 3083

सध्वजः सपताकश्च सानुकर्षो महारथः।
चतुःसादिसमायुक्तो मेघस्तनितनिःस्वनः॥ **6.71.19**॥ 3084

विंशतिर्दश चाष्टौ च तूणास्य रथमास्थिताः।
कार्मुकाणि च भौमानि ज्याश्च काञ्चनपिङ्गलाः॥ **6.71.20**॥ 3085

द्वौ च खड्गौ च पार्श्वस्थौ प्रदीप्तौ पार्श्वशोभितौ।
चतुर्हस्तत्सरुचितौ व्यक्तहस्तदशायतौ॥ **6.71.21**॥ 3086

रक्तकण्ठगुणो धीरो महापर्वतसन्निभः।
कालः कालमहावक्त्रो मेघस्थ इव भास्करः॥ **6.71.22**॥ 3087

काञ्चनाङ्गदनद्धाभ्यां भुजाभ्यामेष शोभते।
शृङ्गाभ्यामिव तुङ्गाभ्यां हिमवान् पर्वतोत्तमः॥ **6.71.23**॥ 3088

कुण्डलाभ्यामुभाभ्यां च भाति वक्त्रं सुभीषणम्।
पुनर्वस्वन्तरगतं परिपूर्णो निशाकरः॥ **6.71.24**॥ 3089

आचक्ष्व मे महाबाहो त्वमेनं राक्षसोत्तमम्।
यं दृष्ट्वा वानराः सर्वे भयार्ता विद्रुता दिशः॥ **6.71.25**॥ 3090

स पृष्टो राजपुत्रेण रामेणामिततेजसा।
आचचक्षे महातेजा राघवाय विभीषणः॥ **6.71.26**॥ 3091

दशग्रीवो महातेजा राजा वैश्रवणानुजः।
भीमकर्मा महात्मा हि रावणो राक्षसेश्वरः॥ **6.71.27**॥ 3092

तस्यासीद् वीर्यवान् पुत्रो रावणप्रतिमो बले।
वृद्धसेवी श्रुतिधरः सर्वास्त्रविदुषां वरः॥ **6.71.28**॥ 3093

अश्वपृष्ठे नागपृष्ठे खड्गे धनुषि कर्षणे।
भेदे सान्त्वे च दाने च नये मन्त्रे च सम्मतः॥ **6.71.29**॥ 3094

यस्य बाहुं समाश्रित्य लङ्का भवति निर्भया।
तनयं धान्यमालिन्या अतिकायमिमं विदुः॥ **6.71.30**॥ 3095

एतेनाराधितो ब्रह्मा तपसा भावितात्मना।
अस्त्राणि चाप्यवाप्तानि रिपवश्च पराजिताः॥ **6.71.31**॥ 3096

सुरासुरैरवध्यत्वं दत्तमस्मै स्वयम्भुवा।
एतच्च कवचं दिव्यं रथश्च रविभास्वरः॥ **6.71.32**॥ 3097

एतेन शतशो देवा दानवाश्च पराजिताः।
रक्षितानि च रक्षांसि यक्षाश्चापि निषूदिताः॥ **6.71.33**॥ 3098

वज्रं विष्टम्भितं येन बाणैरिन्द्रस्य धीमता।
पाशः सलिलराजस्य युद्धे प्रतिहतस्तथा॥ **6.71.34**॥ 3099

एषोऽतिकायो बलवान् राक्षसानामथर्षभः।
स रावणसुतो धीमान् देवदानवदर्पहा॥ **6.71.35**॥ 3100

तदस्मिन् क्रियतां यत्नः क्षिप्रं पुरुषपुङ्गव।
पुरा वानरसैन्यानि क्षयं नयति सायकैः॥ **6.71.36**॥ 3101

ततोऽतिकायो बलवान् प्रविश्य हरिवाहिनीम्।
विस्फारयामास धनुर्ननाद च पुनः पुनः॥ **6.71.37**॥ 3102

तं भीमवपुषं दृष्ट्वा रथस्थं रथिनां वरम्।
अभिपेतुर्महात्मानः प्रधाना ये वनौकसः॥ **6.71.38**॥ 3103

कुमुदो द्विविदो मैन्दो नीलः शरभ एव च।
पादपैर्गिरिशृङ्गैश्च युगपत् समभिद्रवन्॥ **6.71.39**॥ 3104

तेषां वृक्षांश्च शैलांश्च शरैः कनकभूषणैः।
अतिकायो महातेजाश्चिच्छेदास्त्रविदां वरः॥ **6.71.40**॥ 3105

तांश्चैव सर्वान् स हरीञ्शरैः सर्वायसैर्बली।
विव्याधाभिमुखान् सङ्ख्ये भीमकायो निशाचरः॥ **6.71.41**॥ 3106

तेऽर्दिता बाणवर्षेण भिन्नगात्राः पराजिताः।
न शेकुरतिकायस्य प्रतिकर्तुं महाहवे॥ **6.71.42**॥ 3107

तत् सैन्यं हरिवीराणां त्रासयामास राक्षसः।
मृगयूथमिव क्रुद्धो हरियौवनदर्पितः॥ **6.71.43**॥ 3108

स राक्षसेन्द्रो हरियूथमध्ये
नायुध्यमानं निजघान कञ्चित्।
उत्पत्य रामं स धनुःकलापी
सगर्वितं वाक्यमिदं बभाषे॥ **6.71.44**॥ 3109

रथे स्थितोऽहं शरचापपाणि -
र्न प्राकृतं कञ्चन योधयामि।
यस्यास्ति शक्तिर्व्यवसाययुक्तो
ददातु मे शीघ्रमिहाद्य युद्धम्॥ **6.71.45**॥ 3110

तत् तस्य वाक्यं ब्रुवतो निशम्य
चुकोप सौमित्रिरमित्रहन्ता।
अमृष्यमाणश्च समुत्पपात
जग्राह चापं च ततः स्मयित्वा॥ **6.71.46**॥ 3111

क्रुद्धः सौमित्रिरुत्पत्य तूणादाक्षिप्य सायकम्।
पुरस्तादतिकायस्य विचकर्ष महद्धनुः॥ **6.71.47**॥ 3112

पूरयन् स महीं सर्वामाकाशं सागरं दिशः।
ज्याशब्दो लक्ष्मणस्योग्रस्त्रासयन् रजनीचरान्॥ **6.71.48**॥ 3113

सौमित्रेश्चापनिर्घोषं श्रुत्वा प्रतिभयं तदा।
विसिस्मिये महातेजा राक्षसेन्द्रात्मजो बली॥ **6.71.49**॥ 3114

तदातिकायः कुपितो दृष्ट्वा लक्ष्मणमुत्थितम्।
आदाय निशितं बाणमिदं वचनमब्रवीत्॥ **6.71.50**॥ 3115

बालस्त्वमसि सौमित्रे विक्रमेष्वविचक्षणः।
गच्छ किं कालसङ्काशं मां योधयितुमिच्छसि॥ **6.71.51**॥ 3116

नहि मद्बाहुसृष्टानां बाणानां हिमवानपि।
सोढुमुत्सहते वेगमन्तरिक्षमथो मही॥ **6.71.52**॥ 3117

सुखप्रसुप्तं कालाग्निं विबोधयितुमिच्छसि।
न्यस्य चापं निवर्तस्व प्राणान्न जहि मद्गतः॥ **6.71.53**॥ 3118

अथवा त्वं प्रतिस्तब्धो न निवर्तितुमिच्छसि।
तिष्ठ प्राणान् परित्यज्य गमिष्यसि यमक्षयम्॥ **6.71.54**॥ 3119

पश्य मे निशितान् बाणान् रिपुदर्पनिषूदनान्।
ईश्वरायुधसङ्काशांस्तप्तकाञ्चनभूषणान्॥ **6.71.55**॥ 3120

एष ते सर्पसङ्काशो बाणः पास्यति शोणितम्।
मृगराज इव क्रुद्धो नागराजस्य शोणितम्।
इत्येवमुक्त्वा सङ्क्रुद्धः शरं धनुषि सन्दधे॥ **6.71.56**॥ 3121

श्रुत्वातिकायस्य वचः सरोषं
सगर्वितं संयति राजपुत्रः।
स सञ्चुकोपातिबलो मनस्वी
उवाच वाक्यं च ततो महार्थम्॥ **6.71.57**॥ 3122

न वाक्यमात्रेण भवान् प्रधानो
न कत्थनात् सत्पुरुषा भवन्ति।
मयि स्थिते धन्विनि बाणपाणौ
निदर्शयस्वात्मबलं दुरात्मन्॥ **6.71.58**॥ 3123

कर्मणा सूचयात्मानं न विकत्थितुमर्हसि।
पौरुषेण तु यो युक्तः स तु शूर इति स्मृतः॥ **6.71.59**॥ 3124

सर्वायुधसमायुक्तो धन्वी त्वं रथमास्थितः।
शरैर्वा यदि वाप्यस्त्रैर्दर्शयस्व पराक्रमम्॥ **6.71.60**॥ 3125

ततः शिरस्ते निशितैः पातयिष्याम्यहं शरैः।
मारुतः कालसम्पक्वं वृन्तात् तालफलं यथा॥ **6.71.61**॥ 3126

अद्य ते मामका बाणास्तप्तकाञ्चनभूषणाः।
पास्यन्ति रुधिरं गात्राद् बाणशल्यान्तरोत्थितम्॥ **6.71.62**॥ 3127

बालोऽयमिति विज्ञाय न चावज्ञातुमर्हसि।
बालो वा यदि वा वृद्धो मृत्युं जानीहि संयुगे॥ **6.71.63**॥ 3128

बालेन विष्णुना लोकास्त्रयः क्रान्तास्त्रिविक्रमैः।
लक्ष्मणस्य वचः श्रुत्वा हेतुमत् परमार्थवत्।
अतिकायः प्रचुक्रोध बाणं चोत्तममाददे॥ **6.71.64**॥ 3129

ततो विद्याधरा भूता देवा दैत्या महर्षयः।
गुह्यकाश्च महात्मानस्तद् युद्धं द्रष्टुमागमन्॥ **6.71.65**॥ 3130

ततोऽतिकायः कुपितश्चापमारोप्य सायकम्।
लक्ष्मणाय प्रचिक्षेप सङ्क्षिपन्निव चाम्बरम्॥ **6.71.66**॥ 3131

तमापतन्तं निशितं शरमाशीविषोपमम्।
अर्धचन्द्रेण चिच्छेद लक्ष्मणः परवीरहा॥ **6.71.67**॥ 3132

तं निकृत्तं शरं दृष्ट्वा कृत्तभोगमिवोरगम्।
अतिकायो भृशं क्रुद्धः पञ्च बाणान् समादधे॥ **6.71.68**॥ 3133

ताञ्शरान् सम्प्रचिक्षेप लक्ष्मणाय निशाचरः।
तानप्राप्ताशितैर्बाणैश्चिच्छेद भरतानुजः॥ **6.71.69**॥ 3134

स ताञ्छित्त्वा शितैर्बाणैर्लक्ष्मणः परवीरहा।
आददे निशितं बाणं ज्वलन्तमिव तेजसा॥ **6.71.70**॥ 3135

तमादाय धनुःश्रेष्ठे योजयामास लक्ष्मणः।
विचकर्ष च वेगेन विससर्ज च सायकम्॥ **6.71.71**॥ 3136

पूर्णायतविसृष्टेन शरेण नतपर्वणा।
ललाटे राक्षसश्रेष्ठमाजघान स वीर्यवान्॥ **6.71.72**॥ 3137

स ललाटे शरो मग्नस्तस्य भीमस्य रक्षसः।
ददृशे शोणितेनाक्तः पन्नगेन्द्र इवाचले॥ **6.71.73**॥ 3138

राक्षसः प्रचकम्पेऽथ लक्ष्मणेषु प्रपीडितः।
रुद्रबाणहतं घोरं यथा त्रिपुरगोपुरम्॥ **6.71.74**॥ 3139

चिन्तयामास चाश्वास्य विमृश्य च महाबलः।
साधु बाणनिपातेन श्लाघनीयोऽसि मे रिपुः॥ **6.71.75**॥ 3140

विधायैवं विदार्यास्यं नियम्य च महाभुजौ।
स रथोपस्थमास्थाय रथेन प्रचचार ह॥ **6.71.76**॥ 3141

एकं त्रीन् पञ्च सप्तेति सायकान् राक्षसर्षभः।
आददे सन्दधे चापि विचकर्षोत्ससर्ज च॥ **6.71.77**॥ 3142

ते बाणाः कालसङ्काशा राक्षसेन्द्रधनुश्च्युताः।
हेमपुङ्खा रविप्रख्याश्चक्रुर्दीप्तमिवाम्बरम्॥ **6.71.78**॥ 3143

ततस्तान् राक्षसोत्सृष्टाञ्शरौघान् राघवानुजः।
असम्भ्रान्तः प्रचिच्छेद निशितैर्बहुभिः शरैः॥ **6.71.79**॥ 3144

ताञ्शरान् युधि सम्प्रेक्ष्य निकृत्तान् रावणात्मजः।
चुकोप त्रिदशेन्द्रारिर्जग्राह निशितं शरम्॥ **6.71.80**॥ 3145

स सन्धाय महातेजास्तं बाणं सहसोत्सृजत्।
तेन सौमित्रिमायान्तमाजघान स्तनान्तरे॥ **6.71.81**॥ 3146

अतिकायेन सौमित्रिस्ताडितो युधि वक्षसि।
सुस्राव रुधिरं तीव्रं मदं मत्त इव द्विपः॥ **6.71.82**॥ 3147

स चकार तदात्मानं विशल्यं सहसा विभुः।
जग्राह च शरं तीक्ष्णमस्त्रेणापि समाददे॥ **6.71.83**॥ 3148

आग्नेयेन तदास्त्रेण योजयामास सायकम्।
स जज्वाल तदा बाणो धनुष्यस्य महात्मनः॥ **6.71.84**॥ 3149

अतिकायोऽतितेजस्वी रौद्रमस्त्रं समाददे।
तेन बाणं भुजङ्गाभं हेमपुङ्खमयोजयत्॥ **6.71.85**॥ 3150

तदस्त्रं ज्वलितं घोरं लक्ष्मणः शरमाहितम्।
अतिकायाय चिक्षेप कालदण्डमिवान्तकः॥ **6.71.86**॥ 3151

आग्नेयास्त्राभिसंयुक्तं दृष्ट्वा बाणं निशाचरः।
उत्ससर्ज तदा बाणं रौद्रं सूर्यास्त्रयोजितम्॥ **6.71.87**॥ 3152

तावुभावम्बरे बाणावन्योन्यमभिजघ्नतुः।
तेजसा सम्प्रदीप्ताग्रौ क्रुद्धाविव भुजङ्गमौ॥ **6.71.88**॥ 3153

तावन्योन्यं विनिर्दह्य पेततुः पृथिवीतले ॥ **6.71.89** ॥ 3154

निरर्चिषौ भस्मकृतौ न भ्राजेते शरोत्तमौ।
तावुभौ दीप्यमानौ स्म न भ्राजेते महीतले ॥ **6.71.90** ॥ 3155

ततोऽतिकायः सङ्क्रुद्धस्त्वाष्ट्रमैषीकमुत्सृजत्।
ततश्चिच्छेद सौमित्रिरस्त्रमैन्द्रेण वीर्यवान् ॥ **6.71.91** ॥ 3156

ऐषीकं निहतं दृष्ट्वा कुमारो रावणात्मजः।
याम्येनास्त्रेण सङ्क्रुद्धो योजयामास सायकम् ॥ **6.71.92** ॥ 3157

ततस्तदस्त्रं चिक्षेप लक्ष्मणाय निशाचरः।
वायव्येन तदस्त्रेण निजघान स लक्ष्मणः ॥ **6.71.93** ॥ 3158

अथैनं शरधाराभिर्धाराभिरिव तोयदः।
अभ्यवर्षत सङ्क्रुद्धो लक्ष्मणो रावणात्मजम् ॥ **6.71.94** ॥ 3159

तेऽतिकायं समासाद्य कवचे वज्रभूषिते।
भग्नाग्रशल्याः सहसा पेतुर्बाणा महीतले ॥ **6.71.95** ॥ 3160

तान्मोघानभिसम्प्रेक्ष्य लक्ष्मणः परवीरहा।
अभ्यवर्षत बाणानां सहस्रेण महायशाः ॥ **6.71.96** ॥ 3161

स वृष्यमाणो बाणौघैरतिकायो महाबलः।
अवध्यकवचः सङ्ख्ये राक्षसो नैव विव्यथे ॥ **6.71.97** ॥ 3162

शरं चाशीविषाकारं लक्ष्मणाय व्यपासृजत्।
स तेन विद्धः सौमित्रिर्मर्मदेशे शरेण ह ॥ **6.71.98** ॥ 3163

मुहूर्तमात्रं निःसंज्ञो ह्यभवच्छत्रुतापनः।
ततः संज्ञामुपालभ्य चतुर्भिः सायकोत्तमैः ॥ **6.71.99** ॥ 3164

निजघान हयान् सङ्ख्ये सारथिं च महाबलः।
ध्वजस्योन्मथनं कृत्वा शरवर्षैररिन्दमः॥ **6.71.100**॥ 3165

असम्भ्रान्तः स सौमित्रिस्ताञ्शरानभिलक्षितान्।
मुमोच लक्ष्मणो बाणान् वधार्थं तस्य रक्षसः॥ **6.71.101**॥ 3166

न शशाक रुजं कर्तुं युधि तस्य नरोत्तमः।
अथैनमभ्युपागम्य वायुर्वाक्यमुवाच ह॥ **6.71.102**॥ 3167

ब्रह्मदत्तवरो ह्येष अवध्यकवचावृतः।
ब्राह्मणास्त्रेण भिन्ध्येनमेष वध्यो हि नान्यथा।
अवध्य एष ह्यन्येषामस्त्राणां कवची बली॥ **6.71.103**॥ 3168

ततस्तु वायोर्वचनं निशम्य
सौमित्रिरिन्द्रप्रतिमानवीर्यः।
समादधे बाणमथोग्रवेगं
तद्ब्राह्ममस्त्रं सहसा नियुज्य॥ **6.71.104**॥ 3169

तस्मिन् वरास्त्रे तु नियुज्यमाने
सौमित्रिणा बाणवरे शिताग्रे।
दिशश्च चन्द्रार्कमहाग्रहाश्च
नभश्च तत्रास ररास चोर्वी॥ **6.71.105**॥ 3170

तं ब्रह्मणोऽस्त्रेण नियुज्य चापे
शरं सपुङ्खं यमदूतकल्पम्।
सौमित्रिरिन्द्रारिसुतस्य तस्य
ससर्ज बाणं युधि वज्रकल्पम्॥ **6.71.106**॥ 3171

तं लक्ष्मणोत्सृष्टविवृद्धवेगं
समापतन्तं श्वसनोग्रवेगम्।

सुपर्णवज्रोत्तमचित्रपुङ्खं
तदातिकायः समरे ददर्श ॥ **6.71.107** ॥ 3172

तं प्रेक्षमाणः सहसातिकायो
जघान बाणैर्निशितैरनेकैः।
स सायकस्तस्य सुपर्णवेग -
स्तथातिवेगेन जगाम पार्श्वम् ॥ **6.71.108** ॥ 3173

तमागतं प्रेक्ष्य तदातिकायो
बाणं प्रदीप्तान्तककालकल्पम्।
जघान शक्त्यृष्टिगदाकुठारैः
शूलैः शरैश्चाप्यविपन्नचेष्टः ॥ **6.71.109** ॥ 3174

तान्यायुधान्यद्भुतविग्रहाणि
मोघानि कृत्वा स शरोऽग्निदीप्तः।
प्रगृह्य तस्यैव किरीटजुष्टं
तदातिकायस्य शिरो जहार ॥ **6.71.110** ॥ 3175

तच्छिरः सशिरस्त्राणं लक्ष्मणेषुप्रमर्दितम्।
पपात सहसा भूमौ शृङ्गं हिमवतो यथा ॥ **6.71.111** ॥ 3176

तं भूमौ पतितं दृष्ट्वा विक्षिप्ताम्बरभूषणम्।
बभूवुर्व्यथिताः सर्वे हतशेषा निशाचराः ॥ **6.71.112** ॥ 3177

ते विषण्णमुखा दीनाः प्रहारजनितश्रमाः।
विनेदुरुच्चैर्बहवः सहसा विस्वरैः स्वरैः ॥ **6.71.113** ॥ 3178

ततस्तत्परितं याता निरपेक्षा निशाचराः।
पुरीमभिमुखा भीता द्रवन्तो नायके हते ॥ **6.71.114** ॥ 3179

प्रहर्षयुक्ता बहवस्तु वानराः
प्रफुल्लपद्मप्रतिमाननास्तदा।
अपूजयन् लक्ष्मणमिष्टभागिनं
हते रिपौ भीमबले दुरासदे॥ **6.71.115**॥ 3180

अतिबलमतिकायमभ्रकल्पं
युधि विनिपात्य स लक्ष्मणः प्रहृष्टः।
त्वरितमथ तदा स रामपार्श्वं
कपिनिवहैश्च सुपूजितो जगाम॥ **6.71.116**॥ 3181

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विसप्ततितमः सर्गः ॥

रावणस्य चिन्ता पुरीरक्षणायावधानार्थं राक्षसान् प्रत्यादेशश्च

अतिकायं हतं श्रुत्वा लक्ष्मणेन महात्मना।
उद्वेगमगमद् राजा वचनं चेदमब्रवीत्॥ **6.72.1** ॥ 3182

धूम्राक्षः परमामर्षी सर्वशस्त्रभृतां वरः।
अकम्पनः प्रहस्तश्च कुम्भकर्णस्तथैव च॥ **6.72.2** ॥ 3183

एते महाबला वीरा राक्षसा युद्धकाङ्क्षिणः।
जेतारः परसैन्यानां परैर्नित्यापराजिताः॥ **6.72.3** ॥ 3184

ससैन्यास्ते हता वीरा रामेणाक्लिष्टकर्मणा।
राक्षसाः सुमहाकाया नानाशस्त्रविशारदाः॥ **6.72.4** ॥ 3185

अन्ये च बहवः शूरा महात्मानो निपातिताः।
प्रख्यातबलवीर्येण पुत्रेणेन्द्रजिता मम॥ **6.72.5** ॥ 3186

तौ भ्रातरौ तदा बद्धौ घोरैर्दत्तवरैः शरैः।
यन्न शक्यं सुरैः सर्वैरसुरैर्वा महाबलैः॥ **6.72.6** ॥ 3187

मोक्तुं तद्बन्धनं घोरं यक्षगन्धर्वपन्नगैः।
तन्न जाने प्रभावैर्वा मायया मोहनेन वा॥ **6.72.7** ॥ 3188

शरबन्धाद् विमुक्तौ तौ भ्रातरौ रामलक्ष्मणौ।
ये योधा निर्गताः शूरा राक्षसा मम शासनात्॥ **6.72.8**॥ 3189

ते सर्वे निहता युद्धे वानरैः सुमहाबलैः।
तं न पश्याम्यहं युद्धे योऽद्य रामं सलक्ष्मणम्॥ **6.72.9**॥ 3190

नाशयेत् सबलं वीरं ससुग्रीवं विभीषणम्।
अहो सुबलवान् रामो महदस्त्रबलं च वै॥ **6.72.10**॥ 3191

यस्य विक्रममासाद्य राक्षसा निधनं गताः।
तं मन्ये राघवं वीरं नारायणमनामयम्॥ **6.72.11**॥ 3192

तद्भयाद्धि पुरी लङ्का पिहितद्वारतोरणा।
अप्रमत्तैश्च सर्वत्र गुल्मे रक्ष्या पुरी त्वियम्॥ **6.72.12**॥ 3193

अशोकवनिका चैव यत्र सीताभिरक्ष्यते।
निष्क्रमो वा प्रवेशो वा ज्ञातव्यः सर्वदैव नः॥ **6.72.13**॥ 3194

यत्र यत्र भवेद् गुल्मस्तत्र तत्र पुनः पुनः।
सर्वतश्चापि तिष्ठध्वं स्वैः स्वैः परिवृता बलैः॥ **6.72.14**॥ 3195

द्रष्टव्यं च पदं तेषां वानराणां निशाचराः।
प्रदोषे वार्धरात्रे वा प्रत्यूषे वापि सर्वशः॥ **6.72.15**॥ 3196

नावज्ञा तत्र कर्तव्या वानरेषु कदाचन।
द्विषतां बलमुद्युक्तमापतत् किं स्थितं यथा॥ **6.72.16**॥ 3197

ततस्ते राक्षसाः सर्वे श्रुत्वा लङ्काधिपस्य तत्।
वचनं सर्वमातिष्ठन् यथावत् तु महाबलाः॥ **6.72.17**॥ 3198

तान् सर्वान् हि समादिश्य रावणो राक्षसाधिपः।
मन्युशल्यं वहन् दीनः प्रविवेश स्वमालयम्॥ **6.72.18**॥ 3199

ततः स सन्दीपितकोपवह्नि -
निशाचराणामधिपो महाबलः।
तदेव पुत्रव्यसनं विचिन्तयन्
मुहुर्मुहुश्चैव तदा विनिःश्वसन्॥ **6.72.19**॥ 3200

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिसप्ततितमः सर्गः ॥

इन्द्रजितो ब्रह्मास्त्रेण वानरसेनासहितयोः श्रीरामलक्ष्मणयोर्मूर्च्छा

ततो हतान् राक्षसपुङ्गवांस्तान्
देवान्तकादित्रिशिरोऽतिकायान्।
रक्षोगणास्तत्र हतावशिष्टा -
स्ते रावणाय त्वरिताः शशंसुः॥ **6.73.1** ॥ 3201

ततो हतांस्तान् सहसा निशम्य
राजा महाबाष्पपरिप्लुताक्षः।
पुत्रक्षयं भ्रातृवधं च घोरं
विचिन्त्य राजा विपुलं प्रदध्यौ॥ **6.73.2** ॥ 3202

ततस्तु राजानमुदीक्ष्य दीनं
शोकार्णवे सम्परिपुप्लुवानम्।
रथर्षभो राक्षसराजसूनु -
स्तमिन्द्रजिद् वाक्यमिदं बभाषे॥ **6.73.3** ॥ 3203

न तात मोहं परिगन्तुमर्हसे
यत्रेन्द्रजिज्जीवति नैर्ऋतेश।
नेन्द्रारिबाणाभिहतो हि कश्चित्
प्राणान् समर्थः समरेऽभिपातुम्॥ **6.73.4** ॥ 3204

पश्याद्य रामं सह लक्ष्मणेन
मद्बाणनिर्भिन्नविकीर्णदेहम्।
गतायुषं भूमितले शयानं
शितैः शरैराचितसर्वगात्रम्॥ **6.73.5**॥ 3205

इमां प्रतिज्ञां शृणु शक्रशत्रोः
सुनिश्चितां पौरुषदैवयुक्ताम्।
अद्यैव रामं सह लक्ष्मणेन
सन्तर्पयिष्यामि शरैरमोघैः॥ **6.73.6**॥ 3206

अद्येन्द्रवैवस्वतविष्णुरुद्र -
साध्याश्च वैश्वानरचन्द्रसूर्याः।
द्रक्ष्यन्ति मे विक्रममप्रमेयं
विष्णोरिवोग्रं बलियज्ञवाटे॥ **6.73.7**॥ 3207

स एवमुक्त्वा त्रिदशेन्द्रशत्रु -
रापृच्छ्य राजानमदीनसत्त्वः।
समारुरोहानिलतुल्यवेगं
रथं खरश्रेष्ठसमाधियुक्तम्॥ **6.73.8**॥ 3208

समास्थाय महातेजा रथं हरिरथोपमम्।
जगाम सहसा तत्र यत्र युद्धमरिन्दमः॥ **6.73.9**॥ 3209

तं प्रस्थितं महात्मानमनुजग्मुर्महाबलाः।
संहर्षमाणा बहवो धनुःप्रवरपाणयः॥ **6.73.10**॥ 3210

गजस्कन्धगताः केचित् केचित् परमवाजिभिः।
व्याघ्रवृश्चिकमार्जारखरोष्ट्रैश्च भुजङ्गमैः॥ **6.73.11**॥ 3211

वराहैः श्वापदैः सिंहैर्जम्बुकैः पर्वतोपमैः।
काकहंसमयूरैश्च राक्षसा भीमविक्रमाः॥ **6.73.12**॥ 3212

प्रासपट्टिशनिस्त्रिंशपरश्वधगदाधराः।
भुशुण्डिमुद्गरायष्टिशतघ्नीपरिघायुधाः॥ **6.73.13**॥ 3213

स शङ्खनिनदैः पूर्णैर्भेरीणां चापि निःस्वनैः।
जगाम त्रिदशेन्द्रारिराजिं वेगेन वीर्यवान्॥ **6.73.14**॥ 3214

स शङ्खशशिवर्णेन छत्रेण रिपुसूदनः।
रराज प्रतिपूर्णेन नभश्चन्द्रमसा यथा॥ **6.73.15**॥ 3215

वीज्यमानस्ततो वीरो हैमैर्हेमविभूषणः।
चारुचामरमुख्यैश्च मुख्यः सर्वधनुष्मताम्॥ **6.73.16**॥ 3216

स तु दृष्ट्वा विनिर्यान्तं बलेन महता वृतम्।
राक्षसाधिपतिः श्रीमान् रावणः पुत्रमब्रवीत्॥ **6.73.17**॥ 3217

त्वमप्रतिरथः पुत्र त्वया वै वासवो जितः।
किं पुनर्मानुषं धृष्यं निहनिष्यसि राघवम्॥ **6.73.18**॥ 3218

तथोक्तो राक्षसेन्द्रेण प्रत्यगृह्णान्महाशिषः।
ततस्त्विन्द्रजिता लङ्का सूर्यप्रतिमतेजसा॥ **6.73.19**॥ 3219

रराजाप्रतिवीर्येण द्यौरिवार्केण भास्वता।
स सम्प्राप्य महातेजा युद्धभूमिमरिन्दमः॥ **6.73.20**॥ 3220

स्थापयामास रक्षांसि रथं प्रति समन्ततः।
ततस्तु हुतभोक्तारं हुतभुक्सदृशप्रभः॥ **6.73.21**॥ 3221

जुहुवे राक्षसश्रेष्ठो विधिवन्मन्त्रसत्तमैः।
स हविर्लाजसत्कारैर्माल्यगन्धपुरस्कृतैः॥ **6.73.22**॥ 3222

जुहुवे पावकं तत्र राक्षसेन्द्रः प्रतापवान्।
शस्त्राणि शरपत्राणि समिधोऽथ बिभीतकाः॥ **6.73.23**॥ 3223

लोहितानि च वासांसि स्रुवं काष्ण्यायसं तथा।
स तत्राग्निं समास्तीर्य शरपत्रैः सतोमरैः॥ **6.73.24**॥ 3224

छागस्य कृष्णवर्णस्य गलं जग्राह जीवतः।
सकृदेव समिद्धस्य विधूमस्य महार्चिषः॥ **6.73.25**॥ 3225

बभूवुस्तानि लिङ्गानि विजयं यान्यदर्शयन्।
प्रदक्षिणावर्तशिखस्तप्तकाञ्चनसन्निभः॥ **6.73.26**॥ 3226

हविस्तत् प्रतिजग्राह पावकः स्वयमुत्थितः।
सोऽस्त्रमाहारयामास ब्राह्ममस्त्रविशारदः॥ **6.73.27**॥ 3227

धनुश्चात्मरथं चैव सर्वं तत्राभ्यमन्त्रयत्।
तस्मिन्नाहूयमानेऽस्त्रे हूयमाने च पावके।
सार्कग्रहेन्दुनक्षत्रं वितत्रास नभस्थलम्॥ **6.73.28**॥ 3228

स पावकं पावकदीप्ततेजा
हुत्वा महेन्द्रप्रतिमप्रभावः।
सचापबाणासिरथाश्वसूतः
खेऽन्तर्दधेऽऽत्मानमचिन्त्यवीर्यः॥ **6.73.29**॥ 3229

ततो हयरथाकीर्णं पताकाध्वजशोभितम्।
निर्ययौ राक्षसबलं नर्दमानं युयुत्सया॥ **6.73.30**॥ 3230

ते शरैर्बहुभिश्चित्रैस्तीक्ष्णवेगैरलङ्कृतैः।
तोमरैरङ्कुशैश्चापि वानराञ्जघ्नुराहवे॥ **6.73.31**॥ 3231

रावणिस्तु सुसङ्क्रुद्धस्तान् निरीक्ष्य निशाचरान्।
हृष्टा भवन्तो युध्यन्तु वानराणां जिघांसया॥ **6.73.32**॥ 3232

ततस्ते राक्षसाः सर्वे गर्जन्तो जयकाङ्क्षिणः।
अभ्यवर्षंस्ततो घोरं वानराञ्शरवृष्टिभिः॥ **6.73.33**॥ 3233

स तु नालीकनाराचैर्गदाभिर्मुसलैरपि।
रक्षोभिः संवृतः सङ्ख्ये वानरान् विचकर्ष ह॥ **6.73.34**॥ 3234

ते वध्यमानाः समरे वानराः पादपायुधाः।
अभ्यवर्षन्त सहसा रावणिं शैलपादपैः॥ **6.73.35**॥ 3235

इन्द्रजित् तु तदा क्रुद्धो महातेजा महाबलः।
वानराणां शरीराणि व्यधमद् रावणात्मजः॥ **6.73.36**॥ 3236

शरेणैकेन च हरीन् नव पञ्च च सप्त च।
बिभेद समरे क्रुद्धो राक्षसान् सम्प्रहर्षयन्॥ **6.73.37**॥ 3237

स शरैः सूर्यसङ्काशैः शातकुम्भविभूषणैः।
वानरान् समरे वीरः प्रममाथ सुदुर्जयः॥ **6.73.38**॥ 3238

ते भिन्नगात्राः समरे वानराः शरपीडिताः।
पेतुर्मथितसङ्कल्पाः सुरैरिव महासुराः॥ **6.73.39**॥ 3239

ते तपन्तमिवादित्यं घोरैर्बाणगभस्तिभिः।
अभ्यधावन्त सङ्क्रुद्धाः संयुगे वानरर्षभाः॥ **6.73.40**॥ 3240

ततस्तु वानराः सर्वे भिन्नदेहा विचेतसः।
व्यथिता विद्रवन्ति स्म रुधिरेण समुक्षिताः॥ **6.73.41**॥ 3241

रामस्यार्थे पराक्रम्य वानरास्त्यक्तजीविताः।
नर्दन्तस्तेऽनिवृत्तास्तु समरे सशिलायुधाः॥ **6.73.42**॥ 3242

ते द्रुमैः पर्वताग्रैश्च शिलाभिश्च प्लवङ्गमाः।
अभ्यवर्षन्त समरे रावणिं समवस्थिताः॥ **6.73.43**॥ 3243

तं द्रुमाणां शिलानां च वर्षं प्राणहरं महत्।
व्यपोहत महातेजा रावणिः समितिञ्जयः॥ **6.73.44**॥ 3244

ततः पावकसङ्काशैः शरैराशीविषोपमैः।
वानराणामनीकानि बिभेद समरे प्रभुः॥ **6.73.45**॥ 3245

अष्टादशशरैस्तीक्ष्णैः स विद्ध्वा गन्धमादनम्।
विव्याध नवभिश्चैव नलं दूरादवस्थितम्॥ **6.73.46**॥ 3246

सप्तभिस्तु महावीर्यो मैन्दं मर्मविदारणैः।
पञ्चभिर्विशिखैश्चैव गजं विव्याध संयुगे॥ **6.73.47**॥ 3247

जाम्बवन्तं तु दशभिर्नीलं त्रिंशद्भिरेव च।
सुग्रीवमृषभं चैव सोऽङ्गदं द्विविदं तथा॥ **6.73.48**॥ 3248

घोरैर्दत्तवरैस्तीक्ष्णैर्निष्प्राणानकरोत् तदा।
अन्यानपि तथा मुख्यान् वानरान् बहुभिः शरैः॥ **6.73.49**॥ 3249

अर्दयामास सङ्क्रुद्धः कालाग्निरिव मूर्च्छितः।
स शरैः सूर्यसङ्काशैः सुमुक्तैः शीघ्रगामिभिः॥ **6.73.50**॥ 3250

वानराणामनीकानि निर्ममन्थ महारणे।
आकुलां वानरीं सेनां शरजालेन पीडिताम्॥ **6.73.51**॥ 3251

हृष्टः स परया प्रीत्या ददर्श क्षतजोक्षिताम्।
पुनरेव महातेजा राक्षसेन्द्रात्मजो बली॥ **6.73.52**॥ 3252

संसृज्य बाणवर्षं च शस्त्रवर्षं च दारुणम्।
ममर्द वानरानीकं परितस्त्विन्द्रजिद् बली॥ **6.73.53**॥ 3253

स्वसैन्यमुत्सृज्य समेत्य तूर्णं
महाहवे वानरवाहिनीषु।
अदृश्यमानः शरजालमुग्रं
ववर्ष नीलाम्बुधरो यथाम्बु॥ **6.73.54**॥ 3254

ते शक्रजिद्बाणविशीर्णदेहा
मायाहता विस्वरमुन्नदन्तः।
रणे निपेतुर्हरयोऽद्रिकल्पा
यथेन्द्रवज्राभिहता नगेन्द्राः॥ **6.73.55**॥ 3255

ते केवलं सन्ददृशुः शिताग्रान्
बाणान् रणे वानरवाहिनीषु।
मायाविगूढं च सुरेन्द्रशत्रुं
न चात्र तं राक्षसमप्यपश्यन्॥ **6.73.56**॥ 3256

ततः स रक्षोधिपतिर्महात्मा
सर्वा दिशो बाणगणैः शिताग्रैः।
प्रच्छादयामास रविप्रकाशै -
र्विदारयामास च वानरेन्द्रान्॥ **6.73.57**॥ 3257

स शूलनिस्त्रिंशपरश्वधानि
व्याविद्धदीप्तानलसप्रभाणि।
सविस्फुलिङ्गोज्ज्वलपावकानि
ववर्ष तीव्रं प्लवगेन्द्रसैन्ये॥ **6.73.58**॥ 3258

ततो ज्वलनसङ्काशैर्बाणैर्वानरयूथपाः।
ताडिताः शक्रजिद्बाणैः प्रफुल्ला इव किंशुकाः॥ **6.73.59**॥ 3259

तेऽन्योन्यमभिसर्पन्तो निनदन्तश्च विस्वरम्।
राक्षसेन्द्रास्त्रनिर्भिन्ना निपेतुर्वानरर्षभाः॥ **6.73.60**॥ 3260

उदीक्षमाणा गगनं केचिन्नेत्रेषु ताडिताः।
शरैर्विविशुरन्योन्यं पेतुश्च जगतीतले॥ **6.73.61**॥ 3261

हनूमन्तं च सुग्रीवमङ्गदं गन्धमादनम्।
जाम्बवन्तं सुषेणं च वेगदर्शिनमेव च॥ **6.73.62**॥ 3262

मैन्दं च द्विविदं नीलं गवाक्षं गवयं तथा।
केसरिं हरिलोमानं विद्युद्दंष्ट्रं च वानरम्॥ **6.73.63**॥ 3263

सूर्याननं ज्योतिर्मुखं तथा दधिमुखं हरिम्।
पावकाक्षं नलं चैव कुमुदं चैव वानरम्॥ **6.73.64**॥ 3264

प्रासैः शूलैः शितैर्बाणैरिन्द्रजिन्मन्त्रसंहितैः।
विव्याध हरिशार्दूलान् सर्वांस्तान् राक्षसोत्तमः॥ **6.73.65**॥ 3265

स वै गदाभिर्हरियूथमुख्यान्
निर्भिद्य बाणैस्तपनीयवर्णैः।
ववर्ष रामं शरवृष्टिजालैः
सलक्ष्मणं भास्कररश्मिकल्पैः॥ **6.73.66**॥ 3266

स बाणवर्शैरभिवृष्यमाणो
धारानिपातानिव तानचिन्त्य।
समीक्षमाणः परमाद्भुतश्री
रामस्तदा लक्ष्मणमित्युवाच॥ **6.73.67**॥ 3267

असौ पुनर्लक्ष्मण राक्षसेन्द्रो
ब्रह्मास्त्रमाश्रित्य सुरेन्द्रशत्रुः।

निपातयित्वा हरिसैन्यमस्मा -
ञ्शितैः शरैरर्दयति प्रसक्तम्॥ **6.73.68**॥ 3268

स्वयम्भुवा दत्तवरो महात्मा
समाहितोऽन्तर्हितभीमकायः।
कथं नु शक्यो युधि नष्टदेहो
निहन्तुमद्येन्द्रजिदुद्यतास्त्रः॥ **6.73.69**॥ 3269

मन्ये स्वयम्भूर्भगवानचिन्त्य -
स्तस्यैतदस्त्रं प्रभवश्च योऽस्य।
बाणावपातं त्वमिहाद्य धीमन्
मया सहाव्यग्रमनाः सहस्व॥ **6.73.70**॥ 3270

प्रच्छादयत्येष हि राक्षसेन्द्रः
सर्वा दिशः सायकवृष्टिजालैः।
एतच्च सर्वं पतिताग्र्यशूरं
न भ्राजते वानरराजसैन्यम्॥ **6.73.71**॥ 3271

आवां तु दृष्ट्वा पतितौ विसंज्ञौ
निवृत्तयुद्धौ हतहर्षरोषौ।
ध्रुवं प्रवेक्ष्यत्यमरारिवास -
मसौ समासाद्य रणाग्र्यलक्ष्मीम्॥ **6.73.72**॥ 3272

ततस्तु ताविन्द्रजितोऽस्त्रजालै -
र्बभूवतुस्तत्र तदा विशस्तौ।
स चापि तौ तत्र विषादयित्वा
ननाद हर्षाद् युधि राक्षसेन्द्रः॥ **6.73.73**॥ 3273

ततस्तदा वानरसैन्यमेवं
रामं च सङ्ख्ये सह लक्ष्मणेन।
विषादयित्वा सहसा विवेश
पुरीं दशग्रीवभुजाभिगुप्ताम्।
संस्तूयमानः स तु यातुधानैः
पित्रे च सर्वं हृषितोऽभ्युवाच॥ **6.73.74**॥ 3274

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुःसप्ततितमः सर्गः ॥

जाम्बवदादेशेन हनुमता हिमालयाद्दिव्यौषधीनां पर्वतस्यानयनं तासां गन्धेन श्रीरामलक्ष्मणयोः समेषां वानराणां च स्वास्थ्यलाभः

तयोस्तदासादितयो रणाग्रे
मुमोह सैन्यं हरियूथपानाम्।
सुग्रीवनीलाङ्गदजाम्बवन्तो
न चापि किञ्चित् प्रतिपेदिरे ते॥ **6.74.1** ॥ 3275

ततो विषण्णं समवेक्ष्य सर्वं
विभीषणो बुद्धिमतां वरिष्ठः।
उवाच शाखामृगराजवीरा -
नाश्वासयन्नप्रतिमैर्वचोभिः॥ **6.74.2** ॥ 3276

मा भैष्ट नास्त्यत्र विषादकालो
यदार्यपुत्रौ ह्यवशौ विषण्णौ।
स्वयम्भुवो वाक्यमथोद्वहन्तौ
यत्सादितावित्द्रजितास्त्रजालैः॥ **6.74.3** ॥ 3277

तस्मै तु दत्तं परमास्त्रमेतत्
स्वयम्भुवा ब्राह्मममोघवीर्यम्।
तन्मानयन्तौ युधि राजपुत्रौ
निपातितौ कोऽत्र विषादकालः॥ **6.74.4** ॥ 3278

ब्राह्ममस्त्रं ततो धीमान् मानयित्वा तु मारुतिः।
विभीषणवचः श्रुत्वा हनूमानिदमब्रवीत्॥ **6.74.5**॥ 3279

अस्मिन्नस्त्रहते सैन्ये वानराणां तरस्विनाम्।
यो यो धारयते प्राणांस्तं तमाश्वासयावहे॥ **6.74.6**॥ 3280

तावुभौ युगपद् वीरौ हनूमद्राक्षसोत्तमौ।
उल्काहस्तौ तदा रात्रौ रणशीर्षे विचेरतुः॥ **6.74.7**॥ 3281

भिन्नलाङ्गूलहस्तोरुपादाङ्गुलिशिरोधरैः।
स्रवद्भिः क्षतजं गात्रैः प्रस्रवद्भिः समन्ततः॥ **6.74.8**॥ 3282

पतितैः पर्वताकारैर्वानरैरभिसंवृताम्।
शस्त्रैश्च पतितैर्दीप्तैर्ददृशाते वसुन्धराम्॥ **6.74.9**॥ 3283

सुग्रीवमङ्गदं नीलं शरभं गन्धमादनम्।
जाम्बवन्तं सुषेणं च वेगदर्शिनमेव च॥ **6.74.10**॥ 3284

मैन्दं नलं ज्योतिर्मुखं द्विविदं चापि वानरम्।
विभीषणो हनूमांश्च ददृशाते हतान् रणे॥ **6.74.11**॥ 3285

सप्तषष्टिर्हताः कोट्यो वानराणां तरस्विनाम्।
अह्नः पञ्चमशेषेण वल्लभेन स्वयम्भुवः॥ **6.74.12**॥ 3286

सागरौघनिभं भीमं दृष्ट्वा बाणार्दितं बलम्।
मार्गते जाम्बवन्तं च हनूमान् सविभीषणः॥ **6.74.13**॥ 3287

स्वभावजरया युक्तं वृद्धं शरशतैश्चितम्।
प्रजापतिसुतं वीरं शाम्यन्तमिव पावकम्॥ **6.74.14**॥ 3288

दृष्ट्वा समभिसङ्क्रम्य पौलस्त्यो वाक्यमब्रवीत्।
कच्चिदार्य शरैस्तीक्ष्णैर्न प्राणा ध्वंसितास्तव॥ **6.74.15**॥ 3289

विभीषणवचः श्रुत्वा जाम्बवानृक्षपुङ्गवः।
कृच्छ्रादभ्युद्गिरन् वाक्यमिदं वचनमब्रवीत्॥ **6.74.16**॥ 3290

नैर्ऋतेन्द्र महावीर्य स्वरेण त्वाभिलक्षये।
विद्धगात्रः शितैर्बाणैर्न त्वां पश्यामि चक्षुषा॥ **6.74.17**॥ 3291

अङ्गना सुप्रजा येन मातरिश्वा च सुव्रत।
हनूमान् वानरश्रेष्ठः प्राणान् धारयते क्वचित्॥ **6.74.18**॥ 3292

श्रुत्वा जाम्बवतो वाक्यमुवाचेदं विभीषणः।
आर्यपुत्रावतिक्रम्य कस्मात् पृच्छसि मारुतिम्॥ **6.74.19**॥ 3293

नैव राजनि सुग्रीवे नाङ्गदे नापि राघवे।
आर्य सन्दर्शितः स्नेहो यथा वायुसुते परः॥ **6.74.20**॥ 3294

विभीषणवचः श्रुत्वा जाम्बवान् वाक्यमब्रवीत्।
शृणु नैर्ऋतशार्दूल यस्मात् पृच्छामि मारुतिम्॥ **6.74.21**॥ 3295

अस्मिञ्जीवति वीरे तु हतमप्यहतं बलम्।
हनूमत्युज्झितप्राणे जीवन्तोऽपि मृता वयम्॥ **6.74.22**॥ 3296

धरते मारुतिस्तात मारुतप्रतिमो यदि।
वैश्वानरसमो वीर्ये जीविताशा ततो भवेत्॥ **6.74.23**॥ 3297

ततो वृद्धमुपागम्य विनयेनाभ्यवादयत्।
गृह्य जाम्बवतः पादौ हनूमान् मारुतात्मजः॥ **6.74.24**॥ 3298

श्रुत्वा हनूमतो वाक्यं तदा विव्यथितेन्द्रियः।
पुनर्जातमिवात्मानं मन्यते स्मर्क्षपुङ्गवः॥ **6.74.25**॥ 3299

ततोऽब्रवीन्महातेजा हनूमन्तं स जाम्बवान्।
आगच्छ हरिशार्दूल वानरांस्त्रातुमर्हसि॥ **6.74.26**॥ 3300

नान्यो विक्रमपर्याप्तस्त्वमेषां परमः सखा।
त्वत्पराक्रमकालोऽयं नान्यं पश्यामि कञ्चन॥ **6.74.27**॥ 3301

ऋक्षवानरवीराणामनीकानि प्रहर्षय।
विशल्यौ कुरु चाप्येतौ सादितौ रामलक्ष्मणौ॥ **6.74.28**॥ 3302

गत्वा परममध्वानमुपर्युपरि सागरम्।
हिमवन्तं नगश्रेष्ठं हनूमन् गन्तुमर्हसि॥ **6.74.29**॥ 3303

ततः काञ्चनमत्युच्चमृषभं पर्वतोत्तमम्।
कैलासशिखरं चात्र द्रक्ष्यस्यरिनिषूदन॥ **6.74.30**॥ 3304

तयोः शिखरयोर्मध्ये प्रदीप्तमतुलप्रभम्।
सर्वौषधियुतं वीर द्रक्ष्यस्योषधिपर्वतम्॥ **6.74.31**॥ 3305

तस्य वानरशार्दूल चतस्रो मूर्ध्नि सम्भवाः।
द्रक्ष्यस्योषधयो दीप्ता दीपयन्तीर्दिशो दश॥ **6.74.32**॥ 3306

मृतसञ्जीवनीं चैव विशल्यकरणीमपि।
सुवर्णकरणीं चैव सन्धानीं च महौषधीम्॥ **6.74.33**॥ 3307

ताः सर्वा हनुमन् गृह्य क्षिप्रमागन्तुमर्हसि।
आश्वासय हरीन् प्राणैर्योज्य गन्धवहात्मज॥ **6.74.34**॥ 3308

श्रुत्वा जाम्बवतो वाक्यं हनूमान् मारुतात्मजः।
आपूर्यत बलोद्धर्षैर्वायुवेगैरिवार्णवः॥ **6.74.35**॥ 3309

स पर्वततटाग्रस्थः पीडयन् पर्वतोत्तमम्।
हनूमान् दृश्यते वीरो द्वितीय इव पर्वतः॥ **6.74.36**॥ 3310

हरिपादविनिर्भग्नो निषसाद स पर्वतः।
न शशाक तदात्मानं वोढुं भृशनिपीडितः॥ **6.74.37**॥ 3311

तस्य पेतुर्नगा भूमौ हरिवेगाच्च जज्वलुः।
शृङ्गाणि च व्यशीर्यन्त पीडितस्य हनूमता॥ **6.74.38**॥ 3312

तस्मिन् सम्पीड्यमाने तु भग्नद्रुमशिलातले।
न शेकुर्वानराः स्थातुं घूर्णमाने नगोत्तमे॥ **6.74.39**॥ 3313

सा घूर्णितमहाद्वारा प्रभग्नगृहगोपुरा।
लङ्का त्रासाकुला रात्रौ प्रनृत्तेवाभवत् तदा॥ **6.74.40**॥ 3314

पृथिवीधरसङ्काशो निपीड्य पृथिवीधरम्।
पृथिवीं क्षोभयामास सार्णवां मारुतात्मजः॥ **6.74.41**॥ 3315

आरुरोह तदा तस्माद्धरिर्मलयपर्वतम्।
मेरुमन्दरसङ्काशं नानाप्रस्रवणाकुलम्॥ **6.74.42**॥ 3316

नानाद्रुमलताकीर्णं विकासिकमलोत्पलम्।
सेवितं देवगन्धर्वैः षष्टियोजनमुच्छ्रितम्॥ **6.74.43**॥ 3317

विद्याधरैर्मुनिगणैरप्सरोभिर्निषेवितम्।
नानामृगगणाकीर्णं बहुकन्दरशोभितम्॥ **6.74.44**॥ 3318

सर्वानाकुलयंस्तत्र यक्षगन्धर्वकिन्नरान्।
हनूमान् मेघसङ्काशो ववृधे मारुतात्मजः॥ **6.74.45**॥ 3319

पद्भ्यां तु शैलमापीड्य वडवामुखवन्मुखम्।
विवृत्योग्रं ननादोच्चैस्त्रासयन् रजनीचरान्॥ **6.74.46**॥ 3320

तस्य नानद्यमानस्य श्रुत्वा निनदमुत्तमम्।
लङ्कास्था राक्षसव्याघ्रा न शेकुः स्पन्दितुं क्वचित्॥ **6.74.47**॥ 3321

नमस्कृत्वा समुद्राय मारुतिर्भीमविक्रमः।
राघवार्थे परं कर्म समीहत परन्तपः॥ **6.74.48**॥ 3322

स पुच्छमुद्यम्य भुजङ्गकल्पं
विनम्य पृष्ठं श्रवणे निकुच्य।
विवृत्य वक्त्रं वडवामुखाभ -
मापुप्लुवे व्योम्नि स चण्डवेगः॥ **6.74.49**॥ 3323

स वृक्षखण्डांस्तरसा जहार
शैलाञ्शिलाः प्राकृतवानरांश्च।
बाहूरुवेगोद्धतसम्प्रणुन्ना -
स्ते क्षीणवेगाः सलिले निपेतुः॥ **6.74.50**॥ 3324

स तौ प्रसार्योरगभोगकल्पौ
भुजौ भुजङ्गारिनिकाशवीर्यः।
जगाम शैलं नगराजमग्र्यं
दिशः प्रकर्षन्निव वायुसूनुः॥ **6.74.51**॥ 3325

स सागरं घूर्णितवीचिमालं
तदभ्भसा भ्रामितसर्वसत्त्वम्।
समीक्षमाणः सहसा जगाम
चक्रं यथा विष्णुकराग्रमुक्तम्॥ **6.74.52**॥ 3326

स पर्वतान् पक्षिगणान् सरांसि
नदीस्तटाकानि पुरोत्तमानि।
स्फीताञ्जनांस्तानपि सम्प्रवीक्ष्य
जगाम वेगात् पितृतुल्यवेगः॥ **6.74.53**॥ 3327

आदित्यपथमाश्रित्य जगाम स गतश्रमः।
हनूमांस्त्वरितो वीरः पितुस्तुल्यपराक्रमः॥ **6.74.54**॥ 3328

जवेन महता युक्तो मारुतिर्वातरंहसा।
जगाम हरिशार्दूलो दिशः शब्देन नादयन्॥ **6.74.55**॥ 3329

स्मरञ्जाम्बवतो वाक्यं मारुतिर्भीमविक्रमः।
ददर्श सहसा चापि हिमवन्तं महाकपिः॥ **6.74.56**॥ 3330

नानाप्रस्रवणोपेतं बहुकन्दरनिर्झरम्।
श्वेताभ्रचयसङ्काशैः शिखरैश्चारुदर्शनैः।
शोभितं विविधैर्वृक्षैरगमत् पर्वतोत्तमम्॥ **6.74.57**॥ 3331

स तं समासाद्य महानगेन्द्र -
मतिप्रवृद्धोत्तमहेमशृङ्गम्।
ददर्श पुण्यानि महाश्रमाणि
सुरर्षिसङ्घोत्तमसेवितानि॥ **6.74.58**॥ 3332

स ब्रह्मकोशं रजतालयं च
शक्रालयं रुद्रशरप्रमोक्षम्।
हयाननं ब्रह्मशिरश्च दीप्तं
ददर्श वैवस्वतकिङ्करांश्च॥ **6.74.59**॥ 3333

वह्न्यालयं वैश्रवणालयं च
सूर्यप्रभं सूर्यनिबन्धनं च।
ब्रह्मालयं शङ्करकार्मुकं च
ददर्श नाभिं च वसुन्धरायाः॥ **6.74.60**॥ 3334

कैलासमग्र्यं हिमवच्छिलां च
तं वै वृषं काञ्चनशैलमग्र्यम्।
प्रदीप्तसर्वौषधिसम्प्रदीप्तं
ददर्श सर्वौषधिपर्वतेन्द्रम्॥ **6.74.61**॥ 3335

स तं समीक्ष्यानलराशिदीप्तं
विसिस्मिये वासवदूतसूनुः।

आप्लुत्य तं चौषधिपर्वतेन्द्रं
तत्रौषधीनां विचयं चकार ॥ **6.74.62** ॥ 3336

स योजनसहस्राणि समतीत्य महाकपिः।
दिव्यौषधिधरं शैलं व्यचरन्मारुतात्मजः ॥ **6.74.63** ॥ 3337

महौषध्यस्ततः सर्वास्तस्मिन् पर्वतसत्तमे।
विज्ञायार्थिनमायान्तं ततो जग्मुरदर्शनम् ॥ **6.74.64** ॥ 3338

स ता महात्मा हनुमानपश्यं -
श्चुकोप रोषाच्च भृशं ननाद।
अमृष्यमाणोऽग्निसमानचक्षु -
र्महीधरेन्द्रं तमुवाच वाक्यम् ॥ **6.74.65** ॥ 3339

किमेतदेवं सुविनिश्चितं ते
यद् राघवे नासि कृतानुकम्पः।
पश्याद्य मद्बाहुबलाभिभूतो
विकीर्णमात्मानमथो नगेन्द्र ॥ **6.74.66** ॥ 3340

स तस्य शृङ्गं सनगं सनागं
सकाञ्चनं धातुसहस्रजुष्टम्।
विकीर्णकूटं ज्वलिताग्रसानुं
प्रगृह्य वेगात् सहसोन्ममाथ ॥ **6.74.67** ॥ 3341

स तं समुत्पाट्य खमुत्पपात
वित्रास्य लोकान् ससुरासुरेन्द्रान्।
संस्तूयमानः खचरैरनेकै -
र्जगाम वेगाद् गरुडोग्रवेगः ॥ **6.74.68** ॥ 3342

स भास्कराध्वानमनुप्रपन्न -
स्तं भास्कराभं शिखरं प्रगृह्य।
बभौ तदा भास्करसन्निकाशो
रवेः समीपे प्रतिभास्कराभः॥ **6.74.69**॥ 3343

स तेन शैलेन भृशं रराज
शैलोपमो गन्धवहात्मजस्तु।
सहस्रधारेण सपावकेन
चक्रेण खे विष्णुरिवार्पितेन॥ **6.74.70**॥ 3344

तं वानराः प्रेक्ष्य तदा विनेदुः
स तानपि प्रेक्ष्य मुदा ननाद।
तेषां समुत्कृष्टरवं निशम्य
लङ्कालया भीमतरं विनेदुः॥ **6.74.71**॥ 3345

ततो महात्मा निपपात तस्मिन्
शैलोत्तमे वानरसैन्यमध्ये।
हर्युत्तमेभ्यः शिरसाभिवाद्य
विभीषणं तत्र च सस्वजे सः॥ **6.74.72**॥ 3346

तावप्युभौ मानुषराजपुत्रौ
तं गन्धमाघ्राय महौषधीनाम्।
बभूवतुस्तत्र तदा विशल्या -
वुत्तस्थुरन्ये च हरिप्रवीराः॥ **6.74.73**॥ 3347

सर्वे विशल्या विरुजाः क्षणेन
हरिप्रवीराश्च हताश्च ये स्युः।
गन्धेन तासां प्रवरौषधीनां
सुप्ता निशान्तेष्विव सम्प्रबुद्धाः॥ **6.74.74**॥ 3348

यदाप्रभृति लङ्कायां युध्यन्ते हरिराक्षसाः।
तदाप्रभृति मानार्थमाज्ञया रावणस्य च॥ **6.74.75**॥ 3349

ये हन्यन्ते रणे तत्र राक्षसाः कपिकुञ्जरैः।
हता हतास्तु क्षिप्यन्ते सर्व एव तु सागरे॥ **6.74.76**॥ 3350

ततो हरिर्गन्धवहात्मजस्तु
तमोषधीशैलमुदग्रवेगः।
निनाय वेगाद्धिमवन्तमेव
पुनश्च रामेण समाजगाम॥ **6.74.77**॥ 3351

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुःसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चसप्ततितमः सर्गः ॥

लङ्काया दहनं रक्षसां वानराणां च घोरं युद्धम्

ततोऽब्रवीन्महातेजाः सुग्रीवो वानरेश्वरः।
अर्थ्यं विज्ञापयंश्चापि हनूमन्तमिदं वचः॥ **6.75.1** ॥ 3352

यतो हतः कुम्भकर्णः कुमाराश्च निषूदिताः।
नेदानीमुपनिर्हारं रावणो दातुमर्हति॥ **6.75.2** ॥ 3353

ये ये महाबलाः सन्ति लघवश्च प्लवङ्गमाः।
लङ्कामभिपतन्त्वाशु गृह्योल्काः प्लवगर्षभाः॥ **6.75.3** ॥ 3354

ततोऽस्तं गत आदित्ये रौद्रे तस्मिन् निशामुखे।
लङ्कामभिमुखाः सोल्का जग्मुस्ते प्लवगर्षभाः॥ **6.75.4** ॥ 3355

उल्काहस्तैर्हरिगणैः सर्वतः समभिद्रुताः।
आरक्षस्था विरूपाक्षाः सहसा विप्रदुद्रुवुः॥ **6.75.5** ॥ 3356

गोपुराट्टप्रतोलीषु चर्यासु विविधासु च।
प्रासादेषु च संहृष्टाः ससृजुस्ते हुताशनम्॥ **6.75.6** ॥ 3357

तेषां गृहसहस्राणि ददाह हुतभुक् तदा।
प्रासादाः पर्वताकाराः पतन्ति धरणीतले॥ **6.75.7** ॥ 3358

अगुरुर्दह्यते तत्र परं चैव सुचन्दनम्।
मौक्तिका मणयः स्निग्धा वज्रं चापि प्रवालकम्॥ **6.75.8**॥ 3359

क्षौमं च दह्यते तत्र कौशेयं चापि शोभनम्।
आविकं विविधं चौर्णं काञ्चनं भाण्डमायुधम्॥ **6.75.9**॥ 3360

नानाविकृतसंस्थानं वाजिभाण्डपरिच्छदम्।
गजग्रैवेयकक्ष्याश्च रथभाण्डांश्च संस्कृतान्॥ **6.75.10**॥ 3361

तनुत्राणि च योधानां हस्त्यश्वानां च वर्म च।
खड्गा धनूंषि ज्याबाणास्तोमराङ्कुशशक्तयः॥ **6.75.11**॥ 3362

रोमजं वालजं चर्म व्याघ्रजं चाण्डजं बहु।
मुक्तामणिविचित्रांश्च प्रासादांश्च समन्ततः॥ **6.75.12**॥ 3363

विविधानस्त्रसङ्घातानग्निर्दहति तत्र वै।
नानाविधान् गृहांश्चित्रान् ददाह हुतभुक् तदा॥ **6.75.13**॥ 3364

आवासान् राक्षसानां च सर्वेषां गृहगृध्नुनाम्।
हेमचित्रतनुत्राणां स्रग्भाण्डाम्बरधारिणाम्॥ **6.75.14**॥ 3365

सीधुपानचलाक्षाणां मदविह्वलगामिनाम्।
कान्तालम्बितवस्त्राणां शत्रुसञ्जातमन्युनाम्॥ **6.75.15**॥ 3366

गदाशूलासिहस्तानां खादतां पिबतामपि।
शयनेषु महार्हेषु प्रसुप्तानां प्रियैः सह॥ **6.75.16**॥ 3367

त्रस्तानां गच्छतां तूर्णं पुत्रानादाय सर्वतः।
तेषां शतसहस्राणि तदा लङ्कानिवासिनाम्॥ **6.75.17**॥ 3368

अदहत् पावकस्तत्र जज्वाल च पुनः पुनः।
सारवन्ति महार्हाणि गम्भीरगुणवन्ति च॥ **6.75.18**॥ 3369

हेमचन्द्रार्धचन्द्राणि चन्द्रशालोन्नतानि च।
तत्र चित्रगवाक्षाणि साधिष्ठानानि सर्वशः॥ **6.75.19**॥ 3370

मणिविद्रुमचित्राणि स्पृशन्तीव दिवाकरम्।
क्रौञ्चबर्हिणवीणानां भूषणानां च निःस्वनैः॥ **6.75.20**॥ 3371

नादितान्यचलाभानि वेश्मान्यग्निर्ददाह सः।
ज्वलनेन परीतानि तोरणानि चकाशिरे॥ **6.75.21**॥ 3372

विद्युद्भिरिव नद्धानि मेघजालानि घर्मगे।
ज्वलनेन परीतानि गृहाणि प्रचकाशिरे॥ **6.75.22**॥ 3373

दावाग्निदीप्तानि यथा शिखराणि महागिरेः।
विमानेषु प्रसुप्ताश्च दह्यमाना वराङ्गनाः॥ **6.75.23**॥ 3374

त्यक्ताभरणसंयोगा हाहेत्युच्चैर्विचुक्रुशुः।
तत्र चाग्निपरीतानि निपेतुर्भवनान्यपि॥ **6.75.24**॥ 3375

वज्रिवज्रहतानीव शिखराणि महागिरेः।
तानि निर्दह्यमानानि दूरतः प्रचकाशिरे॥ **6.75.25**॥ 3376

हिमवच्छिखराणीव दह्यमानानि सर्वशः।
हर्म्याग्रैर्दह्यमानैश्च ज्वालाप्रज्वलितैरपि॥ **6.75.26**॥ 3377

रात्रौ सा दृश्यते लङ्का पुष्पितैरिव किंशुकैः।
हस्त्यध्यक्षैर्गजैर्मुक्तैर्मुक्तैश्च तुरगैरपि।
बभूव लङ्का लोकान्ते भ्रान्तग्राह इवार्णवः॥ **6.75.27**॥ 3378

अश्वं मुक्तं गजो दृष्ट्वा क्वचिद् भीतोऽपसर्पति।
भीतो भीतं गजं दृष्ट्वा क्वचिदश्वो निवर्तते॥ **6.75.28**॥ 3379

लङ्कायां दह्यमानायां शुशुभे च महोदधिः।
छायासंसक्तसलिलो लोहितोद इवार्णवः॥ **6.75.29**॥ 3380

सा बभूव मुहूर्तेन हरिभिर्दीपिता पुरी।
लोकस्यास्य क्षये घोरे प्रदीप्तेव वसुन्धरा॥ **6.75.30**॥ 3381

नारीजनस्य धूमेन व्याप्तस्योच्चैर्विनेदुषः।
स्वनो ज्वलनतप्तस्य शुश्रुवे शतयोजनम्॥ **6.75.31**॥ 3382

प्रदग्धकायानपरान् राक्षसान् निर्गतान् बहिः।
सहसा ह्युत्पतन्ति स्म हरयोऽथ युयुत्सवः॥ **6.75.32**॥ 3383

उद्घुष्टं वानराणां च राक्षसानां च निःस्वनम्।
दिशो दश समुद्रं च पृथिवीं च व्यनादयत्॥ **6.75.33**॥ 3384

विशल्यौ च महात्मानौ तावुभौ रामलक्ष्मणौ।
असम्भ्रान्तौ जगृहतुस्ते उभे धनुषी वरे॥ **6.75.34**॥ 3385

ततो विस्फारयामास रामश्च धनुरुत्तमम्।
बभूव तुमुलः शब्दो राक्षसानां भयावहः॥ **6.75.35**॥ 3386

अशोभत तदा रामो धनुर्विस्फारयन् महत्।
भगवानिव सङ्क्रुद्धो भवो वेदमयं धनुः॥ **6.75.36**॥ 3387

उद्घुष्टं वानराणां च राक्षसानां च निःस्वनम्।
ज्याशब्दस्तावुभौ शब्दावति रामस्य शुश्रुवे॥ **6.75.37**॥ 3388

वानरोद्घुष्टघोषश्च राक्षसानां च निःस्वनः।
ज्याशब्दश्चापि रामस्य त्रयं व्याप दिशो दश॥ **6.75.38**॥ 3389

तस्य कार्मुकनिर्मुक्तैः शरैस्तत्पुरगोपुरम्।
कैलासशृङ्गप्रतिमं विकीर्णमभवद् भुवि॥ **6.75.39**॥ 3390

ततो रामशरान् दृष्ट्वा विमानेषु गृहेषु च।
सन्नाहो राक्षसेन्द्राणां तुमुलः समपद्यत॥ **6.75.40**॥ 3391

तेषां सन्नह्यमानानां सिंहनादं च कुर्वताम्।
शर्वरी राक्षसेन्द्राणां रौद्रीव समपद्यत॥ **6.75.41**॥ 3392

आदिष्टा वानरेन्द्रास्ते सुग्रीवेण महात्मना।
आसन्नं द्वारमासाद्य युध्यध्वं च प्लवङ्गमाः॥ **6.75.42**॥ 3393

यश्च वो वितथं कुर्यात् तत्र तत्राप्युपस्थितः।
स हन्तव्योऽभिसम्प्लुत्य राजशासनदूषकः॥ **6.75.43**॥ 3394

तेषु वानरमुख्येषु दीप्तोल्कोज्ज्वलपाणिषु।
स्थितेषु द्वारमाश्रित्य रावणं क्रोध आविशत्॥ **6.75.44**॥ 3395

तस्य जृम्भितविक्षेपाद् व्यामिश्रा वै दिशो दश।
रूपवानिव रुद्रस्य मन्युर्गात्रेष्वदृश्यत॥ **6.75.45**॥ 3396

स कुम्भं च निकुम्भं च कुम्भकर्णात्मजावुभौ।
प्रेषयामास सङ्क्रुद्धो राक्षसैर्बहुभिः सह॥ **6.75.46**॥ 3397

यूपाक्षः शोणिताक्षश्च प्रजङ्घः कम्पनस्तथा।
निर्ययुः कौम्भकर्णिभ्यां सह रावणशासनात्॥ **6.75.47**॥ 3398

शशास चैव तान् सर्वान् राक्षसान् स महाबलान्।
राक्षसा गच्छताद्यैव सिंहनादं च नादयन्॥ **6.75.48**॥ 3399

ततस्तु चोदितास्तेन राक्षसा ज्वलितायुधाः।
लङ्काया निर्ययुर्वीराः प्रणदन्तः पुनः पुनः॥ **6.75.49**॥ 3400

रक्षसां भूषणस्थाभिर्भाभिः स्वाभिश्च सर्वशः।
चक्रुस्ते सप्रभं व्योम हरयश्चाग्निभिः सह॥ **6.75.50**॥ 3401

तत्र ताराधिपस्याभा ताराणां भा तथैव च।
तयोराभरणाभा च ज्वलिता द्यामभासयत्॥ **6.75.51**॥ 3402

चन्द्राभा भूषणाभा च ग्रहाणां ज्वलतां च भा।
हरिराक्षससैन्यानि भ्राजयामास सर्वतः॥ **6.75.52**॥ 3403

तत्र चार्धप्रदीप्तानां गृहाणां सागरः पुनः।
भाभिः संसक्तसलिलश्चलोर्मिः शुशुभेऽधिकम्॥ **6.75.53**॥ 3404

पताकाध्वजसंयुक्तमुत्तमासिपरश्वधम्।
भीमाश्वरथमातङ्गं नानापत्तिसमाकुलम्॥ **6.75.54**॥ 3405

दीप्तशूलगदाखड्गप्रासतोमरकार्मुकम्।
तद् राक्षसबलं भीमं घोरविक्रमपौरुषम्॥ **6.75.55**॥ 3406

ददृशे ज्वलितप्रासं किङ्किणीशतनादितम्।
हेमजालाचितभुजं व्यावेष्टितपरश्वधम्॥ **6.75.56**॥ 3407

व्याघूर्णितमहाशस्त्रं बाणसंसक्तकार्मुकम्।
गन्धमाल्यमधूत्सेकसम्मोदितमहानिलम्॥ **6.75.57**॥ 3408

घोरं शूरजनाकीर्णं महाम्बुधरनिःस्वनम्।
तद् दृष्ट्वा बलमायातं राक्षसानां दुरासदम्॥ **6.75.58**॥ 3409

सञ्चचाल प्लवङ्गानां बलमुच्चैर्ननाद च।
जवेनाप्लुत्य च पुनस्तद् बलं रक्षसां महत्॥ **6.75.59**॥ 3410

अभ्ययात् प्रत्यरिबलं पतङ्गा इव पावकम्।
तेषां भुजपरामर्शव्यामृष्टपरिघाशनि॥ **6.75.60**॥ 3411

राक्षसानां बलं श्रेष्ठं भूयः परमशोभत।
तत्रोन्मत्ता इवोत्पेतुर्हरयोऽथ युयुत्सवः॥ **6.75.61**॥ 3412

तरुशैलैरभिघ्नन्तो मुष्टिभिश्च निशाचरान्।
तथैवापततां तेषां हरीणां निशितैः शरैः॥ **6.75.62**॥ 3413

शिरांसि सहसा जह्रू राक्षसा भीमविक्रमाः।
दशनैर्हतकर्णाश्च मुष्टिभिर्भिन्नमस्तकाः।
शिलाप्रहारभग्नाङ्गा विचेरुस्तत्र राक्षसाः॥ **6.75.63**॥ 3414

तथैवाप्यपरे तेषां कपीनामसिभिः शितैः।
प्रवरानभितो जघ्नुर्घोररूपा निशाचराः॥ **6.75.64**॥ 3415

घ्नन्तमन्यं जघानान्यः पातयन्तमपातयत्।
गर्हमाणं जगर्हान्यो दशन्तमपरोऽदशत्॥ **6.75.65**॥ 3416

देहीत्यन्यो ददात्यन्यो ददामीत्यपरः पुनः।
किं क्लेशयसि तिष्ठेति तत्रान्योन्यं बभाषिरे॥ **6.75.66**॥ 3417

विप्रलम्भितशस्त्रं च विमुक्तकवचायुधम्।
समुद्यतमहाप्रासं मुष्टिशूलासिकुन्तलम्॥ **6.75.67**॥ 3418

प्रावर्तत महारौद्रं युद्धं वानररक्षसाम्।
वानरान् दश सप्तेति राक्षसा जघ्नुराहवे॥ **6.75.68**॥ 3419

राक्षसान् दश सप्तेति वानराश्चाभ्यपातयन्।
विप्रलम्भितवस्त्रं च विमुक्तकवचध्वजम्।
बलं राक्षसमालम्ब्य वानराः पर्यवारयन्॥ **6.75.69**॥ 3420

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षड्ढप्ततितमः सर्गः ॥

अङ्गदेन कम्पनप्रजङ्घयोर्द्विविदेन शोणिताक्षस्य मैन्देन यूपाक्षस्य सुग्रीवेण कुम्भस्य वधश्च

प्रवृत्ते सङ्कुले तस्मिन् घोरे वीरजनक्षये।
अङ्गदः कम्पनं वीरमाससाद रणोत्सुकः॥ **6.76.1** ॥ 3421

आहूय सोऽङ्गदं कोपात् ताडयामास वेगितः।
गदया कम्पनः पूर्वं स चचाल भृशाहतः॥ **6.76.2** ॥ 3422

स संज्ञां प्राप्य तेजस्वी चिक्षेप शिखरं गिरेः।
अर्दितश्च प्रहारेण कम्पनः पतितो भुवि॥ **6.76.3** ॥ 3423

ततस्तु कम्पनं दृष्ट्वा शोणिताक्षो हतं रणे।
रथेनाभ्यपतत् क्षिप्रं तत्राङ्गदमभीतवत्॥ **6.76.4** ॥ 3424

सोऽङ्गदं निशितैर्बाणैस्तदा विव्याध वेगितः।
शरीरदारणैस्तीक्ष्णैः कालाग्निसमविग्रहैः॥ **6.76.5** ॥ 3425

क्षुरक्षुरप्रनाराचैर्वत्सदन्तैः शिलीमुखैः।
कर्णिशल्यविपाठैश्च बहुभिर्निशितैः शरैः॥ **6.76.6** ॥ 3426

अङ्गदः प्रतिविद्धाङ्गो वालिपुत्रः प्रतापवान्।
धनुरुग्रं रथं बाणान् ममर्द तरसा बली॥ **6.76.7** ॥ 3427

शोणिताक्षस्ततः क्षिप्रमसिचर्म समाददे।
उत्पपात तदा क्रुद्धो वेगवानविचारयन्॥ **6.76.8**॥ 3428

तं क्षिप्रतरमाप्लुत्य परामृश्याङ्गदो बली।
करेण तस्य तं खड्गं समाच्छिद्य ननाद च॥ **6.76.9**॥ 3429

तस्यांसफलके खड्गं निजघान ततोऽङ्गदः।
यज्ञोपवीतवच्चैनं चिच्छेद कपिकुञ्जरः॥ **6.76.10**॥ 3430

तं प्रगृह्य महाखड्गं विनद्य च पुनः पुनः।
वालिपुत्रोऽभिदुद्राव रणशीर्षे परानरीन्॥ **6.76.11**॥ 3431

प्रजङ्घसहितो वीरो यूपाक्षस्तु ततो बली।
रथेनाभिययौ क्रुद्धो वालिपुत्रं महाबलम्॥ **6.76.12**॥ 3432

आयसीं तु गदां गृह्य स वीरः कनकाङ्गदः।
शोणिताक्षः समाश्वस्य तमेवानुपपात ह॥ **6.76.13**॥ 3433

प्रजङ्घस्तु महावीरो यूपाक्षसहितो बली।
गदयाभिययौ क्रुद्धो वालिपुत्रं महाबलम्॥ **6.76.14**॥ 3434

तयोर्मध्ये कपिश्रेष्ठः शोणिताक्षप्रजङ्घयोः।
विशाखयोर्मध्यगतः पूर्णचन्द्र इवाबभौ॥ **6.76.15**॥ 3435

अङ्गदं परिरक्षन्तौ मैन्दो द्विविद एव च।
तस्य तस्थतुरभ्याशे परस्परदिदृक्षया॥ **6.76.16**॥ 3436

अभिपेतुर्महाकायाः प्रतियत्ता महाबलाः।
राक्षसा वानरान् रोषादसिबाणगदाधराः॥ **6.76.17**॥ 3437

त्रयाणां वानरेन्द्राणां त्रिभी राक्षसपुङ्गवैः।
संसक्तानां महद् युद्धमभवद् रोमहर्षणम्॥ **6.76.18**॥ 3438

ते तु वृक्षान् समादाय सम्प्रचिक्षिपुराहवे।
खड्गेन प्रतिचिक्षेप तान् प्रजङ्घो महाबलः॥ **6.76.19**॥ 3439

रथानश्वान् द्रुमाञ्छैलान् प्रतिचिक्षिपुराहवे।
शरौघैः प्रतिचिच्छेद तान् यूपाक्षो महाबलः॥ **6.76.20**॥ 3440

सृष्टान् द्विविदमैन्दाभ्यां द्रुमानुत्पाट्य वीर्यवान्।
बभञ्ज गदया मध्ये शोणिताक्षः प्रतापवान्॥ **6.76.21**॥ 3441

उद्यम्य विपुलं खड्गं परमर्मविदारणम्।
प्रजङ्घो वालिपुत्राय अभिदुद्राव वेगितः॥ **6.76.22**॥ 3442

तमभ्याशगतं दृष्ट्वा वानरेन्द्रो महाबलः।
आजघानाश्वकर्णेन द्रुमेणातिबलस्तदा॥ **6.76.23**॥ 3443

बाहुं चास्य सनिस्त्रिंशमाजघान स मुष्टिना।
वालिपुत्रस्य घातेन स पपात क्षितावसिः॥ **6.76.24**॥ 3444

तं दृष्ट्वा पतितं भूमौ खड्गं मुसलसन्निभम्।
मुष्टिं संवर्तयामास वज्रकल्पं महाबलः॥ **6.76.25**॥ 3445

स ललाटे महावीर्यमङ्गदं वानरर्षभम्।
आजघान महातेजाः स मुहूर्तं चचाल ह॥ **6.76.26**॥ 3446

स संज्ञां प्राप्य तेजस्वी वालिपुत्रः प्रतापवान्।
प्रजङ्घस्य शिरः कायात् पातयामास मुष्टिना॥ **6.76.27**॥ 3447

स यूपाक्षोऽश्रुपूर्णाक्षः पितृव्ये निहते रणे।
अवरुह्य रथात् क्षिप्रं क्षीणेषुः खड्गमाददे॥ **6.76.28**॥ 3448

तमापतन्तं सम्प्रेक्ष्य यूपाक्षं द्विविदस्त्वरन्।
आजघानोरसि क्रुद्धो जग्राह च बलाद् बली॥ **6.76.29**॥ 3449

गृहीतं भ्रातरं दृष्ट्वा शोणिताक्षो महाबलः।
आजघान महातेजा वक्षसि द्विविदं ततः॥ **6.76.30**॥ 3450

स ततोऽभिहतस्तेन चचाल च महाबलः।
उद्यतां च पुनस्तस्य जहार द्विविदो गदाम्॥ **6.76.31**॥ 3451

एतस्मिन्नन्तरे मैन्दो द्विविदाभ्याशमागमत्।
यूपाक्षं ताडयामास तलेनोरसि वीर्यवान्॥ **6.76.32**॥ 3452

तौ शोणिताक्षयूपाक्षौ प्लवङ्गाभ्यां तरस्विनौ।
चक्रतुः समरे तीव्रमाकर्षोत्पाटनं भृशम्॥ **6.76.33**॥ 3453

द्विविदः शोणिताक्षं तु विददार नखैर्मुखे।
निष्पिपेष स वीर्येण क्षितावाविध्य वीर्यवान्॥ **6.76.34**॥ 3454

यूपाक्षमभिसङ्क्रुद्धो मैन्दो वानरपुङ्गवः।
पीडयामास बाहुभ्यां पपात स हतः क्षितौ॥ **6.76.35**॥ 3455

हतप्रवीरा व्यथिता राक्षसेन्द्रचमूस्तथा।
जगामाभिमुखी सा तु कुम्भकर्णात्मजो यतः॥ **6.76.36**॥ 3456

आपतन्तीं च वेगेन कुम्भस्तां सान्त्वयद्यमूम्।
अथोत्कृष्टं महावीर्यैर्लब्धलक्षैः प्लवङ्गमैः॥ **6.76.37**॥ 3457

निपातितमहावीरां दृष्ट्वा रक्षश्चमूं तदा।
कुम्भः प्रचक्रे तेजस्वी रणे कर्म सुदुष्करम्॥ **6.76.38**॥ 3458

स धनुर्धन्विनां श्रेष्ठः प्रगृह्य सुसमाहितः।
मुमोचाशीविषप्रख्याञ्छरान् देहविदारणान्॥ **6.76.39**॥ 3459

तस्य तच्छुशुभे भूयः सशरं धनुरुत्तमम्।
विद्युदैरावतार्चिष्मद्द्वितीयेन्द्रधनुर्यथा॥ **6.76.40**॥ 3460

आकर्णकृष्टमुक्तेन जघान द्विविदं तदा।
तेन हाटकपुङ्खेन पत्रिणा पत्रवाससा॥ **6.76.41**॥ 3461

सहसाभिहतस्तेन विप्रमुक्तपदः स्फुरन्।
निपपात त्रिकूटाभो विह्वलन् प्लवगोत्तमः॥ **6.76.42**॥ 3462

मैन्दस्तु भ्रातरं तत्र भग्नं दृष्ट्वा महाहवे।
अभिदुद्राव वेगेन प्रगृह्य विपुलां शिलाम्॥ **6.76.43**॥ 3463

तां शिलां तु प्रचिक्षेप राक्षसाय महाबलः।
बिभेद तां शिलां कुम्भः प्रसन्नैः पञ्चभिः शरैः॥ **6.76.44**॥ 3464

सन्धाय चान्यं सुमुखं शरमाशीविषोपमम्।
आजघान महातेजा वक्षसि द्विविदाग्रजम्॥ **6.76.45**॥ 3465

स तु तेन प्रहारेण मैन्दो वानरयूथपः।
मर्मण्यभिहतस्तेन पपात भुवि मूर्च्छितः॥ **6.76.46**॥ 3466

अङ्गदो मातुलौ दृष्ट्वा मथितौ तु महाबलौ।
अभिदुद्राव वेगेन कुम्भमुद्यतकार्मुकम्॥ **6.76.47**॥ 3467

तमापतन्तं विव्याध कुम्भः पञ्चभिरायसैः।
त्रिभिश्चान्यैः शितैर्बाणैर्मातङ्गमिव तोमरैः।
सोऽङ्गदं बहुभिर्बाणैः कुम्भो विव्याध वीर्यवान्॥ **6.76.48**॥ 3468

अकुण्ठधारैर्निशितैस्तीक्ष्णैः कनकभूषणैः।
अङ्गदः प्रतिविद्धाङ्गो वालिपुत्रो न कम्पते॥ **6.76.49**॥ 3469

शिलापादपवर्षाणि तस्य मूर्ध्नि ववर्ष ह।
स प्रचिच्छेद तान् सर्वान् बिभेद च पुनः शिलाः॥ **6.76.50**॥ 3470

कुम्भकर्णात्मजः श्रीमान् वालिपुत्रसमीरितान्।
आपतन्तं च सम्प्रेक्ष्य कुम्भो वानरयूथपम्॥ **6.76.51**॥ 3471

भ्रुवौ विव्याध बाणाभ्यामुल्काभ्यामिव कुञ्जरम्।
तस्य सुस्राव रुधिरं पिहिते चास्य लोचने॥ **6.76.52**॥ 3472

अङ्गदः पाणिना नेत्रे पिधाय रुधिरोक्षिते।
सालमासन्नमेकेन परिजग्राह पाणिना॥ **6.76.53**॥ 3473

सम्पीड्योरसि सस्कन्धं करेणाभिनिवेश्य च।
किञ्चिदभ्यवनम्यैनमुन्ममाथ महारणे॥ **6.76.54**॥ 3474

तमिन्द्रकेतुप्रतिमं वृक्षं मन्दरसन्निभम्।
समुत्सृजत वेगेन मिषतां सर्वरक्षसाम्॥ **6.76.55**॥ 3475

स चिच्छेद शितैर्बाणैः सप्तभिः कायभेदनैः।
अङ्गदो विव्यथेऽभीक्ष्णं स पपात मुमोह च॥ **6.76.56**॥ 3476

अङ्गदं पतितं दृष्ट्वा सीदन्तमिव सागरे।
दुरासदं हरिश्रेष्ठा राघवाय न्यवेदयन्॥ **6.76.57**॥ 3477

रामस्तु व्यथितं श्रुत्वा वालिपुत्रं महाहवे।
व्यादिदेश हरिश्रेष्ठाञ्जाम्बवत्प्रमुखांस्ततः॥ **6.76.58**॥ 3478

ते तु वानरशार्दूलाः श्रुत्वा रामस्य शासनम्।
अभिपेतुः सुसङ्क्रुद्धाः कुम्भमुद्यतकार्मुकम्॥ **6.76.59**॥ 3479

ततो द्रुमशिलाहस्ताः कोपसंरक्तलोचनाः।
रिरक्षिषन्तोऽभ्यपतन्नङ्गदं वानरर्षभाः॥ **6.76.60**॥ 3480

जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः।
कुम्भकर्णात्मजं वीरं क्रुद्धाः समभिदुद्रुवुः॥ **6.76.61**॥ 3481

समीक्ष्यापततस्तांस्तु वानरेन्द्रान् महाबलान्।
आववार शरौघेण नगेनेव जलाशयम्॥ **6.76.62**॥ 3482

तस्य बाणपथं प्राप्य न शेकुरपि वीक्षितुम्।
वानरेन्द्रा महात्मानो वेलामिव महोदधिः॥ **6.76.63**॥ 3483

तांस्तु दृष्ट्वा हरिगणाञ्शरवृष्टिभिरर्दितान्।
अङ्गदं पृष्ठतः कृत्वा भ्रातृजं प्लवगेश्वरः॥ **6.76.64**॥ 3484

अभिदुद्राव सुग्रीवः कुम्भकर्णात्मजं रणे।
शैलसानुचरं नागं वेगवानिव केसरी॥ **6.76.65**॥ 3485

उत्पाट्य च महावृक्षानश्वकर्णादिकान् बहून्।
अन्यांश्च विविधान् वृक्षांश्चिक्षेप स महाकपिः॥ **6.76.66**॥ 3486

तां छादयन्तीमाकाशं वृक्षवृष्टिं दुरासदाम्।
कुम्भकर्णात्मजः श्रीमांश्चिच्छेद स्वशरैः शितैः॥ **6.76.67**॥ 3487

अभिलक्ष्येण तीव्रेण कुम्भेन निशितैः शरैः।
आचितास्ते द्रुमा रेजुर्यथा घोराः शतघ्नयः।
द्रुमवर्षं तु तद् भिन्नं दृष्ट्वा कुम्भेन वीर्यवान्॥ **6.76.68**॥ 3488

वानराधिपतिः श्रीमान् महासत्त्वो न विव्यथे।
स विध्यमानः सहसा सहमानस्तु ताञ्छरान्॥ **6.76.69**॥ 3489

कुम्भस्य धनुराक्षिप्य बभञ्जेन्द्रधनुःप्रभम्।
अवप्लुत्य ततः शीघ्रं कृत्वा कर्म सुदुष्करम्॥ **6.76.70**॥ 3490

अब्रवीत् कुपितः कुम्भं भग्नशृङ्गमिव द्विपम्।
निकुम्भाग्रज वीर्यं ते बाणवेगं तदद्भुतम्॥ **6.76.71**॥ 3491

सन्नतिश्च प्रभावश्च तव वा रावणस्य वा।
प्रह्लादबलिवृत्रघ्नकुबेरवरुणोपम॥ **6.76.72**॥ 3492

एकस्त्वमनुजातोऽसि पितरं बलवत्तरम्।
त्वामेवैकं महाबाहुं शूलहस्तमरिन्दमम्॥ **6.76.73**॥ 3493

त्रिदशा नातिवर्तन्ते जितेन्द्रियमिवाधयः।
विक्रमस्व महाबुद्धे कर्माणि मम पश्य च॥ **6.76.74**॥ 3494

वरदानात् पितृव्यस्ते सहते देवदानवान्।
कुम्भकर्णस्तु वीर्येण सहते च सुरासुरान्॥ **6.76.75**॥ 3495

धनुषीन्द्रजितस्तुल्यः प्रतापे रावणस्य च।
त्वमद्य रक्षसां लोके श्रेष्ठोऽसि बलवीर्यतः॥ **6.76.76**॥ 3496

महाविमर्दं समरे मया सह तवाद्भुतम्।
अद्य भूतानि पश्यन्तु शक्रशम्बरयोरिव॥ **6.76.77**॥ 3497

कृतमप्रतिमं कर्म दर्शितं चास्त्रकौशलम्।
पतिता हरिवीराश्च त्वयैते भीमविक्रमाः॥ **6.76.78**॥ 3498

उपालम्भभयाच्चैव नासि वीर मया हतः।
कृतकर्मपरिश्रान्तो विश्रान्तः पश्य मे बलम्॥ **6.76.79**॥ 3499

तेन सुग्रीववाक्येन सावमानेन मानितः।
अग्नेराज्यहुतस्येव तेजस्तस्याभ्यवर्धत॥ **6.76.80**॥ 3500

ततः कुम्भस्तु सुग्रीवं बाहुभ्यां जगृहे तदा।
गजाविवातीतमदौ निःश्वसन्तौ मुहुर्मुहुः॥ **6.76.81**॥ 3501

अन्योन्यगात्रग्रथितौ घर्षन्तावितरेतरम्।
सधूमां मुखतो ज्वालां विसृजन्तौ परिश्रमात्॥ **6.76.82**॥ 3502

तयोः पादाभिघाताच्च निमग्ना चाभवन्मही।
व्याघूर्णिततरङ्गश्च चुक्षुभे वरुणालयः॥ **6.76.83**॥ 3503

ततः कुम्भं समुत्क्षिप्य सुग्रीवो लवणाम्भसि।
पातयामास वेगेन दर्शयन्नुदधेस्तलम्॥ **6.76.84**॥ 3504

ततः कुम्भनिपातेन जलराशिः समुत्थितः।
विन्ध्यमन्दरसङ्काशो विससर्प समन्ततः॥ **6.76.85**॥ 3505

ततः कुम्भः समुत्पत्य सुग्रीवमभिपात्य च।
आजघानोरसि क्रुद्धो वज्रकल्पेन मुष्टिना॥ **6.76.86**॥ 3506

तस्य वर्म च पुस्फोट सञ्जज्ञे चापि शोणितम्।
तस्य मुष्टिर्महावेगः प्रतिजघ्नेऽस्थिमण्डले॥ **6.76.87**॥ 3507

तस्य वेगेन तत्रासीत् तेजः प्रज्वलितं महत्।
वज्रनिष्पेषसञ्जाता ज्वाला मेरोर्यथा गिरेः॥ **6.76.88**॥ 3508

स तत्राभिहतस्तेन सुग्रीवो वानरर्षभः।
मुष्टिं संवर्तयामास वज्रकल्पं महाबलः॥ **6.76.89**॥ 3509

अर्चिःसहस्रविकचरविमण्डलवर्चसम्।
स मुष्टिं पातयामास कुम्भस्योरसि वीर्यवान्॥ **6.76.90**॥ 3510

स तु तेन प्रहारेण विह्वलो भृशपीडितः।
निपपात तदा कुम्भो गतार्चिरिव पावकः॥ **6.76.91**॥ 3511

मुष्टिनाभिहतस्तेन निपपाताशु राक्षसः।
लोहिताङ्ग इवाकाशाद् दीप्तरश्मिर्यदृच्छया॥ **6.76.92**॥ 3512

कुम्भस्य पततो रूपं भग्नस्योरसि मुष्टिना।
बभौ रुद्राभिपन्नस्य यथा रूपं गवां पतेः॥ **6.76.93**॥ 3513

तस्मिन् हते भीमपराक्रमेण
प्लवङ्गमानामृषभेण युद्धे।
मही सशैला सवना चचाल
भयं च रक्षांस्यधिकं विवेश॥ **6.76.94**॥ 3514

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षड्ढ्नतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तसप्ततितमः सर्गः ॥

हनुमता निकुम्भस्य वधः

निकुम्भो भ्रातरं दृष्ट्वा सुग्रीवेण निपातितम्।
प्रदहन्निव कोपेन वानरेन्द्रमुदैक्षत ॥ **6.77.1** ॥ 3515

ततः स्रग्दामसन्नद्धं दत्तपञ्चाङ्गुलं शुभम्।
आददे परिघं धीरो महेन्द्रशिखरोपमम् ॥ **6.77.2** ॥ 3516

हेमपट्टपरिक्षिप्तं वज्रविद्रुमभूषितम्।
यमदण्डोपमं भीमं रक्षसां भयनाशनम् ॥ **6.77.3** ॥ 3517

तमाविध्य महातेजाः शक्रध्वजसमौजसम्।
निननाद विवृत्तास्यो निकुम्भो भीमविक्रमः ॥ **6.77.4** ॥ 3518

उरोगतेन निष्केण भुजस्थैरङ्गदैरपि।
कुण्डलाभ्यां च चित्राभ्यां मालया च सचित्रया ॥ **6.77.5** ॥ 3519

निकुम्भो भूषणैर्भाति तेन स्म परिघेण च।
यथेन्द्रधनुषा मेघः सविद्युत्स्तनयित्नुमान् ॥ **6.77.6** ॥ 3520

परिघाग्रेण पुस्फोट वातग्रन्थिर्महात्मनः।
प्रजज्वाल सघोषश्च विधूम इव पावकः ॥ **6.77.7** ॥ 3521

नगर्या विटपावत्या गन्धर्वभवनोत्तमैः।
सतारागणनक्षत्रं सचन्द्रसमहाग्रहम्।
निकुम्भपरिघाघूर्णं भ्रमतीव नभस्थलम्॥ **6.77.8**॥ 3522

दुरासदश्च सञ्जज्ञे परिघाभरणप्रभः।
क्रोधेन्धनो निकुम्भाग्निर्युगान्ताग्निरिवोत्थितः॥ **6.77.9**॥ 3523

राक्षसा वानराश्चापि न शेकुः स्पन्दितुं भयात्।
हनुमांस्तु विवृत्योरस्तस्थौ प्रमुखतो बली॥ **6.77.10**॥ 3524

परिघोपमबाहुस्तु परिघं भास्करप्रभम्।
बली बलवतस्तस्य पातयामास वक्षसि॥ **6.77.11**॥ 3525

स्थिरे तस्योरसि व्यूढे परिघः शतधा कृतः।
विकीर्यमाणः सहसा उल्काशतमिवाम्बरे॥ **6.77.12**॥ 3526

स तु तेन प्रहारेण न चचाल महाकपिः।
परिघेण समाधूतो यथा भूमिचलेऽचलः॥ **6.77.13**॥ 3527

स तथाभिहतस्तेन हनूमान् प्लवगोत्तमः।
मुष्टिं संवर्तयामास बलेनातिमहाबलः॥ **6.77.14**॥ 3528

तमुद्यम्य महातेजा निकुम्भोरसि वीर्यवान्।
अभिचिक्षेप वेगेन वेगवान् वायुविक्रमः॥ **6.77.15**॥ 3529

तत्र पुस्फोट वर्मास्य प्रसुस्राव च शोणितम्।
मुष्टिना तेन सञ्जज्ञे मेघे विद्युदिवोत्थिता॥ **6.77.16**॥ 3530

स तु तेन प्रहारेण निकुम्भो विचचाल च।
स्वस्थश्चापि निजग्राह हनूमन्तं महाबलम्॥ **6.77.17**॥ 3531

चुक्रुशुश्च तदा सङ्ख्ये भीमं लङ्कानिवासिनः।
निकुम्भेनोद्यतं दृष्ट्वा हनूमन्तं महाबलम्॥ **6.77.18**॥ 3532

स तथा ह्रियमाणोऽपि हनूमांस्तेन रक्षसा।
आजघानानिलसुतो वज्रकल्पेन मुष्टिना॥ **6.77.19**॥ 3533

आत्मानं मोक्षयित्वाथ क्षितावभ्यवपद्यत।
हनूमानुन्ममाथाशु निकुम्भं मारुतात्मजः॥ **6.77.20**॥ 3534

निक्षिप्य परमायत्तो निकुम्भं निष्पिपेष च।
उत्पत्य चास्य वेगेन पपातोरसि वेगवान्॥ **6.77.21**॥ 3535

परिगृह्य च बाहुभ्यां परिवृत्य शिरोधराम्।
उत्पाटयामास शिरो भैरवं नदतो महत्॥ **6.77.22**॥ 3536

अथ निनदति सादिते निकुम्भे
पवनसुतेन रणे बभूव युद्धम्।
दशरथसुतराक्षसेन्द्रसून्वो -
र्भृशतरमागतरोषयोः सुभीमम्॥ **6.77.23**॥ 3537

व्यपेते तु जीवे निकुम्भस्य हृष्टा
विनेदुः प्लवङ्गा दिशः सस्वनुश्च।
चचालेव चोर्वी पपातेव सा द्यौ -
र्बलं राक्षसानां भयं चाविवेश॥ **6.77.24**॥ 3538

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टसप्ततितमः सर्गः ॥

रावणस्याज्ञया मकराक्षस्य युद्धाय प्रस्थानम्

निकुम्भं निहतं श्रुत्वा कुम्भं च विनिपातितम्।
रावणः परमामर्षी प्रजज्वालानलो यथा॥ **6.78.1** ॥ 3539

नैर्ऋतः क्रोधशोकाभ्यां द्वाभ्यां तु परिमूर्च्छितः।
खरपुत्रं विशालाक्षं मकराक्षमचोदयत्॥ **6.78.2** ॥ 3540

गच्छ पुत्र मयाऽऽज्ञप्तो बलेनाभिसमन्वितः।
राघवं लक्ष्मणं चैव जहि तौ सवनौकसौ॥ **6.78.3** ॥ 3541

रावणस्य वचः श्रुत्वा शूरमानी खरात्मजः।
बाढमित्यब्रवीद्धृष्टो मकराक्षो निशाचरम्॥ **6.78.4** ॥ 3542

सोऽभिवाद्य दशग्रीवं कृत्वा चापि प्रदक्षिणम्।
निर्जगाम गृहाच्छुभ्राद् रावणस्याज्ञया बली॥ **6.78.5** ॥ 3543

समीपस्थं बलाध्यक्षं खरपुत्रोऽब्रवीद् वचः।
रथमानीयतां तूर्णं सैन्यं त्वानीयतां त्वरात्॥ **6.78.6** ॥ 3544

तस्य तद् वचनं श्रुत्वा बलाध्यक्षो निशाचरः।
स्यन्दनं च बलं चैव समीपं प्रत्यपादयत्॥ **6.78.7** ॥ 3545

प्रदक्षिणं रथं कृत्वा समारुह्य निशाचरः।
सूतं सञ्चोदयामास शीघ्रं वै रथमावह॥ **6.78.8**॥ 3546

अथ तान् राक्षसान् सर्वान् मकराक्षोऽब्रवीदिदम्।
यूयं सर्वे प्रयुध्यध्वं पुरस्तान्मम राक्षसाः॥ **6.78.9**॥ 3547

अहं राक्षसराजेन रावणेन महात्मना।
आज्ञप्तः समरे हन्तुं तावुभौ रामलक्ष्मणौ॥ **6.78.10**॥ 3548

अद्य रामं वधिष्यामि लक्ष्मणं च निशाचराः।
शाखामृगं च सुग्रीवं वानरांश्च शरोत्तमैः॥ **6.78.11**॥ 3549

अद्य शूलनिपातैश्च वानराणां महाचमूम्।
प्रदहिष्यामि सम्प्राप्तां शुष्केन्धनमिवानलः॥ **6.78.12**॥ 3550

मकराक्षस्य तच्छ्रुत्वा वचनं ते निशाचराः।
सर्वे नानायुधोपेता बलवन्तः समाहिताः॥ **6.78.13**॥ 3551

ते कामरूपिणः क्रूरा दंष्ट्रिणः पिङ्गलेक्षणाः।
मातङ्गा इव नर्दन्तो ध्वस्तकेशा भयावहाः॥ **6.78.14**॥ 3552

परिवार्य महाकाया महाकायं खरात्मजम्।
अभिजग्मुस्ततो हृष्टाश्चालयन्तो वसुन्धराम्॥ **6.78.15**॥ 3553

शङ्खभेरीसहस्राणामाहतानां समन्ततः।
क्ष्वेलितास्फोटितानां च तत्र शब्दो महानभूत्॥ **6.78.16**॥ 3554

प्रभ्रष्टोऽथ करात् तस्य प्रतोदः सारथेस्तदा।
पपात सहसा दैवाद् ध्वजस्तस्य तु रक्षसः॥ **6.78.17**॥ 3555

तस्य ते रथसंयुक्ता हया विक्रमवर्जिताः।
चरणैराकुलैर्गत्वा दीनाः सास्रमुखा ययुः॥ **6.78.18**॥ 3556

प्रवाति पवनस्तस्मिन् सपांसुः खरदारुणः।
निर्याणे तस्य रौद्रस्य मकराक्षस्य दुर्मतेः॥ **6.78.19**॥ 3557

तानि दृष्ट्वा निमित्तानि राक्षसा वीर्यवत्तमाः।
अचिन्त्य निर्गताः सर्वे यत्र तौ रामलक्ष्मणौ॥ **6.78.20**॥ 3558

घनगजमहिषाङ्गतुल्यवर्णाः
समरमुखेष्वसकृद्गदासिभिन्नाः।
अहमहमिति युद्धकौशलास्ते
रजनिचराः परिबभ्रमुर्मुहुस्ते॥ **6.78.21**॥ 3559

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टसप्ततितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनाशीतितमः सर्गः ॥

श्रीरामेण मकराक्षस्य वधः

निर्गतं मकराक्षं ते दृष्ट्वा वानरपुङ्गवाः।
आप्लुत्य सहसा सर्वे योद्धुकामा व्यवस्थिताः ॥ **6.79.1** ॥ 3560

ततः प्रवृत्तं सुमहत् तद् युद्धं लोमहर्षणम्।
निशाचरैः प्लवङ्गानां देवानां दानवैरिव ॥ **6.79.2** ॥ 3561

वृक्षशूलनिपातैश्च गदापरिघपातनैः।
अन्योन्यं मर्दयन्ति स्म तदा कपिनिशाचराः ॥ **6.79.3** ॥ 3562

शक्तिखड्गगदाकुन्तैस्तोमरैश्च निशाचराः।
पट्टिशैर्भिन्दिपालैश्च बाणपातैः समन्ततः ॥ **6.79.4** ॥ 3563

पाशमुद्गरदण्डैश्च निर्घातैश्चापरैस्तथा।
कदनं कपिसिंहानां चक्रुस्ते रजनीचराः ॥ **6.79.5** ॥ 3564

बाणौघैरर्दिताश्चापि खरपुत्रेण वानराः।
सभ्भ्रान्तमनसः सर्वे दुद्रुवुर्भयपीडिताः ॥ **6.79.6** ॥ 3565

तान् दृष्ट्वा राक्षसाः सर्वे द्रवमाणान् वनौकसः।
नेदुस्ते सिंहवद् दृप्ता राक्षसा जितकाशिनः ॥ **6.79.7** ॥ 3566

विद्रवत्सु तदा तेषु वानरेषु समन्ततः।
रामस्तान् वारयामास शरवर्षेण राक्षसान्॥ **6.79.8**॥ 3567

वारितान् राक्षसान् दृष्ट्वा मकराक्षो निशाचरः।
कोपानलसमाविष्टो वचनं चेदमब्रवीत्॥ **6.79.9**॥ 3568

तिष्ठ राम मया सार्धं द्वन्द्वयुद्धं भविष्यति।
त्याजयिष्यामि ते प्राणान् धनुर्मुक्तैः शितैः शरैः॥ **6.79.10**॥ 3569

यत् तदा दण्डकारण्ये पितरं हतवान् मम।
तदग्रतः स्वकर्मस्थं स्मृत्वा रोषोऽभिवर्धते॥ **6.79.11**॥ 3570

दह्यन्ते भृशमङ्गानि दुरात्मन् मम राघव।
यन्मयासि न दृष्टस्त्वं तस्मिन् काले महावने॥ **6.79.12**॥ 3571

दिष्ट्यासि दर्शनं राम मम त्वं प्राप्तवानिह।
काङ्क्षितोऽसि क्षुधार्तस्य सिंहस्येवेतरो मृगः॥ **6.79.13**॥ 3572

अद्य मद्बाणवेगेन प्रेतराड्विषयं गतः।
ये त्वया निहताः शूराः सह तैश्च वसिष्यसि॥ **6.79.14**॥ 3573

बहुनात्र किमुक्तेन शृणु राम वचो मम।
पश्यन्तु सकला लोकास्त्वां मां चैव रणाजिरे॥ **6.79.15**॥ 3574

अस्त्रैर्वा गदया वापि बाहुभ्यां वा रणाजिरे।
अभ्यस्तं येन वा राम वर्ततां तेन वा मृधम्॥ **6.79.16**॥ 3575

मकराक्षवचः श्रुत्वा रामो दशरथात्मजः।
अब्रवीत् प्रहसन् वाक्यमुत्तरोत्तरवादिनम्॥ **6.79.17**॥ 3576

कत्थसे किं वृथा रक्षो बहून्यसदृशानि ते।
न रणे शक्यते जेतुं विना युद्धेन वाग्बलात्॥ **6.79.18**॥ 3577

चतुर्दश सहस्राणि रक्षसां त्वत्पिता च यः।
त्रिशिरा दूषणश्चापि दण्डके निहतो मया॥ **6.79.19**॥ 3578

स्वाशिताश्चापि मांसेन गृध्रगोमायुवायसाः।
भविष्यन्त्यद्य वै पाप तीक्ष्णतुण्डनखाङ्कुशाः॥ **6.79.20**॥ 3579

राघवेणैवमुक्तस्तु मकराक्षो महाबलः।
बाणौघानमुचत् तस्मै राघवाय रणाजिरे॥ **6.79.21**॥ 3580

ताञ्छराञ्छरवर्षेण रामश्चिच्छेद नैकधा।
निपेतुर्भुवि विच्छिन्ना रुक्मपुङ्खाः सहस्रशः॥ **6.79.22**॥ 3581

तद् युद्धमभवत् तत्र समेत्यान्योन्यमोजसा।
खरराक्षसपुत्रस्य सूनोर्दशरथस्य च॥ **6.79.23**॥ 3582

जीमूतयोरिवाकाशे शब्दो ज्यातलयोरिव।
धनुर्मुक्तः स्वनोऽन्योन्यं श्रूयते च रणाजिरे॥ **6.79.24**॥ 3583

देवदानवगन्धर्वाः किन्नराश्च महोरगाः।
अन्तरिक्षगताः सर्वे द्रष्टुकामास्तदद्भुतम्॥ **6.79.25**॥ 3584

विद्धमन्योन्यगात्रेषु द्विगुणं वर्धते बलम्।
कृतप्रतिकृतान्योन्यं कुरुतां तौ रणाजिरे॥ **6.79.26**॥ 3585

राममुक्तांस्तु बाणौघान् राक्षसस्त्वच्छिनद् रणे।
रक्षोमुक्तांस्तु रामो वै नैकधा प्राच्छिनच्छरैः॥ **6.79.27**॥ 3586

बाणौघविततताः सर्वा दिशश्च प्रदिशस्तथा।
सञ्छन्ना वसुधा चैव समन्तान्न प्रकाशते॥ **6.79.28**॥ 3587

ततः क्रुद्धो महाबाहुर्धनुश्चिच्छेद संयुगे।
अष्टाभिरथ नाराचैः सूतं विव्याध राघवः॥ **6.79.29**॥ 3588

भित्त्वा रथं शरै रामो हत्वा अश्वानपातयत्।
विरथो वसुधास्थः स मकराक्षो निशाचरः॥ **6.79.30**॥ 3589

तत्तिष्ठद् वसुधां रक्षः शूलं जग्राह पाणिना।
त्रासनं सर्वभूतानां युगान्ताग्निसमप्रभम्॥ **6.79.31**॥ 3590

दुरवापं महच्छूलं रुद्रदत्तं भयङ्करम्।
जाज्वल्यमानमाकाशे संहारास्त्रमिवापरम्॥ **6.79.32**॥ 3591

यं दृष्ट्वा देवताः सर्वा भयार्ता विद्रुता दिशः।
विभ्राम्य च महच्छूलं प्रज्वलन्तं निशाचरः॥ **6.79.33**॥ 3592

स क्रोधात् प्राहिणोत् तस्मै राघवाय महाहवे।
तमापतन्तं ज्वलितं खरपुत्रकराच्च्युतम्॥ **6.79.34**॥ 3593

बाणैश्चतुर्भिराकाशे शूलं चिच्छेद राघवः।
स भिन्नो नैकधा शूलो दिव्यहाटकमण्डितः।
व्यशीर्यत महोल्केव रामबाणार्दितो भुवि॥ **6.79.35**॥ 3594

तच्छूलं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा।
साधु साध्विति भूतानि व्याहरन्ति नभोगताः॥ **6.79.36**॥ 3595

तं दृष्ट्वा निहतं शूलं मकराक्षो निशाचरः।
मुष्टिमुद्यम्य काकुत्स्थं तिष्ठ तिष्ठेति चाब्रवीत्॥ **6.79.37**॥ 3596

स तं दृष्ट्वा पतन्तं तु प्रहस्य रघुनन्दनः।
पावकास्त्रं ततो रामः सन्दधे तु शरासने॥ **6.79.38**॥ 3597

तेनास्त्रेण हतं रक्षः काकुत्स्थेन तदा रणे।
सञ्छिन्नहृदयं तत्र पपात च ममार च॥ **6.79.39**॥ 3598

दृष्ट्वा ते राक्षसाः सर्वे मकराक्षस्य पातनम्।
लङ्कामेव प्रधावन्त रामबाणभयार्दिताः॥ **6.79.40** ॥ 3599

दशरथनृपसूनुबाणवेगै
रजनिचरं निहतं खरात्मजं तम्।
प्रददृशुरथ देवताः प्रहृष्टा
गिरिमिव वज्रहतं यथा विकीर्णम्॥ **6.79.41** ॥ 3600

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनाशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अशीतितमः सर्गः ॥

रावणस्यादेशेनेन्द्रजितो घोरं युद्धं तस्य वधविषये श्रीरामलक्ष्मणयोः संलापश्च

मकराक्षं हतं श्रुत्वा रावणः समितिञ्जयः।
रोषेण महताविष्टो दन्तान् कटकटाय्य च॥ **6.80.1** ॥ 3601

कुपितश्च तदा तत्र किं कार्यमिति चिन्तयन्।
आदिदेशाथ सङ्क्रुद्धो रणायेन्द्रजितं सुतम्॥ **6.80.2** ॥ 3602

जहि वीर महावीर्यौ भ्रातरौ रामलक्ष्मणौ।
अदृश्यो दृश्यमानो वा सर्वथा त्वं बलाधिकः॥ **6.80.3** ॥ 3603

त्वमप्रतिमकर्माणमिन्द्रं जयसि संयुगे।
किं पुनर्मानुषौ दृष्ट्वा न वधिष्यसि संयुगे॥ **6.80.4** ॥ 3604

तथोक्तो राक्षसेन्द्रेण प्रतिगृह्य पितुर्वचः।
यज्ञभूमौ स विधिवत् पावकं जुहुवेन्द्रजित्॥ **6.80.5** ॥ 3605

जुह्वतश्चापि तत्राग्निं रक्तोष्णीषधराः स्त्रियः।
आजग्मुस्तत्र सम्भ्रान्ता राक्षस्यो यत्र रावणिः॥ **6.80.6** ॥ 3606

शस्त्राणि शरपत्राणि समिधोऽथ बिभीतकाः।
लोहितानि च वासांसि स्रुवं काष्ण्यायसं तथा॥ **6.80.7** ॥ 3607

सर्वतोऽग्निं समास्तीर्य शरपत्रैः सतोमरैः।
छागस्य सर्वकृष्णस्य गलं जग्राह जीवतः॥ **6.80.8**॥ 3608

सकृद्धोमसमिद्धस्य विधूमस्य महार्चिषः।
बभूवुस्तानि लिङ्गानि विजयं दर्शयन्ति च॥ **6.80.9**॥ 3609

प्रदक्षिणावर्तशिखस्तप्तहाटकसन्निभः।
हविस्तत् प्रतिजग्राह पावकः स्वयमुत्थितः॥ **6.80.10**॥ 3610

हुत्वाग्निं तर्पयित्वाथ देवदानवराक्षसान्।
आरुरोह रथश्रेष्ठमन्तर्धानगतं शुभम्॥ **6.80.11**॥ 3611

स वाजिभिश्चतुर्भिस्तु बाणैस्तु निशितैर्युतः।
आरोपितमहाचापः शुशुभे स्यन्दनोत्तमः॥ **6.80.12**॥ 3612

जाज्वल्यमानो वपुषा तपनीयपरिच्छदः।
मृगैश्चन्द्रार्धचन्द्रैश्च स रथः समलङ्कृतः॥ **6.80.13**॥ 3613

जाम्बूनदमहाकम्बुर्दीप्तपावकसन्निभः।
बभूवेन्द्रजितः केतुर्वैदूर्यसमलङ्कृतः॥ **6.80.14**॥ 3614

तेन चादित्यकल्पेन ब्रह्मास्त्रेण च पालितः।
स बभूव दुराधर्षो रावणिः सुमहाबलः॥ **6.80.15**॥ 3615

सोऽभिनिर्याय नगरादिन्द्रजित् समितिञ्जयः।
हुत्वाग्निं राक्षसैर्मन्त्रैरन्तर्धानगतोऽब्रवीत्॥ **6.80.16**॥ 3616

अद्य हत्वा रणे यौ तौ मिथ्या प्रव्रजितौ वने।
जयं पित्रे प्रदास्यामि रावणाय रणेऽधिकम्॥ **6.80.17**॥ 3617

अद्य निर्वानरामुर्वीं हत्वा रामं च लक्ष्मणम्।
करिष्ये परमां प्रीतिमित्युक्त्वान्तरधीयत॥ **6.80.18**॥ 3618

आपपाताथ सङ्क्रुद्धो दशग्रीवेण चोदितः।
तीक्ष्णकार्मुकनाराचैस्तीक्ष्णस्त्विन्द्ररिपू रणे॥ **6.80.19**॥ 3619

स ददर्श महावीर्यौ नागौ त्रिशिरसाविव।
सृजन्ताविषुजालानि वीरौ वानरमध्यगौ॥ **6.80.20**॥ 3620

इमौ ताविति सञ्चिन्त्य सज्यं कृत्वा च कार्मुकम्।
सन्ततानेषुधाराभिः पर्जन्य इव वृष्टिमान्॥ **6.80.21**॥ 3621

स तु वैहायसरथो युधि तौ रामलक्ष्मणौ।
अचक्षुर्विषये तिष्ठन् विव्याध निशितैः शरैः॥ **6.80.22**॥ 3622

तौ तस्य शरवेगेन परीतौ रामलक्ष्मणौ।
धनुषी सशरे कृत्वा दिव्यमस्त्रं प्रचक्रतुः॥ **6.80.23**॥ 3623

प्रच्छादयन्तौ गगनं शरजालैर्महाबलौ।
तमस्त्रैः सूर्यसङ्काशैर्नैव पस्पर्शतुः शरैः॥ **6.80.24**॥ 3624

स हि धूमान्धकारं च चक्रे प्रच्छादयन्नभः।
दिशश्चान्तर्दधे श्रीमान् नीहारतमसा वृताः॥ **6.80.25**॥ 3625

नैव ज्यातलनिर्घोषो न च नेमिखुरस्वनः।
शुश्रुवे चरतस्तस्य न च रूपं प्रकाशते॥ **6.80.26**॥ 3626

घनान्धकारे तिमिरे शिलावर्षमिवाद्भुतम्।
स ववर्ष महाबाहुर्नाराचशरवृष्टिभिः॥ **6.80.27**॥ 3627

स रामं सूर्यसङ्काशैः शरैर्दत्तवरैर्भृशम्।
विव्याध समरे क्रुद्धः सर्वगात्रेषु रावणिः॥ **6.80.28**॥ 3628

तौ हन्यमानौ नाराचैर्धाराभिरिव पर्वतौ।
हेमपुङ्खान् नरव्याघ्रौ तिग्मान् मुमुचतुः शरान्॥ **6.80.29**॥ 3629

अन्तरिक्षे समासाद्य रावणिं कङ्कपत्रिणः।
निकृत्य पतगा भूमौ पेतुस्ते शोणिताप्लुताः॥ **6.80.30**॥ 3630

अतिमात्रं शरौघेण दीप्यमानौ नरोत्तमौ।
तानिषून् पततो भल्लैरनेकैर्विचकर्ततुः॥ **6.80.31**॥ 3631

यतो हि ददृशाते तौ शरान् निपतिताञ्छितान्।
ततस्तु तौ दाशरथी ससृजातेऽस्त्रमुत्तमम्॥ **6.80.32**॥ 3632

रावणिस्तु दिशः सर्वा रथेनातिरथोऽपतत्।
विव्याध तौ दाशरथी लघ्वस्त्रो निशितैः शरैः॥ **6.80.33**॥ 3633

तेनातिविद्धौ तौ वीरौ रुक्मपुङ्खैः सुसंहतैः।
बभूवतुर्दाशरथी पुष्पिताविव किंशुकौ॥ **6.80.34**॥ 3634

नास्य वेगगतिं कश्चिन्न च रूपं धनुः शरान्।
न चास्य विदितं किञ्चित् सूर्यस्येवाभ्रसम्प्लवे॥ **6.80.35**॥ 3635

तेन विद्धाश्च हरयो निहताश्च गतासवः।
बभूवुः शतशस्तत्र पतिता धरणीतले॥ **6.80.36**॥ 3636

लक्ष्मणस्तु ततः क्रुद्धो भ्रातरं वाक्यमब्रवीत्।
ब्राह्ममस्त्रं प्रयोक्ष्यामि वधार्थं सर्वरक्षसाम्॥ **6.80.37**॥ 3637

तमुवाच ततो रामो लक्ष्मणं शुभलक्षणम्।
नैकस्य हेतो रक्षांसि पृथिव्यां हन्तुमर्हसि॥ **6.80.38**॥ 3638

अयुध्यमानं प्रच्छन्नं प्राञ्जलिं शरणागतम्।
पलायमानं मत्तं वा न हन्तुं त्वमिहार्हसि॥ **6.80.39**॥ 3639

तस्यैव तु वधे यत्नं करिष्यामि महाभुज।
आदेक्ष्यावो महावेगानस्त्रानाशीविषोपमान्॥ **6.80.40**॥ 3640

तमेनं मायिनं क्षुद्रमन्तर्हितरथं बलात्।
राक्षसं निहनिष्यन्ति दृष्ट्वा वानरयूथपाः॥ **6.80.41**॥ 3641

यद्येष भूमिं विशते दिवं वा
रसातलं वापि नभस्तलं वा।
एवं विगूढोऽपि ममास्त्रदग्धः
पतिष्यते भूमितले गतासुः॥ **6.80.42**॥ 3642

इत्येवमुक्त्वा वचनं महार्थं
रघुप्रवीरः प्लवगर्षभैर्वृतः।
वधाय रौद्रस्य नृशंसकर्मण -
स्तदा महात्मा त्वरितं निरीक्षते॥ **6.80.43**॥ 3643

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकाशीतितमः सर्गः ॥

इन्द्रजिता मायामयसीताया वधः

विज्ञाय तु मनस्तस्य राघवस्य महात्मनः।
स निवृत्याहवात् तस्मात् प्रविवेश पुरं ततः॥ **6.81.1** ॥ 3644

सोऽनुस्मृत्य वधं तेषां राक्षसानां तरस्विनाम्।
क्रोधताम्रेक्षणः शूरो निर्जगामाथ रावणिः॥ **6.81.2** ॥ 3645

स पश्चिमेन द्वारेण निर्ययौ राक्षसैर्वृतः।
इन्द्रजित् सुमहावीर्यः पौलस्त्यो देवकण्टकः॥ **6.81.3** ॥ 3646

इन्द्रजित्तु ततो दृष्ट्वा भ्रातरौ रामलक्ष्मणौ।
रणायाभ्युद्यतौ वीरौ मायां प्रादुष्करोत् तदा॥ **6.81.4** ॥ 3647

इन्द्रजित्तु रथे स्थाप्य सीतां मायामयीं तदा।
बलेन महतावृत्य तस्या वधमरोचयत्॥ **6.81.5** ॥ 3648

मोहनार्थं तु सर्वेषां बुद्धिं कृत्वा सुदुर्मतिः।
हन्तुं सीतां व्यवसितो वानराभिमुखो ययौ॥ **6.81.6** ॥ 3649

तं दृष्ट्वा त्वभिनिर्यान्तं सर्वे ते काननौकसः।
उत्पेतुरभिसङ्क्रुद्धाः शिलाहस्ता युयुत्सवः॥ **6.81.7** ॥ 3650

हनूमान् पुरतस्तेषां जगाम कपिकुञ्जरः।
प्रगृह्य सुमहच्छृङ्गं पर्वतस्य दुरासदम्॥ **6.81.8**॥ 3651

स ददर्श हतानन्दां सीतामिन्द्रजितो रथे।
एकवेणीधरां दीनामुपवासकृशाननाम्॥ **6.81.9**॥ 3652

परिक्लिष्टैकवसनाममृजां राघवप्रियाम्।
रजोमलाभ्यामालिप्तैः सर्वगात्रैर्वरस्त्रियम्॥ **6.81.10**॥ 3653

तां निरीक्ष्य मुहूर्तं तु मैथिलीमध्यवस्य च।
बभूवाचिरदृष्टा हि तेन सा जनकात्मजा॥ **6.81.11**॥ 3654

अब्रवीत् तां तु शोकार्तां निरानन्दां तपस्विनीम्।
दृष्ट्वा रथस्थितां दीनां राक्षसेन्द्रसुतश्रिताम्॥ **6.81.12**॥ 3655

किं समर्थितमस्येति चिन्तयन् स महाकपिः।
सह तैर्वानरश्रेष्ठैरभ्यधावत रावणिम्॥ **6.81.13**॥ 3656

तद् वानरबलं दृष्ट्वा रावणिः क्रोधमूर्च्छितः।
कृत्वा विकोशं निस्त्रिंशं मूर्ध्नि सीतामकर्षयत्॥ **6.81.14**॥ 3657

तां स्त्रियं पश्यतां तेषां ताडयामास राक्षसः।
क्रोशन्तीं राम रामेति मायया योजितां रथे॥ **6.81.15**॥ 3658

गृहीतमूर्धजां दृष्ट्वा हनूमान् दैन्यमागतः।
दुःखजं वारि नेत्राभ्यामुत्सृजन् मारुतात्मजः॥ **6.81.16**॥ 3659

तां दृष्ट्वा चारुसर्वाङ्गीं रामस्य महिषीं प्रियाम्।
अब्रवीत् परुषं वाक्यं क्रोधाद् रक्षोधिपात्मजम्॥ **6.81.17**॥ 3660

दुरात्मन्नात्मनाशाय केशपक्षे परामृशः।
ब्रह्मर्षीणां कुले जातो राक्षसीं योनिमाश्रितः॥ **6.81.18**॥ 3661

धिक् त्वां पापसमाचारं यस्य ते मतिरीदृशी।
नृशंसानार्य दुर्वृत्त क्षुद्र पापपराक्रम।
अनार्यस्येदृशं कर्म घृणा ते नास्ति निर्घृण॥ **6.81.19**॥ 3662

च्युता गृहाच्च राज्याच्च रामहस्ताच्च मैथिली।
किं तवैषापराद्धा हि यदेनां हंसि निर्दय॥ **6.81.20**॥ 3663

सीतां हत्वा तु न चिरं जीविष्यसि कथञ्चन।
वधार्ह कर्मणा तेन मम हस्तगतो ह्यसि॥ **6.81.21**॥ 3664

ये च स्त्रीघातिनां लोका लोकवध्यैश्च कुत्सिताः।
इह जीवितमुत्सृज्य प्रेत्य तान् प्रति लप्स्यसे॥ **6.81.22**॥ 3665

इति ब्रुवाणो हनुमान् सायुधैर्हरिभिर्वृतः।
अभ्यधावत् सुसङ्क्रुद्धो राक्षसेन्द्रसुतं प्रति॥ **6.81.23**॥ 3666

आपतन्तं महावीर्यं तदनीकं वनौकसाम्।
रक्षसां भीमकोपानामनीकेन न्यवारयत्॥ **6.81.24**॥ 3667

स तां बाणसहस्रेण विक्षोभ्य हरिवाहिनीम्।
हनूमन्तं हरिश्रेष्ठमिन्द्रजित् प्रत्युवाच ह॥ **6.81.25**॥ 3668

सुग्रीवस्त्वं च रामश्च यन्निमित्तमिहागताः।
तां वधिष्यामि वैदेहीमद्यैव तव पश्यतः॥ **6.81.26**॥ 3669

इमां हत्वा ततो रामं लक्ष्मणं त्वां च वानर।
सुग्रीवं च वधिष्यामि तं चानार्यं विभीषणम्॥ **6.81.27**॥ 3670

न हन्तव्याः स्त्रियश्चेति यद् ब्रवीषि प्लवङ्गम।
पीडाकरममित्राणां यच्च कर्तव्यमेव तत्॥ **6.81.28**॥ 3671

तमेवमुक्त्वा रुदतीं सीतां मायामयीं च ताम्।
शितधारेण खड्गेन निजघानेन्द्रजित् स्वयम्॥ **6.81.29**॥ 3672

यज्ञोपवीतमार्गेण छिन्ना तेन तपस्विनी।
सा पृथिव्यां पृथुश्रोणी पपात प्रियदर्शना॥ **6.81.30**॥ 3673

तामिन्द्रजित् स्त्रियं हत्वा हनूमन्तमुवाच ह।
मया रामस्य पश्येमां प्रियां शस्त्रनिषूदिताम्।
एषा विशस्ता वैदेही निष्फलो वः परिश्रमः॥ **6.81.31**॥ 3674

ततः खड्गेन महता हत्वा तामिन्द्रजित्स्वयम्।
हृष्टः स रथमास्थाय ननाद च महास्वनम्॥ **6.81.32**॥ 3675

वानराः शुश्रुवुः शब्दमदूरे प्रत्यवस्थिताः।
व्यादितास्यस्य नदतस्तद्दुर्गं संश्रितस्य तु॥ **6.81.33**॥ 3676

तथा तु सीतां विनिहत्य दुर्मतिः
प्रहृष्टचेताः स बभूव रावणिः।
तं हृष्टरूपं समुदीक्ष्य वानरा
विषण्णरूपाः समभिप्रदुद्रुवुः॥ **6.81.34**॥ 3677

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकाशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्व्यशीतितमः सर्गः ॥

हनुमन्नायकत्वे वानराणां रक्षसां च युद्धम्, हनुमतः श्रीरामपार्श्वे निवर्तनमिन्द्रजिता निकुम्भिलामुपेत्य यज्ञस्यानुष्ठानं च

श्रुत्वा तु भीमनिर्ह्रादं शक्राशनिसमस्वनम्।
वीक्ष्यमाणा दिशः सर्वा दुद्रुवुर्वानरा भृशम्॥ **6.82.1**॥ 3678

तानुवाच ततः सर्वान् हनूमान् मारुतात्मजः।
विषण्णवदनान् दीनांस्त्रस्तान् विद्रवतः पृथक्॥ **6.82.2**॥ 3679

कस्माद् विषण्णवदना विद्रवध्वं प्लवङ्गमाः।
त्यक्तयुद्धसमुत्साहाः शूरत्वं क्व नु वो गतम्॥ **6.82.3**॥ 3680

पृष्ठतोऽनुव्रजध्वं मामग्रतो यान्तमाहवे।
शूरैरभिजनोपेतैरयुक्तं हि निवर्तितुम्॥ **6.82.4**॥ 3681

एवमुक्ताः सुसङ्क्रुद्धा वायुपुत्रेण धीमता।
शैलशृङ्गान् द्रुमांश्चैव जगृहुर्हृष्टमानसाः॥ **6.82.5**॥ 3682

अभिपेतुश्च गर्जन्तो राक्षसान् वानरर्षभाः।
परिवार्य हनूमन्तमन्वयुश्च महाहवे॥ **6.82.6**॥ 3683

स तैर्वानरमुख्यैस्तु हनूमान् सर्वतो वृतः।
हुताशन इवार्चिष्मानदहच्छत्रुवाहिनीम्॥ **6.82.7**॥ 3684

स राक्षसानां कदनं चकार सुमहाकपिः।
वृतो वानरसैन्येन कालान्तकयमोपमः॥ **6.82.8**॥ 3685

स तु शोकेन चाविष्टः कोपेन महता कपिः।
हनूमान् रावणिरथे महतीं पातयच्छिलाम्॥ **6.82.9**॥ 3686

तामापतन्तीं दृष्ट्वैव रथः सारथिना तदा।
विधेयाश्वसमायुक्तः विदूरमपवाहितः॥ **6.82.10**॥ 3687

तमिन्द्रजितमप्राप्य रथस्थं सहसारथिम्।
विवेश धरणीं भित्त्वा सा शिला व्यर्थमुद्यता॥ **6.82.11**॥ 3688

पतितायां शिलायां तु व्यथिता रक्षसां चमूः।
निपतन्त्या च शिलया राक्षसा मथिता भृशम्॥ **6.82.12**॥ 3689

तमभ्यधावञ्शतशो नदन्तः काननौकसः।
ते द्रुमांश्च महाकाया गिरिशृङ्गाणि चोद्यताः॥ **6.82.13**॥ 3690

क्षिपन्तीन्द्रजितं सङ्ख्ये वानरा भीमविक्रमाः।
वृक्षशैलमहावर्षं विसृजन्तः प्लवङ्गमाः॥ **6.82.14**॥ 3691

शत्रूणां कदनं चक्रुर्नेदुश्च विविधैः स्वनैः।
वानरैस्तैर्महाभीमैर्घोररूपा निशाचराः॥ **6.82.15**॥ 3692

वीर्यादभिहता वृक्षैर्व्यचेष्टन्त रणक्षितौ।
स सैन्यमभिवीक्ष्याथ वानरार्दितमिन्द्रजित्॥ **6.82.16**॥ 3693

प्रगृहीतायुधः क्रुद्धः परानभिमुखो ययौ।
स शरौघानवसृजन् स्वसैन्येनाभिसंवृतः॥ **6.82.17**॥ 3694

जघान कपिशार्दूलान् सुबहून् दृढविक्रमः।
शूलैरशनिभिः खड्गैः पट्टिशैः शूलमुद्गरैः॥ **6.82.18**॥ 3695

ते चाप्यनुचरांस्तस्य वानरा जघ्नुराहवे।
सुस्कन्धविटपैः शैलैः शिलाभिश्च महाबलः॥ **6.82.19**॥ 3696

हनूमान् कदनं चक्रे रक्षसां भीमकर्मणाम्।
सन्निवार्य परानीकमब्रवीत् तान् वनौकसः॥ **6.82.20**॥ 3697

हनूमान् सन्निवर्तध्वं न नः साध्यमिदं बलम्।
त्यक्त्वा प्राणान् विचेष्टन्तो रामप्रियचिकीर्षवः॥ **6.82.21**॥ 3698

यन्निमित्तं हि युध्यामो हता सा जनकात्मजा।
इममर्थं हि विज्ञाप्य रामं सुग्रीवमेव च॥ **6.82.22**॥ 3699

तौ यत् प्रतिविधास्येते तत् करिष्यामहे वयम्।
इत्युक्त्वा वानरश्रेष्ठो वारयन् सर्ववानरान्॥ **6.82.23**॥ 3700

शनैः शनैरसन्त्रस्तः सबलः सन्न्यवर्तत।
ततः प्रेक्ष्य हनूमन्तं व्रजन्तं यत्र राघवः॥ **6.82.24**॥ 3701

स होतुकामो दुष्टात्मा गतश्चैत्यं निकुम्भिलाम्।
निकुम्भिलामधिष्ठाय पावकं जुहवेन्द्रजित्॥ **6.82.25**॥ 3702

यज्ञभूम्यां ततो गत्वा पावकस्तेन रक्षसा।
हूयमानः प्रजज्वाल होमशोणितभुक् तदा॥ **6.82.26**॥ 3703

सार्चिःपिनद्धो ददृशे होमशोणिततर्पितः।
सन्ध्यागत इवादित्यः सुतीव्रोऽग्निः समुत्थितः॥ **6.82.27**॥ 3704

अथेन्द्रजिद् राक्षसभूतये तु जुहाव हव्यं विधिना विधानवित्।
दृष्ट्वा व्यतिष्ठन्त च राक्षसास्ते महासमूहेषु नयानयज्ञाः॥ **6.82.28**॥ 3705

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्व्यशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्र्यशीतितमः सर्गः ॥

सीतावधं श्रुत्वा शोकेन श्रीरामस्य मूर्च्छा तमाश्वासयतो लक्ष्मणस्य पौरुषार्थमुद्यमश्च

राघवश्चापि विपुलं तं राक्षसवनौकसाम्।
श्रुत्वा सङ्ग्रामनिर्घोषं जाम्बवन्तमुवाच ह॥ **6.83.1**॥ 3706

सौम्य नूनं हनुमता कृतं कर्म सुदुष्करम्।
श्रूयते च यथा भीमः सुमहानायुधस्वनः॥ **6.83.2**॥ 3707

तद् गच्छ कुरु साहाय्यं स्वबलेनाभिसंवृतः।
क्षिप्रमृक्षपते तस्य कपिश्रेष्ठस्य युध्यतः॥ **6.83.3**॥ 3708

ऋक्षराजस्तथेत्युक्त्वा स्वेनानीकेन संवृतः।
आगच्छत् पश्चिमं द्वारं हनूमान् यत्र वानरः॥ **6.83.4**॥ 3709

अथायान्तं हनूमन्तं ददर्शर्क्षपतिस्तदा।
वानरैः कृतसङ्ग्रामैः श्वसद्भिरभिसंवृतम्॥ **6.83.5**॥ 3710

दृष्ट्वा पथि हनूमांश्च तदृक्षबलमुद्यतम्।
नीलमेघनिभं भीमं सन्निवार्य न्यवर्तत॥ **6.83.6**॥ 3711

स तेन सह सैन्येन सन्निकर्षं महायशाः।
शीघ्रमागम्य रामाय दुःखितो वाक्यमब्रवीत्॥ **6.83.7**॥ 3712

समरे युध्यमानानामस्माकं प्रेक्षतां च सः।
जघान रुदतीं सीतामिन्द्रजिद् रावणात्मजः॥ **6.83.8**॥ 3713

उद्भ्रान्तचित्तस्तां दृष्ट्वा विषण्णोऽहमरिन्दम।
तदहं भवतो वृत्तं विज्ञापयितुमागतः॥ **6.83.9**॥ 3714

तस्य तद् वचनं श्रुत्वा राघवः शोकमूर्च्छितः।
निपपात तदा भूमौ छिन्नमूल इव द्रुमः॥ **6.83.10**॥ 3715

तं भूमौ देवसङ्काशं पतितं दृश्य राघवम्।
अभिपेतुः समुत्पत्य सर्वतः कपिसत्तमाः॥ **6.83.11**॥ 3716

आसिञ्चन् सलिलैश्चैनं पद्मोत्पलसुगन्धिभिः।
प्रदहन्तमसंहार्यं सहसाग्निमिवोत्थितम्॥ **6.83.12**॥ 3717

तं लक्ष्मणोऽथ बाहुभ्यां परिष्वज्य सुदुःखितः।
उवाच राममस्वस्थं वाक्यं हेत्वर्थसंयुतम्॥ **6.83.13**॥ 3718

शुभे वर्त्मनि तिष्ठन्तं त्वामार्य विजितेन्द्रियम्।
अनर्थेभ्यो न शक्नोति त्रातुं धर्मो निरर्थकः॥ **6.83.14**॥ 3719

भूतानां स्थावराणां च जङ्गमानां च दर्शनम्।
यथास्ति न तथा धर्मस्तेन नास्तीति मे मतिः॥ **6.83.15**॥ 3720

यथैव स्थावरं व्यक्तं जङ्गमं च तथाविधम्।
नायमर्थस्तथा युक्तस्त्वद्विधो न विपद्यते॥ **6.83.16**॥ 3721

यद्यधर्मो भवेद् भूतो रावणो नरकं व्रजेत्।
भवांश्च धर्मसंयुक्तो नैव व्यसनमाप्नुयात्॥ **6.83.17**॥ 3722

तस्य च व्यसनाभावाद् व्यसनं चागते त्वयि।
धर्मो भवत्यधर्मश्च परस्परविरोधिनौ॥ **6.83.18**॥ 3723

धर्मेणोपलभेद् धर्ममधर्मं चाप्यधर्मतः।
यद्यधर्मेण युज्येयुर्येष्वधर्मः प्रतिष्ठितः॥ **6.83.19**॥ 3724

न धर्मेण वियुज्येरन्नाधर्मरुचयो जनाः।
धर्मेणाचरतां तेषां तथा धर्मफलं भवेत्॥ **6.83.20**॥ 3725

यस्मादर्था विवर्धन्ते येष्वधर्मः प्रतिष्ठितः।
क्लिश्यन्ते धर्मशीलाश्च तस्मादेतौ निरर्थकौ॥ **6.83.21**॥ 3726

वध्यन्ते पापकर्माणो यद्यधर्मेण राघव।
वधकर्महतोऽधर्मः स हतः कं वधिष्यति॥ **6.83.22**॥ 3727

अथवा विहितेनायं हन्यते हन्ति चापरम्।
विधिः स लिप्यते तेन न स पापेन कर्मणा॥ **6.83.23**॥ 3728

अदृष्टप्रतिकारेण अव्यक्तेनासता सता।
कथं शक्यं परं प्राप्तुं धर्मेणारिविकर्षण॥ **6.83.24**॥ 3729

यदि सत् स्यात् सतां मुख्य नासत् स्यात् तव किञ्चन।
त्वया यदीदृशं प्राप्तं तस्मात् तन्नोपपद्यते॥ **6.83.25**॥ 3730

अथवा दुर्बलः क्लीबो बलं धर्मोऽनुवर्तते।
दुर्बलो हृतमर्यादो न सेव्य इति मे मतिः॥ **6.83.26**॥ 3731

बलस्य यदि चेद् धर्मो गुणभूतः पराक्रमैः।
धर्ममुत्सृज्य वर्तस्व यथा धर्मे तथा बले॥ **6.83.27**॥ 3732

अथ चेत् सत्यवचनं धर्मः किल परन्तप।
अनृतं त्वय्यकरणे किं न बद्धस्त्वया विना॥ **6.83.28**॥ 3733

यदि धर्मो भवेद् भूत अधर्मो वा परन्तप।
न स्म हत्वा मुनिं वज्री कुर्यादिज्यां शतक्रतुः॥ **6.83.29**॥ 3734

अधर्मसंश्रितो धर्मो विनाशयति राघव।
सर्वमेतद् यथाकामं काकुत्स्थ कुरुते नरः॥ **6.83.30**॥ 3735

मम चेदं मतं तात धर्मोऽयमिति राघव।
धर्ममूलं त्वया छिन्नं राज्यमुत्सृजता तदा॥ **6.83.31**॥ 3736

अर्थेभ्योऽथ प्रवृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः।
क्रियाः सर्वाः प्रवर्तन्ते पर्वतेभ्य इवापगाः॥ **6.83.32**॥ 3737

अर्थेन हि विमुक्तस्य पुरुषस्याल्पचेतसः।
विच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा॥ **6.83.33**॥ 3738

सोऽयमर्थं परित्यज्य सुखकामः सुखैधितः।
पापमाचरते कर्तुं तदा दोषः प्रवर्तते॥ **6.83.34**॥ 3739

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पण्डितः॥ **6.83.35**॥ 3740

यस्यार्थाः स च विक्रान्तो यस्यार्थाः स च बुद्धिमान्।
यस्यार्थाः स महाभागो यस्यार्थाः स गुणाधिकः॥ **6.83.36**॥ 3741

अर्थस्यैते परित्यागे दोषाः प्रव्याहृता मया।
राज्यमुत्सृजता धीर येन बुद्धिस्त्वया कृता॥ **6.83.37**॥ 3742

यस्यार्था धर्मकामार्थास्तस्य सर्वं प्रदक्षिणम्।
अधनेनार्थकामेन नार्थः शक्यो विचिन्वता॥ **6.83.38**॥ 3743

हर्षः कामश्च दर्पश्च धर्मः क्रोधः शमो दमः।
अर्थादेतानि सर्वाणि प्रवर्तन्ते नराधिप॥ **6.83.39**॥ 3744

येषां नश्यत्ययं लोकश्चरतां धर्मचारिणाम्।
तेऽर्थास्त्वयि न दृश्यन्ते दुर्दिनेषु यथा ग्रहाः॥ **6.83.40**॥ 3745

त्वयि प्रव्रजिते वीर गुरोश्च वचने स्थिते।
रक्षसापहृता भार्या प्राणैः प्रियतरा तव॥ **6.83.41**॥ 3746

तदद्य विपुलं वीर दुःखमिन्द्रजिता कृतम्।
कर्मणा व्यपनेष्यामि तस्मादुत्तिष्ठ राघव॥ **6.83.42**॥ 3747

उत्तिष्ठ नरशार्दूल दीर्घबाहो धृतव्रत।
किमात्मानं महात्मानमात्मानं नावबुध्यसे॥ **6.83.43**॥ 3748

अयमनघ तवोदितः प्रियार्थं
जनकसुतानिधनं निरीक्ष्य रुष्टः।
सरथगजहयां सराक्षसेन्द्रां
भृशमिषुभिर्विनिपातयामि लङ्काम्॥ **6.83.44**॥ 3749

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्र्यशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुरशीतितमः सर्गः ॥

विभीषणेन श्रीरामं प्रतीन्द्रजितो मायाया रहस्यं वर्णयित्वा सीता जीवतीति विश्वासस्य दृढीकरणं लक्ष्मणं च निकुम्भिलां गमयितुं प्रार्थनम्

राममाश्वासमाने तु लक्ष्मणे भ्रातृवत्सले।
निक्षिप्य गुल्मान् स्वस्थाने तत्रागच्छद् विभीषणः॥ **6.84.1** ॥ 3750

नानाप्रहरणैर्वीरैश्चतुर्भिरभिसंवृतः।
नीलाञ्जनचयाकारैर्मातङ्गैरिव यूथपैः॥ **6.84.2** ॥ 3751

सोऽभिगम्य महात्मानं राघवं शोकलालसम्।
वानरांश्चापि ददृशे बाष्पपर्याकुलेक्षणान्॥ **6.84.3** ॥ 3752

राघवं च महात्मानमिक्ष्वाकुकुलनन्दनम्।
ददर्श मोहमापन्नं लक्ष्मणस्याङ्कमाश्रितम्॥ **6.84.4** ॥ 3753

व्रीडितं शोकसन्तप्तं दृष्ट्वा रामं विभीषणः।
अन्तर्दुःखेन दीनात्मा किमेतदिति सोऽब्रवीत्॥ **6.84.5** ॥ 3754

विभीषणमुखं दृष्ट्वा सुग्रीवं तांश्च वानरान्।
लक्ष्मणोवाच मन्दार्थमिदं बाष्पपरिप्लुतः॥ **6.84.6** ॥ 3755

हता इन्द्रजिता सीता इति श्रुत्वैव राघवः।
हनूमद्वचनात् सौम्य ततो मोहमुपाश्रितः॥ **6.84.7** ॥ 3756

कथयन्तं तु सौमित्रिं सन्निवार्य विभीषणः।
पुष्कलार्थमिदं वाक्यं विसंज्ञं राममब्रवीत्॥ **6.84.8**॥ 3757

मनुजेन्द्रार्तरूपेण यदुक्तस्त्वं हनूमता।
तदयुक्तमहं मन्ये सागरस्येव शोषणम्॥ **6.84.9**॥ 3758

अभिप्रायं तु जानामि रावणस्य दुरात्मनः।
सीतां प्रति महाबाहो न च घातं करिष्यति॥ **6.84.10**॥ 3759

याच्यमानः सुबहुशो मया हितचिकीर्षुणा।
वैदेहीमुत्सृजस्वेति न च तत् कृतवान् वचः॥ **6.84.11**॥ 3760

नैव साम्ना न दानेन न भेदेन कुतो युधा।
सा द्रष्टुमपि शक्येत नैव चान्येन केनचित्॥ **6.84.12**॥ 3761

वानरान् मोहयित्वा तु प्रतियातः स राक्षसः।
मायामयीं महाबाहो तां विद्धि जनकात्मजाम्॥ **6.84.13**॥ 3762

चैत्यं निकुम्भिलामद्य प्राप्य होमं करिष्यति।
हुतवानुपयातो हि देवैरपि सवासवैः॥ **6.84.14**॥ 3763

दुराधर्षो भवत्येष सङ्ग्रामे रावणात्मजः।
तेन मोहयता नूनमेषा माया प्रयोजिता॥ **6.84.15**॥ 3764

विघ्नमन्विच्छता तत्र वानराणां पराक्रमे।
ससैन्यास्तत्र गच्छामो यावत्तन्न समाप्यते॥ **6.84.16**॥ 3765

त्यजैनं नरशार्दूल मिथ्या सन्तापमागतम्।
सीदते हि बलं सर्वं दृष्ट्वा त्वां शोककर्शितम्॥ **6.84.17**॥ 3766

इह त्वं स्वस्थहृदयस्तिष्ठ सत्त्वसमुच्छ्रितः।
लक्ष्मणं प्रेषयास्माभिः सह सैन्यानुकर्षिभिः॥ **6.84.18**॥ 3767

एष तं नरशार्दूलो रावणिं निशितैः शरैः।
त्याजयिष्यति तत्कर्म ततो वध्यो भविष्यति॥ **6.84.19**॥ 3768

तस्यैते निशितास्तीक्ष्णाः पत्रिपत्राङ्गवाजिनः।
पतत्रिण इवासौम्याः शराः पास्यन्ति शोणितम्॥ **6.84.20**॥ 3769

तत् सन्दिश महाबाहो लक्ष्मणं शुभलक्षणम्।
राक्षसस्य विनाशाय वज्रं वज्रधरो यथा॥ **6.84.21**॥ 3770

मनुजवर न कालविप्रकर्षो
रिपुनिधनं प्रति यत्क्षमोऽद्य कर्तुम्।
त्वमतिसृज रिपोर्वधाय वज्रं
दिविजरिपोर्मथने यथा महेन्द्रः॥ **6.84.22**॥ 3771

समाप्तकर्मा हि स राक्षसर्षभो
भवत्यदृश्यः समरे सुरासुरैः।
युयुत्सता तेन समाप्तकर्मणा
भवेत् सुराणामपि संशयो महान्॥ **6.84.23**॥ 3772

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुरशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चाशीतितमः सर्गः ॥

विभीषणकर्तृकानुरोधेन श्रीरामेणेन्द्रजिद्वधाय लक्ष्मणस्य प्रेषणं लक्ष्मणस्य निकुम्भिलासमीपे गमनम्

तस्य तद् वचनं श्रुत्वा राघवः शोककर्शितः।
नोपधारयते व्यक्तं यदुक्तं तेन रक्षसा॥ **6.85.1**॥ 3773

ततो धैर्यमवष्टभ्य रामः परपुरञ्जयः।
विभीषणमुपासीनमुवाच कपिसन्निधौ॥ **6.85.2**॥ 3774

नैर्ऋताधिपते वाक्यं यदुक्तं ते विभीषण।
भूयस्तच्छ्रोतुमिच्छामि ब्रूहि यत्ते विवक्षितम्॥ **6.85.3**॥ 3775

राघवस्य वचः श्रुत्वा वाक्यं वाक्यविशारदः।
यत् तत् पुनरिदं वाक्यं बभाषेऽथ विभीषणः॥ **6.85.4**॥ 3776

यथाऽऽज्ञप्तं महाबाहो त्वया गुल्मनिवेशनम्।
तत् तथानुष्ठितं वीर त्वद्वाक्यसमनन्तरम्॥ **6.85.5**॥ 3777

तान्यनीकानि सर्वाणि विभक्तानि समन्ततः।
विन्यस्ता यूथपाश्चैव यथान्यायं विभागशः॥ **6.85.6**॥ 3778

भूयस्तु मम विज्ञाप्यं तच्छृणुष्व महाप्रभो।
त्वय्यकारणसन्तप्ते सन्तप्तहृदया वयम्॥ **6.85.7**॥ 3779

त्यज राजन्निमं शोकं मिथ्या सन्तापमागतम्।
यदियं त्यज्यतां चिन्ता शत्रुहर्षविवर्धिनी॥ **6.85.8**॥ 3780

उद्यमः क्रियतां वीर हर्षः समुपसेव्यताम्।
प्राप्तव्या यदि ते सीता हन्तव्याश्च निशाचराः॥ **6.85.9**॥ 3781

रघुनन्दन वक्ष्यामि श्रूयतां मे हितं वचः।
साध्वयं यातु सौमित्रिर्बलेन महता वृतः॥ **6.85.10**॥ 3782

निकुम्भिलायां सम्प्राप्तं हन्तुं रावणिमाहवे।
धनुर्मण्डलनिर्मुक्तैराशीविषविषोपमैः॥ **6.85.11**॥ 3783

शरैर्हन्तुं महेष्वासो रावणिं समितिञ्जयः।
तेन वीरेण तपसा वरदानात् स्वयम्भुवः।
अस्त्रं ब्रह्मशिरः प्राप्तं कामगाश्च तुरङ्गमाः॥ **6.85.12**॥ 3784

स एष किल सैन्येन प्राप्तः किल निकुम्भिलाम्।
यद्युत्तिष्ठेत् कृतं कर्म हतान् सर्वांश्च विद्धि नः॥ **6.85.13**॥ 3785

निकुम्भिलामसम्प्राप्तमकृताग्निं च यो रिपुः।
त्वामाततायिनं हन्यादिन्द्रशत्रो स ते वधः॥ **6.85.14**॥ 3786

वरो दत्तो महाबाहो सर्वलोकेश्वरेण वै।
इत्येवं विहितो राजन् वधस्तस्यैष धीमतः॥ **6.85.15**॥ 3787

वधायेन्द्रजितो राम सन्दिशस्व महाबलम्।
हते तस्मिन् हतं विद्धि रावणं ससुहृद्गणम्॥ **6.85.16**॥ 3788

विभीषणवचः श्रुत्वा रामो वाक्यमथाब्रवीत्।
जानामि तस्य रौद्रस्य मायां सत्यपराक्रम॥ **6.85.17**॥ 3789

स हि ब्रह्मास्त्रवित् प्राज्ञो महामायो महाबलः।
करोत्यसंज्ञान् सङ्ग्रामे देवान् सवरुणानपि॥ **6.85.18**॥ 3790

तस्यान्तरिक्षे चरतः सरथस्य महायशः।
न गतिर्ज्ञायते वीर सूर्यस्येवाभ्रसम्प्लवे॥ **6.85.19**॥ 3791

राघवस्तु रिपोर्ज्ञात्वा मायावीर्यं दुरात्मनः।
लक्ष्मणं कीर्तिसम्पन्नमिदं वचनमब्रवीत्॥ **6.85.20**॥ 3792

यद् वानरेन्द्रस्य बलं तेन सर्वेण संवृतः।
हनूमत्प्रमुखैश्चैव यूथपैः सह लक्ष्मण॥ **6.85.21**॥ 3793

जाम्बवेनर्क्षपतिना सह सैन्येन संवृतः।
जहि तं राक्षससुतं मायाबलसमन्वितम्॥ **6.85.22**॥ 3794

अयं त्वां सचिवैः सार्धं महात्मा रजनीचरः।
अभिज्ञस्तस्य मायानां पृष्ठतोऽनुगमिष्यति॥ **6.85.23**॥ 3795

राघवस्य वचः श्रुत्वा लक्ष्मणः सविभीषणः।
जग्राह कार्मुकश्रेष्ठमन्यद् भीमपराक्रमः॥ **6.85.24**॥ 3796

सन्नद्धः कवची खड्गी सशरी वामचापभृत्।
रामपादावुपस्पृश्य हृष्टः सौमित्रिरब्रवीत्॥ **6.85.25**॥ 3797

अद्य मत्कार्मुकोन्मुक्ताः शरा निर्भिद्य रावणिम्।
लङ्कामभिपतिष्यन्ति हंसाः पुष्करिणीमिव॥ **6.85.26**॥ 3798

अद्यैव तस्य रौद्रस्य शरीरं मामकाः शराः।
विधमिष्यन्ति भित्त्वा तं महाचापगुणच्युताः॥ **6.85.27**॥ 3799

एवमुक्त्वा तु वचनं द्युतिमान् भ्रातुरग्रतः।
स रावणिवधाकाङ्क्षी लक्ष्मणस्त्वरितं ययौ॥ **6.85.28**॥ 3800

सोऽभिवाद्य गुरोः पादौ कृत्वा चापि प्रदक्षिणम्।
निकुम्भिलामभिययौ चैत्यं रावणिपालितम्॥ **6.85.29**॥ 3801

विभीषणेन सहितो राजपुत्रः प्रतापवान्।
कृतस्वस्त्ययनो भ्रात्रा लक्ष्मणस्त्वरितो ययौ॥ **6.85.30**॥ 3802

वानराणां सहस्रेस्तु हनूमान् बहुभिर्वृतः।
विभीषणश्च सामात्यो लक्ष्मणं त्वरितं ययौ॥ **6.85.31**॥ 3803

महता हरिसैन्येन सवेगमभिसंवृतः।
ऋक्षराजबलं चैव ददर्श पथि विष्ठितम्॥ **6.85.32**॥ 3804

स गत्वा दूरमध्वानं सौमित्रिर्मित्रनन्दनः।
राक्षसेन्द्रबलं दूरादपश्यद् व्यूहमाश्रितम्॥ **6.85.33**॥ 3805

स सम्प्राप्य धनुष्पाणिर्मायायोगमरिन्दमः।
तस्थौ ब्रह्मविधानेन विजेतुं रघुनन्दनः॥ **6.85.34**॥ 3806

विभीषणेन सहितो राजपुत्रः प्रतापवान्।
अङ्गदेन च वीरेण तथानिलसुतेन च॥ **6.85.35**॥ 3807

विविधममलशस्त्रभास्वरं तद्
ध्वजगहनं गहनं महारथैश्च।
प्रतिभयतममप्रमेयवेगं
तिमिरमिव द्विषतां बलं विवेश॥ **6.85.36**॥ 3808

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चाशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षडशीतितमः सर्गः ॥

वानररक्षसां युद्धं हनुमता रक्षःसैन्यस्य संहार इन्द्रजितो युद्धायाह्वानं च लक्ष्मणकर्तृकमिन्द्रजितो दर्शनम्

अथ तस्यामवस्थायां लक्ष्मणं रावणानुजः।
परेषामहितं वाक्यमर्थसाधकमब्रवीत्॥ **6.86.1** ॥ 3809

यदेतद् राक्षसानीकं मेघश्यामं विलोक्यते।
एतदायोध्यतां शीघ्रं कपिभिश्च शिलायुधैः॥ **6.86.2** ॥ 3810

तस्यानीकस्य महतो भेदने यत लक्ष्मण।
राक्षसेन्द्रसुतोऽप्यत्र भिन्ने दृश्यो भविष्यति॥ **6.86.3** ॥ 3811

स त्वमिन्द्राशनिप्रख्यैः शरैरवकिरन् परान्।
अभिद्रवाशु यावद् वै नैतत् कर्म समाप्यते॥ **6.86.4** ॥ 3812

जहि वीर दुरात्मानं मायापरमधार्मिकम्।
रावणिं क्रूरकर्माणं सर्वलोकभयावहम्॥ **6.86.5** ॥ 3813

विभीषणवचः श्रुत्वा लक्ष्मणः शुभलक्षणः।
ववर्ष शरवर्षेण राक्षसेन्द्रसुतं प्रति॥ **6.86.6** ॥ 3814

ऋक्षाः शाखामृगाश्चैव द्रुमप्रवरयोधिनः।
अभ्यधावन्त सहितास्तदनीकमवस्थितम्॥ **6.86.7** ॥ 3815

राक्षसाश्च शितैर्बाणैरसिभिः शक्तितोमरैः।
अभ्यवर्तन्त समरे कपिसैन्यजिघांसवः॥ **6.86.8**॥ 3816

स सम्प्रहारस्तुमुलः सञ्जज्ञे कपिरक्षसाम्।
शब्देन महता लङ्कां नादयन् वै समन्ततः॥ **6.86.9**॥ 3817

शस्त्रैश्च विविधाकारैः शितैर्बाणैश्च पादपैः।
उद्यतैर्गिरिशृङ्गैश्च घोरैराकाशमावृतम्॥ **6.86.10**॥ 3818

राक्षसा वानरेन्द्रेषु विकृताननबाहवः।
निवेशयन्तः शस्त्राणि चक्रुस्ते सुमहद्भयम्॥ **6.86.11**॥ 3819

तथैव सकलैर्वृक्षैर्गिरिशृङ्गैश्च वानराः।
अभिजघ्नुर्निजघ्नुश्च समरे सर्वराक्षसान्॥ **6.86.12**॥ 3820

ऋक्षवानरमुख्यैश्च महाकायैर्महाबलैः।
रक्षसां युध्यमानानां महद्भयमजायत॥ **6.86.13**॥ 3821

स्वमनीकं विषण्णं तु श्रुत्वा शत्रुभिरर्दितम्।
उदतिष्ठत दुर्धर्षः स कर्मण्यननुष्ठिते॥ **6.86.14**॥ 3822

वृक्षान्धकारान्निर्गत्य जातक्रोधः स रावणिः।
आरुरोह रथं सज्जं पूर्वयुक्तं सुसंयतम्॥ **6.86.15**॥ 3823

स भीमकार्मुकशरः कृष्णाञ्जनचयोपमः।
रक्तास्यनयनो भीमो बभौ मृत्युरिवान्तकः॥ **6.86.16**॥ 3824

दृष्ट्वैव तु रथस्थं तं पर्यवर्तत तद् बलम्।
रक्षसां भीमवेगानां लक्ष्मणेन युयुत्सताम्॥ **6.86.17**॥ 3825

तस्मिंस्तु काले हनुमानरुजत् स दुरासदम्।
धरणीधरसङ्काशो महावृक्षमरिन्दमः॥ **6.86.18**॥ 3826

स राक्षसानां तत् सैन्यं कालाग्निरिव निर्दहन्।
चकार बहुभिर्वृक्षैर्निःसंज्ञं युधि वानरः॥ **6.86.19**॥ 3827

विध्वंसयन्तं तरसा दृष्ट्वैव पवनात्मजम्।
राक्षसानां सहस्राणि हनूमन्तमवाकिरन्॥ **6.86.20**॥ 3828

शितशूलधराः शूलैरसिभिश्चासिपाणयः।
शक्तिहस्ताश्च शक्तीभिः पट्टिशैः पट्टिशायुधाः॥ **6.86.21**॥ 3829

परिघैश्च गदाभिश्च कुन्तैश्च शुभदर्शनैः।
शतशश्च शतघ्नीभिरायसैरपि मुद्गरैः॥ **6.86.22**॥ 3830

घोरैः परशुभिश्चैव भिन्दिपालैश्च राक्षसाः।
मुष्टिभिर्वज्रकल्पैश्च तलैरशनिसन्निभैः॥ **6.86.23**॥ 3831

अभिजघ्नुः समासाद्य समन्तात् पर्वतोपमम्।
तेषामपि च सङ्क्रुद्धश्चकार कदनं महत्॥ **6.86.24**॥ 3832

स ददर्श कपिश्रेष्ठमचलोपममिन्द्रजित्।
सूदमानमसन्त्रस्तममित्रान् पवनात्मजम्॥ **6.86.25**॥ 3833

स सारथिमुवाचेदं याहि यत्रैष वानरः।
क्षयमेव हि नः कुर्याद् राक्षसानामुपेक्षितः॥ **6.86.26**॥ 3834

इत्युक्तः सारथिस्तेन ययौ यत्र स मारुतिः।
वहन् परमदुर्धर्षं स्थितमिन्द्रजितं रथे॥ **6.86.27**॥ 3835

सोऽभ्युपेत्य शरान् खड्गान् पट्टिशांश्च परश्वधान्।
अभ्यवर्षत दुर्धर्षः कपिमूर्धनि राक्षसः॥ **6.86.28**॥ 3836

तानि शस्त्राणि घोराणि प्रतिगृह्य स मारुतिः।
रोषेण महताविष्टो वाक्यं चेदमुवाच ह॥ **6.86.29**॥ 3837

युध्यस्व यदि शूरोऽसि रावणात्मज दुर्मते।
वायुपुत्रं समासाद्य न जीवन् प्रतियास्यसि॥ **6.86.30**॥ 3838

बाहुभ्यां सम्प्रयुध्यस्व यदि मे द्वन्द्वमाहवे।
वेगं सहस्व दुर्बुद्धे ततस्त्वं रक्षसां वरः॥ **6.86.31**॥ 3839

हनूमन्तं जिघांसन्तं समुद्यतशरासनम्।
रावणात्मजमाचष्टे लक्ष्मणाय विभीषणः॥ **6.86.32**॥ 3840

यः स वासवनिर्जेता रावणस्यात्मसम्भवः।
स एष रथमास्थाय हनूमन्तं जिघांसति॥ **6.86.33**॥ 3841

तमप्रतिमसंस्थानैः शरैः शत्रुनिवारणैः।
जीवितान्तकरैर्घोरैः सौमित्रे रावणिं जहि॥ **6.86.34**॥ 3842

इत्येवमुक्तस्तु तदा महात्मा
विभीषणेनारिविभीषणेन।
ददर्श तं पर्वतसन्निकाशं
रथस्थितं भीमबलं नदन्तम्॥ **6.86.35**॥ 3843

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षडशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्ताशीतितमः सर्गः ॥

इन्द्रजिद्विभीषणयोः सरोषः संवादः

एवमुक्त्वा तु सौमित्रिं जातहर्षो विभीषणः।
धनुष्पाणिं तमादाय त्वरमाणो जगाम सः॥ **6.87.1** ॥ 3844

अविदूरं ततो गत्वा प्रविश्य तु महद् वनम्।
अदर्शयत तत्कर्म लक्ष्मणाय विभीषणः॥ **6.87.2** ॥ 3845

नीलजीमूतसङ्काशं न्यग्रोधं भीमदर्शनम्।
तेजस्वी रावणभ्राता लक्ष्मणाय न्यवेदयत्॥ **6.87.3** ॥ 3846

इहोपहारं भूतानां बलवान् रावणात्मजः।
उपहृत्य ततः पश्चात् सङ्ग्राममभिवर्तते॥ **6.87.4** ॥ 3847

अदृश्यः सर्वभूतानां ततो भवति राक्षसः।
निहन्ति समरे शत्रून् बध्राति च शरोत्तमैः॥ **6.87.5** ॥ 3848

तमप्रविष्टं न्यग्रोधं बलिनं रावणात्मजम्।
विध्वंसय शरैर्दीप्तैः सरथं साश्वसारथिम्॥ **6.87.6** ॥ 3849

तथेत्युक्त्वा महातेजाः सौमित्रिर्मित्रनन्दनः।
बभूवावस्थितस्तत्र चित्रं विस्फारयन् धनुः॥ **6.87.7** ॥ 3850

स रथेनाग्निवर्णेन बलवान् रावणात्मजः।
इन्द्रजित् कवची खड्गी सध्वजः प्रत्यदृश्यत॥ **6.87.8**॥ 3851

तमुवाच महातेजाः पौलस्त्यमपराजितम्।
समाह्वये त्वां समरे सम्यग् युद्धं प्रयच्छ मे॥ **6.87.9**॥ 3852

एवमुक्तो महातेजा मनस्वी रावणात्मजः।
अब्रवीत् परुषं वाक्यं तत्र दृष्ट्वा विभीषणम्॥ **6.87.10**॥ 3853

इह त्वं जातसंवृद्धः साक्षाद् भ्राता पितुर्मम।
कथं द्रुह्यसि पुत्रस्य पितृव्यो मम राक्षस॥ **6.87.11**॥ 3854

न ज्ञातित्वं न सौहार्दं न जातिस्तव दुर्मते।
प्रमाणं न च सौदर्यं न धर्मो धर्मदूषण॥ **6.87.12**॥ 3855

शोच्यस्त्वमसि दुर्बुद्धे निन्दनीयश्च साधुभिः।
यस्त्वं स्वजनमुत्सृज्य परभृत्यत्वमागतः॥ **6.87.13**॥ 3856

नैतच्छिथिलया बुद्ध्या त्वं वेत्सि महदन्तरम्।
क्व च स्वजनसंवासः क्व च नीच पराश्रयः॥ **6.87.14**॥ 3857

गुणवान् वा परजनः स्वजनो निर्गुणोऽपि वा।
निर्गुणः स्वजनः श्रेयान् यः परः पर एव सः॥ **6.87.15**॥ 3858

यः स्वपक्षं परित्यज्य परपक्षं निषेवते।
स स्वपक्षे क्षयं याते पश्चात् तैरेव हन्यते॥ **6.87.16**॥ 3859

निरनुक्रोशता चेयं यादृशी ते निशाचर।
स्वजनेन त्वया शक्यं पौरुषं रावणानुज॥ **6.87.17**॥ 3860

इत्युक्तो भ्रातृपुत्रेण प्रत्युवाच विभीषणः।
अजानन्निव मच्छीलं किं राक्षस विकत्थसे॥ **6.87.18**॥ 3861

राक्षसेन्द्रसुतासाधो पारुष्यं त्यज गौरवात्।
कुले यद्यप्यहं जातो रक्षसां क्रूरकर्मणाम्।
गुणो यः प्रथमो नृणां तन्मे शीलमराक्षसम्॥ **6.87.19**॥ 3862

न रमे दारुणेनाहं न चाधर्मेण वै रमे।
भ्रात्रा विषमशीलोऽपि कथं भ्राता निरस्यते॥ **6.87.20**॥ 3863

धर्मात् प्रच्युतशीलं हि पुरुषं पापनिश्चयम्।
त्यक्त्वा सुखमवाप्नोति हस्तादाशीविषं यथा॥ **6.87.21**॥ 3864

परस्वहरणे युक्तं परदाराभिमर्शकम्।
त्याज्यमाहुर्दुरात्मानं वेश्म प्रज्वलितं यथा॥ **6.87.22**॥ 3865

परस्वानां च हरणं परदाराभिमर्शनम्।
सुहृदामतिशङ्का च त्रयो दोषाः क्षयावहाः॥ **6.87.23**॥ 3866

महर्षीणां वधो घोरः सर्वदेवैश्च विग्रहः।
अभिमानश्च रोषश्च वैरित्वं प्रतिकूलता॥ **6.87.24**॥ 3867

एते दोषा मम भ्रातुर्जीवितैश्वर्यनाशनाः।
गुणान् प्रच्छादयामासुः पर्वतानिव तोयदाः॥ **6.87.25**॥ 3868

दोषैरेतैः परित्यक्तो मया भ्राता पिता तव।
नेयमस्ति पुरी लङ्का न च त्वं न च ते पिता॥ **6.87.26**॥ 3869

अतिमानश्च बालश्च दुर्विनीतश्च राक्षस।
बद्धस्त्वं कालपाशेन ब्रूहि मां यद् यदिच्छसि॥ **6.87.27**॥ 3870

अद्येह व्यसनं प्राप्तं यन्मां परुषमुक्तवान्।
प्रवेष्टुं न त्वया शक्यं न्यग्रोधं राक्षसाधम॥ **6.87.28**॥ 3871

धर्षयित्वा च काकुत्स्थं न शक्यं जीवितुं त्वया।
युध्यस्व नरदेवेन लक्ष्मणेन रणे सह।
हतस्त्वं देवताकार्यं करिष्यसि यमक्षयम्॥ **6.87.29**॥ 3872

निदर्शय स्वात्मबलं समुद्यतं
कुरुष्व सर्वायुधसायकव्ययम्।
न लक्ष्मणस्यैत्य हि बाणगोचरं
त्वमद्य जीवन् सबलो गमिष्यसि॥ **6.87.30**॥ 3873

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्ताशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टाशीतितमः सर्गः ॥

लक्ष्मणेन्द्रजितो रुषा संवादो मिथो युद्धं च

विभीषणवचः श्रुत्वा रावणिः क्रोधमूर्च्छितः।
अब्रवीत् परुषं वाक्यं क्रोधेनाभ्युत्पपात च ॥ **6.88.1** ॥ 3874

उद्यतायुधनिस्त्रिंशो रथे सुसमलङ्कृते।
कालाश्वयुक्ते महति स्थितः कालान्तकोपमः ॥ **6.88.2** ॥ 3875

महाप्रमाणमुद्यम्य विपुलं वेगवद् दृढम्।
धनुर्भीमबलो भीमं शरांश्चामित्रनाशनान् ॥ **6.88.3** ॥ 3876

तं ददर्श महेष्वासो रथस्थः समलङ्कृतः।
अलङ्कृतममित्रघ्नो रावणस्यात्मजो बली ॥ **6.88.4** ॥ 3877

हनूमत्पृष्ठमारूढमुदयस्थरविप्रभम्।
उवाचैनं सुसंरब्धः सौमित्रिं सविभीषणम् ॥ **6.88.5** ॥ 3878

तांश्च वानरशार्दूलान् पश्यध्वं मे पराक्रमम्।
अद्य मत्कार्मुकोत्सृष्टं शरवर्षं दुरासदम् ॥ **6.88.6** ॥ 3879

मुक्तवर्षमिवाकाशे धारयिष्यथ संयुगे।
अद्य वो मामका बाणा महाकार्मुकनिःसृताः।
विधमिष्यन्ति गात्राणि तूलराशिमिवानलः ॥ **6.88.7** ॥ 3880

तीक्ष्णसायकनिर्भिन्नाञ्शूलशक्त्यृष्टितोमरैः।
अद्य वो गमयिष्यामि सर्वानेव यमक्षयम्॥ **6.88.8**॥ 3881

सृजतः शरवर्षाणि क्षिप्रहस्तस्य संयुगे।
जीमूतस्येव नदतः कः स्थास्यति ममाग्रतः॥ **6.88.9**॥ 3882

रात्रियुद्धे तदा पूर्वं वज्राशनिसमैः शरैः।
शायितौ तौ मया भूयो विसंज्ञौ सपुरःसरौ॥ **6.88.10**॥ 3883

स्मृतिर्न तेऽस्ति वा मन्ये व्यक्तं यातो यमक्षयम्।
आशीविषसमं क्रुद्धं यन्मां योद्धुमुपस्थितः॥ **6.88.11**॥ 3884

तच्छ्रुत्वा राक्षसेन्द्रस्य गर्जितं राघवस्तदा।
अभीतवदनः क्रुद्धो रावणिं वाक्यमब्रवीत्॥ **6.88.12**॥ 3885

उक्तश्च दुर्गमः पारः कार्याणां राक्षस त्वया।
कार्याणां कर्मणा पारं यो गच्छति स बुद्धिमान्॥ **6.88.13**॥ 3886

स त्वमर्थस्य हीनार्थो दुरवापस्य केनचित्।
वाचा व्याहृत्य जानीषे कृतार्थोऽस्मीति दुर्मते॥ **6.88.14**॥ 3887

अन्तर्धानगतेनाजौ यत्त्वया चरितस्तदा।
तस्कराचरितो मार्गो नैष वीरनिषेवितः॥ **6.88.15**॥ 3888

यथा बाणपथं प्राप्य स्थितोऽस्मि तव राक्षस।
दर्शयस्वाद्य तत्तेजो वाचा त्वं किं विकत्थसे॥ **6.88.16**॥ 3889

एवमुक्तो धनुर्भीमं परामृश्य महाबलः।
ससर्ज निशितान् बाणानिन्द्रजित् समितिञ्जयः॥ **6.88.17**॥ 3890

तेन सृष्टा महावेगाः शराः सर्पविषोपमाः।
सम्प्राप्य लक्ष्मणं पेतुः श्वसन्त इव पन्नगाः॥ **6.88.18**॥ 3891

शरैरतिमहावेगैर्वेगवान् रावणात्मजः।
सौमित्रिमिन्द्रजिद् युद्धे विव्याध शुभलक्षणम्॥ **6.88.19**॥ 3892

स शरैरतिविद्धाङ्गो रुधिरेण समुक्षितः।
शुशुभे लक्ष्मणः श्रीमान् विधूम इव पावकः॥ **6.88.20**॥ 3893

इन्द्रजित् त्वात्मनः कर्म प्रसमीक्ष्याभिगम्य च।
विनद्य सुमहानादमिदं वचनमब्रवीत्॥ **6.88.21**॥ 3894

पत्रिणः शितधारास्ते शरा मत्कार्मुकच्युताः।
आदास्यन्तेऽद्य सौमित्रे जीवितं जीवितान्तकाः॥ **6.88.22**॥ 3895

अद्य गोमायुसङ्घाश्च श्येनसङ्घाश्च लक्ष्मण।
गृध्राश्च निपतन्तु त्वां गतासुं निहतं मया॥ **6.88.23**॥ 3896

क्षत्रबन्धुं सदानार्यं रामः परमदुर्मतिः।
भक्तं भ्रातरमद्यैव त्वां द्रक्ष्यति हतं मया॥ **6.88.24**॥ 3897

विस्रस्तकवचं भूमौ व्यपविद्धशरासनम्।
हृतोत्तमाङ्गं सौमित्रे त्वामद्य निहतं मया॥ **6.88.25**॥ 3898

इति ब्रुवाणं सङ्क्रुद्धः परुषं रावणात्मजम्।
हेतुमद् वाक्यमर्थज्ञो लक्ष्मणः प्रत्युवाच ह॥ **6.88.26**॥ 3899

वाग्बलं त्यज दुर्बुद्धे क्रूरकर्मन् हि राक्षस।
अथ कस्माद् वदस्येतत् सम्पादय सुकर्मणा॥ **6.88.27**॥ 3900

अकृत्वा कत्थसे कर्म किमर्थमिह राक्षस।
कुरु तत् कर्म येनाहं श्रद्धेयं तव कत्थनम्॥ **6.88.28**॥ 3901

अनुक्त्वा परुषं वाक्यं किञ्चिदप्यनवक्षिपन्।
अविकत्थन् वधिष्यामि त्वां पश्य पुरुषादन॥ **6.88.29**॥ 3902

इत्युक्त्वा पञ्च नाराचानाकर्णापूरिताञ्शरान्।
विजघान महावेगाल्लक्ष्मणो राक्षसोरसि॥ **6.88.30**॥ 3903

सुपत्रवाजिता बाणा ज्वलिता इव पन्नगाः।
नैर्ऋतोरस्यभासन्त सवितू रश्मयो यथा॥ **6.88.31**॥ 3904

स शरैराहतस्तेन सरोषो रावणात्मजः।
सुप्रयुक्तैस्त्रिभिर्बाणैः प्रतिविव्याध लक्ष्मणम्॥ **6.88.32**॥ 3905

स बभूव महाभीमो नरराक्षससिंहयोः।
विमर्दस्तुमुलो युद्धे परस्परजयैषिणोः॥ **6.88.33**॥ 3906

विक्रान्तौ बलसम्पन्नावुभौ विक्रमशालिनौ।
उभौ परमदुर्जेयावतुल्यबलतेजसौ॥ **6.88.34**॥ 3907

युयुधाते तदा वीरौ ग्रहाविव नभोगतौ।
बलवृत्राविव हि तौ युधि वै दुष्प्रधर्षणौ॥ **6.88.35**॥ 3908

युयुधाते महात्मानौ तदा केसरिणाविव।
बहूनवसृजन्तौ हि मार्गणौघानवस्थितौ।
नरराक्षसमुख्यौ तौ प्रहृष्टावभ्ययुध्यताम्॥ **6.88.36**॥ 3909

ततः शरान् दाशरथिः सन्धायामित्रकर्षणः।
ससर्ज राक्षसेन्द्राय क्रुद्धः सर्प इव श्वसन्॥ **6.88.37**॥ 3910

तस्य ज्यातलनिर्घोषं स श्रुत्वा राक्षसाधिपः।
विवर्णवदनो भूत्वा लक्ष्मणं समुदैक्षत॥ **6.88.38**॥ 3911

विवर्णवदनं दृष्ट्वा राक्षसं रावणात्मजम्।
सौमित्रिं युद्धसंयुक्तं प्रत्युवाच विभीषणः॥ **6.88.39**॥ 3912

निमित्तान्युप पश्यामि यान्यस्मिन् रावणात्मजे।
त्वर तेन महाबाहो भग्न एष न संशयः॥ **6.88.40**॥ 3913

ततः सन्धाय सौमित्रिः शरानाशीविषोपमान्।
मुमोच विशिखांस्तस्मिन् सर्पानिव विषोल्बणान्॥ **6.88.41**॥ 3914

शक्राशनिसमस्पर्शैर्लक्ष्मणेनाहतः शरैः।
मुहूर्तमभवन्मूढः सर्वसङ्क्षुभितेन्द्रियः॥ **6.88.42**॥ 3915

उपलभ्य मुहूर्तेन संज्ञां प्रत्यागतेन्द्रियः।
ददर्शावस्थितं वीरमाजौ दशरथात्मजम्।
सोऽभिचक्राम सौमित्रिं रोषात् संरक्तलोचनः॥ **6.88.43**॥ 3916

अम्ब्रवीच्चैनमासाद्य पुनः स परुषं वचः।
किं न स्मरसि तद् युद्धे प्रथमे मत्पराक्रमम्।
निबद्धस्त्वं सह भ्रात्रा यदा युधि विचेष्टसे॥ **6.88.44**॥ 3917

युवां खलु महायुद्धे वज्राशनिसमैः शरैः।
शायितौ प्रथमं भूमौ विसंज्ञौ सपुरःसरौ॥ **6.88.45**॥ 3918

स्मृतिर्वा नास्ति ते मन्ये व्यक्तं वा यमसादनम्।
गन्तुमिच्छसि यन्मां त्वमाधर्षयितुमिच्छसि॥ **6.88.46**॥ 3919

यदि ते प्रथमे युद्धे न दृष्टो मत्पराक्रमः।
अद्य त्वां दर्शयिष्यामि तिष्ठेदानीं व्यवस्थितः॥ **6.88.47**॥ 3920

इत्युक्त्वा सप्तभिर्बाणैरभिविव्याध लक्ष्मणम्।
दशभिस्तु हनूमन्तं तीक्ष्णधारैः शरोत्तमैः॥ **6.88.48**॥ 3921

ततः शरशतेनैव सुप्रयुक्तेन वीर्यवान्।
क्रोधाद् द्विगुणसंरब्धो निर्बिभेद विभीषणम्॥ **6.88.49**॥ 3922

तद् दृष्ट्वेन्द्रजिता कर्म कृतं रामानुजस्तदा।
अचिन्तयित्वा प्रहसन्नैतत् किञ्चिदिति ब्रुवन्॥ **6.88.50**॥ 3923

मुमोच च शरान् घोरान् सङ्गृह्य नरपुङ्गवः।
अभीतवदनः क्रुद्धो रावणिं लक्ष्मणो युधि॥ **6.88.51**॥ 3924

नैवं रणगताः शूराः प्रहरन्ति निशाचर।
लघवश्चाल्पवीर्याश्च शरा हीमे सुखास्तव॥ **6.88.52**॥ 3925

नैवं शूरास्तु युध्यन्ते समरे युद्धकाङ्क्षिणः।
इत्येवं तं ब्रुवन् धन्वी शरैरभिववर्ष ह॥ **6.88.53**॥ 3926

तस्य बाणैः सुविध्वस्तं कवचं काञ्चनं महत्।
व्यशीर्यत रथोपस्थे ताराजालमिवाम्बरात्॥ **6.88.54**॥ 3927

विधूतवर्मा नाराचैर्बभूव स कृतव्रणः।
इन्द्रजित् समरे वीरः प्रत्यूषे भानुमानिव॥ **6.88.55**॥ 3928

ततः शरसहस्रेण सङ्क्रुद्धो रावणात्मजः।
बिभेद समरे वीरो लक्ष्मणं भीमविक्रमः॥ **6.88.56**॥ 3929

व्यशीर्यत महद्दिव्यं कवचं लक्ष्मणस्य तु।
कृतप्रतिकृतान्योन्यं बभूवतुररिन्दमौ॥ **6.88.57**॥ 3930

अभीक्ष्णं निःश्वसन्तौ तौ युध्येतां तुमुलं युधि।
शरसङ्कृत्तसर्वाङ्गौ सर्वतो रुधिरोक्षितौ॥ **6.88.58**॥ 3931

सुदीर्घकालं तौ वीरावन्योन्यं निशितैः शरैः।
ततक्षतुर्महात्मानौ रणकर्मविशारदौ।
बभूवतुश्चात्मजये यत्तौ भीमपराक्रमौ॥ **6.88.59**॥ 3932

तौ शरौघैस्तथाकीर्णौ निकृत्तकवचध्वजौ।
सृजन्तौ रुधिरं चोष्णं जलं प्रस्रवणाविव॥ **6.88.60**॥ 3933

शरवर्षं ततो घोरं मुञ्चतोर्भीमनिःस्वनम्।
सासारयोरिवाकाशे नीलयोः कालमेघयोः॥ **6.88.61**॥ 3934

तयोरथ महान् कालो व्यतीयाद् युध्यमानयोः।
न च तौ युद्धवैमुख्यं क्लमं चाप्युपजग्मतुः॥ **6.88.62**॥ 3935

अस्त्राण्यस्त्रविदां श्रेष्ठौ दर्शयन्तौ पुनः पुनः।
शरानुच्चावचाकारानन्तरिक्षे बबन्धतुः॥ **6.88.63**॥ 3936

व्यपेतदोषमस्यन्तौ लघु चित्रं च सुष्ठु च।
उभौ तु तुमुलं घोरं चक्रतुर्नरराक्षसौ॥ **6.88.64**॥ 3937

तयोः पृथक् पृथग् भीमः शुश्रुवे तलनिस्वनः।
स कम्पं जनयामास निर्घात इव दारुणः॥ **6.88.65**॥ 3938

तयोः स भ्राजते शब्दस्तथा समरमत्तयोः।
सुघोरयोर्निष्टनतोर्गगने मेघयोरिव॥ **6.88.66**॥ 3939

सुवर्णपुङ्खैर्नाराचैर्बलवन्तौ कृतव्रणौ।
प्रसुस्रुवाते रुधिरं कीर्तिमन्तौ जये धृतौ॥ **6.88.67**॥ 3940

ते गात्रयोर्निपतिता रुक्मपुङ्खाः शरा युधि।
असृग्दिग्धा विनिष्पेतुर्विविशुर्धरणीतलम्॥ **6.88.68**॥ 3941

अन्ये सुनिशितैः शस्त्रैराकाशे सङ्घट्टिरे।
बभञ्जुश्चिच्छिदुश्चैव तयोर्बाणाः सहस्रशः॥ **6.88.69**॥ 3942

स बभूव रणो घोरस्तयोर्बाणमयश्चयः।
अग्निभ्यामिव दीप्ताभ्यां सत्रे कुशमयश्च यः॥ **6.88.70**॥ 3943

तयोः कृतव्रणौ देहौ शुशुभाते महात्मनोः।
सुपुष्पाविव निष्पत्रौ वने किंशुकशाल्मली॥ **6.88.71**॥ 3944

चक्रतुस्तुमुलं घोरं सन्निपातं मुहुर्मुहुः।
इन्द्रजिल्लक्ष्मणश्चैव परस्परजयैषिणौ॥ **6.88.72**॥ 3945

लक्ष्मणो रावणिं युद्धे रावणिश्चापि लक्ष्मणम्।
अन्योन्यं तावभिघ्नन्तौ न श्रमं प्रतिपद्यताम्॥ **6.88.73**॥ 3946

बाणजालैः शरीरस्थैरवगाढैस्तरस्विनौ।
शुशुभाते महावीर्यौ प्ररूढाविव पर्वतौ॥ **6.88.74**॥ 3947

तयो रुधिरसिक्तानि संवृतानि शरैर्भृशम्।
बभ्राजुः सर्वगात्राणि ज्वलन्त इव पावकाः॥ **6.88.75**॥ 3948

तयोरथ महान् कालो व्यतीयाद् युध्यमानयोः।
न च तो युद्धवैमुख्यं श्रमं चाप्यभिजग्मतुः॥ **6.88.76**॥ 3949

अथ समरपरिश्रमं निहन्तुं
समरमुखेष्वजितस्य लक्ष्मणस्य।
प्रियहितमुपपादयन् महात्मा
समरमुपेत्य विभीषणोऽवतस्थे॥ **6.88.77**॥ 3950

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टाशीतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोननवतितमः सर्गः ॥

विभीषणस्य रक्षःसु प्रहारस्तेन वानरयूथपानां प्रोत्साहनं लक्ष्मणेनेन्द्रजितः सारथेर्वधो वानरैस्तदीयानामश्वानां विनिपातनम्

युध्यमानौ ततो दृष्ट्वा प्रसक्तौ नरराक्षसौ।
प्रभिन्नाविव मातङ्गौ परस्परजयैषिणौ॥ **6.89.1**॥ 3951

तयोर्युद्धं द्रष्टुकामो वरचापधरो बली।
शूरः स रावणभ्राता तस्थौ सङ्ग्राममूर्धनि॥ **6.89.2**॥ 3952

ततो विस्फारयामास महद् धनुरवस्थितः।
उत्ससर्ज च तीक्ष्णाग्रान् राक्षसेषु महाशरान्॥ **6.89.3**॥ 3953

ते शराः शिखिसंस्पर्शा निपतन्तः समाहिताः।
राक्षसान् द्रावयामासुर्वज्राणीव महागिरीन्॥ **6.89.4**॥ 3954

विभीषणस्यानुचरास्तेऽपि शूलासिपट्टिशैः।
चिच्छिदुः समरे वीरान् राक्षसान् राक्षसोत्तमाः॥ **6.89.5**॥ 3955

राक्षसैस्तैः परिवृतः स तदा तु विभीषणः।
बभौ मध्ये प्रधृष्टानां कलभानामिव द्विपः॥ **6.89.6**॥ 3956

ततः सञ्चोदमानो वै हरीन् रक्षोवधप्रियान्।
उवाच वचनं काले कालज्ञो रक्षसां वरः॥ **6.89.7**॥ 3957

एकोऽयं राक्षसेन्द्रस्य परायणमवस्थितः।
एतच्छेषं बलं तस्य किं तिष्ठत हरीश्वराः॥ **6.89.8**॥ 3958

अस्मिंश्च निहते पापे राक्षसे रणमूर्धनि।
रावणं वर्जयित्वा तु शेषमस्य बलं हतम्॥ **6.89.9**॥ 3959

प्रहस्तो निहतो वीरो निकुम्भश्च महाबलः।
कुम्भकर्णश्च कुम्भश्च धूम्राक्षश्च निशाचरः॥ **6.89.10**॥ 3960

जम्बुमाली महामाली तीक्ष्णवेगोऽशनिप्रभः।
सुप्तघ्नो यज्ञकोपश्च वज्रदंष्ट्रश्च राक्षसः॥ **6.89.11**॥ 3961

संह्रादी विकटोऽरिघ्नस्तपनो मन्द एव च।
प्रघासः प्रघसश्चैव प्रजङ्घो जङ्घ एव च॥ **6.89.12**॥ 3962

अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च वीर्यवान्।
विद्युज्जिह्वो द्विजिह्वश्च सूर्यशत्रुश्च राक्षसः॥ **6.89.13**॥ 3963

अकम्पनः सुपार्श्वश्च चक्रमाली च राक्षसः।
कम्पनः सत्त्ववन्तौ तौ देवान्तकनरान्तकौ॥ **6.89.14**॥ 3964

एतान् निहत्यातिबलान् बहून् राक्षससत्तमान्।
बाहुभ्यां सागरं तीर्त्वा लङ्घ्यतां गोष्पदं लघु॥ **6.89.15**॥ 3965

एतावदेव शेषं वो जेतव्यमिति वानराः।
हताः सर्वे समागम्य राक्षसा बलदर्पिताः॥ **6.89.16**॥ 3966

अयुक्तं निधनं कर्तुं पुत्रस्य जनितुर्मम।
घृणामपास्य रामार्थे निहन्यां भ्रातुरात्मजम्॥ **6.89.17**॥ 3967

हन्तुकामस्य मे बाष्पं चक्षुश्चैव निरुध्यति।
तमेवैष महाबाहुर्लक्ष्मणः शमयिष्यति॥ **6.89.18**॥ 3968

वानरा घ्नत सम्भूय भृत्यानस्य समीपगान्।
इति तेनातियशसा राक्षसेनाभिचोदिताः॥ **6.89.19**॥ 3969

वानरेन्द्रा जहृषिरे लाङ्गूलानि च विव्यधुः।
ततस्तु कपिशार्दूलाः क्ष्वेडन्तश्च पुनः पुनः।
मुमुचुर्विविधान् नादान् मेघान् दृष्ट्वेव बर्हिणः॥ **6.89.20**॥ 3970

जाम्बवानपि तैः सर्वैः स्वयूथ्यैरभिसंवृतः।
तेऽश्मभिस्ताडयामासुर्नखैर्दन्तैश्च राक्षसान्॥ **6.89.21**॥ 3971

निघ्नन्तमृक्षाधिपतिं राक्षसास्ते महाबलाः।
परिवव्रुर्भयं त्यक्त्वा तमनेकविधायुधाः॥ **6.89.22**॥ 3972

शरैः परशुभिस्तीक्ष्णैः पट्टिशैर्यष्टितोमरैः।
जाम्बवन्तं मृधे जघ्नुर्निघ्नन्तं राक्षसीं चमूम्॥ **6.89.23**॥ 3973

स सम्प्रहारस्तुमुलः सञ्जज्ञे कपिरक्षसाम्।
देवासुराणां क्रुद्धानां यथा भीमो महास्वनः॥ **6.89.24**॥ 3974

हनूमानपि सङ्क्रुद्धः सालमुत्पाट्य पर्वतात्।
स लक्ष्मणं स्वयं पृष्ठादवरोप्य महामनाः॥ **6.89.25**॥ 3975

रक्षसां कदनं चक्रे दुरासादः सहस्रशः।
स दत्त्वा तुमुलं युद्धं पितृव्यस्येन्द्रजिद् बली॥ **6.89.26**॥ 3976

लक्ष्मणं परवीरघ्नः पुनरेवाभ्यधावत।
तौ प्रयुद्धौ तदा वीरौ मृधे लक्ष्मणराक्षसौ॥ **6.89.27**॥ 3977

शरौघानभिवर्षन्तौ जघ्नतुस्तौ परस्परम्।
अभीक्ष्णमन्तर्दधतुः शरजालैर्महाबलौ॥ **6.89.28**॥ 3978

चन्द्रादित्याविवोष्णान्ते यथा मेघैस्तरस्विनौ।
नह्यादानं न सन्धानं धनुषो वा परिग्रहः॥ **6.89.29**॥ 3979

न विप्रमोक्षो बाणानां न विकर्षो न विग्रहः।
न मुष्टिप्रतिसन्धानं न लक्ष्यप्रतिपादनम्॥ **6.89.30**॥ 3980

अदृश्यत तयोस्तत्र युध्यतोः पाणिलाघवात्।
चापवेगप्रयुक्तैश्च बाणजालैः समन्ततः॥ **6.89.31**॥ 3981

अन्तरिक्षेऽभिसम्पन्ने न रूपाणि चकाशिरे।
लक्ष्मणो रावणिं प्राप्य रावणिश्चापि लक्ष्मणम्॥ **6.89.32**॥ 3982

अव्यवस्था भवत्युग्रा ताभ्यामन्योन्यविग्रहे।
ताभ्यामुभाभ्यां तरसा प्रसृष्टैर्विशिखैः शितैः॥ **6.89.33**॥ 3983

निरन्तरमिवाकाशं बभूव तमसा वृतम्।
तैः पतद्भिश्च बहुभिस्तयोः शरशतैः शितैः॥ **6.89.34**॥ 3984

दिशश्च प्रदिशश्चैव बभूवुः शरसङ्कुलाः।
तमसा पिहितं सर्वमासीत् प्रतिभयं महत्॥ **6.89.35**॥ 3985

अस्तं गते सहस्रांशौ संवृते तमसा च वै।
रुधिरौघा महानद्यः प्रावर्तन्त सहस्रशः॥ **6.89.36**॥ 3986

क्रव्यादा दारुणा वाग्भिश्चिक्षिपुर्भीमनिःस्वनान्।
न तदानीं ववौ वायुर्न च जज्वाल पावकः॥ **6.89.37**॥ 3987

स्वस्त्यस्तु लोकेभ्य इति जजल्पुस्ते महर्षयः।
सम्पेतुश्चात्र सन्तप्ता गन्धर्वाः सह चारणैः॥ **6.89.38**॥ 3988

अथ राक्षससिंहस्य कृष्णान् कनकभूषणान्।
शरैश्चतुर्भिः सौमित्रिर्विव्याध चतुरो हयान्॥ **6.89.39**॥ 3989

ततोऽपरेण भल्लेन पीतेन निशितेन च।
सम्पूर्णायतमुक्तेन सुपत्रेण सुवर्चसा॥ **6.89.40**॥ 3990

महेन्द्राशनिकल्पेन सूतस्य विचरिष्यतः।
स तेन बाणाशनिना तलशब्दानुनादिना॥ **6.89.41**॥ 3991

लाघवाद् राघवः श्रीमाञ्शिरः कायादपाहरत्।
स यन्तरि महातेजा हते मन्दोदरीसुतः॥ **6.89.42**॥ 3992

स्वयं सारथ्यमकरोत् पुनश्च धनुरस्पृशत्।
तदद्भुतमभूत् तत्र सारथ्यं पश्यतां युधि॥ **6.89.43**॥ 3993

हयेषु व्यग्रहस्तं तं विव्याध निशितैः शरैः।
धनुष्यथ पुनर्व्यग्रं हयेषु मुमुचे शरान्॥ **6.89.44**॥ 3994

छिद्रेषु तेषु बाणौघैर्विचरन्तमभीतवत्।
अर्दयामास समरे सौमित्रिः शीघ्रकृत्तमः॥ **6.89.45**॥ 3995

निहतं सारथिं दृष्ट्वा समरे रावणात्मजः।
प्रजहौ समरोद्धर्षं विषण्णः स बभूव ह॥ **6.89.46**॥ 3996

विषण्णवदनं दृष्ट्वा राक्षसं हरियूथपाः।
ततः परमसंहृष्टा लक्ष्मणं चाभ्यपूजयन्॥ **6.89.47**॥ 3997

ततः प्रमाथी रभसः शरभो गन्धमादनः।
अमृष्यमाणाश्चत्वारश्चक्रुर्वेगं हरीश्वराः॥ **6.89.48**॥ 3998

ते चास्य हयमुख्येषु तूर्णमुत्पत्य वानराः।
चतुर्षु सुमहावीर्या निपेतुर्भीमविक्रमाः॥ **6.89.49**॥ 3999

तेषामधिष्ठितानां तैर्वानरैः पर्वतोपमैः।
मुखेभ्यो रुधिरं व्यक्तं हयानां समवर्तत॥ **6.89.50**॥ 4000

ते हया मथिता भग्ना व्यसवो धरणीं गताः।
ते निहत्य हयांस्तस्य प्रमथ्य च महारथम्।
पुनरुत्पत्य वेगेन तस्थुर्लक्ष्मणपार्श्वतः॥ **6.89.51**॥ 4001

स हताश्वादवप्लुत्य रथान्मथितसारथिः।
शरवर्षेण सौमित्रिमभ्यधावत रावणिः॥ **6.89.52**॥ 4002

ततो महेन्द्रप्रतिमः स लक्ष्मणः
पदातिनं तं निहतैर्हयोत्तमैः।
सृजन्तमाजौ निशिताञ्छरोत्तमान्
भृशं तदा बाणगणैर्व्यदारयत्॥ **6.89.53**॥ 4003

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोननवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ नवतितमः सर्गः ॥

इन्द्रजिल्लक्ष्मणयोर्घोरं युद्धमिन्द्रजितो वधश्च

स हताश्वो महातेजा भूमौ तिष्ठन् निशाचरः।
इन्द्रजित् परमक्रुद्धः सम्प्रजज्वाल तेजसा॥ **6.90.1**॥ 4004

तौ धन्विनौ जिघांसन्तावन्योन्यमिषुभिर्भृशम्।
विजयेनाभिनिष्क्रान्तौ वने गजवृषाविव॥ **6.90.2**॥ 4005

निबर्हयन्तश्चान्योन्यं ते राक्षसवनौकसः।
भर्तारं न जहुर्युद्धे सम्पतन्तस्ततस्ततः॥ **6.90.3**॥ 4006

ततस्तान् राक्षसान् सर्वान् हर्षयन् रावणात्मजः।
स्तुन्वानो हर्षमाणश्च इदं वचनमब्रवीत्॥ **6.90.4**॥ 4007

तमसा बहुलेनेमाः संसक्ताः सर्वतो दिशः।
नेह विज्ञायते स्वो वा परो वा राक्षसोत्तमाः॥ **6.90.5**॥ 4008

धृष्टं भवन्तो युध्यन्तु हरीणां मोहनाय वै।
अहं तु रथमास्थाय आगमिष्यामि संयुगे॥ **6.90.6**॥ 4009

तथा भवन्तः कुर्वन्तु यथेमे हि वनौकसः।
न युध्येयुर्महात्मानः प्रविष्टे नगरं मयि॥ **6.90.7**॥ 4010

इत्युक्त्वा रावणसुतो वञ्चयित्वा वनौकसः।
प्रविवेश पुरीं लङ्कां रथहेतोरमित्रहा॥ **6.90.8**॥ 4011

स रथं भूषयित्वाथ रुचिरं हेमभूषितम्।
प्रासासिशरसंयुक्तं युक्तं परमवाजिभिः॥ **6.90.9**॥ 4012

अधिष्ठितं हयज्ञेन सूतेनाप्तोपदेशिना।
आरुरोह महातेजा रावणिः समितिञ्जयः॥ **6.90.10**॥ 4013

स राक्षसगणैर्मुख्यैर्वृतो मन्दोदरीसुतः।
निर्ययौ नगराद् वीरः कृतान्तबलचोदितः॥ **6.90.11**॥ 4014

सोऽभिनिष्क्रम्य नगरादिन्द्रजित् परमौजसा।
अभ्ययाज्जवनैरश्वैर्लक्ष्मणं सविभीषणम्॥ **6.90.12**॥ 4015

ततो रथस्थमालोक्य सौमित्री रावणात्मजम्।
वानराश्च महावीर्या राक्षसश्च विभीषणः॥ **6.90.13**॥ 4016

विस्मयं परमं जग्मुर्लाघवात् तस्य धीमतः।
रावणिश्चापि सङ्क्रुद्धो रणे वानरयूथपान्॥ **6.90.14**॥ 4017

पातयामास बाणौघैः शतशोऽथ सहस्रशः।
स मण्डलीकृतधनू रावणिः समितिञ्जयः॥ **6.90.15**॥ 4018

हरीनभ्यहनत् क्रुद्धः परं लाघवमास्थितः।
ते वध्यमाना हरयो नाराचैर्भीमविक्रमाः॥ **6.90.16**॥ 4019

सौमित्रिं शरणं प्राप्ताः प्रजापतिमिव प्रजाः।
ततः समरकोपेन ज्वलितो रघुनन्दनः।
चिच्छेद कार्मुकं तस्य दर्शयन् पाणिलाघवम्॥ **6.90.17**॥ 4020

सोऽन्यत्कार्मुकमादाय सज्यं चक्रे त्वरन्निव।
तदप्यस्य त्रिभिर्बाणैर्लक्ष्मणो निरकृन्तत॥ **6.90.18**॥ 4021

अथैनं छिन्नधन्वानमाशीविषविषोपमैः।
विव्याधोरसि सौमित्री रावणिं पञ्चभिः शरैः॥ **6.90.19**॥ 4022

ते तस्य कायं निर्भिद्य महाकार्मुकनिःसृताः।
निपेतुर्धरणीं बाणा रक्ता इव महोरगाः॥ **6.90.20**॥ 4023

स च्छिन्नधन्वा रुधिरं वमन् वक्त्रेण रावणिः।
जग्राह कार्मुकश्रेष्ठं दृढज्यं बलवत्तरम्॥ **6.90.21**॥ 4024

स लक्ष्मणं समुद्दिश्य परं लाघवमास्थितः।
ववर्ष शरवर्षाणि वर्षाणीव पुरन्दरः॥ **6.90.22**॥ 4025

मुक्तमिन्द्रजिता तत्तु शरवर्षमरिन्दमः।
आवारयदसम्भ्रान्तो लक्ष्मणः सुदुरासदम्॥ **6.90.23**॥ 4026

सन्दर्शयामास तदा रावणिं रघुनन्दनः।
असम्भ्रान्तो महातेजास्तदद्भुतमिवाभवत्॥ **6.90.24**॥ 4027

ततस्तान् राक्षसान् सर्वांस्त्रिभिरेकैकमाहवे।
अविध्यत् परमक्रुद्धः शीघ्रास्त्रं सम्प्रदर्शयन्।
राक्षसेन्द्रसुतं चापि बाणौघैः समताडयत्॥ **6.90.25**॥ 4028

सोऽतिविद्धो बलवता शत्रुणा शत्रुघातिना।
असक्तं प्रेषयामास लक्ष्मणाय बहूञ्शरान्॥ **6.90.26**॥ 4029

तानप्राप्ताञ्शितैर्बाणैश्चिच्छेद परवीरहा।
सारथेरस्य च रणे रथिनो रथसत्तमः॥ **6.90.27**॥ 4030

शिरो जहार धर्मात्मा भल्लेनानतपर्वणा।
असूतास्ते हयास्तत्र रथमूहुरविक्लवाः॥ **6.90.28**॥ 4031

मण्डलान्यभिधावन्ति तद्भुतमिवाभवत्।
अमर्षवशमापन्नः सौमित्रिर्दृढविक्रमः॥ **6.90.29**॥ 4032

प्रत्यविध्यद्धयांस्तस्य शरैर्वित्रासयन् रणे।
अमर्षमाणस्तत्कर्म रावणस्य सुतो रणे॥ **6.90.30**॥ 4033

विव्याध दशभिर्बाणैः सौमित्रिं तममर्षणम्।
ते तस्य वज्रप्रतिमाः शराः सर्पविषोपमाः।
विलयं जग्मुरागत्य कवचं काञ्चनप्रभम्॥ **6.90.31**॥ 4034

अभेद्यकवचं मत्वा लक्ष्मणं रावणात्मजः।
ललाटे लक्ष्मणं बाणैः सुपुङ्खैस्त्रिभिरिन्द्रजित्॥ **6.90.32**॥ 4035

अविध्यत् परमक्रुद्धः शीघ्रमस्त्रं प्रदर्शयन्।
तैः पृषत्कैर्ललाटस्थैः शुशुभे रघुनन्दनः॥ **6.90.33**॥ 4036

रणाग्रे समरश्लाघी त्रिशृङ्ग इव पर्वतः।
स तथाप्यर्दितो बाणै राक्षसेन तदा मृधे॥ **6.90.34**॥ 4037

तमाशु प्रतिविव्याध लक्ष्मणः पञ्चभिः शरैः।
विकृष्येन्द्रजितो युद्धे वदने शुभकुण्डले॥ **6.90.35**॥ 4038

लक्ष्मणेन्द्रजितौ वीरौ महाबलशरासनौ।
अन्योन्यं जघ्नतुर्वीरौ विशिखैर्भीमविक्रमौ॥ **6.90.36**॥ 4039

ततः शोणितदिग्धाङ्गौ लक्ष्मणेन्द्रजितावुभौ।
रणे तौ रेजतुर्वीरौ पुष्पिताविव किंशुकौ॥ **6.90.37**॥ 4040

तौ परस्परमभ्येत्य सर्वगात्रेषु धन्विनौ।
घोरैर्विव्यधतुर्बाणैः कृतभावावुभौ जये॥ **6.90.38**॥ 4041

ततः समरकोपेन संयुतो रावणात्मजः।
विभीषणं त्रिभिर्बाणैर्विव्याध वदने शुभे॥ **6.90.39**॥ 4042

अयोमुखैस्त्रिभिर्विद्ध्वा राक्षसेन्द्रं विभीषणम्।
एकैकेनाभिविव्याध तान् सर्वान् हरियूथपान्॥ **6.90.40**॥ 4043

तस्मै दृढतरं क्रुद्धो जघान गदया हयान्।
विभीषणो महातेजा रावणेः स दुरात्मनः॥ **6.90.41**॥ 4044

स हताश्वादवप्लुत्य रथान्निहतसारथेः।
अथ शक्तिं महातेजाः पितृव्याय मुमोच ह॥ **6.90.42**॥ 4045

तामापतन्तीं सम्प्रेक्ष्य सुमित्रानन्दवर्धनः।
चिच्छेद निशितैर्बाणैर्दशधापातयद् भुवि॥ **6.90.43**॥ 4046

तस्मै दृढधनुः क्रुद्धो हताश्वाय विभीषणः।
वज्रस्पर्शसमान् पञ्च ससर्जोरसि मार्गणान्॥ **6.90.44**॥ 4047

ते तस्य कायं भित्त्वा तु रुक्मपुङ्खा निमित्तगाः।
बभूवुर्लोहितादिग्धा रक्ता इव महोरगाः॥ **6.90.45**॥ 4048

स पितृव्यस्य सङ्क्रुद्ध इन्द्रजिच्छरमाददे।
उत्तमं रक्षसां मध्ये यमदत्तं महाबलः॥ **6.90.46**॥ 4049

तं समीक्ष्य महातेजा महेषुं तेन संहितम्।
लक्ष्मणोऽप्याददे बाणमन्यद् भीमपराक्रमः॥ **6.90.47**॥ 4050

कुबेरेण स्वयं स्वप्ने यद् दत्तममितात्मना।
दुर्जयं दुर्विषह्यं च सेन्द्रैरपि सुरासुरैः॥ **6.90.48**॥ 4051

तयोस्तु धनुषी श्रेष्ठे बाहुभिः परिघोपमैः।
विकृष्यमाणे बलवत् क्रौञ्चाविव चुकूजतुः॥ **6.90.49**॥ 4052

ताभ्यां तु धनुषि श्रेष्ठे संहितौ सायकोत्तमौ।
विकृष्यमाणौ वीराभ्यां भृशं जज्वलतुः श्रिया॥ **6.90.50**॥ 4053

तौ भासयन्तावाकाशं धनुर्भ्यां विशिखौ च्युतौ।
मुखेन मुखमाहत्य सन्निपेततुरोजसा॥ **6.90.51**॥ 4054

सन्निपातस्तयोश्चासीच्छरयोर्घोररूपयोः।
सधूमविस्फुलिङ्गश्च तज्जोऽग्निर्दारुणोऽभवत्॥ **6.90.52**॥ 4055

तौ महाग्रहसङ्काशावन्योन्यं सन्निपत्य च।
सङ्ग्रामे शतधा यातौ मेदिन्यां चैव पेततुः॥ **6.90.53**॥ 4056

शरौ प्रतिहतौ दृष्ट्वा तावुभौ रणमूर्धनि।
व्रीडितौ जातरोषौ च लक्ष्मणेन्द्रजितौ तदा॥ **6.90.54**॥ 4057

सुसंरब्धस्तु सौमित्रिरस्त्रं वारुणमाददे।
रौद्रं महेन्द्रजिद् युद्धेऽप्यसृजद् युधि निष्ठितः॥ **6.90.55**॥ 4058

तेन तद्विहितं शस्त्रं वारुणं परमाद्भुतम्।
ततः क्रुद्धो महातेजा इन्द्रजित् समितिञ्जयः।
आग्नेयं सन्दधे दीप्तं स लोकं सङ्क्षिपन्निव॥ **6.90.56**॥ 4059

सौरेणास्त्रेण तद् वीरो लक्ष्मणः पर्यवारयत्।
अस्त्रं निवारितं दृष्ट्वा रावणिः क्रोधमूर्च्छितः॥ **6.90.57**॥ 4060

आददे निशितं बाणमासुरं शत्रुदारणम्।
तस्माच्चापाद् विनिष्पेतुर्भास्वराः कूटमुद्गराः॥ **6.90.58**॥ 4061

शूलानि च भुशुण्ड्यश्च गदाः खड्गाः परश्वधाः।
तद् दृष्ट्वा लक्ष्मणः सङ्ख्ये घोरमस्त्रमथासुरम्॥ **6.90.59**॥ 4062

अवार्यं सर्वभूतानां सर्वशस्त्रविदारणम्।
माहेश्वरेण द्युतिमांस्तदस्त्रं प्रत्यवारयत्॥ **6.90.60**॥ 4063

तयोः समभवद् युद्धमद्भुतं रोमहर्षणम्।
गगनस्थानि भूतानि लक्ष्मणं पर्यवारयन्॥ **6.90.61**॥ 4064

भैरवाभिरुते भीमे युद्धे वानररक्षसाम्।
भूतैर्बहुभिराकाशं विस्मितैरावृतं बभौ॥ **6.90.62**॥ 4065

ऋषयः पितरो देवा गन्धर्वगरुडोरगाः।
शतक्रतुं पुरस्कृत्य ररक्षुर्लक्ष्मणं रणे॥ **6.90.63**॥ 4066

अथान्यं मार्गणश्रेष्ठं सन्दधे राघवानुजः।
हुताशनसमस्पर्शं रावणात्मजदारणम्॥ **6.90.64**॥ 4067

सुपत्रमनुवृत्ताङ्गं सुपर्वाणं सुसंस्थितम्।
सुवर्णविकृतं वीरः शरीरान्तकरं शरम्॥ **6.90.65**॥ 4068

दुरावारं दुर्विषहं राक्षसानां भयावहम्।
आशीविषविषप्रख्यं देवसङ्घैः समर्चितम्॥ **6.90.66**॥ 4069

येन शक्रो महातेजा दानवानजयत् प्रभुः।
पुरा देवासुरे युद्धे वीर्यवान् हरिवाहनः॥ **6.90.67**॥ 4070

अथैन्द्रमस्त्रं सौमित्रिः संयुगेष्वपराजितम्।
शरश्रेष्ठं धनुश्रेष्ठे विकर्षन्निदमब्रवीत्॥ **6.90.68**॥ 4071

लक्ष्मीवान् लक्ष्मणो वाक्यमर्थसाधकमात्मनः।
धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि।
पौरुषे चाप्रतिद्वन्द्वस्तदैनं जहि रावणिम्॥ **6.90.69**॥ 4072

इत्युक्त्वा बाणमाकर्णं विकृष्य तमजिह्मगम्।
लक्ष्मणः समरे वीरः ससर्जेन्द्रजितं प्रति।
ऐन्द्रास्त्रेण समायुज्य लक्ष्मणः परवीरहा॥ **6.90.70**॥ 4073

तच्छिरः सशिरस्त्राणं श्रीमज्ज्वलितकुण्डलम्।
प्रमथ्येन्द्रजितः कायात् पातयामास भूतले॥ **6.90.71**॥ 4074

तद् राक्षसतनूजस्य भिन्नस्कन्धं शिरो महत्।
तपनीयनिभं भूमौ ददृशे रुधिरोक्षितम्॥ **6.90.72**॥ 4075

हतः स निपपाताथ धरण्यां रावणात्मजः।
कवची सशिरस्त्राणो विप्रविद्धशरासनः॥ **6.90.73**॥ 4076

चुक्रुशुस्ते ततः सर्वे वानराः सविभीषणाः।
हृष्यन्ते निहते तस्मिन् देवा वृत्रवधे यथा॥ **6.90.74**॥ 4077

अथान्तरिक्षे देवानामृषीणां च महात्मनाम्।
जज्ञेऽथ जयसन्नादो गन्धर्वाप्सरसामपि॥ **6.90.75**॥ 4078

पतितं समभिज्ञाय राक्षसी सा महाचमूः।
वध्यमाना दिशो भेजे हरिभिर्जितकाशिभिः॥ **6.90.76**॥ 4079

वानरैर्वध्यमानास्ते शस्त्राण्युत्सृज्य राक्षसाः।
लङ्कामभिमुखाः सस्रुर्भ्रष्टसंज्ञाः प्रधाविताः॥ **6.90.77**॥ 4080

दुद्रुवुर्बहुधा भीता राक्षसाः शतशो दिशः।
त्यक्त्वा प्रहरणान् सर्वे पट्टिशासिपरश्वधान्॥ **6.90.78**॥ 4081

केचिल्लङ्कां परित्रस्ताः प्रविष्टा वानरार्दिताः।
समुद्रे पतिताः केचित् केचित् पर्वतमाश्रिताः॥ **6.90.79**॥ 4082

हतमिन्द्रजितं दृष्ट्वा शयानं च रणक्षितौ।
राक्षसानां सहस्रेषु न कश्चित् प्रत्यदृश्यत॥ **6.90.80**॥ 4083

यथास्तं गत आदित्ये नावतिष्ठन्ति रश्मयः।
तथा तस्मिन् निपतिते राक्षसास्ते गता दिशः॥ **6.90.81**॥ 4084

शान्तरश्मिरिवादित्यो निर्वाण इव पावकः।
बभूव स महाबाहुर्व्यपास्तगतजीवितः॥ **6.90.82**॥ 4085

प्रशान्तपीडाबहुलो विनष्टारिः प्रहर्षवान्।
बभूव लोकः पतिते राक्षसेन्द्रसुते तदा॥ **6.90.83**॥ 4086

हर्षं च शक्रो भगवान् सह सर्वैर्महर्षिभिः।
जगाम निहते तस्मिन् राक्षसे पापकर्मणि॥ **6.90.84**॥ 4087

आकाशे चापि देवानां शुश्रुवे दुन्दुभिस्वनः।
नृत्यद्भिरप्सरोभिश्च गन्धर्वैश्च महात्मभिः॥ **6.90.85**॥ 4088

ववर्षुः पुष्पवर्षाणि तदद्भुतमिवाभवत्।
प्रशशाम हते तस्मिन् राक्षसे क्रूरकर्मणि॥ **6.90.86**॥ 4089

शुद्धा आपो नभश्चैव जह्रषुर्देवदानवाः।
आजग्मुः पतिते तस्मिन् सर्वलोकभयावहे॥ **6.90.87**॥ 4090

ऊचुश्च सहितास्तुष्टा देवगन्धर्वदानवाः।
विज्वराः शान्तकलुषा ब्राह्मणा विचरन्त्विति॥ **6.90.88**॥ 4091

ततोऽभ्यनन्दन् संहृष्टाः समरे हरियूथपाः।
तमप्रतिबलं दृष्ट्वा हतं नैर्ऋतपुङ्गवम्॥ **6.90.89**॥ 4092

विभीषणो हनूमांश्च जाम्बवांश्चर्क्षयूथपः।
विजयेनाभिनन्दन्तस्तुष्टुवुश्चापि लक्ष्मणम्॥ **6.90.90**॥ 4093

क्ष्वेडन्तश्च प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः।
लब्धलक्षा रघुसुतं परिवार्योपतस्थिरे॥ **6.90.91**॥ 4094

लाङ्गूलानि प्रविध्यन्तः स्फोटयन्तश्च वानराः।
लक्ष्मणो जयतीत्येव वाक्यं विश्रावयंस्तदा॥ **6.90.92**॥ 4095

अन्योन्यं च समाश्लिष्य हरयो हृष्टमानसाः।
चक्रुरुच्चावचगुणा राघवाश्रयसत्कथाः॥ **6.90.93**॥ 4096

तदसुकरमथाभिवीक्ष्य हृष्टाः
प्रियसुहृदो युधि लक्ष्मणस्य कर्म।
परममुपलभन्मनःप्रहर्षं
विनिहतमिन्द्ररिपुं निशम्य देवाः॥ **6.90.94**॥ 4097

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे नवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकनवतितमः सर्गः ॥

श्रीरामपार्श्वमागम्य लक्ष्मणविभीषणप्रभृतिभिरिन्द्रजिद्वधवृत्तान्तस्य श्रावणं सन्तुष्टेन श्रीरामेण लक्ष्मणं परिष्वज्य तस्य प्रशंसनं सुषेणेन लक्ष्मणादीनां चिकित्सनं च

रुधिरक्लिन्नगात्रस्तु लक्ष्मणः शुभलक्षणः।
बभूव हृष्टस्तं हत्वा शत्रुजेतारमाहवे ॥ **6.91.1** ॥ 4098

ततः स जाम्बवन्तं च हनूमन्तं च वीर्यवान्।
सन्निपत्य महातेजास्तांश्च सर्वान् वनौकसः ॥ **6.91.2** ॥ 4099

आजगाम ततः शीघ्रं यत्र सुग्रीवराघवौ।
विभीषणमवष्टभ्य हनूमन्तं च लक्ष्मणः ॥ **6.91.3** ॥ 4100

ततो राममभिक्रम्य सौमित्रिरभिवाद्य च।
तस्थौ भ्रातृसमीपस्थः शक्रस्येन्द्रानुजो यथा ॥ **6.91.4** ॥ 4101

निष्टनन्निव चागत्य राघवाय महात्मने।
आचचक्षे तदा वीरो घोरमिन्द्रजितो वधम् ॥ **6.91.5** ॥ 4102

रावणेस्तु शिरश्छिन्नं लक्ष्मणेन महात्मना।
न्यवेदयत रामाय तदा हृष्टो विभीषणः ॥ **6.91.6** ॥ 4103

श्रुत्वैव तु महावीर्यो लक्ष्मणेनेन्द्रजिद्वधम्।
प्रहर्षमतुलं लेभे वाक्यं चेदमुवाच ह ॥ **6.91.7** ॥ 4104

साधु लक्ष्मण तुष्टोऽस्मि कर्म चासुकरं कृतम्।
रावणेर्हि विनाशेन जितमित्युपधारय॥ **6.91.8**॥ 4105

स तं शिरस्युपाघ्राय लक्ष्मणं कीर्तिवर्धनम्।
लज्जमानं बलात् स्नेहादङ्कमारोप्य वीर्यवान्॥ **6.91.9**॥ 4106

उपवेश्य तमुत्सङ्गे परिष्वज्यावपीडितम्।
भ्रातरं लक्ष्मणं स्निग्धं पुनः पुनरुदैक्षत॥ **6.91.10**॥ 4107

शल्यसम्पीडितं शस्तं निःश्वसन्तं तु लक्ष्मणम्।
रामस्तु दुःखसन्तप्तं तं तु निःश्वासपीडितम्॥ **6.91.11**॥ 4108

मूर्ध्नि चैनमुपाघ्राय भूयः संस्पृश्य च त्वरन्।
उवाच लक्ष्मणं वाक्यमाश्वास्य पुरुषर्षभः॥ **6.91.12**॥ 4109

कृतं परमकल्याणं कर्म दुष्करकर्मणा।
अद्य मन्ये हते पुत्रे रावणं निहतं युधि॥ **6.91.13**॥ 4110

अद्याहं विजयी शत्रौ हते तस्मिन् दुरात्मनि।
रावणस्य नृशंसस्य दिष्ट्या वीर त्वया रणे॥ **6.91.14**॥ 4111

छिन्नो हि दक्षिणो बाहुः स हि तस्य व्यपाश्रयः।
विभीषणहनूमद्भ्यां कृतं कर्म महद् रणे॥ **6.91.15**॥ 4112

अहोरात्रैस्त्रिभिर्वीरः कथञ्चिद् विनिपातितः।
निरमित्रः कृतोऽस्म्यद्य निर्यास्यति हि रावणः॥ **6.91.16**॥ 4113

बलव्यूहेन महता निर्यास्यति हि रावणः।
बलव्यूहेन महता श्रुत्वा पुत्रं निपातितम्॥ **6.91.17**॥ 4114

तं पुत्रवधसन्तप्तं निर्यान्तं राक्षसाधिपम्।
बलेनावृत्य महता निहनिष्यामि दुर्जयम्॥ **6.91.18**॥ 4115

त्वया लक्ष्मण नाथेन सीता च पृथिवी च मे।
न दुष्प्रापा हते तस्मिञ्शक्रजेतरि चाहवे॥ **6.91.19**॥ 4116

स तं भ्रातरमाश्वास्य परिष्वज्य च राघवः।
रामः सुषेणं मुदितः समाभाष्येदमब्रवीत्॥ **6.91.20**॥ 4117

विशल्योऽयं महाप्राज्ञ सौमित्रिर्मित्रवत्सलः।
यथा भवति सुस्वस्थस्तथा त्वं समुपाचर॥ **6.91.21**॥ 4118

विशल्यः क्रियतां क्षिप्रं सौमित्रिः सविभीषणः।
ऋक्षवानरसैन्यानां शूराणां द्रुमयोधिनाम्॥ **6.91.22**॥ 4119

ये चाप्यन्येऽत्र युध्यन्ति सशल्या व्रणिनस्तथा।
तेऽपि सर्वे प्रयत्नेन क्रियन्ते सुखिनस्त्वया॥ **6.91.23**॥ 4120

एवमुक्तः स रामेण महात्मा हरियूथपः।
लक्ष्मणाय ददौ नस्तः सुषेणः परमौषधम्॥ **6.91.24**॥ 4121

स तस्य गन्धमाघ्राय विशल्यः समपद्यत।
तदा निर्वेदनश्चैव संरूढव्रण एव च॥ **6.91.25**॥ 4122

विभीषणमुखानां च सुहृदां राघवाज्ञया।
सर्ववानरमुख्यानां चिकित्सामकरोत् तदा॥ **6.91.26**॥ 4123

ततः प्रकृतिमापन्नो हृतशल्यो गतक्लमः।
सौमित्रिर्मुमुदे तत्र क्षणेन विगतज्वरः॥ **6.91.27**॥ 4124

तदैव रामः प्लवगाधिपस्तथा
विभीषणश्चर्क्षपतिश्च वीर्यवान्।
अवेक्ष्य सौमित्रिमरोगमुत्थितं
मुदा ससैन्याः सुचिरं जहर्षिरे॥ **6.91.28**॥ 4125

अपूजयत् कर्म स लक्ष्मणस्य
सुदुष्करं दाशरथिर्महात्मा।
हृष्टा बभूवुर्युधि यूथपेन्द्रा
निपातितं शक्रजितं निशम्य॥ **6.91.29**॥ 4126

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकनवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्विनवतितमः सर्गः ॥

रावणस्य शोकः सुपार्श्वकर्तृकाश्वासनेन च तस्य सीतावधान्निवृत्तिः

ततः पौलस्त्यसचिवाः श्रुत्वा चेन्द्रजितो वधम्।
आचचक्षुरभिज्ञाय दशग्रीवाय सत्वराः॥ **6.92.1** ॥ 4127

युद्धे हतो महाराज लक्ष्मणेन तवात्मजः।
विभीषणसहायेन मिषतां नो महाद्युतिः॥ **6.92.2** ॥ 4128

शूरः शूरेण सङ्गम्य संयुगेष्वपराजितः।
लक्ष्मणेन हतः शूरः पुत्रस्ते विबुधेन्द्रजित्॥ **6.92.3** ॥ 4129

गतः स परमान् लोकाञ्शरैः सन्तर्प्य लक्ष्मणम्।
स तं प्रतिभयं श्रुत्वा वधं पुत्रस्य दारुणम्॥ **6.92.4** ॥ 4130

घोरमिन्द्रजितः सङ्ख्ये कश्मलं प्राविशन्महत्।
उपलभ्य चिरात् संज्ञां राजा राक्षसपुङ्गवः॥ **6.92.5** ॥ 4131

पुत्रशोकाकुलो दीनो विललापाकुलेन्द्रियः।
हा राक्षसचमूमुख्य मम वत्स महाबल॥ **6.92.6** ॥ 4132

जित्वेन्द्रं कथमद्य त्वं लक्ष्मणस्य वशं गतः।
ननु त्वमिषुभिः क्रुद्धो भिन्द्याः कालान्तकावपि॥ **6.92.7** ॥ 4133

मन्दरस्यापि शृङ्गाणि किं पुनर्लक्ष्मणं युधि।
अद्य वैवस्वतो राजा भूयो बहुमतो मम॥ **6.92.8**॥ 4134

येनाद्य त्वं महाबाहो संयुक्तः कालधर्मणा।
एष पन्थाः सुयोधानां सर्वामरगणेष्वपि।
यः कृते हन्यते भर्तुः स पुमान् स्वर्गमृच्छति॥ **6.92.9**॥ 4135

अद्य देवगणाः सर्वे लोकपाला महर्षयः।
हतमिन्द्रजितं श्रुत्वा सुखं स्वप्स्यन्ति निर्भयाः॥ **6.92.10**॥ 4136

अद्य लोकास्त्रयः कृत्स्ना पृथिवी च सकानना।
एकेनेन्द्रजिता हीना शून्येव प्रतिभाति मे॥ **6.92.11**॥ 4137

अद्य नैर्ऋतकन्यानां श्रोष्याम्यन्तःपुरे रवम्।
करेणुसङ्घस्य यथा निनादं गिरिगह्वरे॥ **6.92.12**॥ 4138

यौवराज्यं च लङ्कां च रक्षांसि च परन्तप।
मातरं मां च भार्याश्च क्व गतोऽसि विहाय नः॥ **6.92.13**॥ 4139

मम नाम त्वया वीर गतस्य यमसादनम्।
प्रेतकार्याणि कार्याणि विपरीते हि वर्तसे॥ **6.92.14**॥ 4140

स त्वं जीवति सुग्रीवे लक्ष्मणे च सराघवे।
मम शल्यमनुद्धृत्य क्व गतोऽसि विहाय नः॥ **6.92.15**॥ 4141

एवमादिविलापार्तं रावणं राक्षसाधिपम्।
आविवेश महान् कोपः पुत्रव्यसनसम्भवः॥ **6.92.16**॥ 4142

प्रकृत्या कोपनं ह्येनं पुत्रस्य पुनराधयः।
दीप्तं सन्दीपयामासुर्घर्मेऽर्कमिव रश्मयः॥ **6.92.17**॥ 4143

ललाटे भ्रुकुटीभिश्च सङ्गताभिर्व्यरोचत।
युगान्ते सह नक्रैस्तु महोर्मिभिरिवोदधिः॥ **6.92.18**॥ 4144

कोपाद् विजृम्भमाणस्य वक्त्राद् व्यक्तमिव ज्वलन्।
उत्पपात सधूमाग्निर्वृत्रस्य वदनादिव॥ **6.92.19**॥ 4145

स पुत्रवधसन्तप्तः शूरः क्रोधवशं गतः।
समीक्ष्य रावणो बुद्ध्या वैदेह्या रोचयद् वधम्॥ **6.92.20**॥ 4146

तस्य प्रकृत्या रक्ते च रक्ते क्रोधाग्निनापि च।
रावणस्य महाघोरे दीप्ते नेत्रे बभूवतुः॥ **6.92.21**॥ 4147

घोरं प्रकृत्या रूपं तत् तस्य क्रोधाग्निमूर्च्छितम्।
बभूव रूपं क्रुद्धस्य रुद्रस्येव दुरासदम्॥ **6.92.22**॥ 4148

तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नश्रुबिन्दवः।
दीपाभ्यामिव दीप्ताभ्यां सार्चिषः स्नेहबिन्दवः॥ **6.92.23**॥ 4149

दन्तान् विदशतस्तस्य श्रूयते दशनस्वनः।
यन्त्रस्याकृष्यमाणस्य मश्नतो दानवैरिव॥ **6.92.24**॥ 4150

कालाग्निरिव सङ्क्रुद्धो यां यां दिशमवैक्षत।
तस्यां तस्यां भयत्रस्ता राक्षसाः संविलिल्यिरे॥ **6.92.25**॥ 4151

तमन्तकमिव क्रुद्धं चराचरचिखादिषुम्।
वीक्षमाणं दिशः सर्वा राक्षसा नोपचक्रमुः॥ **6.92.26**॥ 4152

ततः परमसङ्क्रुद्धो रावणो राक्षसाधिपः।
अब्रवीद् रक्षसां मध्ये संस्तम्भयिषुराहवे॥ **6.92.27**॥ 4153

मया वर्षसहस्राणि चरित्वा परमं तपः।
तेषु तेष्ववकाशेषु स्वयम्भूः परितोषितः॥ **6.92.28**॥ 4154

तस्यैव तपसो व्युष्ट्या प्रसादाच्च स्वयम्भुवः।
नासुरेभ्यो न देवेभ्यो भयं मम कदाचन॥ **6.92.29**॥ 4155

कवचं ब्रह्मदत्तं मे यदादित्यसमप्रभम्।
देवासुरविमर्देषु न च्छिन्नं वज्रमुष्टिभिः॥ **6.92.30**॥ 4156

तेन मामद्य संयुक्तं रथस्थमिह संयुगे।
प्रतीयात् कोऽद्य मामाजौ साक्षादपि पुरन्दरः॥ **6.92.31**॥ 4157

यत् तदाभिप्रसन्नेन सशरं कार्मुकं महत्।
देवासुरविमर्देषु मम दत्तं स्वयम्भुवा॥ **6.92.32**॥ 4158

अद्य तूर्यशतैर्भीमं धनुरुत्थाप्यतां मम।
रामलक्ष्मणयोरेव वधाय परमाहवे॥ **6.92.33**॥ 4159

स पुत्रवधसन्तप्तः क्रूरः क्रोधवशं गतः।
समीक्ष्य रावणो बुद्ध्या सीतां हन्तुं व्यवस्यत॥ **6.92.34**॥ 4160

प्रत्यवेक्ष्य तु ताम्राक्षः सुघोरो घोरदर्शनः।
दीनो दीनस्वरान् सर्वांस्तानुवाच निशाचरान्॥ **6.92.35**॥ 4161

मायया मम वत्सेन वञ्चनार्थं वनौकसाम्।
किञ्चिदेव हतं तत्र सीतेयमिति दर्शितम्॥ **6.92.36**॥ 4162

तदिदं तथ्यमेवाहं करिष्ये प्रियमात्मनः।
वैदेहीं नाशयिष्यामि क्षत्रबन्धुमनुव्रताम्॥ **6.92.37**॥ 4163

इत्येवमुक्त्वा सचिवान् खड्गमाशु परामृशत्।
उद्धृत्य गुणसम्पन्नं विमलाम्बरवर्चसम्॥ **6.92.38**॥ 4164

निष्पपात स वेगेन सभार्यः सचिवैर्वृतः।
रावणः पुत्रशोकेन भृशमाकुलचेतनः॥ **6.92.39**॥ 4165

सङ्क्रुद्धः खड्गमादाय सहसा यत्र मैथिली।
व्रजन्तं राक्षसं प्रेक्ष्य सिंहनादं विचुक्रुशुः॥ **6.92.40**॥ 4166

ऊचुश्चान्योन्यमालिङ्ग्य सङ्क्रुद्धं प्रेक्ष्य राक्षसम्।
अद्यैनं तावुभौ दृष्ट्वा भ्रातरौ प्रव्यथिष्यतः॥ **6.92.41**॥ 4167

लोकपाला हि चत्वारः क्रुद्धेनानेन निर्जिताः।
बहवः शत्रवश्चान्ये संयुगेष्वभिपातिताः॥ **6.92.42**॥ 4168

त्रिषु लोकेषु रत्नानि भुङ्क्ते आहृत्य रावणः।
विक्रमे च बले चैव नास्त्यस्य सदृशो भुवि॥ **6.92.43**॥ 4169

तेषां सञ्जल्पमानानामशोकवनिकां गताम्।
अभिदुद्राव वैदेहीं रावणः क्रोधमूर्च्छितः॥ **6.92.44**॥ 4170

वार्यमाणः सुसङ्क्रुद्धः सुहृद्भिर्हितबुद्धिभिः।
अभ्यधावत सङ्क्रुद्धः खे ग्रहो रोहिणीमिव॥ **6.92.45**॥ 4171

मैथिली रक्ष्यमाणा तु राक्षसीभिरनिन्दिता।
ददर्श राक्षसं क्रुद्धं निस्त्रिंशवरधारिणम्॥ **6.92.46**॥ 4172

तं निशम्य सनिस्त्रिंशं व्यथिता जनकात्मजा।
निवार्यमाणं बहुशः सुहृद्भिरनिवर्तिनम्॥ **6.92.47**॥ 4173

सीता दुःखसमाविष्टा विलपन्तीदमब्रवीत्।
यथायं मामभिक्रुद्धः समभिद्रवति स्वयम्॥ **6.92.48**॥ 4174

वधिष्यति सनाथां मामनाथामिव दुर्मतिः।
बहुशश्चोदयामास भर्तारं मामनुव्रताम्॥ **6.92.49**॥ 4175

भार्या मम भवस्वेति प्रत्याख्यातो ध्रुवं मया।
सोऽयं मामनुपस्थाने व्यक्तं नैराश्यमागतः॥ **6.92.50**॥ 4176

क्रोधमोहसमाविष्टो व्यक्तं मां हन्तुमुद्यतः।
अथवा तौ नरव्याघ्रौ भ्रातरौ रामलक्ष्मणौ॥ **6.92.51**॥ 4177

मन्निमित्तमनार्येण समरेऽद्य निपातितौ।
भैरवो हि महान् नादो राक्षसानां श्रुतो मया॥ **6.92.52**॥ 4178

बहूनामिह हृष्टानां तथा विक्रोशतां प्रियम्।
अहो धिङ्मन्निमित्तोऽयं विनाशो राजपुत्रयोः॥ **6.92.53**॥ 4179

अथवा पुत्रशोकेन अहत्वा रामलक्ष्मणौ।
विधमिष्यति मां रौद्रो राक्षसः पापनिश्चयः॥ **6.92.54**॥ 4180

हनूमतस्तु तद् वाक्यं न कृतं क्षुद्रया मया।
यद्यहं तस्य पृष्ठेन तदायासमनिर्जिता॥ **6.92.55**॥ 4181

नाद्यैवमनुशोचेयं भर्तुरङ्कगता सती।
मन्ये तु हृदयं तस्याः कौसल्यायाः फलिष्यति॥ **6.92.56**॥ 4182

एकपुत्रा यदा पुत्रं विनष्टं श्रोष्यते युधि।
सा हि जन्म च बाल्यं च यौवनं च महात्मनः॥ **6.92.57**॥ 4183

धर्मकार्याणि रूपं च रुदती संस्मरिष्यति।
निराशा निहते पुत्रे दत्त्वा श्राद्धमचेतना॥ **6.92.58**॥ 4184

अग्निमावेक्ष्यते नूनमपो वापि प्रवेक्ष्यति।
धिगस्तु कुब्जामसतीं मन्थरां पापनिश्चयाम्॥ **6.92.59**॥ 4185

यन्निमित्तमिमं शोकं कौसल्या प्रतिपत्स्यते।
इत्येवं मैथिलीं दृष्ट्वा विलपन्तीं तपस्विनीम्॥ **6.92.60**॥ 4186

रोहिणीमिव चन्द्रेण विना ग्रहवशं गताम्।
एतस्मिन्नन्तरे तस्य अमात्यः शीलवाञ्छुचिः॥ **6.92.61**॥ 4187

सुपार्श्वो नाम मेधावी रावणं रक्षसां वरम्।
निवार्यमाणः सचिवैरिदं वचनमब्रवीत्॥ **6.92.62**॥ 4188

कथं नाम दशग्रीव साक्षाद्वैश्रवणानुज।
हन्तुमिच्छसि वैदेहीं क्रोधाद् धर्ममपास्य च॥ **6.92.63**॥ 4189

वेदविद्याव्रतस्नातः स्वकर्मनिरतस्तथा।
स्त्रियः कस्माद् वधं वीर मन्यसे राक्षसेश्वर॥ **6.92.64**॥ 4190

मैथिलीं रूपसम्पन्नां प्रत्यवेक्षस्व पार्थिव।
तस्मिन्नेव सहास्माभिराहवे क्रोधमुत्सृज॥ **6.92.65**॥ 4191

अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशी।
कृत्वा निर्याह्यमावास्यां विजयाय बलैर्वृतः॥ **6.92.66**॥ 4192

शूरो धीमान् रथी खड्गी रथप्रवरमास्थितः।
हत्वा दाशरथिं रामं भवान् प्राप्स्यति मैथिलीम्॥ **6.92.67**॥ 4193

स तद् दुरात्मा सुहृदा निवेदितं
वचः सुधर्म्यं प्रतिगृह्य रावणः।
गृहं जगामाथ ततश्च वीर्यवान्
पुनः सभां च प्रययौ सुहृद्वृतः॥ **6.92.68**॥ 4194

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्विनवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रिनवतितमः सर्गः ॥

श्रीरामेण राक्षससेनायाः संहारः

स प्रविश्य सभां राजा दीनः परमदुःखितः।
निषसादासने मुख्ये सिंहः क्रुद्ध इव श्वसन्॥ **6.93.1** ॥ 4195

अब्रवीच्च स तान् सर्वान् बलमुख्यान् महाबलः।
रावणः प्राञ्जलिर्वाक्यं पुत्रव्यसनकर्शितः॥ **6.93.2** ॥ 4196

सर्वे भवन्तः सर्वेण हस्त्यश्वेन समावृताः।
निर्यान्तु रथसङ्घैश्च पादातैश्चोपशोभिताः॥ **6.93.3** ॥ 4197

एकं रामं परिक्षिप्य समरे हन्तुमर्हथ।
वर्षन्तः शरवर्षाणि प्रावृट्काल इवाम्बुदाः॥ **6.93.4** ॥ 4198

अथवाहं शरैस्तीक्ष्णैर्भिन्नगात्रं महाहवे।
भवद्भिःश्वो निहन्तास्मि रामं लोकस्य पश्यतः॥ **6.93.5** ॥ 4199

इत्येतद् वाक्यमादाय राक्षसेन्द्रस्य राक्षसाः।
निर्ययुस्ते रथैः शीघ्रैर्नानानीकैश्च संयुताः॥ **6.93.6** ॥ 4200

परिघान् पट्टिशांश्चैव शरखड्गपरश्वधान्।
शरीरान्तकरान् सर्वे चिक्षिपुर्वानरान् प्रति॥ **6.93.7** ॥ 4201

वानराश्च द्रुमाञ्छैलान् राक्षसान् प्रति चिक्षिपुः।
स सङ्ग्रामो महाभीमः सूर्यस्योदयनं प्रति॥ **6.93.8**॥ 4202

रक्षसां वानराणां च तुमुलः समपद्यत।
ते गदाभिश्च चित्राभिः प्रासैः खड्गैः परश्वधैः॥ **6.93.9**॥ 4203

अन्योन्यं समरे जघ्नुस्तदा वानरराक्षसाः।
एवं प्रवृत्ते सङ्ग्रामे ह्यद्भुतं सुमहद्रजः॥ **6.93.10**॥ 4204

रक्षसां वानराणां च शान्तं शोणितविस्रवैः।
मातङ्गरथकूलाश्च शरमत्स्या ध्वजद्रुमाः॥ **6.93.11**॥ 4205

शरीरसङ्घाटवहाः प्रससुः शोणितापगाः।
ततस्ते वानराः सर्वे शोणितौघपरिप्लुताः॥ **6.93.12**॥ 4206

ध्वजवर्मरथानश्वान् नानाप्रहरणानि च।
आप्लुत्याप्लुत्य समरे वानरेन्द्रा बभञ्जिरे॥ **6.93.13**॥ 4207

केशान् कर्णललाटं च नासिकाश्च प्लवङ्गमाः।
रक्षसां दशनैस्तीक्ष्णैर्नखैश्चापि व्यकर्तयन्॥ **6.93.14**॥ 4208

एकैकं राक्षसं सङ्ख्ये शतं वानरपुङ्गवाः।
अभ्यधावन्त फलिनं वृक्षं शकुनयो यथा॥ **6.93.15**॥ 4209

तदा गदाभिर्गुर्वीभिः प्रासैः खड्गैः परश्वधैः।
निर्जघ्नुर्वानरान् घोरान् राक्षसाः पर्वतोपमाः॥ **6.93.16**॥ 4210

राक्षसैर्वध्यमानानां वानराणां महाचमूः।
शरण्यं शरणं याता रामं दशरथात्मजम्॥ **6.93.17**॥ 4211

ततो रामो महातेजा धनुरादाय वीर्यवान्।
प्रविश्य राक्षसं सैन्यं शरवर्षं ववर्ष च॥ **6.93.18**॥ 4212

प्रविष्टं तु तदा रामं मेघाः सूर्यमिवाम्बरे।
नाधिजग्मुर्महाघोरा निर्दहन्तं शराग्निना॥ **6.93.19**॥ 4213

कृतान्येव सुघोराणि रामेण रजनीचराः।
रणे रामस्य ददृशुः कर्माण्यसुकराणि ते॥ **6.93.20**॥ 4214

चालयन्तं महासैन्यं विधमन्तं महारथान्।
ददृशुस्ते न वै रामं वातं वनगतं यथा॥ **6.93.21**॥ 4215

छिन्नं भिन्नं शरैर्दग्धं प्रभग्नं शस्त्रपीडितम्।
बलं रामेण ददृशुर्न रामं शीघ्रकारिणम्॥ **6.93.22**॥ 4216

प्रहरन्तं शरीरेषु न ते पश्यन्ति राघवम्।
इन्द्रियार्थेषु तिष्ठन्तं भूतात्मानमिव प्रजाः॥ **6.93.23**॥ 4217

एष हन्ति गजानीकमेष हन्ति महारथान्।
एष हन्ति शरैस्तीक्ष्णैः पदातीन् वाजिभिः सह॥ **6.93.24**॥ 4218

इति ते राक्षसाः सर्वे रामस्य सदृशान् रणे।
अन्योन्यं कुपिता जघ्नुः सादृश्याद् राघवस्य तु॥ **6.93.25**॥ 4219

न ते ददृशिरे रामं दहन्तमपि वाहिनीम्।
मोहिताः परमास्त्रेण गान्धर्वेण महात्मना॥ **6.93.26**॥ 4220

ते तु रामसहस्राणि रणे पश्यन्ति राक्षसाः।
पुनः पश्यन्ति काकुत्स्थमेकमेव महाहवे॥ **6.93.27**॥ 4221

भ्रमन्तीं काञ्चनीं कोटिं कार्मुकस्य महात्मनः।
अलातचक्रप्रतिमां ददृशुस्ते न राघवम्॥ **6.93.28**॥ 4222

शरीरनाभि सत्त्वार्चिः शरारं नेमिकार्मुकम्।
ज्याघोषतलनिर्घोषं तेजोबुद्धिगुणप्रभम्॥ **6.93.29**॥ 4223

दिव्यास्त्रगुणपर्यन्तं निघ्नन्तं युधि राक्षसान्।
ददृशू रामचक्रं तत् कालचक्रमिव प्रजाः॥ **6.93.30**॥ 4224

अनीकं दशसाहस्रं रथानां वातरंहसाम्।
अष्टादश सहस्राणि कुञ्जराणां तरस्विनाम्॥ **6.93.31**॥ 4225

चतुर्दश सहस्राणि सारोहाणां च वाजिनाम्।
पूर्णे शतसहस्रे द्वे राक्षसानां पदातिनाम्॥ **6.93.32**॥ 4226

दिवसस्याष्टभागेन शरैरग्निशिखोपमैः।
हतान्येकेन रामेण रक्षसां कामरूपिणाम्॥ **6.93.33**॥ 4227

ते हताश्वा हतरथाः शान्ता विमथितध्वजाः।
अभिपेतुः पुरीं लङ्कां हतशेषा निशाचराः॥ **6.93.34**॥ 4228

हतैर्गजपदात्यश्वैस्तद् बभूव रणाजिरम्।
आक्रीडभूमिः क्रुद्धस्य रुद्रस्येव महात्मनः॥ **6.93.35**॥ 4229

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
साधु साध्विति रामस्य तत् कर्म समपूजयन्॥ **6.93.36**॥ 4230

अब्रवीच्च तदा रामः सुग्रीवं प्रत्यनन्तरम्।
विभीषणं च धर्मात्मा हनूमन्तं च वानरम्॥ **6.93.37**॥ 4231

जाम्बवन्तं हरिश्रेष्ठं मैन्दं द्विविदमेव च।
एतदस्त्रबलं दिव्यं मम वा त्र्यम्बकस्य वा॥ **6.93.38**॥ 4232

निहत्य तां राक्षसवाहिनीं तु रामस्तदा शक्रसमो महात्मा।
अस्त्रेषु शस्त्रेषु जितक्लमश्च संस्तूयते देवगणैः प्रहृष्टैः॥ **6.93.39**॥ 4233

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिनवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्नवतितमः सर्गः ॥

राक्षसीनां विलापः

तानि नागसहस्राणि सारोहाणि च वाजिनाम्।
रथानां त्वग्निवर्णानां सध्वजानां सहस्रशः॥ **6.94.1** ॥ 4234

राक्षसानां सहस्राणि गदापरिघयोधिनाम्।
काञ्चनध्वजचित्राणां शूराणां कामरूपिणाम्॥ **6.94.2** ॥ 4235

निहतानि शरैर्दीप्तैस्तप्तकाञ्चनभूषणैः।
रावणेन प्रयुक्तानि रामेणाक्लिष्टकर्मणा॥ **6.94.3** ॥ 4236

दृष्ट्वा श्रुत्वा च सम्भ्रान्ता हतशेषा निशाचराः।
राक्षस्यश्च समागम्य दीनाश्चिन्तापरिप्लुताः॥ **6.94.4** ॥ 4237

विधवा हतपुत्राश्च क्रोशन्त्यो हतबान्धवाः।
राक्षस्यः सह सङ्गम्य दुःखार्ताः पर्यदेवयन्॥ **6.94.5** ॥ 4238

कथं शूर्पणखा वृद्धा कराला निर्णतोदरी।
आससाद वने रामं कन्दर्पसमरूपिणम्॥ **6.94.6** ॥ 4239

सुकुमारं महासत्त्वं सर्वभूतहिते रतम्।
तं दृष्ट्वा लोकवध्या सा हीनरूपा प्रकामिता॥ **6.94.7** ॥ 4240

कथं सर्वगुणैर्हीना गुणवन्तं महौजसम्।
सुमुखं दुर्मुखी रामं कामयामास राक्षसी॥ **6.94.8**॥ 4241

जनस्यास्याल्पभाग्यत्वाद् वलिनी श्वेतमूर्धजा।
अकार्यमपहास्यं च सर्वलोकविगर्हितम्॥ **6.94.9**॥ 4242

राक्षसानां विनाशाय दूषणस्य खरस्य च।
चकाराप्रतिरूपा सा राघवस्य प्रधर्षणम्॥ **6.94.10**॥ 4243

तन्निमित्तमिदं वैरं रावणेन कृतं महत्।
वधाय सीता साऽऽनीता दशग्रीवेण रक्षसा॥ **6.94.11**॥ 4244

न च सीतां दशग्रीवः प्राप्नोति जनकात्मजाम्।
बद्धं बलवता वैरमक्षयं राघवेण च॥ **6.94.12**॥ 4245

वैदेहीं प्रार्थयानं तं विराधं प्रेक्ष्य राक्षसम्।
हतमेकेन रामेण पर्याप्तं तन्निदर्शनम्॥ **6.94.13**॥ 4246

चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम्।
निहतानि जनस्थाने शरैरग्निशिखोपमैः॥ **6.94.14**॥ 4247

खरश्च निहतः सङ्ख्ये दूषणस्त्रिशिरास्तथा।
शरैरादित्यसङ्काशैः पर्याप्तं तन्निदर्शनम्॥ **6.94.15**॥ 4248

हतो योजनबाहुश्च कबन्धो रुधिराशनः।
क्रोधान्नादं नदन् सोऽथ पर्याप्तं तन्निदर्शनम्॥ **6.94.16**॥ 4249

जघान बलिनं रामः सहस्रनयनात्मजम्।
वालिनं मेरुसङ्काशं पर्याप्तं तन्निदर्शनम्॥ **6.94.17**॥ 4250

ऋष्यमूके वसंश्चैव दीनो भग्नमनोरथः।
सुग्रीवः प्रापितो राज्यं पर्याप्तं तन्निदर्शनम्॥ **6.94.18**॥ 4251

धर्मार्थसहितं वाक्यं सर्वेषां रक्षसां हितम्।
युक्तं विभीषणेनोक्तं मोहात् तस्य न रोचते॥ **6.94.19**॥ 4252

विभीषणवचः कुर्याद् यदि स्म धनदानुजः।
श्मशानभूता दुःखार्ता नेयं लङ्का भविष्यति॥ **6.94.20**॥ 4253

कुम्भकर्णं हतं श्रुत्वा राघवेण महाबलम्।
अतिकायं च दुर्मर्षं लक्ष्मणेन हतं तदा।
प्रियं चेन्द्रजितं पुत्रं रावणो नावबुध्यते॥ **6.94.21**॥ 4254

मम पुत्रो मम भ्राता मम भर्ता रणे हतः।
इत्येष श्रूयते शब्दो राक्षसीनां कुले कुले॥ **6.94.22**॥ 4255

रथाश्वनागाश्च हतास्तत्र तत्र सहस्रशः।
रणे रामेण शूरेण हताश्चापि पदातयः॥ **6.94.23**॥ 4256

रुद्रो वा यदि वा विष्णुर्महेन्द्रो वा शतक्रतुः।
हन्ति नो रामरूपेण यदि वा स्वयमन्तकः॥ **6.94.24**॥ 4257

हतप्रवीरा रामेण निराशा जीविते वयम्।
अपश्यन्त्यो भयस्यान्तमनाथा विलपामहे॥ **6.94.25**॥ 4258

रामहस्ताद् दशग्रीवः शूरो दत्तमहावरः।
इदं भयं महाघोरं समुत्पन्नं न बुद्ध्यते॥ **6.94.26**॥ 4259

तं न देवा न गन्धर्वा न पिशाचा न राक्षसाः।
उपसृष्टं परित्रातुं शक्ता रामेण संयुगे॥ **6.94.27**॥ 4260

उत्पाताश्चापि दृश्यन्ते रावणस्य रणे रणे।
कथयन्ति हि रामेण रावणस्य निबर्हणम्॥ **6.94.28**॥ 4261

पितामहेन प्रीतेन देवदानवराक्षसैः।
रावणस्याभयं दत्तं मनुष्येभ्यो न याचितम्॥ **6.94.29**॥ 4262

तदिदं मानुषं मन्ये प्राप्तं निःसंशयं भयम्।
जीवितान्तकरं घोरं रक्षसां रावणस्य च॥ **6.94.30**॥ 4263

पीड्यमानास्तु बलिना वरदानेन रक्षसा।
दीप्तैस्तपोभिर्विबुधाः पितामहमपूजयन्॥ **6.94.31**॥ 4264

देवतानां हितार्थाय महात्मा वै पितामहः।
उवाच देवतास्तुष्ट इदं सर्वा महद्वचः॥ **6.94.32**॥ 4265

अद्यप्रभृति लोकांस्त्रीन् सर्वे दानवराक्षसाः।
भयेन प्रभृता नित्यं विचरिष्यन्ति शाश्वतम्॥ **6.94.33**॥ 4266

दैवतैस्तु समागम्य सर्वैश्चेन्द्रपुरोगमैः।
वृषध्वजस्त्रिपुरहा महादेवः प्रतोषितः॥ **6.94.34**॥ 4267

प्रसन्नस्तु महादेवो देवानेतद् वचोऽब्रवीत्।
उत्पत्स्यति हितार्थं वो नारी रक्षःक्षयावहा॥ **6.94.35**॥ 4268

एषा देवैः प्रयुक्ता तु क्षुद् यथा दानवान् पुरा।
भक्षयिष्यति नः सर्वान् राक्षसघ्नी सरावणान्॥ **6.94.36**॥ 4269

रावणस्यापनीतेन दुर्विनीतस्य दुर्मतेः।
अयं निष्टानको घोरः शोकेन समभिप्लुतः॥ **6.94.37**॥ 4270

तं न पश्यामहे लोके यो नः शरणदो भवेत्।
राघवेणोपसृष्टानां कालेनेव युगक्षये॥ **6.94.38**॥ 4271

नास्ति नः शरणं किञ्चिद् भये महति तिष्ठताम्।
दावाग्निवेष्टितानां हि करेणूनां यथा वने॥ **6.94.39**॥ 4272

प्राप्तकालं कृतं तेन पौलस्त्येन महात्मना।
यत एव भयं दृष्टं तमेव शरणं गतः॥ **6.94.40**॥ 4273

इतीव सर्वा रजनीचरस्त्रियः
परस्परं सम्परिरभ्य बाहुभिः।
विषेदुरार्तातिभयाभिपीडिता
विनेदुरुच्चैश्च तदा सुदारुणम्॥ **6.94.41**॥ 4274

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुर्नवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चनवतितमः सर्गः ॥

स्वामात्यानाहूय रावणेन स्वशत्रुवधविषयकोत्साहस्य प्रकटनं सर्वैः सह रणभूमिमागत्य पराक्रमस्य प्रदर्शनं च

आर्तानां राक्षसीनां तु लङ्कायां वै कुले कुले।
रावणः करुणं शब्दं शुश्राव परिदेवितम्॥ **6.95.1**॥ 4275

स तु दीर्घं विनिःश्वस्य मुहूर्तं ध्यानमास्थितः।
बभूव परमक्रुद्धो रावणो भीमदर्शनः॥ **6.95.2**॥ 4276

सन्दश्य दशनैरोष्ठं क्रोधसंरक्तलोचनः।
राक्षसैरपि दुर्दर्शः कालाग्निरिव मूर्तिमान्॥ **6.95.3**॥ 4277

उवाच च समीपस्थान् राक्षसान् राक्षसेश्वरः।
क्रोधाव्यक्तकथस्तत्र निर्दहन्निव चक्षुषा॥ **6.95.4**॥ 4278

महोदरं महापार्श्वं विरूपाक्षं च राक्षसम्।
शीघ्रं वदत सैन्यानि निर्यातेति ममाज्ञया॥ **6.95.5**॥ 4279

तस्य तद् वचनं श्रुत्वा राक्षसास्ते भयार्दिताः।
चोदयामासुरव्यग्रान् राक्षसांस्तान् नृपाज्ञया॥ **6.95.6**॥ 4280

ते तु सर्वे तथेत्युक्त्वा राक्षसा भीमदर्शनाः।
कृतस्वस्त्ययनाः सर्वे ते रणाभिमुखा ययुः॥ **6.95.7**॥ 4281

प्रतिपूज्य यथान्यायं रावणं ते महारथाः।
तस्थुः प्राञ्जलयः सर्वे भर्तुर्विजयकाङ्क्षिणः॥ **6.95.8**॥ 4282

ततोवाच प्रहस्यैतान् रावणः क्रोधमूर्च्छितः।
महोदरमहापार्श्वौ विरूपाक्षं च राक्षसम्॥ **6.95.9**॥ 4283

अद्य बाणैर्धनुर्मुक्तैर्युगान्तादित्यसन्निभैः।
राघवं लक्ष्मणं चैव नेष्यामि यमसादनम्॥ **6.95.10**॥ 4284

खरस्य कुम्भकर्णस्य प्रहस्तेन्द्रजितोस्तथा।
करिष्यामि प्रतीकारमद्य शत्रुवधादहम्॥ **6.95.11**॥ 4285

नैवान्तरिक्षं न दिशो न च द्यौर्नापि सागराः।
प्रकाशत्वं गमिष्यन्ति मद्बाणजलदावृताः॥ **6.95.12**॥ 4286

अद्य वानरमुख्यानां तानि यूथानि भागशः।
धनुषा शरजालेन वधिष्यामि पतत्रिणा॥ **6.95.13**॥ 4287

अद्य वानरसैन्यानि रथेन पवनौजसा।
धनुःसमुद्रादुद्भूतैर्मथिष्यामि शरोर्मिभिः॥ **6.95.14**॥ 4288

व्याकोशपद्मवक्त्राणि पद्मकेसरवर्चसाम्।
अद्य यूथतटाकानि गजवत् प्रमथाम्यहम्॥ **6.95.15**॥ 4289

सशरैरद्य वदनैः सङ्ख्ये वानरयूथपाः।
मण्डयिष्यन्ति वसुधां सनालैरिव पङ्कजैः॥ **6.95.16**॥ 4290

अद्य यूथप्रचण्डानां हरीणां द्रुमयोधिनाम्।
मुक्तेनैकेषुणा युद्धे भेत्स्यामि च शतं शतम्॥ **6.95.17**॥ 4291

हतो भ्राता च येषां वै येषां च तनयो हतः।
वधेनाद्य रिपोस्तेषां करोम्यश्रुप्रमार्जनम्॥ **6.95.18**॥ 4292

अद्य मद्बाणनिर्भिन्नैः प्रस्तीर्णैर्गतचेतनैः।
करोमि वानरैर्युद्धे यत्नावेक्ष्यतलां महीम्॥ **6.95.19**॥ 4293

अद्य काकाश्च गृध्राश्च ये च मांसाशिनोऽपरे।
सर्वांस्तांस्तर्पयिष्यामि शत्रुमांसैः शराहतैः॥ **6.95.20**॥ 4294

कल्प्यतां मे रथः शीघ्रं क्षिप्रमानीयतां धनुः।
अनुप्रयान्तु मां युद्धे येऽत्र शिष्टा निशाचराः॥ **6.95.21**॥ 4295

तस्य तद् वचनं श्रुत्वा महापार्श्वोऽब्रवीद् वचः।
बलाध्यक्षान् स्थितांस्तत्र बलं सन्त्वर्यतामिति॥ **6.95.22**॥ 4296

बलाध्यक्षास्तु संयुक्ता राक्षसांस्तान् गृहे गृहे।
चोदयन्तः परिययुर्लङ्कां लघुपराक्रमाः॥ **6.95.23**॥ 4297

ततो मुहूर्तान्निष्पेतू राक्षसा भीमदर्शनाः।
नदन्तो भीमवदना नानाप्रहरणैर्भुजैः॥ **6.95.24**॥ 4298

असिभिः पट्टिशैः शूलैर्गदाभिर्मुसलैर्हलैः।
शक्तिभिस्तीक्ष्णधाराभिर्महद्भिः कूटमुद्गरैः॥ **6.95.25**॥ 4299

यष्टिभिर्विविधैश्चक्रैर्निशितैश्च परश्वधैः।
भिन्दिपालैः शतघ्नीभिरन्यैश्चापि वरायुधैः॥ **6.95.26**॥ 4300

अथानयन् बलाध्यक्षाश्चत्वारो रावणाज्ञया।
रथानां नियुतं साग्रं नागानां नियुतत्रयम्॥ **6.95.27**॥ 4301

अश्वानां षष्टिकोट्यस्तु खरोष्ट्राणां तथैव च।
पदातयस्त्वसङ्ख्याता जग्मुस्ते राजशासनात्॥ **6.95.28**॥ 4302

बलाध्यक्षाश्च संस्थाप्य राज्ञः सेनां पुरःस्थिताम्।
एतस्मिन्नन्तरे सूतः स्थापयामास तं रथम्॥ **6.95.29**॥ 4303

दिव्यास्त्रवरसम्पन्नं नानालङ्कारभूषितम्।
नानायुधसमाकीर्णं किङ्किणीजालसंयुतम्॥ **6.95.30**॥ 4304

नानारत्नपरिक्षिप्तं रत्नस्तम्भैर्विराजितम्।
जाम्बूनदमयैश्चैव सहस्रकलशैर्वृतम्॥ **6.95.31**॥ 4305

तं दृष्ट्वा राक्षसाः सर्वे विस्मयं परमं गताः।
तं दृष्ट्वा सहसोत्थाय रावणो राक्षसेश्वरः॥ **6.95.32**॥ 4306

कोटिसूर्यप्रतीकाशं ज्वलन्तमिव पावकम्।
द्रुतं सूतसमायुक्तं युक्ताष्टतुरगं रथम्।
आरुरोह तदा भीमं दीप्यमानं स्वतेजसा॥ **6.95.33**॥ 4307

ततः प्रयातः सहसा राक्षसैर्बहुभिर्वृतः।
रावणः सत्त्वगाम्भीर्याद् दारयन्निव मेदिनीम्॥ **6.95.34**॥ 4308

ततश्चासीन्महानादस्तूर्याणां च ततस्ततः।
मृदङ्गैः पटहैः शङ्खैः कलहैः सह रक्षसाम्॥ **6.95.35**॥ 4309

आगतो रक्षसां राजा छत्रचामरसंयुतः।
सीतापहारी दुर्वृत्तो ब्रह्मघ्नो देवकण्टकः।
योद्धुं रघुवरेणेति शुश्रुवे कलहध्वनिः॥ **6.95.36**॥ 4310

तेन नादेन महता पृथिवी समकम्पत।
तं शब्दं सहसा श्रुत्वा वानरा दुद्रुवुर्भयात्॥ **6.95.37**॥ 4311

रावणस्तु महाबाहुः सचिवैः परिवारितः।
आजगाम महातेजा जयाय विजयं प्रति॥ **6.95.38**॥ 4312

रावणेनाभ्यनुज्ञातौ महापार्श्वमहोदरौ।
विरूपाक्षश्च दुर्धर्षो रथानारुरुहुस्तदा॥ **6.95.39**॥ 4313

ते तु हृष्टाभिनर्दन्तो भिन्दन्त इव मेदिनीम्।
नादं घोरं विमुञ्चन्तो निर्ययुर्जयकाङ्क्षिणः॥ **6.95.40**॥ 4314

ततो युद्धाय तेजस्वी रक्षोगणबलैर्वृतः।
निर्ययावुद्यतधनुः कालान्तकयमोपमः॥ **6.95.41**॥ 4315

ततः प्रजविताश्वेन रथेन स महारथः।
द्वारेण निर्ययौ तेन यत्र तौ रामलक्ष्मणौ॥ **6.95.42**॥ 4316

ततो नष्टप्रभः सूर्यो दिशश्च तिमिरावृताः।
द्विजाश्च नेदुर्घोराश्च सञ्चचाल च मेदिनी॥ **6.95.43**॥ 4317

ववर्ष रुधिरं देवश्चस्खलुश्च तुरङ्गमाः।
ध्वजाग्रे न्यपतद् गृध्रो विनेदुश्चाशिवं शिवाः॥ **6.95.44**॥ 4318

नयनं चास्फुरद् वामं वामो बाहुरकम्पत।
विवर्णवदनश्चासीत् किञ्चिदभ्रश्यत स्वनः॥ **6.95.45**॥ 4319

ततो निष्पततो युद्धे दशग्रीवस्य रक्षसः।
रणे निधनशंसीनि रूपाण्येतानि जज्ञिरे॥ **6.95.46**॥ 4320

अन्तरिक्षात् पपातोल्का निर्घातसमनिःस्वना।
विनेदुरशिवा गृध्रा वायसैरभिमिश्रिताः॥ **6.95.47**॥ 4321

एतानचिन्तयन् घोरानुत्पातान् समवस्थितान्।
निर्ययौ रावणो मोहाद् वधार्थं कालचोदितः॥ **6.95.48**॥ 4322

तेषां तु रथघोषेण राक्षसानां महात्मनाम्।
वानराणामपि चमूर्युद्धायैवाभ्यवर्तत॥ **6.95.49**॥ 4323

तेषां तु तुमुलं युद्धं बभूव कपिरक्षसाम्।
अन्योन्यमाह्वयानानां क्रुद्धानां जयमिच्छताम्॥ **6.95.50**॥ 4324

ततः क्रुद्धो दशग्रीवः शरैः काञ्चनभूषणैः।
वानराणामनीकेषु चकार कदनं महत्॥ **6.95.51**॥ 4325

निकृत्तशिरसः केचिद् रावणेन वलीमुखाः।
केचिद् विच्छिन्नहृदयाः केचिच्छ्रोत्रविवर्जिताः॥ **6.95.52**॥ 4326

निरुच्छ्वासा हताः केचित् केचित् पार्श्वेषु दारिताः।
केचिद् विभिन्नशिरसः केचिच्चक्षुर्विनाकृताः॥ **6.95.53**॥ 4327

दशाननः क्रोधविवृत्तनेत्रो
यतो यतोऽभ्येति रथेन सङ्ख्ये।
ततस्ततस्तस्य शरप्रवेगं
सोढुं न शेकुर्हरियूथपास्ते॥ **6.95.54**॥ 4328

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चनवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षण्णवतितमः सर्गः ॥

सुग्रीवेण राक्षससेनायाः संहारो विरूपाक्षस्य वधश्च

तथा तैः कृत्तगात्रैस्तु दशग्रीवेण मार्गणैः।
बभूव वसुधा तत्र प्रकीर्णा हरिभिस्तदा ॥ **6.96.1** ॥ 4329

रावणस्याप्रसह्यं तं शरसम्पातमेकतः।
न शेकुः सहितुं दीप्तं पतङ्गा ज्वलनं यथा ॥ **6.96.2** ॥ 4330

तेऽदिता निशितैर्बाणैः क्रोशन्तो विप्रदुद्रुवुः।
पावकार्चिःसमाविष्टा दह्यमाना यथा गजाः ॥ **6.96.3** ॥ 4331

प्लवङ्गानामनीकानि महाभ्राणीव मारुतः।
संययौ समरे तस्मिन् विधमन् रावणः शरैः ॥ **6.96.4** ॥ 4332

कदनं तरसा कृत्वा राक्षसेन्द्रो वनौकसाम्।
आससाद ततो युद्धे त्वरितं राघवं रणे ॥ **6.96.5** ॥ 4333

सुग्रीवस्तान् कपीन् दृष्ट्वा भग्नान् विद्रावितान् रणे।
गुल्मे सुषेणं निक्षिप्य चक्रे युद्धे द्रुतं मनः ॥ **6.96.6** ॥ 4334

आत्मनः सदृशं वीरं स तं निक्षिप्य वानरम्।
सुग्रीवोऽभिमुखं शत्रुं प्रतस्थे पादपायुधः ॥ **6.96.7** ॥ 4335

पार्श्वतः पृष्ठतश्चास्य सर्वे वानरयूथपाः।
अनुजग्मुर्महाशैलान् विविधांश्च वनस्पतीन्॥ **6.96.8**॥ 4336

ननर्द युधि सुग्रीवः स्वरेण महता महान्।
पोथयन् विविधांश्चान्यान् ममन्थोत्तमराक्षसान्॥ **6.96.9**॥ 4337

ममर्द च महाकायो राक्षसान् वानरेश्वरः।
युगान्तसमये वायुः प्रवृद्धानगमानिव॥ **6.96.10**॥ 4338

राक्षसानामनीकेषु शैलवर्षं ववर्ष ह।
अश्मवर्षं यथा मेघः पक्षिसङ्घेषु कानने॥ **6.96.11**॥ 4339

कपिराजविमुक्तैस्तैः शैलवर्षैस्तु राक्षसाः।
विकीर्णशिरसः पेतुर्विकीर्णा इव पर्वताः॥ **6.96.12**॥ 4340

अथ सङ्क्षीयमाणेषु राक्षसेषु समन्ततः।
सुग्रीवेण प्रभग्नेषु नदत्सु च पतत्सु च॥ **6.96.13**॥ 4341

विरूपाक्षः स्वकं नाम धन्वी विश्राव्य राक्षसः।
रथादाप्लुत्य दुर्धर्षो गजस्कन्धमुपारुहत्॥ **6.96.14**॥ 4342

स तं द्विपमथारुह्य विरूपाक्षो महाबलः।
ननर्द भीमनिर्ह्रादं वानरानभ्यधावत॥ **6.96.15**॥ 4343

सुग्रीवे स शरान् घोरान् विससर्ज चमूमुखे।
स्थापयामास चोद्विग्नान् राक्षसान् सम्प्रहर्षयन्॥ **6.96.16**॥ 4344

सोऽतिविद्धः शितैर्बाणैः कपीन्द्रस्तेन रक्षसा।
चुक्रोश च महाक्रोधो वधे चास्य मनो दधे॥ **6.96.17**॥ 4345

ततः पादपमुद्धृत्य शूरः सम्प्रधनो हरिः।
अभिपत्य जघानास्य प्रमुखे तं महागजम्॥ **6.96.18**॥ 4346

स तु प्रहाराभिहतः सुग्रीवेण महागजः।
अपासर्पद् धनुर्मात्रं निषसाद ननाद च॥ **6.96.19**॥ 4347

गजात् तु मथितात् तूर्णमपक्रम्य स वीर्यवान्।
राक्षसोऽभिमुखः शत्रुं प्रत्युद्गम्य ततः कपिम्॥ **6.96.20**॥ 4348

आर्षभं चर्म खड्गं च प्रगृह्य लघुविक्रमः।
भर्त्सयन्निव सुग्रीवमाससाद व्यवस्थितम्॥ **6.96.21**॥ 4349

स हि तस्याभिसङ्क्रुद्धः प्रगृह्य विपुलां शिलाम्।
विरूपाक्षस्य चिक्षेप सुग्रीवो जलदोपमाम्॥ **6.96.22**॥ 4350

स तां शिलामापतन्तीं दृष्ट्वा राक्षसपुङ्गवः।
अपक्रम्य सुविक्रान्तः खड्गेन प्राहरत्तदा॥ **6.96.23**॥ 4351

तेन खड्गप्रहारेण रक्षसा बलिना हतः।
मुहूर्तमभवद् भूमौ विसंज्ञ इव वानरः॥ **6.96.24**॥ 4352

सहसा स तदोत्पत्य राक्षसस्य महाहवे।
मुष्टिं संवर्त्य वेगेन पातयामास वक्षसि॥ **6.96.25**॥ 4353

मुष्टिप्रहाराभिहतो विरूपाक्षो निशाचरः।
तेन खड्गेन सङ्क्रुद्धः सुग्रीवस्य चमूमुखे॥ **6.96.26**॥ 4354

कवचं पातयामास पद्भ्यामभिहतोऽपतत्।
स समुत्थाय पतितः कपिस्तस्य व्यसर्जयत्॥ **6.96.27**॥ 4355

तलप्रहारमशनेः समानं भीमनिःस्वनम्।
तलप्रहारं तद् रक्षः सुग्रीवेण समुद्यतम्॥ **6.96.28**॥ 4356

नैपुण्यान्मोचयित्वैनं मुष्टिनोरसि ताडयत्।
ततस्तु सङ्क्रुद्धतरः सुग्रीवो वानरेश्वरः॥ **6.96.29**॥ 4357

मोक्षितं चात्मनो दृष्ट्वा प्रहारं तेन रक्षसा।
स ददर्शान्तरं तस्य विरूपाक्षस्य वानरः॥ **6.96.30**॥ 4358

ततोऽन्यं पातयत् क्रोधाच्छङ्खदेशे महातलम्।
महेन्द्राशनिकल्पेन तलेनाभिहतः क्षितौ॥ **6.96.31**॥ 4359

पपात रुधिरक्लिन्नः शोणितं हि समुद्गिरन्।
स्रोतोभ्यस्तु विरूपाक्षो जलं प्रस्रवणादिव॥ **6.96.32**॥ 4360

विवृत्तनयनं क्रोधात् सफेनं रुधिराप्लुतम्।
ददृशुस्ते विरूपाक्षं विरूपाक्षतरं कृतम्॥ **6.96.33**॥ 4361

स्फुरन्तं परिवर्तन्तं पार्थेन रुधिरोक्षितम्।
करुणं च विनर्दन्तं ददृशुः कपयो रिपुम्॥ **6.96.34**॥ 4362

तथा तु तौ संयति सम्प्रयुक्तौ
तरस्विनौ वानरराक्षसानाम्।
बलार्णवौ सस्वनतुश्च भीमौ
महार्णवौ द्वाविव भिन्नसेतू॥ **6.96.35**॥ 4363

विनाशितं प्रेक्ष्य विरूपनेत्रं
महाबलं तं हरिपार्थिवेन।
बलं समेतं कपिराक्षसाना -
मुद्वृत्तगङ्गाप्रतिमं बभूव॥ **6.96.36**॥ 4364

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षण्णवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तनवतितमः सर्गः ॥

सुग्रीवेण महोदरस्य वधः

हन्यमाने बले तूर्णमन्योन्यं ते महामृधे।
सरसीव महाघर्मे सूपक्षीणे बभूवतुः॥ **6.97.1** ॥ 4365

स्वबलस्य तु घातेन विरूपाक्षवधेन च।
बभूव द्विगुणं क्रुद्धो रावणो राक्षसाधिपः॥ **6.97.2** ॥ 4366

प्रक्षीणं स्वबलं दृष्ट्वा वध्यमानं वलीमुखैः।
बभूवास्य व्यथा युद्धे दृष्ट्वा दैवविपर्ययम्॥ **6.97.3** ॥ 4367

उवाच च समीपस्थं महोदरमनन्तरम्।
अस्मिन् काले महाबाहो जयाशा त्वयि मे स्थिता॥ **6.97.4** ॥ 4368

जहि शत्रुचमूं वीर दर्शयाद्य पराक्रमम्।
भर्तृपिण्डस्य कालोऽयं निर्वेष्टुं साधु युध्यताम्॥ **6.97.5** ॥ 4369

एवमुक्तस्तथेत्युक्त्वा राक्षसेन्द्रो महोदरः।
प्रविवेशारिसेनां स पतङ्ग इव पावकम्॥ **6.97.6** ॥ 4370

ततः स कदनं चक्रे वानराणां महाबलः।
भर्तृवाक्येन तेजस्वी स्वेन वीर्येण चोदितः॥ **6.97.7** ॥ 4371

वानराश्च महासत्त्वाः प्रगृह्य विपुलाः शिलाः।
प्रविश्यारिबलं भीमं जघ्नुस्ते सर्वराक्षसान्॥ **6.97.8**॥ 4372

महोदरः सुसङ्क्रुद्धः शरैः काञ्चनभूषणैः।
चिच्छेद पाणिपादोरु वानराणां महाहवे॥ **6.97.9**॥ 4373

ततस्ते वानराः सर्वे राक्षसैरर्दिता भृशम्।
दिशो दश द्रुताः केचित् केचित् सुग्रीवमाश्रिताः॥ **6.97.10**॥ 4374

प्रभग्नं समरे दृष्ट्वा वानराणां महाबलम्।
अभिदुद्राव सुग्रीवो महोदरमनन्तरम्॥ **6.97.11**॥ 4375

प्रगृह्य विपुलां घोरां महीधरसमां शिलाम्।
चिक्षेप च महातेजास्तद्वधाय हरीश्वरः॥ **6.97.12**॥ 4376

तामापतन्तीं सहसा शिलां दृष्ट्वा महोदरः।
असम्भ्रान्तस्ततो बाणैर्निर्बिभेद दुरासदाम्॥ **6.97.13**॥ 4377

रक्षसा तेन बाणौघैर्निकृत्ता सा सहस्रधा।
निपपात तदा भूमौ गृध्रचक्रमिवाकुलम्॥ **6.97.14**॥ 4378

तां तु भिन्नां शिलां दृष्ट्वा सुग्रीवः क्रोधमूर्च्छितः।
सालमुत्पाट्य चिक्षेप तं स चिच्छेद नैकधा॥ **6.97.15**॥ 4379

शरैश्च विददारैनं शूरः परबलार्दनः।
स ददर्श ततः क्रुद्धः परिघं पतितं भुवि॥ **6.97.16**॥ 4380

आविध्य तु स तं दीप्तं परिघं तस्य दर्शयन्।
परिघेणोग्रवेगेन जघानास्य हयोत्तमान्॥ **6.97.17**॥ 4381

तस्माद्धतहयाद् वीरः सोऽवप्लुत्य महारथात्।
गदां जग्राह सङ्क्रुद्धो राक्षसोऽथ महोदरः॥ **6.97.18**॥ 4382

गदापरिघहस्तौ तौ युधि वीरौ समीयतुः।
नर्दन्तौ गोवृषप्रख्यौ घनाविव सविद्युतौ॥ **6.97.19**॥ 4383

ततः क्रुद्धो गदां तस्मै चिक्षेप रजनीचरः।
ज्वलन्तीं भास्कराभासां सुग्रीवाय महोदरः॥ **6.97.20**॥ 4384

गदां तां सुमहाघोरामापतन्तीं महाबलः।
सुग्रीवो रोषताम्राक्षः समुद्यम्य महाहवे॥ **6.97.21**॥ 4385

आजघान गदां तस्य परिघेण हरीश्वरः।
पपात तरसा भिन्नः परिघस्तस्य भूतले॥ **6.97.22**॥ 4386

ततो जग्राह तेजस्वी सुग्रीवो वसुधातलात्।
आयसं मुसलं घोरं सर्वतो हेमभूषितम्॥ **6.97.23**॥ 4387

स तमुद्यम्य चिक्षेप सोऽप्यस्य प्राक्षिपद् गदाम्।
भिन्नावन्योन्यमासाद्य पेततुस्तौ महीतले॥ **6.97.24**॥ 4388

ततो भिन्नप्रहरणौ मुष्टिभ्यां तौ समीयतुः।
तेजोबलसमाविष्टौ दीप्ताविव हुताशनौ॥ **6.97.25**॥ 4389

जघ्नतुस्तौ तदान्योन्यं नदन्तौ च पुनः पुनः।
तलैश्चान्योन्यमासाद्य पेततुश्च महीतले॥ **6.97.26**॥ 4390

उत्पेततुस्तदा तूर्णं जघ्नतुश्च परस्परम्।
भुजैश्चिक्षिपतुर्वीरावन्योन्यमपराजितौ॥ **6.97.27**॥ 4391

जग्मतुस्तौ श्रमं वीरौ बाहुयुद्धे परन्तपौ।
आजहार तदा खड्गमदूरपरिवर्तिनम्॥ **6.97.28**॥ 4392

राक्षसश्चर्मणा सार्धं महावेगो महोदरः।
तथैव च महाखड्गं चर्मणा पतितं सह।
जग्राह वानरश्रेष्ठः सुग्रीवो वेगवत्तरः॥ **6.97.29**॥ 4393

ततो रोषपरीताङ्गौ नदन्तावभ्यधावताम्।
उद्यतासी रणे हृष्टौ युधि शस्त्रविशारदौ॥ **6.97.30**॥ 4394

दक्षिणं मण्डलं चोभौ सुतूर्णं सम्परीयतुः।
अन्योन्यमभिसङ्क्रुद्धौ जये प्रणिहितावुभौ॥ **6.97.31**॥ 4395

स तु शूरो महावेगो वीर्यश्लाघी महोदरः।
महावर्मणि तं खड्गं पातयामास दुर्मतिः॥ **6.97.32**॥ 4396

लग्नमुत्कर्षतः खड्गं खड्गेन कपिकुञ्जरः।
जहार सशिरस्त्राणं कुण्डलोपगतं शिरः॥ **6.97.33**॥ 4397

निकृत्तशिरसस्तस्य पतितस्य महीतले।
तद् बलं राक्षसेन्द्रस्य दृष्ट्वा तत्र न दृश्यते॥ **6.97.34**॥ 4398

हत्वा तं वानरैः सार्धं ननाद मुदितो हरिः।
चुक्रोध च दशग्रीवो बभौ हृष्टश्च राघवः॥ **6.97.35**॥ 4399

विषण्णवदनाः सर्वे राक्षसा दीनचेतसः।
विद्रवन्ति ततः सर्वे भयविस्त्रस्तचेतसः॥ **6.97.36**॥ 4400

महोदरं तं विनिपात्य भूमौ
महागिरेः कीर्णमिवैकदेशम्।
सूर्यात्मजस्तत्र रराज लक्ष्म्या
सूर्यः स्वतेजोभिरिवाप्रधृष्यः॥ **6.97.37**॥ 4401

अथ विजयमवाप्य वानरेन्द्रः
समरमुखे सुरसिद्धयक्षसङ्घैः।
अवनितलगतैश्च भूतसङ्घै -
र्हरुषसमाकुलितैर्निरीक्ष्यमाणः॥ **6.97.38**॥ 4402

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तनवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टनवतितमः सर्गः ॥

अङ्गदेन महापार्श्वस्य वधः

महोदरे तु निहते महापार्श्वो महाबलः।
सुग्रीवेण समीक्ष्याथ क्रोधात्संरक्तलोचनः॥ **6.98.1** ॥ 4403

अङ्गदस्य चमूं भीमां क्षोभयामास मार्गणैः।
स वानराणां मुख्यानामुत्तमाङ्गानि राक्षसः॥ **6.98.2** ॥ 4404

पातयामास कायेभ्यः फलं वृन्तादिवानिलः।
केषाञ्चिदिषुभिर्बाहूंश्चिच्छेदाथ स राक्षसः॥ **6.98.3** ॥ 4405

वानराणां सुसंरब्धः पार्श्वं केषाञ्चिदाक्षिपत्।
तेऽर्दिता बाणवर्षेण महापार्श्वेन वानराः॥ **6.98.4** ॥ 4406

विषादविमुखाः सर्वे बभूवुर्गतचेतसः।
निशम्य बलमुद्विग्नमङ्गदो राक्षसार्दितम्॥ **6.98.5** ॥ 4407

वेगं चक्रे महावेगः समुद्र इव पर्वसु।
आयसं परिघं गृह्य सूर्यरश्मिसमप्रभम्॥ **6.98.6** ॥ 4408

समरे वानरश्रेष्ठो महापार्श्वे न्यपातयत्।
स तु तेन प्रहारेण महापार्श्वो विचेतनः॥ **6.98.7** ॥ 4409

ससूतः स्यन्दनात् तस्माद् विसंज्ञश्चापतद् भुवि।
तस्यर्क्षराजस्तेजस्वी नीलाञ्जनचयोपमः॥ **6.98.8**॥ 4410

निष्पत्य सुमहावीर्यः स्वयूथान्मेघसन्निभात्।
प्रगृह्य गिरिशृङ्गाभां क्रुद्धः स विपुलां शिलाम्॥ **6.98.9**॥ 4411

अश्वाञ्जघान तरसा बभञ्ज स्यन्दनं च तम्।
मुहूर्तात्लब्धसंज्ञस्तु महापार्श्वो महाबलः॥ **6.98.10**॥ 4412

अङ्गदं बहुभिर्बाणैर्भूयस्तं प्रत्यविध्यत।
जाम्बवन्तं त्रिभिर्बाणैराजघान स्तनान्तरे॥ **6.98.11**॥ 4413

ऋक्षराजं गवाक्षं च जघान बहुभिः शरैः।
गवाक्षं जाम्बवन्तं च स दृष्ट्वा शरपीडितौ॥ **6.98.12**॥ 4414

जग्राह परिघं घोरमङ्गदः क्रोधमूर्च्छितः।
तस्याङ्गदः सरोषाक्षो राक्षसस्य तमायसम्॥ **6.98.13**॥ 4415

दूरस्थितस्य परिघं रविरश्मिसमप्रभम्।
द्वाभ्यां भुजाभ्यां सङ्गृह्य भ्रामयित्वा च वेगवत्॥ **6.98.14**॥ 4416

महापार्श्वस्य चिक्षेप वधार्थं वालिनः सुतः।
स तु क्षिप्तो बलवता परिघस्तस्य रक्षसः॥ **6.98.15**॥ 4417

धनुश्च सशरं हस्ताच्छिरस्त्राणं च पातयत्।
तं समासाद्य वेगेन वालिपुत्रः प्रतापवान्॥ **6.98.16**॥ 4418

तलेनाभ्यहनत् क्रुद्धः कर्णमूले सकुण्डले।
स तु क्रुद्धो महावेगो महापार्श्वो महाद्युतिः॥ **6.98.17**॥ 4419

करेणैकेन जग्राह सुमहान्तं परश्वधम्।
तं तैलधौतं विमलं शैलसारमयं दृढम्॥ **6.98.18**॥ 4420

राक्षसः परमक्रुद्धो वालिपुत्रे न्यपातयत्।
तेन वामांसफलके भृशं प्रत्यवपातितम्॥ **6.98.19**॥ 4421

अङ्गदो मोक्षयामास सरोषः स परश्वधम्।
स वीरो वज्रसङ्काशमङ्गदो मुष्टिमात्मनः॥ **6.98.20**॥ 4422

संवर्तयत् सुसङ्क्रुद्धः पितुस्तुल्यपराक्रमः।
राक्षसस्य स्तनाभ्याशे मर्मज्ञो हृदयं प्रति॥ **6.98.21**॥ 4423

इन्द्राशनिसमस्पर्शं स मुष्टिं विन्यपातयत्।
तेन तस्य निपातेन राक्षसस्य महामृधे॥ **6.98.22**॥ 4424

पफाल हृदयं चास्य स पपात हतो भुवि।
तस्मिन् विनिहते भूमौ तत् सैन्यं सम्प्रचुक्षुभे॥ **6.98.23**॥ 4425

अभवच्च महान् क्रोधः समरे रावणस्य तु।
वानराणां प्रहृष्टानां सिंहनादः सुपुष्कलः॥ **6.98.24**॥ 4426

स्फोटयन्निव शब्देन लङ्कां साट्टालगोपुराम्।
सहेन्द्रेणेव देवानां नादः समभवन्महान्॥ **6.98.25**॥ 4427

अथेन्द्रशत्रुस्त्रिदशालयानां
वनौकसां चैव महाप्रणादम्।
श्रुत्वा सरोषं युधि राक्षसेन्द्रः
पुनश्च युद्धाभिमुखोऽवतस्थे॥ **6.98.26**॥ 4428

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टनवतितमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनशततमः सर्गः ॥

श्रीरामरावणयोर्युद्धम्

महोदरमहापार्श्वौ हतौ दृष्ट्वा स रावणः।
तस्मिंश्च निहते वीरे विरूपाक्षे महाबले ॥ **6.99.1** ॥ 4429

आविवेश महान् क्रोधो रावणं तु महामृधे।
सूतं सञ्चोदयामास वाक्यं चेदमुवाच ह ॥ **6.99.2** ॥ 4430

निहतानाममात्यानां रुद्धस्य नगरस्य च।
दुःखमेवापनेष्यामि हत्वा तौ रामलक्ष्मणौ ॥ **6.99.3** ॥ 4431

रामवृक्षं रणे हन्मि सीतापुष्पफलप्रदम्।
प्रशाखा यस्य सुग्रीवो जाम्बवान् कुमुदो नलः ॥ **6.99.4** ॥ 4432

द्विविदश्चैव मैन्दश्च अङ्गदो गन्धमादनः।
हनूमांश्च सुषेणश्च सर्वे च हरियूथपाः ॥ **6.99.5** ॥ 4433

स दिशो दश घोषेण रथस्यातिरथो महान्।
नादयन् प्रययौ तूर्णं राघवं चाभ्यधावत ॥ **6.99.6** ॥ 4434

पूरिता तेन शब्देन सनदीगिरिकानना।
सञ्चचाल मही सर्वा त्रस्तसिंहमृगद्विजा ॥ **6.99.7** ॥ 4435

तामसं सुमहाघोरं चकारास्त्रं सुदारुणम्।
निर्ददाह कपीन् सर्वांस्ते प्रपेतुः समन्ततः॥ **6.99.8**॥ 4436

उत्पपात रजो भूमौ तैर्भग्नैः सम्प्रधावितैः।
नहि तत् सहितुं शेकुर्ब्रह्मणा निर्मितं स्वयम्॥ **6.99.9**॥ 4437

तान्यनीकान्यनेकानि रावणस्य शरोत्तमैः।
दृष्ट्वा भग्नानि शतशो राघवः पर्यवस्थितः॥ **6.99.10**॥ 4438

ततो राक्षसशार्दूलो विद्राव्य हरिवाहिनीम्।
स ददर्श ततो रामं तिष्ठन्तमपराजितम्॥ **6.99.11**॥ 4439

लक्ष्मणेन सह भ्रात्रा विष्णुना वासवं यथा।
आलिखन्तमिवाकाशमवष्टभ्य महद् धनुः॥ **6.99.12**॥ 4440

पद्मपत्रविशालाक्षं दीर्घबाहुमरिन्दमम्।
ततो रामो महातेजाः सौमित्रिसहितो बली॥ **6.99.13**॥ 4441

वानरांश्च रणे भग्नानापतन्तं च रावणम्।
समीक्ष्य राघवो हृष्टो मध्ये जग्राह कार्मुकम्॥ **6.99.14**॥ 4442

विस्फारयितुमारेभे ततः स धनुरुत्तमम्।
महावेगं महानादं निर्भिन्दन्निव मेदिनीम्॥ **6.99.15**॥ 4443

रावणस्य च बाणौघै रामविस्फारितेन च।
शब्देन राक्षसास्तेन पेतुश्च शतशस्तदा॥ **6.99.16**॥ 4444

तयोः शरपथं प्राप्य रावणो राजपुत्रयोः।
स बभौ च यथा राहुः समीपे शशिसूर्ययोः॥ **6.99.17**॥ 4445

तमिच्छन् प्रथमं योद्धुं लक्ष्मणो निशितैः शरैः।
मुमोच धनुरायम्य शरानग्निशिखोपमान्॥ **6.99.18**॥ 4446

तान् मुक्तमात्रानाकाशे लक्ष्मणेन धनुष्मता।
बाणान् बाणैर्महातेजा रावणः प्रत्यवारयत्॥ **6.99.19**॥ 4447

एकमेकेन बाणेन त्रिभिस्त्रीन् दशभिर्दश।
लक्ष्मणस्य प्रचिच्छेद दर्शयन् पाणिलाघवम्॥ **6.99.20**॥ 4448

अभ्यतिक्रम्य सौमित्रिं रावणः समितिञ्जयः।
आससाद रणे रामं स्थितं शैलमिवापरम्॥ **6.99.21**॥ 4449

स राघवं समासाद्य क्रोधसंरक्तलोचनः।
व्यसृजच्छरवर्षाणि रावणो राक्षसेश्वरः॥ **6.99.22**॥ 4450

शरधारास्ततो रामो रावणस्य धनुश्च्युताः।
दृष्ट्वैवापतिताः शीघ्रं भल्लाञ्जग्राह सत्वरम्॥ **6.99.23**॥ 4451

ताञ्छरौघांस्ततो भल्लैस्तीक्ष्णैश्चिच्छेद राघवः।
दीप्यमानान् महाघोराञ्छरानाशीविषोपमान्॥ **6.99.24**॥ 4452

राघवो रावणं तूर्णं रावणो राघवं तथा।
अन्योन्यं विविधैस्तीक्ष्णैः शरवर्शैर्ववर्षतुः॥ **6.99.25**॥ 4453

चेरतुश्च चिरं चित्रं मण्डलं सव्यदक्षिणम्।
बाणवेगात् समुत्क्षिप्तावन्योन्यमपराजितौ॥ **6.99.26**॥ 4454

तयोर्भूतानि वित्रेसुर्युगपत् सम्प्रयुध्यतोः।
रौद्रयोः सायकमुचोर्यमान्तकनिकाशयोः॥ **6.99.27**॥ 4455

सततं विविधैर्बाणैर्बभूव गगनं तदा।
घनैरिवातपापाये विद्युन्मालासमाकुलैः॥ **6.99.28**॥ 4456

गवाक्षितमिवाकाशं बभूव शरवृष्टिभिः।
महावेगैः सुतीक्ष्णाग्रैर्गृध्रपत्रैः सुवाजितैः॥ **6.99.29**॥ 4457

शरान्धकारमाकाशं चक्रतुः परमं तदा।
गतेऽस्तं तपने चापि महामेघाविवोत्थितौ॥ **6.99.30**॥ 4458

तयोरभून्महायुद्धमन्योन्यवधकाङ्क्षिणोः।
अनासाद्यमचिन्त्यं च वृत्रवासवयोरिव॥ **6.99.31**॥ 4459

उभौ हि परमेष्वासावुभौ युद्धविशारदौ।
उभावस्त्रविदां मुख्यावुभौ युद्धे विचेरतुः॥ **6.99.32**॥ 4460

उभौ हि येन व्रजतस्तेन तेन शरोर्मयः।
ऊर्मयो वायुना विद्धा जग्मुः सागरयोरिव॥ **6.99.33**॥ 4461

ततः संसक्तहस्तस्तु रावणो लोकरावणः।
नाराचमालां रामस्य ललाटे प्रत्यमुञ्चत॥ **6.99.34**॥ 4462

रौद्रचापप्रयुक्तां तां नीलोत्पलदलप्रभाम्।
शिरसाधारयद् रामो न व्यथामभ्यपद्यत॥ **6.99.35**॥ 4463

अथ मन्त्रानपि जपन् रौद्रमस्त्रमुदीरयन्।
शरान् भूयः समादाय रामः क्रोधसमन्वितः॥ **6.99.36**॥ 4464

मुमोच च महातेजाश्चापमायम्य वीर्यवान्।
ताञ्शरान् राक्षसेन्द्राय चिक्षेपाच्छिन्नसायकः॥ **6.99.37**॥ 4465

ते महामेघसङ्काशे कवचे पतिताः शराः।
अवध्ये राक्षसेन्द्रस्य न व्यथां जनयंस्तदा॥ **6.99.38**॥ 4466

पुनरेवाथ तं रामो रथस्थं राक्षसाधिपम्।
ललाटे परमास्त्रेण सर्वास्त्रकुशलोऽभिनत्॥ **6.99.39**॥ 4467

ते भित्त्वा बाणरूपाणि पञ्चशीर्षा इवोरगाः।
श्वसन्तो विविशुर्भूमिं रावणप्रतिकूलिताः॥ **6.99.40**॥ 4468

निहत्य राघवस्यास्त्रं रावणः क्रोधमूर्च्छितः।
आसुरं सुमहाघोरमस्त्रं प्रादुश्चकार सः॥ **6.99.41**॥ 4469

सिंहव्याघ्रमुखांश्चापि कङ्ककोकमुखानपि।
गृध्रश्येनमुखांश्चापि शृगालवदनांस्तथा॥ **6.99.42**॥ 4470

ईहामृगमुखांश्चापि व्यादितास्यान् भयावहान्।
पञ्चास्यान् लेलिहानांश्च ससर्ज निशिताञ्शरान्॥ **6.99.43**॥ 4471

शरान् खरमुखांश्चान्यान् वराहमुखसंश्रितान्।
श्वानकुक्कुटवक्त्रांश्च मकराशीविषाननान्॥ **6.99.44**॥ 4472

एतांश्चान्यांश्च मायाभिः ससर्ज निशिताञ्छरान्।
रामं प्रति महातेजाः क्रुद्धः सर्प इव श्वसन्॥ **6.99.45**॥ 4473

आसुरेण समाविष्टः सोऽस्त्रेण रघुपुङ्गवः।
ससर्जास्त्रं महोत्साहं पावकं पावकोपमः॥ **6.99.46**॥ 4474

अग्निदीप्तमुखान् बाणांस्तत्र सूर्यमुखानपि।
चन्द्रार्धचन्द्रवक्त्रांश्च धूमकेतुमुखानपि।
ग्रहनक्षत्रवर्णांश्च महोल्कामुखसंस्थितान्॥ **6.99.47**॥ 4475

विद्युज्जिह्वोपमांश्चापि ससर्ज विविधाञ्छरान्।
ते रावणशरा घोरा राघवास्त्रसमाहताः॥ **6.99.48**॥ 4476

विलयं जग्मुराकाशे जघ्नुश्चैव सहस्रशः।
तदस्त्रं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा॥ **6.99.49**॥ 4477

हृष्टा नेदुस्ततः सर्वे कपयः कामरूपिणः।
सुग्रीवाभिमुखा वीराः सम्परिक्षिप्य राघवम्॥ **6.99.50**॥ 4478

ततस्तदस्त्रं विनिहत्य राघवः
प्रसह्य तद् रावणबाहुनिःसृतम्।
मुदान्वितो दाशरथिर्महाहवे
विनेदुरुच्चैर्मुदिताः कपीश्वराः॥ **6.99.51** ॥ 4479

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकोनशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ शततमः सर्गः ॥

श्रीरामरावणयोर्युद्धं रावणस्य शक्त्या लक्ष्मणस्य मूर्च्छा रावणस्य युद्धात् पलायनं च

तस्मिन् प्रतिहतेऽस्त्रे तु रावणो राक्षसाधिपः।
क्रोधं च द्विगुणं चक्रे क्रोधाच्चास्त्रमनन्तरम्॥ **6.100.1** ॥ 4480

मयेन विहितं रौद्रमन्यदस्त्रं महाद्युतिः।
उत्स्रष्टुं रावणो भीमं राघवाय प्रचक्रमे॥ **6.100.2** ॥ 4481

ततः शूलानि निश्चेरुर्गदाश्च मुसलानि च।
कार्मुकाद् दीप्यमानानि वज्रसाराणि सर्वशः॥ **6.100.3** ॥ 4482

मुद्गराः कूटपाशाश्च दीप्ताश्चाशनयस्तथा।
निष्पेतुर्विविधास्तीक्ष्णा वाता इव युगक्षये॥ **6.100.4** ॥ 4483

तदस्त्रं राघवः श्रीमानुत्तमास्त्रविदां वरः।
जघान परमास्त्रेण गान्धर्वेण महाद्युतिः॥ **6.100.5** ॥ 4484

तस्मिन् प्रतिहतेऽस्त्रे तु राघवेण महात्मना।
रावणः क्रोधताम्राक्षः सौरमस्त्रमुदीरयत्॥ **6.100.6** ॥ 4485

ततश्चक्राणि निष्पेतुर्भास्वराणि महान्ति च।
कार्मुकाद् भीमवेगस्य दशग्रीवस्य धीमतः॥ **6.100.7** ॥ 4486

तैरासीद् गगनं दीप्तं सम्पतद्भिः समन्ततः।
पतद्भिश्च दिशो दीप्ताश्चन्द्रसूर्यग्रहैरिव॥ **6.100.8**॥ 4487

तानि चिच्छेद बाणौघैश्चक्राणि तु स राघवः।
आयुधानि च चित्राणि रावणस्य चमूमुखे॥ **6.100.9**॥ 4488

तदस्त्रं तु हतं दृष्ट्वा रावणो राक्षसाधिपः।
विव्याध दशभिर्बाणै रामं सर्वेषु मर्मसु॥ **6.100.10**॥ 4489

स विद्धो दशभिर्बाणैर्महाकार्मुकनिःसृतैः।
रावणेन महातेजा न प्राकम्पत राघवः॥ **6.100.11**॥ 4490

ततो विव्याध गात्रेषु सर्वेषु समितिञ्जयः।
राघवस्तु सुसङ्क्रुद्धो रावणं बहुभिः शरैः॥ **6.100.12**॥ 4491

एतस्मिन्नन्तरे क्रुद्धो राघवस्यानुजो बली।
लक्ष्मणः सायकान् सप्त जग्राह परवीरहा॥ **6.100.13**॥ 4492

तैः सायकैर्महावेगै रावणस्य महाद्युतिः।
ध्वजं मनुष्यशीर्षं तु तस्य चिच्छेद नैकधा॥ **6.100.14**॥ 4493

सारथेश्चापि बाणेन शिरो ज्वलितकुण्डलम्।
जहार लक्ष्मणः श्रीमान् नैर्ऋतस्य महाबलः॥ **6.100.15**॥ 4494

तस्य बाणैश्च चिच्छेद धनुर्गजकरोपमम्।
लक्ष्मणो राक्षसेन्द्रस्य पञ्चभिर्निशितैस्तदा॥ **6.100.16**॥ 4495

नीलमेघनिभांश्चास्य सदश्वान् पर्वतोपमान्।
जघानाप्लुत्य गदया रावणस्य विभीषणः॥ **6.100.17**॥ 4496

हताश्वात् तु तदा वेगादवप्लुत्य महारथात्।
कोपमाहारयत् तीव्रं भ्रातरं प्रति रावणः॥ **6.100.18**॥ 4497

ततः शक्तिं महाशक्तिः प्रदीप्तामशनीमिव।
विभीषणाय चिक्षेप राक्षसेन्द्रः प्रतापवान्॥ **6.100.19**॥ 4498

अप्राप्तामेव तां बाणैस्त्रिभिश्चिच्छेद लक्ष्मणः।
अथोदतिष्ठत् सन्नादो वानराणां महारणे॥ **6.100.20**॥ 4499

सम्पपात त्रिधा छिन्ना शक्तिः काञ्चनमालिनी।
सविस्फुलिङ्गा ज्वलिता महोल्केव दिवश्च्युता॥ **6.100.21**॥ 4500

ततः सम्भाविततरां कालेनापि दुरासदाम्।
जग्राह विपुलां शक्तिं दीप्यमानां स्वतेजसा॥ **6.100.22**॥ 4501

सा वेगिता बलवता रावणेन दुरात्मना।
जज्वाल सुमहातेजा दीप्ताशनिसमप्रभा॥ **6.100.23**॥ 4502

एतस्मिन्नन्तरे वीरो लक्ष्मणस्तं विभीषणम्।
प्राणसंशयमापन्नं तूर्णमभ्यवपद्यत॥ **6.100.24**॥ 4503

तं विमोक्षयितुं वीरश्चापमायम्य लक्ष्मणः।
रावणं शक्तिहस्तं वै शरवर्षैरवाकिरत्॥ **6.100.25**॥ 4504

कीर्यमाणः शरौघेण विसृष्टेन महात्मना।
न प्रहर्तुं मनश्चक्रे विमुखीकृतविक्रमः॥ **6.100.26**॥ 4505

मोक्षितं भ्रातरं दृष्ट्वा लक्ष्मणेन स रावणः।
लक्ष्मणाभिमुखस्तिष्ठन्निदं वचनमब्रवीत्॥ **6.100.27**॥ 4506

मोक्षितस्ते बलश्लाघिन् यस्मादेवं विभीषणः।
विमुच्य राक्षसं शक्तिस्त्वयीयं विनिपात्यते॥ **6.100.28**॥ 4507

एषा ते हृदयं भित्त्वा शक्तिर्लोहितलक्षणा।
मद्बाहुपरिघोत्सृष्टा प्राणानादाय यास्यति॥ **6.100.29**॥ 4508

इत्येवमुक्त्वा तां शक्तिमष्टघण्टां महास्वनाम्।
मयेन मायाविहितामोघां शत्रुघातिनीम्॥ **6.100.30**॥ 4509

लक्ष्मणाय समुद्दिश्य ज्वलन्तीमिव तेजसा।
रावणः परमक्रुद्धश्चिक्षेप च ननाद च॥ **6.100.31**॥ 4510

सा क्षिप्ता भीमवेगेन वज्राशनिसमस्वना।
शक्तिरभ्यपतद् वेगाल्लक्ष्मणं रणमूर्धनि॥ **6.100.32**॥ 4511

तामनुव्याहरच्छक्तिमापतन्तीं स राघवः।
स्वस्त्यस्तु लक्ष्मणायेति मोघा भव हतोद्यमा॥ **6.100.33**॥ 4512

रावणेन रणे शक्तिः क्रुद्धेनाशीविषोपमा।
मुक्ताऽऽशूरस्यभीतस्य लक्ष्मणस्य ममज्ज सा॥ **6.100.34**॥ 4513

न्यपतत् सा महावेगा लक्ष्मणस्य महोरसि।
जिह्वेवोरगराजस्य दीप्यमाना महाद्युतिः॥ **6.100.35**॥ 4514

ततो रावणवेगेन सुदूरमवगाढया।
शक्त्या विभिन्नहृदयः पपात भुवि लक्ष्मणः॥ **6.100.36**॥ 4515

तदवस्थं समीपस्थो लक्ष्मणं प्रेक्ष्य राघवः।
भ्रातृस्नेहान्महातेजा विषण्णहृदयोऽभवत्॥ **6.100.37**॥ 4516

स मुहूर्तमिव ध्यात्वा बाष्पपर्याकुलेक्षणः।
बभूव संरब्धतरो युगान्त इव पावकः॥ **6.100.38**॥ 4517

न विषादस्य कालोऽयमिति सञ्चिन्त्य राघवः।
चक्रे सुतुमुलं युद्धं रावणस्य वधे धृतः।
सर्वयत्नेन महता लक्ष्मणं परिवीक्ष्य च॥ **6.100.39**॥ 4518

स ददर्श ततो रामः शक्त्या भिन्नं महाहवे।
लक्ष्मणं रुधिरादिग्धं सपन्नगमिवाचलम्॥ **6.100.40**॥ 4519

तामपि प्रहितां शक्तिं रावणेन बलीयसा।
यत्नतस्ते हरिश्रेष्ठा न शेकुरवमर्दितुम्॥ **6.100.41**॥ 4520

अर्दिताश्चैव बाणौघैस्ते प्रवेकेण रक्षसाम्।
सौमित्रेः सा विनिर्भिद्य प्रविष्टा धरणीतलम्॥ **6.100.42**॥ 4521

तां कराभ्यां परामृश्य रामः शक्तिं भयावहाम्।
बभञ्ज समरे क्रुद्धो बलवान् विचकर्ष च॥ **6.100.43**॥ 4522

तस्य निष्कर्षतः शक्तिं रावणेन बलीयसा।
शराः सर्वेषु गात्रेषु पातिता मर्मभेदिनः॥ **6.100.44**॥ 4523

अचिन्तयित्वा तान् बाणान् समाश्लिष्य च लक्ष्मणम्।
अब्रवीच्च हनूमन्तं सुग्रीवं च महाकपिम्॥ **6.100.45**॥ 4524

लक्ष्मणं परिवार्यैवं तिष्ठध्वं वानरोत्तमाः।
पराक्रमस्य कालोऽयं सम्प्राप्तो मे चिरेप्सितः॥ **6.100.46**॥ 4525

पापात्मायं दशग्रीवो वध्यतां पापनिश्चयः।
काङ्क्षितं चातकस्येव घर्मान्ते मेघदर्शनम्॥ **6.100.47**॥ 4526

अस्मिन् मुहूर्ते नचिरात् सत्यं प्रतिशृणोमि वः।
अरावणमरामं वा जगद् द्रक्ष्यथ वानराः॥ **6.100.48**॥ 4527

राज्यनाशं वने वासं दण्डके परिधावनम्।
वैदेह्याश्च परामर्शो रक्षोभिश्च समागमम्॥ **6.100.49**॥ 4528

प्राप्तं दुःखं महाघोरं क्लेशश्च निरयोपमः।
अद्य सर्वमहं त्यक्ष्ये निहत्वा रावणं रणे॥ **6.100.50**॥ 4529

यदर्थं वानरं सैन्यं समानीतमिदं मया।
सुग्रीवश्च कृतो राज्ये निहत्वा वालिनं रणे।
यदर्थं सागरः क्रान्तः सेतुर्बद्धश्च सागरे॥ **6.100.51**॥ 4530

सोऽयमद्य रणे पापश्चक्षुर्विषयमागतः।
चक्षुर्विषयमागत्य नायं जीवितुमर्हति॥ **6.100.52**॥ 4531

दृष्टिं दृष्टिविषस्येव सर्पस्य मम रावणः।
यथा वा वैनतेयस्य दृष्टिं प्राप्तो भुजङ्गमः॥ **6.100.53**॥ 4532

सुखं पश्यत दुर्धर्षा युद्धं वानरपुङ्गवाः।
आसीनाः पर्वताग्रेषु ममेदं रावणस्य च॥ **6.100.54**॥ 4533

अद्य पश्यन्तु रामस्य रामत्वं मम संयुगे।
त्रयो लोकाः सगन्धर्वाः सदेवाः सर्षिचारणाः॥ **6.100.55**॥ 4534

अद्य कर्म करिष्यामि यल्लोकाः सचराचराः।
सदेवाः कथयिष्यन्ति यावद् भूमिर्धरिष्यति।
समागम्य सदा लोके यथा युद्धं प्रवर्तितम्॥ **6.100.56**॥ 4535

एवमुक्त्वा शितैर्बाणैस्तप्तकाञ्चनभूषणैः।
आजघान रणे रामो दशग्रीवं समाहितः॥ **6.100.57**॥ 4536

तथा प्रदीप्तैर्नाराचैर्मुसलैश्चापि रावणः।
अभ्यवर्षत् तदा रामं धाराभिरिव तोयदः॥ **6.100.58**॥ 4537

रामरावणमुक्तानामन्योन्यमभिनिघ्नताम्।
वराणां च शराणां च बभूव तुमुलः स्वनः॥ **6.100.59**॥ 4538

विच्छिन्नाश्च विकीर्णाश्च रामरावणयोः शराः।
अन्तरिक्षात् प्रदीप्ताग्रा निपेतुर्धरणीतले॥ **6.100.60**॥ 4539

तयोर्ज्यातलनिर्घोषो रामरावणयोर्महान्।
त्रासनः सर्वभूतानां सम्बभूवाद्भुतोपमः॥ **6.100.61**॥ 4540

स कीर्यमाणः शरजालवृष्टिभि -
र्महात्मना दीप्तधनुष्मतार्दितः।
भयात् प्रदुद्राव समेत्य रावणो
यथानिलेनाभिहतो बलाहकः॥ **6.100.62**॥ 4541

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे शततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकाधिकशततमः सर्गः ॥

श्रीरामस्य विलापो हनुमदाहृतयौषध्या सुषेणप्रयुक्तया लक्ष्मणस्य संज्ञालाभः

शक्त्या निपातितं दृष्ट्वा रावणेन बलीयसा।
लक्ष्मणं समरे शूरं शोणितौघपरिप्लुतम्॥ **6.101.1**॥ 4542

स दत्त्वा तुमुलं युद्धं रावणस्य दुरात्मनः।
विसृजन्नेव बाणौघान् सुषेणमिदमब्रवीत्॥ **6.101.2**॥ 4543

एष रावणवीर्येण लक्ष्मणः पतितो भुवि।
सर्पवच्चेष्टते वीरो मम शोकमुदीरयन्॥ **6.101.3**॥ 4544

शोणितार्द्रमिमं वीरं प्राणैः प्रियतरं मम।
पश्यतो मम का शक्तिर्योद्धुं पर्याकुलात्मनः॥ **6.101.4**॥ 4545

अयं स समरश्लाघी भ्राता मे शुभलक्षणः।
यदि पञ्चत्वमापन्नः प्राणैर्मे किं सखेन वा॥ **6.101.5**॥ 4546

लज्जतीव हि मे वीर्यं भ्रश्यतीव कराद् धनुः।
सायका व्यवसीदन्ति दृष्टिर्बाष्पवशं गता॥ **6.101.6**॥ 4547

अवसीदन्ति गात्राणि स्वप्नयाने नृणामिव।
चिन्ता मे वर्धते तीव्रा मुमूर्षापि च जायते॥ **6.101.7**॥ 4548

भ्रातरं निहतं दृष्ट्वा रावणेन दुरात्मना।
विष्टनन्तं तु दुःखार्तं मर्मण्यभिहतं भृशम्॥ **6.101.8**॥ 4549

राघवो भ्रातरं दृष्ट्वा प्रियं प्राणं बहिश्चरम्।
दुःखेन महताविष्टो ध्यानशोकपरायणः॥ **6.101.9**॥ 4550

परं विषादमापन्नो विललापाकुलेन्द्रियः।
भ्रातरं निहतं दृष्ट्वा लक्ष्मणं रणपांसुषु॥ **6.101.10**॥ 4551

विजयोऽपि हि मे शूर न प्रियायोपकल्पते।
अचक्षुर्विषयश्चन्द्रः कां प्रीतिं जनयिष्यति॥ **6.101.11**॥ 4552

किं मे युद्धेन किं प्राणैर्युद्धकार्यं न विद्यते।
यत्रायं निहतः शेते रणमूर्धनि लक्ष्मणः॥ **6.101.12**॥ 4553

यथैव मां वनं यान्तमनुयाति महाद्युतिः।
अहमप्यनुयास्यामि तथैवैनं यमक्षयम्॥ **6.101.13**॥ 4554

इष्टबन्धुजनो नित्यं मां स नित्यमनुव्रतः।
इमामवस्थां गमितो राक्षसैः कूटयोधिभिः॥ **6.101.14**॥ 4555

देशे देशे कलत्राणि देशे देशे च बान्धवाः।
तं तु देशं न पश्यामि यत्र भ्राता सहोदरः॥ **6.101.15**॥ 4556

किं नु राज्येन दुर्धर्षलक्ष्मणेन विना मम।
कथं वक्ष्याम्यहं त्वम्बां सुमित्रां पुत्रवत्सलाम्॥ **6.101.16**॥ 4557

उपालम्भं न शक्ष्यामि सोढुं दत्तं सुमित्रया।
किं नु वक्ष्यामि कौसल्यां मातरं किं नु कैकयीम्॥ **6.101.17**॥ 4558

भरतं किं नु वक्ष्यामि शत्रुघ्नं च महाबलम्।
सह तेन वनं यातो विना तेनागतः कथम्॥ **6.101.18**॥ 4559

इहैव मरणं श्रेयो न तु बन्धुविगर्हणम्।
किं मया दुष्कृतं कर्म कृतमन्यत्र जन्मनि॥ **6.101.19**॥ 4560

येन मे धार्मिको भ्राता निहतश्चाग्रतः स्थितः।
हा भ्रातर्मनुजश्रेष्ठ शूराणां प्रवर प्रभो॥ **6.101.20**॥ 4561

एकाकी किं नु मां त्यक्त्वा परलोकाय गच्छसि।
विलपन्तं च मां भ्रातः किमर्थं नावभाषसे॥ **6.101.21**॥ 4562

उत्तिष्ठ पश्य किं शेषे दीनं मां पश्य चक्षुषा।
शोकार्तस्य प्रमत्तस्य पर्वतेषु वनेषु च॥ **6.101.22**॥ 4563

विषण्णस्य महाबाहो समाश्वासयिता मम।
राममेवं ब्रुवाणं तु शोकव्याकुलितेन्द्रियम्॥ **6.101.23**॥ 4564

आश्वासयन्नुवाचेदं सुषेणः परमं वचः।
त्यजेमां नरशार्दूल बुद्धिं वैक्लव्यकारिणीम्॥ **6.101.24**॥ 4565

शोकसञ्जननीं चिन्तां तुल्यां बाणैश्चमूमुखे।
नैव पञ्चत्वमापन्नो लक्ष्मणो लक्ष्मिवर्धनः॥ **6.101.25**॥ 4566

नह्यस्य विकृतं वक्त्रं न च श्यामत्वमागतम्।
सुप्रभं च प्रसन्नं च मुखमस्य निरीक्ष्यताम्॥ **6.101.26**॥ 4567

पद्मपत्रतलौ हस्तौ सुप्रसन्ने च लोचने।
नेदृशं दृश्यते रूपं गतासूनां विशाम्पते॥ **6.101.27**॥ 4568

विषादं मा कृथा वीर सप्राणोऽयमरिन्दम।
आख्याति तु प्रसुप्तस्य स्रस्तगात्रस्य भूतले॥ **6.101.28**॥ 4569

सोच्छ्वासं हृदयं वीर कम्पमानं मुहुर्मुहुः।
एवमुक्त्वा महाप्राज्ञः सुषेणो राघवं वचः॥ **6.101.29**॥ 4570

समीपस्थमुवाचेदं हनूमन्तं महाकपिम्।
सौम्य शीघ्रमितो गत्वा पर्वतं हि महोदयम्॥ **6.101.30**॥ 4571

पूर्वं तु कथितो योऽसौ वीर जाम्बवता तव।
दक्षिणे शिखरे जातां महौषधिमिहानय॥ **6.101.31**॥ 4572

विशल्यकरणीं नाम्ना सावर्ण्यकरणीं तथा।
सञ्जीवकरणीं वीर सन्धानीं च महौषधीम्॥ **6.101.32**॥ 4573

सञ्जीवनार्थं वीरस्य लक्ष्मणस्य त्वमानय।
इत्येवमुक्तो हनुमान् गत्वा चौषधिपर्वतम्।
चिन्तामभ्यगमच्छ्रीमानजानंस्ता महौषधीः॥ **6.101.33**॥ 4574

तस्य बुद्धिः समुत्पन्ना मारुतेरमितौजसः।
इदमेव गमिष्यामि गृहीत्वा शिखरं गिरेः॥ **6.101.34**॥ 4575

अस्मिंस्तु शिखरे जातामोषधीं तां सुखावहाम्।
प्रतर्केणावगच्छामि सुषेणो ह्येवमब्रवीत्॥ **6.101.35**॥ 4576

अगृह्य यदि गच्छामि विशल्यकरणीमहम्।
कालात्ययेन दोषः स्याद् वैक्लव्यं च महद् भवेत्॥ **6.101.36**॥ 4577

इति सञ्चिन्त्य हनुमान् गत्वा क्षिप्रं महाबलः।
आसाद्य पर्वतश्रेष्ठं त्रिः प्रकम्प्य गिरेः शिरः॥ **6.101.37**॥ 4578

फुल्लनानातरुगणं समुत्पाट्य महाबलः।
गृहीत्वा हरिशार्दूलो हस्ताभ्यां समतोलयत्॥ **6.101.38**॥ 4579

स नीलमिव जीमूतं तोयपूर्णं नभस्तलात्।
उत्पपात गृहीत्वा तु हनूमाञ्शिखरं गिरेः॥ **6.101.39**॥ 4580

समागम्य महावेगः सन्न्यस्य शिखरं गिरेः।
विश्रम्य किञ्चिद्धनुमान् सुषेणमिदमब्रवीत्॥ **6.101.40**॥ 4581

औषधीर्नावगच्छामि ता अहं हरिपुङ्गव।
तदिदं शिखरं कृत्स्नं गिरेस्तस्याहृतं मया॥ **6.101.41**॥ 4582

एवं कथयमानं तु प्रशस्य पवनात्मजम्।
सुषेणो वानरश्रेष्ठो जग्राहोत्पाट्य चौषधीः॥ **6.101.42**॥ 4583

विस्मितास्तु बभूवुस्ते सर्वे वानरपुङ्गवाः।
दृष्ट्वा तु हनुमत्कर्म सुरैरपि सुदुष्करम्॥ **6.101.43**॥ 4584

ततः सङ्क्षोदयित्वा तामोषधीं वानरोत्तमः।
लक्ष्मणस्य ददौ नस्तः सुषेणः सुमहाद्युतिः॥ **6.101.44**॥ 4585

सशल्यः स समाघ्राय लक्ष्मणः परवीरहा।
विशल्यो विरुजः शीघ्रमुदतिष्ठन्महीतलात्॥ **6.101.45**॥ 4586

तमुत्थितं तु हरयो भूतलात् प्रेक्ष्य लक्ष्मणम्।
साधुसाध्विति सुप्रीता लक्ष्मणं प्रत्यपूजयन्॥ **6.101.46**॥ 4587

एह्येहीत्यब्रवीद् रामो लक्ष्मणं परवीरहा।
सस्वजे गाढमालिङ्ग्य बाष्पपर्याकुलेक्षणः॥ **6.101.47**॥ 4588

अब्रवीच परिष्वज्य सौमित्रिं राघवस्तदा।
दिष्ट्या त्वां वीर पश्यामि मरणात् पुनरागतम्॥ **6.101.48**॥ 4589

नहि मे जीवितेनार्थः सीतया च जयेन वा।
को हि मे जीवितेनार्थस्त्वयि पञ्चत्वमागते॥ **6.101.49**॥ 4590

इत्येवं ब्रुवतस्तस्य राघवस्य महात्मनः।
खिन्नः शिथिलया वाचा लक्ष्मणो वाक्यमब्रवीत्॥ **6.101.50**॥ 4591

तां प्रतिज्ञां प्रतिज्ञाय पुरा सत्यपराक्रम।
लघुः कश्चिदिवासत्त्वो नैवं त्वं वक्तुमर्हसि॥ **6.101.51**॥ 4592

नहि प्रतिज्ञां कुर्वन्ति वितथां सत्यवादिनः।
लक्षणं हि महत्त्वस्य प्रतिज्ञापरिपालनम्॥ **6.101.52**॥ 4593

नैराश्यमुपगन्तुं च नालं ते मत्कृतेऽनघ।
वधेन रावणस्याद्य प्रतिज्ञामनुपालय॥ **6.101.53**॥ 4594

न जीवन् यास्यते शत्रुस्तव बाणपथं गतः।
नर्दतस्तीक्ष्णदंष्ट्रस्य सिंहस्येव महागजः॥ **6.101.54**॥ 4595

अहं तु वधमिच्छामि शीघ्रमस्य दुरात्मनः।
यावदस्तं न यात्येष कृतकर्मा दिवाकरः॥ **6.101.55**॥ 4596

यदि वधमिच्छसि रावणस्य सङ्ख्ये
यदि च कृतां हि तवेच्छसि प्रतिज्ञाम्।
यदि तव राजसुताभिलाष आर्य
कुरु च वचो मम शीघ्रमद्य वीर॥ **6.101.56**॥ 4597

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्व्यधिकशततमः सर्गः ॥

इन्द्रप्रहितं रथमारूढस्य रामस्य रावणेन सह युद्धम्

लक्ष्मणेन तु तद् वाक्यमुक्तं श्रुत्वा स राघवः।
सन्दधे परवीरघ्नो धनुरादाय वीर्यवान्॥ **6.102.1**॥ 4598

रावणाय शरान् घोरान् विससर्ज चमूमुखे।
अथान्यं रथमास्थाय रावणो राक्षसाधिपः॥ **6.102.2**॥ 4599

अभ्यधावत काकुत्स्थं स्वर्भानुरिव भास्करम्।
दशग्रीवो रथस्थस्तु रामं वज्रोपमैः शरैः।
आजघान महाशैलं धाराभिरिव तोयदः॥ **6.102.3**॥ 4600

दीप्तपावकसङ्काशैः शरैः काञ्चनभूषणैः।
अभ्यवर्षद् रणे रामो दशग्रीवं समाहितः॥ **6.102.4**॥ 4601

भूमौ स्थितस्य रामस्य रथस्थस्य स रक्षसः।
न समं युद्धमित्याहुर्देवगन्धर्वकिन्नराः॥ **6.102.5**॥ 4602

ततो देववरः श्रीमाञ्श्रुत्वा तेषां वचोऽमृतम्।
आहूय मातलिं शक्रो वचनं चेदमब्रवीत्॥ **6.102.6**॥ 4603

रथेन मम भूमिष्ठं शीघ्रं याहि रघूत्तमम्।
आहूय भूतलं यातः कुरु देवहितं महत्॥ **6.102.7**॥ 4604

इत्युक्तो देवराजेन मातलिर्देवसारथिः।
प्रणम्य शिरसा देवं ततो वचनमब्रवीत्॥ **6.102.8**॥ 4605

शीघ्रं यास्यामि देवेन्द्र सारथ्यं च करोम्यहम्।
ततो हयैश्च संयोज्य हरितैः स्यन्दनोत्तमम्॥ **6.102.9**॥ 4606

ततः काञ्चनचित्राङ्गः किङ्किणीशतभूषितः।
तरुणादित्यसङ्काशो वैदूर्यमयकूबरः।
सदश्वैः काञ्चनापीडैर्युक्तः श्वेतप्रकीर्णकैः॥ **6.102.10**॥ 4607

हरिभिः सूर्यसङ्काशैर्हेमजालविभूषितैः।
रुक्मवेणुध्वजः श्रीमान् देवराजरथो वरः॥ **6.102.11**॥ 4608

देवराजेन सन्दिष्टो रथमारुह्य मातलिः।
अभ्यवर्तत काकुत्स्थमवतीर्य त्रिविष्टपात्॥ **6.102.12**॥ 4609

अब्रवीच्च तदा रामं सप्रतोदो रथे स्थितः।
प्राञ्जलिर्मातलिर्वाक्यं सहस्राक्षस्य सारथिः॥ **6.102.13**॥ 4610

सहस्राक्षेण काकुत्स्थ रथोऽयं विजयाय ते।
दत्तस्तव महासत्त्व श्रीमञ्शत्रुनिबर्हण॥ **6.102.14**॥ 4611

इदमैन्द्रं महच्चापं कवचं चाग्निसन्निभम्।
शराश्चादित्यसङ्काशाः शक्तिश्च विमला शिवा॥ **6.102.15**॥ 4612

आरुह्येमं रथं वीर राक्षसं जहि रावणम्।
मया सारथिना देव महेन्द्र इव दानवान्॥ **6.102.16**॥ 4613

इत्युक्तः सम्परिक्रम्य रथं तमभिवाद्य च।
आरुरोह तदा रामो लोकान् लक्ष्म्या विराजयन्॥ **6.102.17**॥ 4614

तद् बभौ चाद्भुतं युद्धं द्वैरथं रोमहर्षणम्।
रामस्य च महाबाहो रावणस्य च रक्षसः॥ **6.102.18**॥ 4615

स गान्धर्वेण गान्धर्वं दैवं दैवेन राघवः।
अस्त्रं राक्षसराजस्य जघान परमास्त्रवित्॥ **6.102.19**॥ 4616

अस्त्रं तु परमं घोरं राक्षसं राक्षसाधिपः।
ससर्ज परमक्रुद्धः पुनरेव निशाचरः॥ **6.102.20**॥ 4617

ते रावणधनुर्मुक्ताः शराः काञ्चनभूषणाः।
अभ्यवर्तन्त काकुत्स्थं सर्पा भूत्वा महाविषाः॥ **6.102.21**॥ 4618

ते दीप्तवदना दीप्तं वमन्तो ज्वलनं मुखैः।
राममेवाभ्यवर्तन्त व्यादितास्या भयानकाः॥ **6.102.22**॥ 4619

तैर्वासुकिसमस्पर्शैर्दीप्तभोगैर्महाविषैः।
दिशश्च सन्ततः सर्वा विदिशश्च समावृताः॥ **6.102.23**॥ 4620

तान् दृष्ट्वा पन्नगान् रामः समापतत आहवे।
अस्त्रं गारुत्मतं घोरं प्रादुश्चक्रे भयावहम्॥ **6.102.24**॥ 4621

ते राघवधनुर्मुक्ता रुक्मपुङ्खाः शिखिप्रभाः।
सुपर्णाः काञ्चना भूत्वा विचेरुः सर्पशत्रवः॥ **6.102.25**॥ 4622

ते तान् सर्वाञ्शराञ्जघ्नुः सर्परूपान् महाजवान्।
सुपर्णरूपा रामस्य विशिखाः कामरूपिणः॥ **6.102.26**॥ 4623

अस्त्रे प्रतिहते क्रुद्धो रावणो राक्षसाधिपः।
अभ्यवर्षत् तदा रामं घोराभिः शरवृष्टिभिः॥ **6.102.27**॥ 4624

ततः शरसहस्रेण राममक्लिष्टकारिणम्।
अर्दयित्वा शरौघेण मातलिं प्रत्यविध्यत॥ **6.102.28**॥ 4625

चिच्छेद केतुमुद्दिश्य शरेणैकेन रावणः।
पातयित्वा रथोपस्थे रथात् केतुं च काञ्चनम्॥ **6.102.29**॥ 4626

ऐन्द्रानपि जघानाश्वाञ्शारजालेन रावणः।
विषेदुर्देवगन्धर्वचारणा दानवैः सह॥ **6.102.30**॥ 4627

राममार्तं तदा दृष्ट्वा सिद्धाश्च परमर्षयः।
व्यथिता वानरेन्द्राश्च बभूवुः सविभीषणाः॥ **6.102.31**॥ 4628

रामचन्द्रमसं दृष्ट्वा ग्रस्तं रावणराहुणा।
प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम्॥ **6.102.32**॥ 4629

समाक्रम्य बुधस्तस्थौ प्रजानामहितावहः।
सधूमपरिवृत्तोर्मिः प्रज्वलन्निव सागरः॥ **6.102.33**॥ 4630

उत्पपात तदा क्रुद्धः स्पृशन्निव दिवाकरम्।
शस्त्रवर्णः सुपरुषो मन्दरश्मिर्दिवाकरः॥ **6.102.34**॥ 4631

अदृश्यत कबन्धाङ्कः संसक्तो धूमकेतुना।
कोसलानां च नक्षत्रं व्यक्तमिन्द्राग्निदैवतम्॥ **6.102.35**॥ 4632

आहत्याङ्गारकस्तस्थौ विशाखमपि चाम्बरे।
दशास्यो विंशतिभुजः प्रगृहीतशरासनः॥ **6.102.36**॥ 4633

अदृश्यत दशग्रीवो मैनाक इव पर्वतः।
निरस्यमानो रामस्तु दशग्रीवेण रक्षसा॥ **6.102.37**॥ 4634

नाशक्नोदभिसन्धातुं सायकान् रणमूर्धनि।
स कृत्वा भ्रुकुटिं क्रुद्धः किञ्चित् संरक्तलोचनः॥ **6.102.38**॥ 4635

जगाम सुमहाक्रोधं निर्दहन्निव राक्षसान्।
तस्य क्रुद्धस्य वदनं दृष्ट्वा रामस्य धीमतः।
सर्वभूतानि वित्रेसुः प्राकम्पत च मेदिनी॥ **6.102.39**॥ 4636

सिंहशार्दूलवाञ्छैलः सञ्चचाल चलद् द्रुमः।
बभूव चापि क्षुभितः समुद्रः सरितां पतिः॥ **6.102.40**॥ 4637

खराश्च खरनिर्घोषा गगने परुषा घनाः।
औत्पातिकाश्च नर्दन्तः समन्तात् परिचक्रमुः॥ **6.102.41**॥ 4638

रामं दृष्ट्वा सुसङ्क्रुद्धमुत्पातांश्चैव दारुणान्।
वित्रेसुः सर्वभूतानि रावणस्याभवद् भयम्॥ **6.102.42**॥ 4639

विमानस्थास्तदा देवा गन्धर्वाश्च महोरगाः।
ऋषिदानवदैत्याश्च गरुत्मन्तश्च खेचराः॥ **6.102.43**॥ 4640

ददृशुस्ते तदा युद्धं लोकसंवर्तसंस्थितम्।
नानाप्रहरणैर्भीमैः शूरयोः सम्प्रयुध्यतोः॥ **6.102.44**॥ 4641

ऊचुः सुरासुराः सर्वे तदा विग्रहमागताः।
प्रेक्षमाणा महायुद्धं वाक्यं भक्त्या प्रहृष्टवत्॥ **6.102.45**॥ 4642

दशग्रीवं जयेत्याहुरसुराः समवस्थिताः।
देवा राममथोचुस्ते त्वं जयेति पुनः पुनः॥ **6.102.46**॥ 4643

एतस्मिन्नन्तरे क्रोधाद् राघवस्य च रावणः।
प्रहर्तुकामो दुष्टात्मा स्पृशन् प्रहरणं महत्॥ **6.102.47**॥ 4644

वज्रसारं महानादं सर्वशत्रुनिबर्हणम्।
शैलशृङ्गनिभैः कूटैश्चित्तदृष्टिभयावहम्॥ **6.102.48**॥ 4645

सधूममिव तीक्ष्णाग्रं युगान्ताग्निचयोपमम्।
अतिरौद्रमनासाद्यं कालेनापि दुरासदम्॥ **6.102.49**॥ 4646

त्रासनं सर्वभूतानां दारणं भेदनं तथा।
प्रदीप्त इव रोषेण शूलं जग्राह रावणः॥ **6.102.50**॥ 4647

तच्छूलं परमक्रुद्धो जग्राह युधि वीर्यवान्।
अनीकैः समरे शूरै राक्षसैः परिवारितः॥ **6.102.51**॥ 4648

समुद्यम्य महाकायो ननाद युधि भैरवम्।
संरक्तनयनो रोषात् स्वसैन्यमभिहर्षयन्॥ **6.102.52**॥ 4649

पृथिवीं चान्तरिक्षं च दिशश्च प्रदिशस्तथा।
प्राकम्पयत् तदा शब्दो राक्षसेन्द्रस्य दारुणः॥ **6.102.53**॥ 4650

अतिकायस्य नादेन तेन तस्य दुरात्मनः।
सर्वभूतानि वित्रेसुः सागरश्च प्रचुक्षुभे॥ **6.102.54**॥ 4651

स गृहीत्वा महावीर्यः शूलं तद् रावणो महत्।
विनद्य सुमहानादं रामं परुषमब्रवीत्॥ **6.102.55**॥ 4652

शूलोऽयं वज्रसारस्ते राम रोषान्मयोद्यतः।
तव भ्रातृसहायस्य सद्यः प्राणान् हरिष्यति॥ **6.102.56**॥ 4653

रक्षसामद्य शूराणां निहतानां चमूमुखे।
त्वां निहत्य रणश्लाघिन् करोमि तरसा समम्॥ **6.102.57**॥ 4654

तिष्ठेदानीं निहन्मि त्वामेष शूलेन राघव।
एवमुक्त्वा स चिक्षेप तच्छूलं राक्षसाधिपः॥ **6.102.58**॥ 4655

तद् रावणकरान्मुक्तं विद्युन्मालासमावृतम्।
अष्टघण्टं महानादं वियद्गतमशोभत॥ **6.102.59**॥ 4656

तच्छूलं राघवो दृष्ट्वा ज्वलन्तं घोरदर्शनम्।
ससर्ज विशिखान् रामश्चापमायम्य वीर्यवान्॥ **6.102.60**॥ 4657

आपतन्तं शरौघेण वारयामास राघवः।
उत्पतन्तं युगान्ताग्निं जलौघैरिव वासवः॥ **6.102.61**॥ 4658

निर्ददाह स तान् बाणान् रामकार्मुकनिःसृतान्।
रावणस्य महाञ्शूलः पतङ्गानिव पावकः॥ **6.102.62**॥ 4659

तान् दृष्ट्वा भस्मसाद्भूताञ्शूलसंस्पर्शचूर्णितान्।
सायकानन्तरिक्षस्थान् राघवः क्रोधमाहरत्॥ **6.102.63**॥ 4660

स तां मातलिना नीतां शक्तिं वासवसम्मताम्।
जग्राह परमक्रुद्धो राघवो रघुनन्दनः॥ **6.102.64**॥ 4661

सा तोलिता बलवता शक्तिर्घण्टाकृतस्वना।
नभः प्रज्वालयामास युगान्तोल्केव सप्रभा॥ **6.102.65**॥ 4662

सा क्षिप्ता राक्षसेन्द्रस्य तस्मिञ्छूले पपात ह।
भिन्नः शक्त्या महाञ्शूलो निपपात गतद्युतिः॥ **6.102.66**॥ 4663

निर्बिभेद ततो बाणैर्हयानस्य महाजवान्।
रामस्तीक्ष्णैर्महावेगैर्वज्रकल्पैरजिह्मगैः॥ **6.102.67**॥ 4664

निर्बिभेदोरसि तदा रावणं निशितैः शरैः।
राघवः परमायत्तो ललाटे पत्रिभिस्त्रिभिः॥ **6.102.68**॥ 4665

स शरैर्भिन्नसर्वाङ्गो गात्रप्रस्रुतशोणितः।
राक्षसेन्द्रः समूहस्थः फुल्लाशोक इवाबभौ॥ **6.102.69**॥ 4666

स रामबाणैरतिविद्धगात्रो
निशाचरेन्द्रः क्षतजार्द्रगात्रः।

जगाम खेदं च समाजमध्ये
क्रोधं च चक्रे सुभृशं तदानीम्॥ 6.102.70॥ 4667

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्व्यधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्र्यधिकशततमः सर्गः ॥

श्रीरामकर्तृकं रावणस्य भर्त्सनं रामेणाहतस्य रावणस्य तदीयसारथिना रणाद् बहिरपनयनम्

स तु तेन तदा क्रोधात् काकुत्स्थेनार्दितो भृशम्।
रावणः समरश्लाघी महाक्रोधमुपागमत्॥ **6.103.1** ॥ 4668

स दीप्तनयनोऽमर्षाच्चापमुद्यम्य वीर्यवान्।
अभ्यर्दयत् सुसङ्क्रुद्धो राघवं परमाहवे॥ **6.103.2** ॥ 4669

बाणधारासहस्रैस्तैः स तोयद इवाम्बरात्।
राघवं रावणो बाणैस्तटाकमिव पूरयन्॥ **6.103.3** ॥ 4670

पूरितः शरजालेन धनुर्मुक्तेन संयुगे।
महागिरिरिवाकम्प्यः काकुत्स्थो न प्रकम्पते॥ **6.103.4** ॥ 4671

स शरैः शरजालानि वारयन् समरे स्थितः।
गभस्तीनिव सूर्यस्य प्रतिजग्राह वीर्यवान्॥ **6.103.5** ॥ 4672

ततः शरसहस्राणि क्षिप्रहस्तो निशाचरः।
निजघानोरसि क्रुद्धो राघवस्य महात्मनः॥ **6.103.6** ॥ 4673

स शोणितसमादिग्धः समरे लक्ष्मणाग्रजः।
दृष्टः फुल्ल इवारण्ये सुमहान् किंशुकद्रुमः॥ **6.103.7** ॥ 4674

शराभिघातसंरब्धः सोऽभिजग्राह सायकान्।
काकुत्स्थः सुमहातेजा युगान्तादित्यवर्चसः॥ **6.103.8**॥ 4675

ततोऽन्योन्यं सुसंरब्धौ तावुभौ रामरावणौ।
शरान्धकारे समरे नोपलक्षयतां तदा॥ **6.103.9**॥ 4676

ततः क्रोधसमाविष्टो रामो दशरथात्मजः।
उवाच रावणं वीरः प्रहस्य परुषं वचः॥ **6.103.10**॥ 4677

मम भार्या जनस्थानादज्ञानाद् राक्षसाधम।
हृता ते विवशा यस्मात् तस्मात् त्वं नासि वीर्यवान्॥ **6.103.11**॥ 4678

मया विरहितां दीनां वर्तमानां महावने।
वैदेहीं प्रसभं हृत्वा शूरोऽहमिति मन्यसे॥ **6.103.12**॥ 4679

स्त्रीषु शूर विनाथासु परदाराभिमर्शनम्।
कृत्वा कापुरुषं कर्म शूरोऽहमिति मन्यसे॥ **6.103.13**॥ 4680

भिन्नमर्याद निर्लज्ज चारित्रेष्वनवस्थित।
दर्पान्मृत्युमुपादाय शूरोऽहमिति मन्यसे॥ **6.103.14**॥ 4681

शूरेण धनदभ्रात्रा बलैः समुदितेन च।
श्लाघनीयं महत्कर्म यशस्यं च कृतं त्वया॥ **6.103.15**॥ 4682

उत्सेकेनाभिपन्नस्य गर्हितस्याहितस्य च।
कर्मणः प्राप्नुहीदानीं तस्याद्य सुमहत् फलम्॥ **6.103.16**॥ 4683

शूरोऽहमिति चात्मानमवगच्छसि दुर्मते।
नैव लज्जास्ति ते सीतां चौरवद् व्यपकर्षतः॥ **6.103.17**॥ 4684

यदि मत्सन्निधौ सीता धर्षिता स्यात् त्वया बलात्।
भ्रातरं तु खरं पश्येस्तदा मत्सायकैर्हतः॥ **6.103.18**॥ 4685

दिष्ट्यासि मम मन्दात्मंश्चक्षुर्विषयमागतः।
अद्य त्वां सायकैस्तीक्ष्णैर्नयामि यमसादनम्॥ **6.103.19**॥ 4686

अद्य ते मच्छरैश्छिन्नं शिरो ज्वलितकुण्डलम्।
क्रव्यादा व्यपकर्षन्तु विकीर्णं रणपांसुषु॥ **6.103.20**॥ 4687

निपत्योरसि गृध्रास्ते क्षितौ क्षिप्तस्य रावण।
पिबन्तु रुधिरं तर्षाद् बाणशल्यान्तरोत्थितम्॥ **6.103.21**॥ 4688

अद्य मद्बाणभिन्नस्य गतासोः पतितस्य ते।
कर्षन् त्वन्त्राणि पतगा गरुत्मन्त इवोरगान्॥ **6.103.22**॥ 4689

इत्येवं स वदन् वीरो रामः शत्रुनिबर्हणः।
राक्षसेन्द्रं समीपस्थं शरवर्षैरवाकिरत्॥ **6.103.23**॥ 4690

बभूव द्विगुणं वीर्यं बलं हर्षश्च संयुगे।
रामस्यास्त्रबलं चैव शत्रोर्निधनकाङ्क्षिणः॥ **6.103.24**॥ 4691

प्रादुर्बभूवुरस्त्राणि सर्वाणि विदितात्मनः।
प्रहर्षाच्च महातेजाः शीघ्रहस्ततरोऽभवत्॥ **6.103.25**॥ 4692

शुभान्येतानि चिह्नानि विज्ञायात्मगतानि सः।
भूय एवार्दयद् रामो रावणं राक्षसान्तकृत्॥ **6.103.26**॥ 4693

हरीणां चाश्मनिकरैः शरवर्षैश्च राघवात्।
हन्यमानो दशग्रीवो विघूर्णहृदयोऽभवत्॥ **6.103.27**॥ 4694

यदा च शस्त्रं नारेभे न चकर्ष शरासनम्।
नास्य प्रत्यकरोद् वीर्यं विक्लवेनान्तरात्मना॥ **6.103.28**॥ 4695

क्षिप्ताश्चाशु शरास्तेन शस्त्राणि विविधानि च।
मरणार्थाय वर्तन्ते मृत्युकालोऽभ्यवर्तत॥ **6.103.29**॥ 4696

सूतस्तु रथनेतास्य तदवस्थं निरीक्ष्य तम्।
शनैर्युद्धादसभ्भ्रान्तो रथं तस्यापवाहयत्॥ **6.103.30**॥ 4697

रथं च तस्याथ जवेन सारथि -
निर्वार्य भीमं जलदस्वनं तदा।
जगाम भीत्या समरान्महीपतिं
निरस्तवीर्यं पतितं समीक्ष्य॥ **6.103.31**॥ 4698

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्र्यधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुरधिकशततमः सर्गः ॥

रावणेन सारथेर्भर्त्सनं सारथिना प्रतिवचसा रावणं सन्तोष्य तदीयरथस्य रणभूमौ प्रापणम्

स तु मोहात् सुसङ्क्रुद्धः कृतान्तबलचोदितः।
क्रोधसंरक्तनयनो रावणः सूतमब्रवीत्॥ **6.104.1**॥ 4699

हीनवीर्यमिवाशक्तं पौरुषेण विवर्जितम्।
भीरुं लघुमिवासत्त्वं विहीनमिव तेजसा॥ **6.104.2**॥ 4700

विमुक्तमिव मायाभिरस्त्रैरिव बहिष्कृतम्।
मामवज्ञाय दुर्बुद्धे स्वया बुद्ध्या विचेष्टसे॥ **6.104.3**॥ 4701

किमर्थं मामवज्ञाय मच्छन्दमनवेक्ष्य च।
त्वया शत्रुसमक्षं मे रथोऽयमपवाहितः॥ **6.104.4**॥ 4702

त्वयाद्य हि ममानार्य चिरकालमुपार्जितम्।
यशो वीर्यं च तेजश्च प्रत्ययश्च विनाशितः॥ **6.104.5**॥ 4703

शत्रोः प्रख्यातवीर्यस्य रञ्जनीयस्य विक्रमैः।
पश्यतो युद्धलुब्धोऽहं कृतः कापुरुषस्त्वया॥ **6.104.6**॥ 4704

यत् त्वं कथमिदं मोहान्न चेद् वहसि दुर्मते।
सत्योऽयं प्रतितर्को मे परेण त्वमुपस्कृतः॥ **6.104.7**॥ 4705

नहि तद् विद्यते कर्म सुहृदो हितकाङ्क्षिणः।
रिपूणां सदृशं त्वेतद् यत् त्वयैतदनुष्ठितम्॥ **6.104.8**॥ 4706

निवर्तय रथं शीघ्रं यावन्नापैति मे रिपुः।
यदि वाध्युषितोऽसि त्वं स्मर्यते यदि मे गुणः॥ **6.104.9**॥ 4707

एवं परुषमुक्तस्तु हितबुद्धिरबुद्धिना।
अब्रवीद् रावणं सूतो हितं सानुनयं वचः॥ **6.104.10**॥ 4708

न भीतोऽस्मि न मूढोऽस्मि नोपजप्तोऽस्मि शत्रुभिः।
न प्रमत्तो न निःस्नेहो विस्मृता न च सत्क्रिया॥ **6.104.11**॥ 4709

मया तु हितकामेन यशश्च परिरक्षता।
स्नेहप्रस्कन्नमनसा हितमित्यप्रियं कृतम्॥ **6.104.12**॥ 4710

नास्मिन्नर्थे महाराज त्वं मां प्रियहिते रतम्।
कश्चिल्लघुरिवानार्यो दोषतो गन्तुमर्हसि॥ **6.104.13**॥ 4711

श्रूयतां प्रति दास्यामि यन्निमित्तं मया रथः।
नदीवेग इवाम्भोभिः संयुगे विनिवर्तितः॥ **6.104.14**॥ 4712

श्रमं तवावगच्छामि महता रणकर्मणा।
नहि ते वीर्यसौमुख्यं प्रकर्षं नोपधारये॥ **6.104.15**॥ 4713

रथोद्वहनखिन्नाश्च भग्ना मे रथवाजिनः।
दीना घर्मपरिश्रान्ता गावो वर्षहता इव॥ **6.104.16**॥ 4714

निमित्तानि च भूयिष्ठं यानि प्रादुर्भवन्ति नः।
तेषु तेष्वभिपन्नेषु लक्षयाम्यप्रदक्षिणम्॥ **6.104.17**॥ 4715

देशकालौ च विज्ञेयौ लक्षणानीङ्गितानि च।
दैन्यं हर्षश्च खेदश्च रथिनश्च बलाबलम्॥ **6.104.18**॥ 4716

स्थलनिम्नानि भूमेश्च समानि विषमाणि च।
युद्धकालश्च विज्ञेयः परस्यान्तरदर्शनम्॥ **6.104.19**॥ 4717

उपयानापयाने च स्थानं प्रत्यपसर्पणम्।
सर्वमेतद् रथस्थेन ज्ञेयं रथकुटुम्बिना॥ **6.104.20**॥ 4718

तव विश्रामहेतोस्तु तथैषां रथवाजिनाम्।
रौद्रं वर्जयता खेदं क्षमं कृतमिदं मया॥ **6.104.21**॥ 4719

स्वेच्छया न मया वीर रथोऽयमपवाहितः।
भर्तुः स्नेहपरीतेन मयेदं यत् कृतं प्रभो॥ **6.104.22**॥ 4720

आज्ञापय यथातत्त्वं वक्ष्यस्यरिनिषूदन।
तत् करिष्याम्यहं वीर गतानृण्येन चेतसा॥ **6.104.23**॥ 4721

सन्तुष्टस्तेन वाक्येन रावणस्तस्य सारथेः।
प्रशस्यैनं बहुविधं युद्धलुब्धोऽब्रवीदिदम्॥ **6.104.24**॥ 4722

रथं शीघ्रमिमं सूत राघवाभिमुखं नय।
नाहत्वा समरे शत्रून् निवर्तिष्यति रावणः॥ **6.104.25**॥ 4723

एवमुक्त्वा रथस्थस्य रावणो राक्षसेश्वरः।
ददौ तस्य शुभं ह्येकं हस्ताभरणमुत्तमम्।
श्रुत्वा रावणवाक्यानि सारथिः सन्न्यवर्तत॥ **6.104.26**॥ 4724

ततो द्रुतं रावणवाक्यचोदितः
प्रचोदयामास हयान् स सारथिः।
स राक्षसेन्द्रस्य ततो महारथः
क्षणेन रामस्य रणाग्रतोऽभवत्॥ **6.104.27**॥ 4725

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे चतुरधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चाधिकशततमः सर्गः ॥

अगस्त्येन रणे विजयलाभार्थमादित्यहृदयस्तोत्रपाठाय श्रीरामं प्रति सम्मतिदानम्

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम्।
रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम्॥ **6.105.1** ॥ 4726

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम्।
उपगम्याब्रवीद् राममगस्त्यो भगवांस्तदा॥ **6.105.2** ॥ 4727

राम राम महाबाहो शृणु गुह्यं सनातनम्।
येन सर्वानरीन् वत्स समरे विजयिष्यसे॥ **6.105.3** ॥ 4728

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम्।
जयावहं जपं नित्यमक्षयं परमं शिवम्॥ **6.105.4** ॥ 4729

सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम्।
चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम्॥ **6.105.5** ॥ 4730

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम्।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम्॥ **6.105.6** ॥ 4731

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः।
एष देवासुरगणान् लोकान् पाति गभस्तिभिः॥ **6.105.7** ॥ 4732

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः।
महेन्द्रो धनदः कालो यमः सोमो ह्यपां पतिः॥ **6.105.8**॥ 4733

पितरो वसवः साध्या अश्विनौ मरुतो मनुः।
वायुर्वह्निः प्रजाः प्राण ऋतुकर्ता प्रभाकरः॥ **6.105.9**॥ 4734

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान्।
सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः॥ **6.105.10**॥ 4735

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान्।
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्तण्डकोऽंशुमान्॥ **6.105.11**॥ 4736

हिरण्यगर्भः शिशिरस्तपनोऽहस्करो रविः।
अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः॥ **6.105.12**॥ 4737

व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः।
घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवङ्गमः॥ **6.105.13**॥ 4738

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः॥ **6.105.14**॥ 4739

नक्षत्रग्रहताराणामधिपो विश्वभावनः।
तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तु ते॥ **6.105.15**॥ 4740

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः।
ज्योतिर्गणानां पतये दिनाधिपतये नमः॥ **6.105.16**॥ 4741

जयाय जयभद्राय हर्यश्वाय नमो नमः।
नमो नमः सहस्रांशो आदित्याय नमो नमः॥ **6.105.17**॥ 4742

नम उग्राय वीराय सारङ्गाय नमो नमः।
नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु ते॥ **6.105.18**॥ 4743

ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः॥ **6.105.19**॥ 4744

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः॥ **6.105.20**॥ 4745

तप्तचामीकराभाय हरये विश्वकर्मणे।
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे॥ **6.105.21**॥ 4746

नाशयत्येष वै भूतं तमेव सृजति प्रभुः।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः॥ **6.105.22**॥ 4747

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः।
एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम्॥ **6.105.23**॥ 4748

देवाश्च क्रतवश्चैव क्रतूनां फलमेव च।
यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः॥ **6.105.24**॥ 4749

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च।
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव॥ **6.105.25**॥ 4750

पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम्।
एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यति॥ **6.105.26**॥ 4751

अस्मिन् क्षणे महाबाहो रावणं त्वं जहिष्यसि।
एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम्॥ **6.105.27**॥ 4752

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत् तदा।
धारयामास सुप्रीतो राघवः प्रयतात्मवान्॥ **6.105.28**॥ 4753

आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान्।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान्॥ **6.105.29**॥ 4754

रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपागमत्।
सर्वयत्नेन महता वृतस्तस्य वधेऽभवत्॥ **6.105.30**॥ 4755

अथ रविरवदन्निरीक्ष्य रामं
मुदितमनाः परमं प्रहृष्यमाणः।
निशिचरपतिसङ्क्षयं विदित्वा
सुरगणमध्यगतो वचस्त्वरेति॥ **6.105.31**॥ 4756

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे पञ्चाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षडधिकशततमः सर्गः ॥

रावणस्य रथं दृष्ट्वा श्रीरामेण मातलेः प्रबोधनं रावणपराजयस्य श्रीरामविजयस्य च सूचकानां शकुनानां वर्णनम्

सारथिः स रथं हृष्टः परसैन्यप्रधर्षणम्।
गन्धर्वनगराकारं समुच्छ्रितपताकिनम्॥ **6.106.1** ॥ 4757

युक्तं परमसम्पन्नैर्वाजिभिर्हेममालिभिः।
युद्धोपकरणैः पूर्णं पताकाध्वजमालिनम्॥ **6.106.2** ॥ 4758

ग्रसन्तमिव चाकाशं नादयन्तं वसुन्धराम्।
प्रणाशं परसैन्यानां स्वसैन्यस्य प्रहर्षणम्॥ **6.106.3** ॥ 4759

रावणस्य रथं क्षिप्रं चोदयामास सारथिः।
तमापतन्तं सहसा स्वनवन्तं महाध्वजम्॥ **6.106.4** ॥ 4760

रथं राक्षसराजस्य नरराजो ददर्श ह।
कृष्णवाजिसमायुक्तं युक्तं रौद्रेण वर्चसा॥ **6.106.5** ॥ 4761

दीप्यमानमिवाकाशे विमानं सूर्यवर्चसम्।
तडित्पताकागहनं दर्शितेन्द्रायुधप्रभम्॥ **6.106.6** ॥ 4762

शरधारा विमुञ्चन्तं धाराधरमिवाम्बुदम्।
स दृष्ट्वा मेघसङ्काशमापतन्तं रथं रिपोः॥ **6.106.7** ॥ 4763

गिरेर्वज्राभिमृष्टस्य दीर्यतः सदृशस्वनम्।
विस्फारयन् वै वेगेन बालचन्द्रानतं धनुः॥ **6.106.8**॥ 4764

उवाच मातलिं रामः सहस्राक्षस्य सारथिम्।
मातले पश्य संरब्धमापतन्तं रथं रिपोः॥ **6.106.9**॥ 4765

यथापसव्यं पतता वेगेन महता पुनः।
समरे हन्तुमात्मानं तथानेन कृता मतिः॥ **6.106.10**॥ 4766

तदप्रमादमातिष्ठ प्रत्युद्गच्छ रथं रिपोः।
विध्वंसयितुमिच्छामि वायुर्मेघमिवोत्थितम्॥ **6.106.11**॥ 4767

अविक्लवमसम्भ्रान्तमव्यग्रहृदयेक्षणम्।
रश्मिसञ्चारनियतं प्रचोदय रथं द्रुतम्॥ **6.106.12**॥ 4768

कामं न त्वं समाधेयः पुरन्दररथोचितः।
युयुत्सुरहमेकाग्रः स्मारये त्वां न शिक्षये॥ **6.106.13**॥ 4769

परितुष्टः स रामस्य तेन वाक्येन मातलिः।
प्रचोदयामास रथं सुरसारथिरुत्तमः॥ **6.106.14**॥ 4770

अपसव्यं ततः कुर्वन् रावणस्य महारथम्।
चक्रसम्भूतरजसा रावणं व्यवधूनयत्॥ **6.106.15**॥ 4771

ततः क्रुद्धो दशग्रीवस्ताम्रविस्फारितेक्षणः।
रथप्रतिमुखं रामं सायकैरवधूनयत्॥ **6.106.16**॥ 4772

धर्षणामर्षितो रामो धैर्यं रोषेण लम्भयन्।
जग्राह सुमहावेगमैन्द्रं युधि शरासनम्॥ **6.106.17**॥ 4773

शरांश्च सुमहावेगान् सूर्यरश्मिसमप्रभान्।
तदुपोढं महद् युद्धमन्योन्यवधकाङ्क्षिणोः।
परस्पराभिमुखयोर्दृप्तयोरिव सिंहयोः॥ **6.106.18**॥ 4774

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
समीयुर्द्वैरथं द्रष्टुं रावणक्षयकाङ्क्षिणः॥ **6.106.19**॥ 4775

समुत्पेतुरथोत्पाता दारुणा रोमहर्षणाः।
रावणस्य विनाशाय राघवस्योदयाय च॥ **6.106.20**॥ 4776

ववर्ष रुधिरं देवो रावणस्य रथोपरि।
वाता मण्डलिनस्तीव्रा व्यपसव्यं प्रचक्रमुः॥ **6.106.21**॥ 4777

महद्गृध्रकुलं चास्य भ्रममाणं नभस्थले।
येन येन रथो याति तेन तेन प्रधावति॥ **6.106.22**॥ 4778

सन्ध्यया चावृता लङ्का जपापुष्पनिकाशया।
दृश्यते सम्प्रदीप्तेव दिवसेऽपि वसुन्धरा॥ **6.106.23**॥ 4779

सनिर्घाता महोल्काश्च सम्प्रपेतुर्महास्वनाः।
विषादयंस्ते रक्षांसि रावणस्य तदाहिताः॥ **6.106.24**॥ 4780

रावणश्च यतस्तत्र प्रचचाल वसुन्धरा।
रक्षसां च प्रहरतां गृहीता इव बाहवः॥ **6.106.25**॥ 4781

ताम्राः पीताः सिताः श्वेताः पतिताः सूर्यरश्मयः।
दृश्यन्ते रावणस्याग्रे पर्वतस्येव धातवः॥ **6.106.26**॥ 4782

गृध्रैरनुगताश्चास्य वमन्त्यो ज्वलनं मुखैः।
प्रणेदुर्मुखमीक्षन्त्यः संरब्धमशिवं शिवाः॥ **6.106.27**॥ 4783

प्रतिकूलं ववौ वायू रणे पांसून् समुत्किरन्।
तस्य राक्षसराजस्य कुर्वन् दृष्टिविलोपनम्॥ **6.106.28**॥ 4784

निपेतुरिन्द्राशनयः सैन्ये चास्य समन्ततः।
दुर्विषह्यस्वरा घोरा विना जलधरोदयम्॥ **6.106.29**॥ 4785

दिशश्च प्रदिशः सर्वा बभूवुस्तिमिरावृताः।
पांसुवर्षेण महता दुर्दर्शं च नभोऽभवत्॥ **6.106.30**॥ 4786

कुर्वन्त्यः कलहं घोरं सारिकास्तद्रथं प्रति।
निपेतुः शतशस्तत्र दारुणा दारुणारुताः॥ **6.106.31**॥ 4787

जघनेभ्यः स्फुलिङ्गाश्च नेत्रेभ्योऽश्रूणि सन्ततम्।
मुमुचुस्तस्य तुरगास्तुल्यमग्निं च वारि च॥ **6.106.32**॥ 4788

एवम्प्रकारा बहवः समुत्पाता भयावहाः।
रावणस्य विनाशाय दारुणाः सम्प्रजज्ञिरे॥ **6.106.33**॥ 4789

रामस्यापि निमित्तानि सौम्यानि च शिवानि च।
बभूवुर्जयशंसीनि प्रादुर्भूतानि सर्वशः॥ **6.106.34**॥ 4790

निमित्तानीह सौम्यानि राघवः स्वजयाय वै।
दृष्ट्वा परमसंहृष्टो हतं मेने च रावणम्॥ **6.106.35**॥ 4791

ततो निरीक्ष्यात्मगतानि राघवो
रणे निमित्तानि निमित्तकोविदः।
जगाम हर्षं च परां च निर्वृतिं
चकार युद्धे ह्यधिकं च विक्रमम्॥ **6.106.36**॥ 4792

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षडधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्ताधिकशततमः सर्गः ॥

श्रीरामरावणयोर्घोरं युद्धम्

ततः प्रवृत्तं सुक्रूरं रामरावणयोस्तदा।
सुमहद् द्वैरथं युद्धं सर्वलोकभयावहम्॥ **6.107.1** ॥ 4793

ततो राक्षससैन्यं च हरीणां च महद्बलम्।
प्रगृहीतप्रहरणं निश्चेष्टं समवर्तत॥ **6.107.2** ॥ 4794

सम्प्रयुद्धौ तु तौ दृष्ट्वा बलवन्नरराक्षसौ।
व्याक्षिप्तहृदयाः सर्वे परं विस्मयमागताः॥ **6.107.3** ॥ 4795

नानाप्रहरणैर्व्यग्रैर्भुजैर्विस्मितबुद्धयः।
तस्थुः प्रेक्ष्य च सङ्ग्रामं नाभिजग्मुः परस्परम्॥ **6.107.4** ॥ 4796

रक्षसां रावणं चापि वानराणां च राघवम्।
पश्यतां विस्मिताक्षाणां सैन्यं चित्रमिवाबभौ॥ **6.107.5** ॥ 4797

तौ तु तत्र निमित्तानि दृष्ट्वा राघवरावणौ।
कृतबुद्धी स्थिरामर्षौ युयुधाते ह्यभीतवत्॥ **6.107.6** ॥ 4798

जेतव्यमिति काकुत्स्थो मर्तव्यमिति रावणः।
धृतौ स्ववीर्यसर्वस्वं युद्धेऽदर्शयतां तदा॥ **6.107.7** ॥ 4799

ततः क्रोधाद् दशग्रीवः शरान् सन्धाय वीर्यवान्।
मुमोच ध्वजमुद्दिश्य राघवस्य रथे स्थितम्॥ **6.107.8**॥ 4800

ते शरास्तमनासाद्य पुरन्दररथध्वजम्।
रथशक्तिं परामृश्य निपेतुर्धरणीतले॥ **6.107.9**॥ 4801

ततो रामोऽपि सङ्क्रुद्धश्चापमाकृष्य वीर्यवान्।
कृतप्रतिकृतं कर्तुं मनसा सम्प्रचक्रमे॥ **6.107.10**॥ 4802

रावणध्वजमुद्दिश्य मुमोच निशितं शरम्।
महासर्पमिवासह्यं ज्वलन्तं स्वेन तेजसा॥ **6.107.11**॥ 4803

रामश्चिक्षेप तेजस्वी केतुमुद्दिश्य सायकम्।
जगाम स महीं छित्त्वा दशग्रीवध्वजं शरः॥ **6.107.12**॥ 4804

स निकृत्तोऽपतद् भूमौ रावणस्यन्दनध्वजः।
ध्वजस्योन्मथनं दृष्ट्वा रावणः स महाबलः॥ **6.107.13**॥ 4805

सम्प्रदीप्तोऽभवत् क्रोधादमर्षात् प्रदहन्निव।
स रोषवशमापन्नः शरवर्षं ववर्ष ह॥ **6.107.14**॥ 4806

रामस्य तुरगान् दीप्तैः शरैर्विव्याध रावणः।
ते दिव्या हरयस्तत्र नास्खलन्नापि बभ्रमुः॥ **6.107.15**॥ 4807

बभूवुः स्वस्थहृदयाः पद्मनालैरिवाहताः।
तेषामसम्भ्रमं दृष्ट्वा वाजिनां रावणस्तदा॥ **6.107.16**॥ 4808

भूय एव सुसङ्क्रुद्धः शरवर्षं मुमोच ह।
गदाश्च परिघांश्चैव चक्राणि मुसलानि च॥ **6.107.17**॥ 4809

गिरिशृङ्गाणि वृक्षांश्च तथा शूलपरश्वधान्।
मायाविहितमेतत् तु शस्त्रवर्षमपातयत्।
सहस्रशस्तदा बाणानश्रान्तहृदयोद्यमः॥ **6.107.18**॥ 4810

तुमुलं त्रासजननं भीमं भीमप्रतिस्वनम्।
तद् वर्षमभवद् युद्धे नैकशस्त्रमयं महत्॥ **6.107.19**॥ 4811

विमुच्य राघवरथं समन्ताद् वानरे बले।
सायकैरन्तरिक्षं च चकार सुनिरन्तरम्॥ **6.107.20**॥ 4812

मुमोच च दशग्रीवो निःसङ्गेनान्तरात्मना।
व्यायच्छमानं तं दृष्ट्वा तत्परं रावणं रणे॥ **6.107.21**॥ 4813

प्रहसन्निव काकुत्स्थः सन्दधे निशिताञ्छरान्।
स मुमोच ततो बाणाञ्छतशोऽथ सहस्रशः॥ **6.107.22**॥ 4814

तान् दृष्ट्वा रावणश्चक्रे स्वशरैः खं निरन्तरम्।
ताभ्यां नियुक्तेन तदा शरवर्षेण भास्वता॥ **6.107.23**॥ 4815

शरबद्धमिवाभाति द्वितीयं भास्वदम्बरम्।
नानिमित्तोऽभवद् बाणो नानिर्भेत्ता न निष्फलः॥ **6.107.24**॥ 4816

अन्योन्यमभिसंहत्य निपेतुर्धरणीतले।
तथा विसृजतोर्बाणान् रामरावणयोर्मृधे॥ **6.107.25**॥ 4817

प्रायुध्येतामविच्छिन्नमस्यन्तौ सव्यदक्षिणम्।
चक्रतुश्च शरैर्घोरैर्निरुच्छ्वासमिवाम्बरम्॥ **6.107.26**॥ 4818

रावणस्य हयान् रामो हयान् रामस्य रावणः।
जघ्नतुस्तौ तदान्योन्यं कृतानुकृतकारिणौ॥ **6.107.27**॥ 4819

एवं तु तौ सुसङ्क्रुद्धौ चक्रतुर्युद्धमुत्तमम्।
मुहूर्तमभवद् युद्धं तुमुलं रोमहर्षणम्॥ **6.107.28**॥ 4820

तौ तथा युध्यमानौ तु समरे रामरावणौ।
ददृशुः सर्वभूतानि विस्मितेनान्तरात्मना॥ **6.107.29**॥ 4821

अर्दयन्तौ तु समरे तयोस्तौ स्यन्दनोत्तमौ।
परस्परमभिक्रुद्धौ परस्परमभिद्रुतौ॥ **6.107.30**॥ 4822

परस्परवधे युक्तौ घोररूपौ बभूवतुः।
मण्डलानि च वीथीश्च गतप्रत्यागतानि च॥ **6.107.31**॥ 4823

दर्शयन्तौ बहुविधां सूतौ सारथ्यजां गतिम्।
अर्दयन् रावणं रामो राघवं चापि रावणः॥ **6.107.32**॥ 4824

गतिवेगं समापन्नौ प्रवर्तननिवर्तने।
क्षिपतोः शरजालानि तयोस्तौ स्यन्दनोत्तमौ॥ **6.107.33**॥ 4825

चेरतुः संयुगमहीं सासारौ जलदाविव।
दर्शयित्वा तदा तौ तु गतिं बहुविधां रणे॥ **6.107.34**॥ 4826

परस्परस्याभिमुखौ पुनरेव च तस्थतुः।
धुरं धुरेण रथयोर्वक्त्रं वक्त्रेण वाजिनाम्॥ **6.107.35**॥ 4827

पताकाश्च पताकाभिः समीयुः स्थितयोस्तदा।
रावणस्य ततो रामो धनुर्मुक्तैः शितैः शरैः॥ **6.107.36**॥ 4828

चतुर्भिश्चतुरो दीप्तान् हयान् प्रत्यपसर्पयत्।
स क्रोधवशमापन्नो हयानामपसर्पणे॥ **6.107.37**॥ 4829

मुमोच निशितान् बाणान् राघवाय दशाननः।
सोऽतिविद्धो बलवता दशग्रीवेण राघवः॥ **6.107.38**॥ 4830

जगाम न विकारं च न चापि व्यथितोऽभवत्।
चिक्षेप च पुनर्बाणान् वज्रसारसमस्वनान्॥ **6.107.39**॥ 4831

सारथिं वज्रहस्तस्य समुद्दिश्य दशाननः।
मातलेस्तु महावेगाः शरीरे पतिताः शराः॥ **6.107.40**॥ 4832

न सूक्ष्ममपि सम्मोहं व्यथां वा प्रददुर्युधि।
तया धर्षणया क्रुद्धो मातलेर्न तथाऽऽत्मनः॥ **6.107.41**॥ 4833

चकार शरजालेन राघवो विमुखं रिपुम्।
विंशतिं त्रिंशतिं षष्टिं शतशोऽथ सहस्रशः॥ **6.107.42**॥ 4834

मुमोच राघवो वीरः सायकान् स्यन्दने रिपोः।
रावणोऽपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः॥ **6.107.43**॥ 4835

गदामुसलवर्षेण रामं प्रत्यर्दयद् रणे।
तत् प्रवृत्तं पुनर्युद्धं तुमुलं रोमहर्षणम्॥ **6.107.44**॥ 4836

गदानां मुसलानां च परिघाणां च निःस्वनैः।
शराणां पुङ्खवातैश्च क्षुभिताः सप्त सागराः॥ **6.107.45**॥ 4837

क्षुब्धानां सागराणां च पातालतलवासिनः।
व्यथिता दानवाः सर्वे पन्नगाश्च सहस्रशः॥ **6.107.46**॥ 4838

चकम्पे मेदिनी कृत्स्ना सशैलवनकानना।
भास्करो निष्प्रभश्चासीन्न ववौ चापि मारुतः॥ **6.107.47**॥ 4839

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
चिन्तामापेदिरे सर्वे सकिन्नरमहोरगाः॥ **6.107.48**॥ 4840

स्वस्ति गोब्राह्मणेभ्यस्तु लोकास्तिष्ठन्तु शाश्वताः।
जयतां राघवः सङ्ख्ये रावणं राक्षसेश्वरम्॥ **6.107.49**॥ 4841

एवं जपन्तोऽपश्यंस्ते देवाः सर्षिगणास्तदा।
रामरावणयोर्युद्धं सुघोरं रोमहर्षणम्॥ **6.107.50**॥ 4842

गन्धर्वाप्सरसां सङ्घा दृष्ट्वा युद्धमनूपमम्।
गगनं गगनाकारं सागरः सागरोपमः॥ **6.107.51**॥ 4843

रामरावणयोर्युद्धं रामरावणयोरिव।
एवं ब्रुवन्तो ददृशुस्तद् युद्धं रामरावणम्॥ **6.107.52**॥ 4844

ततः क्रोधान्महाबाहू रघूणां कीर्तिवर्धनः।
सन्धाय धनुषा रामः शरमाशीविषोपमम्॥ **6.107.53**॥ 4845

रावणस्य शिरोऽच्छिन्दच्छ्रीमज्ज्वलितकुण्डलम्।
तच्छिरः पतितं भूमौ दृष्टं लोकैस्त्रिभिस्तदा॥ **6.107.54**॥ 4846

तस्यैव सदृशं चान्यद् रावणस्योत्थितं शिरः।
तत् क्षिप्तं क्षिप्रहस्तेन रामेण क्षिप्रकारिणा॥ **6.107.55**॥ 4847

द्वितीयं रावणशिरश्छिन्नं संयति सायकैः।
छिन्नमात्रं च तच्छीर्षं पुनरेव प्रदृश्यते॥ **6.107.56**॥ 4848

तदप्यशनिसङ्काशैश्छिन्नं रामस्य सायकैः।
एवमेव शतं छिन्नं शिरसां तुल्यवर्चसाम्॥ **6.107.57**॥ 4849

न चैव रावणस्यान्तो दृश्यते जीवितक्षये।
ततः सर्वास्त्रविद् वीरः कौसल्यानन्दवर्धनः॥ **6.107.58**॥ 4850

मार्गणैर्बहुभिर्युक्तश्चिन्तयामास राघवः।
मारीचो निहतो यैस्तु खरो यैस्तु सदूषणः॥ **6.107.59**॥ 4851

क्रौञ्चावटे विराधस्तु कबन्धो दण्डकावने।
यैः साला गिरयो भग्ना वाली च क्षुभितोऽम्बुधिः॥ **6.107.60**॥ 4852

त इमे सायकाः सर्वे युद्धे प्रात्ययिका मम।
किं नु तत् कारणं येन रावणे मन्दतेजसः॥ **6.107.61**॥ 4853

इति चिन्तापरश्चासीदप्रमत्तश्च संयुगे।
ववर्ष शरवर्षाणि राघवो रावणोरसि॥ **6.107.62**॥ 4854

रावणोऽपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः।
गदामुसलवर्षेण रामं प्रत्यर्दयद् रणे॥ **6.107.63**॥ 4855

तत् प्रवृत्तं महद् युद्धं तुमुलं रोमहर्षणम्।
अन्तरिक्षे च भूमौ च पुनश्च गिरिमूर्धनि॥ **6.107.64**॥ 4856

देवदानवयक्षाणां पिशाचोरगरक्षसाम्।
पश्यतां तन्महद् युद्धं सर्वरात्रमवर्तत॥ **6.107.65**॥ 4857

नैव रात्रिं न दिवसं न मुहूर्तं न च क्षणम्।
रामरावणयोर्युद्धं विराममुपगच्छति॥ **6.107.66**॥ 4858

दशरथसुतराक्षसेन्द्रयोस्तयो -
    र्जयमनवेक्ष्य रणे स राघवस्य।
सुरवररथसारथिर्महात्मा
    रणरतराममुवाच वाक्यमाशु॥ **6.107.67**॥ 4859

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्ताधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टाधिकशततमः सर्गः ॥

श्रीरामेण रावणस्य वधः

अथ संस्मारयामास मातली राघवं तदा।
अजानन्निव किं वीर त्वमेनमनुवर्तसे॥ **6.108.1** ॥ 4860

विसृजास्मै वधाय त्वमस्त्रं पैतामहं प्रभो।
विनाशकालः कथितो यः सुरैः सोऽद्य वर्तते॥ **6.108.2** ॥ 4861

ततः संस्मारितो रामस्तेन वाक्येन मातलेः।
जग्राह स शरं दीप्तं निःश्वसन्तमिवोरगम्॥ **6.108.3** ॥ 4862

यं तस्मै प्रथमं प्रादादगस्त्यो भगवानृषिः।
ब्रह्मदत्तं महद् बाणममोघं युधि वीर्यवान्॥ **6.108.4** ॥ 4863

ब्रह्मणा निर्मितं पूर्वमिन्द्रार्थममितौजसा।
दत्तं सुरपतेः पूर्वं त्रिलोकजयकाङ्क्षिणः॥ **6.108.5** ॥ 4864

यस्य वाजेषु पवनः फले पावकभास्करौ।
शरीरमाकाशमयं गौरवे मेरुमन्दरौ॥ **6.108.6** ॥ 4865

जाज्वल्यमानं वपुषा सुपुङ्खं हेमभूषितम्।
तेजसा सर्वभूतानां कृतं भास्करवर्चसम्॥ **6.108.7** ॥ 4866

सधूममिव कालाग्निं दीप्तमाशीविषोपमम्।
नरनागाश्ववृन्दानां भेदनं क्षिप्रकारिणम्॥ **6.108.8**॥ 4867

द्वाराणां परिघाणां च गिरीणां चापि भेदनम्।
नानारुधिरदिग्धाङ्गं मेदोदिग्धं सुदारुणम्॥ **6.108.9**॥ 4868

वज्रसारं महानादं नानासमितिदारुणम्।
सर्ववित्रासनं भीमं श्वसन्तमिव पन्नगम्॥ **6.108.10**॥ 4869

कङ्कगृध्रबकानां च गोमायुगणरक्षसाम्।
नित्यभक्षप्रदं युद्धे यमरूपं भयावहम्॥ **6.108.11**॥ 4870

नन्दनं वानरेन्द्राणां रक्षसामवसादनम्।
वाजितं विविधैर्वाजैश्चारुचित्रैर्गरुत्मतः॥ **6.108.12**॥ 4871

तमुत्तमेषुं लोकानामिक्ष्वाकुभयनाशनम्।
द्विषतां कीर्तिहरणं प्रहर्षकरमात्मनः॥ **6.108.13**॥ 4872

अभिमन्त्र्य ततो रामस्तं महेषुं महाबलः।
वेदप्रोक्तेन विधिना सन्दधे कार्मुके बली॥ **6.108.14**॥ 4873

तस्मिन् सन्धीयमाने तु राघवेण शरोत्तमे।
सर्वभूतानि सन्त्रेसुश्चचाल च वसुन्धरा॥ **6.108.15**॥ 4874

स रावणाय सङ्क्रुद्धो भृशमायम्य कार्मुकम्।
चिक्षेप परमायत्तः शरं मर्मविदारणम्॥ **6.108.16**॥ 4875

स वज्र इव दुर्धर्षो वज्रिबाहुविसर्जितः।
कृतान्त इव चावार्यो न्यपतद् रावणोरसि॥ **6.108.17**॥ 4876

स विसृष्टो महावेगः शरीरान्तकरः परः।
बिभेद हृदयं तस्य रावणस्य दुरात्मनः॥ **6.108.18**॥ 4877

रुधिराक्तः स वेगेन शरीरान्तकरः शरः।
रावणस्य हरन् प्राणान् विवेश धरणीतलम्॥ **6.108.19**॥ 4878

स शरो रावणं हत्वा रुधिरार्द्रकृतच्छविः।
कृतकर्मा निभृतवत् स तूणीं पुनराविशत्॥ **6.108.20**॥ 4879

तस्य हस्ताद्धतस्याशु कार्मुकं तत् ससायकम्।
निपपात सह प्राणैर्भ्रश्यमानस्य जीवितात्॥ **6.108.21**॥ 4880

गतासुर्भीमवेगस्तु नैर्ऋतेन्द्रो महाद्युतिः।
पपात स्यन्दनाद् भूमौ वृत्रो वज्रहतो यथा॥ **6.108.22**॥ 4881

तं दृष्ट्वा पतितं भूमौ हतशेषा निशाचराः।
हतनाथा भयत्रस्ताः सर्वतः सम्प्रदुद्रुवुः॥ **6.108.23**॥ 4882

नर्दन्तश्चाभिपेतुस्तान् वानरा द्रुमयोधिनः।
दशग्रीववधं दृष्ट्वा वानरा जितकाशिनः॥ **6.108.24**॥ 4883

अर्दिता वानरैर्हृष्टैर्लङ्कामभ्यपतन् भयात्।
हताश्रयत्वात् करुणैर्बाष्पप्रस्रवणैर्मुखैः॥ **6.108.25**॥ 4884

ततो विनेदुः संहृष्टा वानरा जितकाशिनः।
वदन्तो राघवजयं रावणस्य च तद्वधम्॥ **6.108.26**॥ 4885

अथान्तरिक्षे व्यनदत् सौम्यस्त्रिदशदुन्दुभिः।
दिव्यगन्धवहस्तत्र मारुतः सुसुखो ववौ॥ **6.108.27**॥ 4886

निपपातान्तरिक्षाच्च पुष्पवृष्टिस्तदा भुवि।
किरन्ती राघवरथं दुरावापा मनोहरा॥ **6.108.28**॥ 4887

राघवस्तवसंयुक्ता गगने च विशुश्रुवे।
साधुसाध्विति वागग्र्या देवतानां महात्मनाम्॥ **6.108.29**॥ 4888

आविवेश महान् हर्षो देवानां चारणैः सह।
रावणे निहते रौद्रे सर्वलोकभयङ्करे॥ **6.108.30**॥ 4889

ततः सकामं सुग्रीवमङ्गदं च विभीषणम्।
चकार राघवः प्रीतो हत्वा राक्षसपुङ्गवम्॥ **6.108.31**॥ 4890

ततः प्रजग्मुः प्रशमं मरुद्गणा
दिशः प्रसेदुर्विमलं नभोऽभवत्।
मही चकम्पे न च मारुतो ववौ
स्थिरप्रभश्चाप्यभवद् दिवाकरः॥ **6.108.32**॥ 4891

ततस्तु सुग्रीवविभीषणाङ्गदाः
सुहृद्विशिष्टाः सहलक्ष्मणस्तदा।
समेत्य हृष्टा विजयेन राघवं
रणेऽभिरामं विधिनाभ्यपूजयन्॥ **6.108.33**॥ 4892

स तु निहतरिपुः स्थिरप्रतिज्ञः
स्वजनबलाभिवृतो रणे बभूव।
रघुकुलनृपनन्दनो महौजा -
स्त्रिदशगणैरभिसंवृतो महेन्द्रः॥ **6.108.34**॥ 4893

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे अष्टाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ नवाधिकशततमः सर्गः ॥

विभीषणस्य विलापः श्रीरामेण तस्य प्रबोधनपूर्वकं रावणान्त्येष्टिसंस्कारार्थं तं प्रत्यादेशदानम्

भ्रातरं निहतं दृष्ट्वा शयानं निर्जितं रणे।
शोकवेगपरीतात्मा विललाप विभीषणः॥ **6.109.1** ॥ 4894

वीरविक्रान्त विख्यात प्रवीण नयकोविद।
महार्हशयनोपेत किं शेषे निहतो भुवि॥ **6.109.2** ॥ 4895

निक्षिप्य दीर्घौ निश्चेष्टौ भुजावङ्गदभूषितौ।
मुकुटेनापवृत्तेन भास्कराकारवर्चसा॥ **6.109.3** ॥ 4896

तदिदं वीर सम्प्राप्तं यन्मया पूर्वमीरितम्।
काममोहपरीतस्य यत् तन्न रुचितं तव॥ **6.109.4** ॥ 4897

यन्न दर्पात् प्रहस्तो वा नेन्द्रजिन्नापरे जनाः।
न कुम्भकर्णोऽतिरथो नातिकायो नरान्तकः।
न स्वयं बहु मन्येथास्तस्योदर्कोऽयमागतः॥ **6.109.5** ॥ 4898

गतः सेतुः सुनीतानां गतो धर्मस्य विग्रहः।
गतः सत्त्वस्य सङ्क्षेपः सुहस्तानां गतिर्गता॥ **6.109.6** ॥ 4899

आदित्यः पतितो भूमौ मग्नस्तमसि चन्द्रमाः।
चित्रभानुः प्रशान्तार्चिर्व्यवसायो निरुद्यमः।
अस्मिन् निपतिते वीरे भूमौ शस्त्रभृतां वरे॥ **6.109.7**॥ 4900

किं शेषमिहलोकस्य गतसत्त्वस्य सम्प्रति।
रणे राक्षसशार्दूले प्रसुप्त इव पांसुषु॥ **6.109.8**॥ 4901

धृतिप्रवालः प्रसभाग्र्यपुष्प -
स्तपोबलः शौर्यनिबद्धमूलः।
रणे महान् राक्षसराजवृक्षः
सम्मर्दितो राघवमारुतेन॥ **6.109.9**॥ 4902

तेजोविषाणः कुलवंशवंशः
कोपप्रसादापरगात्रहस्तः।
इक्ष्वाकुसिंहावगृहीतदेहः
सुप्तः क्षितौ रावणगन्धहस्ती॥ **6.109.10**॥ 4903

पराक्रमोत्साहविजृम्भितार्चि -
र्निःश्वासधूमः स्वबलप्रतापः।
प्रतापवान् संयति राक्षसाग्नि -
र्निर्वापितो रामपयोधरेण॥ **6.109.11**॥ 4904

सिंहर्क्षलाङ्गूलककुद्विषाणः
पराभिजिद्गन्धनगन्धवाहः।
रक्षोवृषश्चापलकर्णचक्षुः
क्षितीश्वरव्याघ्रहतोऽवसन्नः॥ **6.109.12**॥ 4905

वदन्तं हेतुमद्वाक्यं परिदृष्टार्थनिश्चयम्।
रामः शोकसमाविष्टमित्युवाच विभीषणम्॥ **6.109.13**॥ 4906

नायं विनष्टो निश्चेष्टः समरे चण्डविक्रमः।
अत्युन्नतमहोत्साहः पतितोऽयमशङ्कितः॥ **6.109.14**॥ 4907

नैवं विनष्टाः शोचन्ते क्षत्रधर्मव्यवस्थिताः।
वृद्धिमाशंसमाना ये निपतन्ति रणाजिरे॥ **6.109.15**॥ 4908

येन सेन्द्रास्त्रयो लोकास्त्रासिता युधि धीमता।
तस्मिन् कालसमायुक्ते न कालः परिशोचितुम्॥ **6.109.16**॥ 4909

नैकान्तविजयो युद्धे भूतपूर्वः कदाचन।
परैर्वा हन्यते वीरः परान् वा हन्ति संयुगे॥ **6.109.17**॥ 4910

इयं हि पूर्वैः सन्दिष्टा गतिः क्षत्रियसम्मता।
क्षत्रियो निहतः सङ्ख्ये न शोच्य इति निश्चयः॥ **6.109.18**॥ 4911

तदेवं निश्चयं दृष्ट्वा तत्त्वमास्थाय विज्वरः।
यदिहानन्तरं कार्यं कल्प्यं तदनुचिन्तय॥ **6.109.19**॥ 4912

तमुक्तवाक्यं विक्रान्तं राजपुत्रं विभीषणः।
उवाच शोकसन्तप्तो भ्रातुर्हितमनन्तरम्॥ **6.109.20**॥ 4913

योऽयं विमर्देष्वविभग्नपूर्वः
सुरैः समस्तैरपि वासवेन।
भवन्तमासाद्य रणे विभग्नो
वेलामिवासाद्य यथा समुद्रः॥ **6.109.21**॥ 4914

अनेन दत्तानि वनीपकेषु
भुक्ताश्च भोगा निभृताश्च भृत्याः।
धनानि मित्रेषु समर्पितानि
वैराण्यमित्रेषु च यापितानि॥ **6.109.22**॥ 4915

एषोऽहिताग्निश्च महातपाश्च
वेदान्तगः कर्मसु चाग्र्यशूरः।
एतस्य यत् प्रेतगतस्य कृत्यं
तत् कर्तुमिच्छामि तव प्रसादात्॥ **6.109.23**॥ 4916

स तस्य वाक्यैः करुणैर्महात्मा
सम्बोधितः साधु विभीषणेन।
आज्ञापयामास नरेन्द्रसूनुः
स्वर्गीयमाधानमदीनसत्त्वः॥ **6.109.24**॥ 4917

मरणान्तानि वैराणि निर्वृत्तं नः प्रयोजनम्।
क्रियतामस्य संस्कारो ममाप्येष यथा तव॥ **6.109.25**॥ 4918

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे नवाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ दशाधिकशततमः सर्गः ॥

रावणस्य स्त्रीणां विलापः

रावणं निहतं श्रुत्वा राघवेण महात्मना।
अन्तःपुराद् विनिष्पेतू राक्षस्यः शोककर्शिताः॥ **6.110.1** ॥ 4919

वार्यमाणाः सुबहुशो वेष्टन्त्यः क्षितिपांसुषु।
विमुक्तकेश्यः शोकार्ता गावो वत्सहता इव॥ **6.110.2** ॥ 4920

उत्तरेण विनिष्क्रम्य द्वारेण सह राक्षसैः।
प्रविश्यायोधनं घोरं विचिन्वन्त्यो हतं पतिम्॥ **6.110.3** ॥ 4921

आर्यपुत्रेति वादिन्यो हा नाथेति च सर्वशः।
परिपेतुः कबन्धाङ्कां महीं शोणितकर्दमाम्॥ **6.110.4** ॥ 4922

ता बाष्पपरिपूर्णाक्ष्यो भर्तृशोकपराजिताः।
करिण्य इव नर्दन्त्यः करेण्वो हतयूथपाः॥ **6.110.5** ॥ 4923

ददृशुस्ता महाकायं महावीर्यं महाद्युतिम्।
रावणं निहतं भूमौ नीलाञ्जनचयोपमम्॥ **6.110.6** ॥ 4924

ताः पतिं सहसा दृष्ट्वा शयानं रणपांसुषु।
निपेतुस्तस्य गात्रेषु च्छिन्ना वनलता इव॥ **6.110.7** ॥ 4925

बहुमानात् परिष्वज्य काचिदेनं रुरोद ह।
चरणौ काचिदालम्ब्य काचित् कण्ठेऽवलम्ब्य च॥ **6.110.8**॥ 4926

उत्क्षिप्य च भुजौ काचिद् भूमौ सुपरिवर्तते।
हतस्य वदनं दृष्ट्वा काचिन्मोहमुपागमत्॥ **6.110.9**॥ 4927

काचिदङ्के शिरः कृत्वा रुरोद मुखमीक्षती।
स्नापयन्ती मुखं बाष्पैस्तुषारैरिव पङ्कजम्॥ **6.110.10**॥ 4928

एवमार्ताः पतिं दृष्ट्वा रावणं निहतं भुवि।
चुक्रुशुर्बहुधा शोकाद् भूयस्ताः पर्यदेवयन्॥ **6.110.11**॥ 4929

येन वित्रासितः शक्रो येन वित्रासितो यमः।
येन वैश्रवणो राजा पुष्पकेण वियोजितः॥ **6.110.12**॥ 4930

गन्धर्वाणामृषीणां च सुराणां च महात्मनाम्।
भयं येन रणे दत्तं सोऽयं शेते रणे हतः॥ **6.110.13**॥ 4931

असुरेभ्यः सुरेभ्यो वा पन्नगेभ्योऽपि वा तथा।
भयं यो न विजानाति तस्येदं मानुषाद् भयम्॥ **6.110.14**॥ 4932

अवध्यो देवतानां यस्तथा दानवरक्षसाम्।
हतः सोऽयं रणे शेते मानुषेण पदातिना॥ **6.110.15**॥ 4933

यो न शक्यः सुरैर्हन्तुं न यक्षैर्नासुरैस्तथा।
सोऽयं कश्चिदिवासत्त्वो मृत्युं मर्त्येन लम्भितः॥ **6.110.16**॥ 4934

एवं वदन्त्यो रुरुदुस्तस्य ता दुःखिताः स्त्रियः।
भूय एव च दुःखार्ता विलेपुश्च पुनः पुनः॥ **6.110.17**॥ 4935

अश्रृण्वता तु सुहृदां सततं हितवादिनाम्।
मरणायाहृता सीता राक्षसाश्च निपातिताः।
एताः सममिदानीं ते वयमात्मा च पातितः॥ **6.110.18**॥ 4936

ब्रुवाणोऽपि हितं वाक्यमिष्टो भ्राता विभीषणः।
दृष्टं परुषितो मोहात् त्वयाऽऽत्मवधकाङ्क्षिणा॥ **6.110.19**॥ 4937

यदि निर्यातिता ते स्यात् सीता रामाय मैथिली।
न नः स्याद् व्यसनं घोरमिदं मूलहरं महत्॥ **6.110.20**॥ 4938

वृत्तकामो भवेद् भ्राता रामो मित्रकुलं भवेत्।
वयं चाविधवाः सर्वाः सकामा न च शत्रवः॥ **6.110.21**॥ 4939

त्वया पुनर्नृशंसेन सीतां संरुन्धता बलात्।
राक्षसा वयमात्मा च त्रयं तुल्यं निपातितम्॥ **6.110.22**॥ 4940

न कामकारः कामं वा तव राक्षसपुङ्गव।
दैवं चेष्टयते सर्वं हतं दैवेन हन्यते॥ **6.110.23**॥ 4941

वानराणां विनाशोऽयं राक्षसानां च ते रणे।
तव चैव महाबाहो दैवयोगादुपागतः॥ **6.110.24**॥ 4942

नैवार्थेन च कामेन विक्रमेण न चाज्ञया।
शक्या दैवगतिर्लोके निवर्तयितुमुद्यता॥ **6.110.25**॥ 4943

विलेपुरेवं दीनास्ता राक्षसाधिपयोषितः।
कुरर्य इव दुःखार्ता बाष्पपर्याकुलेक्षणाः॥ **6.110.26**॥ 4944

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे दशाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकादशाधिकशततमः सर्गः ॥

मन्दोदर्या विलापो रावणशवस्य दाहश्च

तासां विलपमानानां तदा राक्षसयोषिताम्।
ज्येष्ठपत्नी प्रिया दीना भर्तारं समुदैक्षत ॥ **6.111.1** ॥ 4945

दशग्रीवं हतं दृष्ट्वा रामेणाचिन्त्यकर्मणा।
पतिं मन्दोदरी तत्र कृपणा पर्यदेवयत् ॥ **6.111.2** ॥ 4946

ननु नाम महाबाहो तव वैश्रवणानुज।
क्रुद्धस्य प्रमुखे स्थातुं त्रस्यत्यपि पुरन्दरः ॥ **6.111.3** ॥ 4947

ऋषयश्च महान्तोऽपि गन्धर्वाश्च यशस्विनः।
ननु नाम तवोद्वेगाच्चारणाश्च दिशो गताः ॥ **6.111.4** ॥ 4948

स त्वं मानुषमात्रेण रामेण युधि निर्जितः।
न व्यपत्रपसे राजन् किमिदं राक्षसेश्वर ॥ **6.111.5** ॥ 4949

कथं त्रैलोक्यमाक्रम्य श्रिया वीर्येण चान्वितम्।
अविषह्यं जघान त्वां मानुषो वनगोचरः ॥ **6.111.6** ॥ 4950

मानुषाणामविषये चरतः कामरूपिणः।
विनाशस्तव रामेण संयुगे नोपपद्यते ॥ **6.111.7** ॥ 4951

न चैतत् कर्म रामस्य श्रद्दधामि चमूमुखे।
सर्वतः समुपेतस्य तव तेनाभिमर्षणम्॥ **6.111.8**॥ 4952

अथवा रामरूपेण कृतान्तः स्वयमागतः।
मायां तव विनाशाय विधायाप्रतितर्किताम्॥ **6.111.9**॥ 4953

अथवा वासवेन त्वं धर्षितोऽसि महाबल।
वासवस्य तु का शक्तिस्त्वां द्रष्टुमपि संयुगे॥ **6.111.10**॥ 4954

महाबलं महावीर्यं देवशत्रुं महौजसम्।
व्यक्तमेष महायोगी परमात्मा सनातनः॥ **6.111.11**॥ 4955

अनादिमध्यनिधनो महतः परमो महान्।
तमसः परमो धाता शङ्खचक्रगदाधरः॥ **6.111.12**॥ 4956

श्रीवत्सवक्षा नित्यश्रीरजय्यः शाश्वतो ध्रुवः।
मानुषं रूपमास्थाय विष्णुः सत्यपराक्रमः॥ **6.111.13**॥ 4957

सर्वैः परिवृतो देवैर्वानरत्वमुपागतैः।
सर्वलोकेश्वरः श्रीमान् लोकानां हितकाम्यया॥ **6.111.14**॥ 4958

स राक्षसपरीवारं देवशत्रुं भयावहम्।
इन्द्रियाणि पुरा जित्वा जितं त्रिभुवनं त्वया॥ **6.111.15**॥ 4959

स्मरद्भिरिव तद् वैरमिन्द्रियैरेव निर्जितः।
यदैव हि जनस्थाने राक्षसैर्बहुभिर्वृतः॥ **6.111.16**॥ 4960

खरस्तु निहतो भ्राता तदा रामो न मानुषः।
यदैव नगरीं लङ्कां दुष्प्रवेशां सुरैरपि॥ **6.111.17**॥ 4961

प्रविष्टो हनुमान् वीर्यात् तदैव व्यथिता वयम्।
क्रियतामविरोधश्च राघवेणेति यन्मया॥ **6.111.18**॥ 4962

उच्यमानो न गृह्णासि तस्येयं व्युष्टिरागता।
अकस्माच्चाभिकामोऽसि सीतां राक्षसपुङ्गव॥ **6.111.19**॥ 4963

ऐश्वर्यस्य विनाशाय देहस्य स्वजनस्य च।
अरुन्धत्या विशिष्टां तां रोहिण्याश्चापि दुर्मते॥ **6.111.20**॥ 4964

सीतां धर्षयता मान्यां त्वया ह्यसदृशं कृतम्।
वसुधाया हि वसुधां श्रियाः श्रीं भर्तृवत्सलाम्॥ **6.111.21**॥ 4965

सीतां सर्वानवद्याङ्गीमरण्ये विजने शुभाम्।
आनयित्वा तु तां दीनां छद्मनाऽऽत्मस्वदूषणम्॥ **6.111.22**॥ 4966

अप्राप्य तं चैव कामं मैथिलीसङ्गमे कृतम्।
पतिव्रतायास्तपसा नूनं दग्धोऽसि मे प्रभो॥ **6.111.23**॥ 4967

तदैव यन्न दग्धस्त्वं धर्षयंस्तनुमध्यमाम्।
देवा बिभ्यति ते सर्वे सेन्द्राः साग्निपुरोगमाः॥ **6.111.24**॥ 4968

अवश्यमेव लभते फलं पापस्य कर्मणः।
भर्तः पर्यागते काले कर्ता नास्त्यत्र संशयः॥ **6.111.25**॥ 4969

शुभकृच्छुभमाप्नोति पापकृत् पापमश्नुते।
विभीषणः सुखं प्राप्तस्त्वं प्राप्तः पापमीदृशम्॥ **6.111.26**॥ 4970

सन्त्यन्याः प्रमदास्तुभ्यं रूपेणाभ्यधिकास्ततः।
अनङ्गवशमापन्नस्त्वं तु मोहान्न बुद्ध्यसे॥ **6.111.27**॥ 4971

न कुलेन न रूपेण न दाक्षिण्येन मैथिली।
मयाधिका वा तुल्या वा तत् तु मोहान्न बुद्ध्यसे॥ **6.111.28**॥ 4972

सर्वदा सर्वभूतानां नास्ति मृत्युरलक्षणः।
तव तद्धृदयं मृत्युर्मैथिलीकृतलक्षणः॥ **6.111.29**॥ 4973

सीतानिमित्तजो मृत्युस्त्वया दूरादुपाहृतः।
मैथिली सह रामेण विशोका विहरिष्यति॥ **6.111.30**॥ 4974

अल्पपुण्या त्वहं घोरे पतिता शोकसागरे।
कैलासे मन्दरे मेरौ तथा चैत्ररथे वने॥ **6.111.31**॥ 4975

देवोद्यानेषु सर्वेषु विहृत्य सहिता त्वया।
विमानेनानुरूपेण या याम्यतुलया श्रिया॥ **6.111.32**॥ 4976

पश्यन्ती विविधान् देशांस्तांस्तांश्चित्रस्रगम्बरा।
भ्रंशिता कामभोगेभ्यः सास्मि वीर वधात् तव॥ **6.111.33**॥ 4977

सैवान्येवास्मि संवृत्ता धिग्राज्ञां चञ्चलां श्रियम्।
हा राजन् सुकुमारं ते सुभ्रु सुत्वक्समुन्नसम्॥ **6.111.34**॥ 4978

कान्तिश्रीद्युतिभिस्तुल्यमिन्दुपद्मदिवाकरैः।
किरीटकूटोज्ज्वलितं ताम्रास्यं दीप्तकुण्डलम्॥ **6.111.35**॥ 4979

मदव्याकुललोलाक्षं भूत्वा यत्पानभूमिषु।
विविधस्रग्धरं चारु वल्गुस्मितकथं शुभम्॥ **6.111.36**॥ 4980

तदेवाद्य तवैवं हि वक्त्रं न भ्राजते प्रभो।
रामसायकनिर्भिन्नं रक्तं रुधिरविस्रवैः॥ **6.111.37**॥ 4981

विशीर्णमेदोमस्तिष्कं रूक्षं स्यन्दनरेणुभिः।
हा पश्चिमा मे सम्प्राप्ता दशा वैधव्यदायिनी॥ **6.111.38**॥ 4982

या मयाऽऽसीन्न सम्बुद्धा कदाचिदपि मन्दया।
पिता दानवराजो मे भर्ता मे राक्षसेश्वरः॥ **6.111.39**॥ 4983

पुत्रो मे शक्रनिर्जेता इत्यहं गर्विता भृशम्।
दृप्तारिमथनाः क्रूराः प्रख्यातबलपौरुषाः॥ **6.111.40**॥ 4984

अकुतश्चिद्भया नाथा ममेत्यासीन्मतिर्ध्रुवा।
तेषामेवम्प्रभावाणां युष्माकं राक्षसर्षभाः॥ **6.111.41**॥ 4985

कथं भयमसम्बुद्धं मानुषादिदमागतम्।
स्निग्धेन्द्रनीलनीलं तु प्रांशुशैलोपमं महत्॥ **6.111.42**॥ 4986

केयूराङ्गदवैदूर्यमुक्ताहारस्रगुज्ज्वलम्।
कान्तं विहारेष्वधिकं दीप्तं सङ्ग्रामभूमिषु॥ **6.111.43**॥ 4987

भात्याभरणभाभिर्यद् विद्युद्भिरिव तोयदः।
तदेवाद्य शरीरं ते तीक्ष्णैर्नैकशरैश्चितम्॥ **6.111.44**॥ 4988

पुनर्दुर्लभसंस्पर्शं परिष्वक्तुं न शक्यते।
श्वाविधः शललैर्यद्वद् बाणैर्लग्नैर्निरन्तरम्॥ **6.111.45**॥ 4989

स्वर्पितैर्मर्मसु भृशं सञ्छिन्नस्नायुबन्धनम्।
क्षितौ निपतितं राजन् श्यामं वै रुधिरच्छवि॥ **6.111.46**॥ 4990

वज्रप्रहाराभिहतो विकीर्ण इव पर्वतः।
हा स्वप्नः सत्यमेवेदं त्वं रामेण कथं हतः॥ **6.111.47**॥ 4991

त्वं मृत्योरपि मृत्युः स्याः कथं मृत्युवशं गतः।
त्रैलोक्यवसुभोक्तारं त्रैलोक्योद्वेगदं महत्॥ **6.111.48**॥ 4992

जेतारं लोकपालानां क्षेप्तारं शङ्करस्य च।
दृप्तानां निग्रहीतारमाविष्कृतपराक्रमम्॥ **6.111.49**॥ 4993

लोकक्षोभयितारं च साधुभूतविदारणम्।
ओजसा दृप्तवाक्यानां वक्तारं रिपुसन्निधौ॥ **6.111.50**॥ 4994

स्वयूथभृत्यगोप्तारं हन्तारं भीमकर्मणाम्।
हन्तारं दानवेन्द्राणां यक्षाणां च सहस्रशः॥ **6.111.51**॥ 4995

निवातकवचानां तु निग्रहीतारमाहवे।
नैकयज्ञविलोप्तारं त्रातारं स्वजनस्य च॥ **6.111.52**॥ 4996

धर्मव्यवस्थाभेत्तारं मायास्रष्टारमाहवे।
देवासुरनृकन्यानामाहर्तारं ततस्ततः॥ **6.111.53**॥ 4997

शत्रुस्त्रीशोकदातारं नेतारं स्वजनस्य च।
लङ्काद्वीपस्य गोप्तारं कर्तारं भीमकर्मणाम्॥ **6.111.54**॥ 4998

अस्माकं कामभोगानां दातारं रथिनां वरम्।
एवम्प्रभावं भर्तारं दृष्ट्वा रामेण पातितम्॥ **6.111.55**॥ 4999

स्थिरास्मि या देहमिमं धारयामि हतप्रिया।
शयनेषु महार्हेषु शयित्वा राक्षसेश्वर॥ **6.111.56**॥ 5000

इह कस्मात् प्रसुप्तोऽसि धरण्यां रेणुगुण्ठितः।
यदा मे तनयः शस्तो लक्ष्मणेनेन्द्रजिद् युधि॥ **6.111.57**॥ 5001

तदा त्वभिहता तीव्रमद्य त्वस्मिन् निपातिता।
साहं बन्धुजनैर्हीना हीना नाथेन च त्वया॥ **6.111.58**॥ 5002

विहीना कामभोगैश्च शोचिष्ये शाश्वतीः समाः।
प्रपन्नो दीर्घमध्वानं राजन्नद्य सुदुर्गमम्॥ **6.111.59**॥ 5003

नय मामपि दुःखार्तां न वर्तिष्ये त्वया विना।
कस्मात् त्वं मां विहायेह कृपणां गन्तुमिच्छसि॥ **6.111.60**॥ 5004

दीनां विलपतीं मन्दां किं च मां नाभिभाषसे।
दृष्ट्वा न खल्वभिक्रुद्धो मामिहानवगुण्ठिताम्॥ **6.111.61**॥ 5005

निर्गतां नगरद्वारात् पद्भ्यामेवागतां प्रभो।
पश्येष्टदार दारांस्ते भ्रष्टलज्जावगुण्ठनान्॥ **6.111.62**॥ 5006

बहिर्निष्पतितान् सर्वान् कथं दृष्ट्वा न कुप्यसि।
अयं क्रीडासहायस्तेऽनाथो लालप्यते जनः॥ **6.111.63**॥ 5007

न चैनमाश्वासयसि किं वा न बहुमन्यसे।
यास्त्वया विधवा राजन् कृता नैकाः कुलस्त्रियः॥ **6.111.64**॥ 5008

पतिव्रता धर्मरता गुरुशुश्रूषणे रताः।
ताभिः शोकाभितप्ताभिः शप्तः परवशं गतः॥ **6.111.65**॥ 5009

त्वया विप्रकृताभिश्च तदा शप्तस्तदागतम्।
प्रवादः सत्यमेवायं त्वां प्रति प्रायशो नृप॥ **6.111.66**॥ 5010

पतिव्रतानां नाकस्मात् पतन्त्यश्रूणि भूतले।
कथं च नाम ते राजन् लोकानाक्रम्य तेजसा॥ **6.111.67**॥ 5011

नारीचौर्यमिदं क्षुद्रं कृतं शौण्डीर्यमानिना।
अपनीयाश्रमाद् रामं यन्मृगच्छद्मना त्वया॥ **6.111.68**॥ 5012

आनीता रामपत्नी सा अपनीय च लक्ष्मणम्।
कातर्यं च न ते युद्धे कदाचित् संस्मराम्यहम्॥ **6.111.69**॥ 5013

तत् तु भाग्यविपर्यासान्नूनं ते पक्वलक्षणम्।
अतीतानागतार्थज्ञो वर्तमानविचक्षणः॥ **6.111.70**॥ 5014

मैथिलीमाहृतां दृष्ट्वा ध्यात्वा निःश्वस्य चायतम्।
सत्यवाक् स महाबाहो देवरो मे यदब्रवीत्॥ **6.111.71**॥ 5015

अयं राक्षसमुख्यानां विनाशः प्रत्युपस्थितः।
कामक्रोधसमुत्थेन व्यसनेन प्रसङ्गिना॥ **6.111.72**॥ 5016

निवृत्तस्त्वत्कृतेनार्थः सोऽयं मूलहरो महान्।
त्वया कृतमिदं सर्वमनाथं राक्षसं कुलम्॥ **6.111.73**॥ 5017

नहि त्वं शोचितव्यो मे प्रख्यातबलपौरुषः।
स्त्रीस्वभावात् तु मे बुद्धिः कारुण्ये परिवर्तते॥ **6.111.74**॥ 5018

सुकृतं दुष्कृतं च त्वं गृहीत्वा स्वां गतिं गतः।
आत्मानमनुशोचामि त्वद्विनाशेन दुःखिताम्॥ **6.111.75**॥ 5019

सुहृदां हितकामानां न श्रुतं वचनं त्वया।
भ्रातॄणां चैव कात्स्न्र्येन हितमुक्तं दशानन॥ **6.111.76**॥ 5020

हेत्वर्थयुक्तं विधिवच्छ्रेयस्करमदारुणम्।
विभीषणेनाभिहितं न कृतं हेतुमत् त्वया॥ **6.111.77**॥ 5021

मारीचकुम्भकर्णाभ्यां वाक्यं मम पितुस्तथा।
न कृतं वीर्यमत्तेन तस्येदं फलमीदृशम्॥ **6.111.78**॥ 5022

नीलजीमूतसङ्काश पीताम्बर शुभाङ्गद।
स्वगात्राणि विनिक्षिप्य किं शेषे रुधिरावृतः॥ **6.111.79**॥ 5023

प्रसुप्त इव शोकार्तां किं मां न प्रतिभाषसे।
महावीर्यस्य दक्षस्य संयुगेष्वपलायिनः॥ **6.111.80**॥ 5024

यातुधानस्य दौहित्रीं किं मां न प्रतिभाषसे।
उत्तिष्ठोत्तिष्ठ किं शेषे नवे परिभवे कृते॥ **6.111.81**॥ 5025

अद्य वै निर्भया लङ्कां प्रविष्टाः सूर्यरश्मयः।
येन सूदयसे शत्रून् समरे सूर्यवर्चसा॥ **6.111.82**॥ 5026

वज्रं वज्रधरस्येव सोऽयं ते सततार्चितः।
रणे बहुप्रहरणो हेमजालपरिष्कृतः॥ **6.111.83**॥ 5027

परिघो व्यवकीर्णस्ते बाणैश्छिन्नः सहस्रधा।
प्रियामिवोपसङ्गृह्य किं शेषे रणमेदिनीम्॥ **6.111.84**॥ 5028

अप्रियामिव कस्माच्च मां नेच्छस्यभिभाषितुम्।
धिगस्तु हृदयं यस्या ममेदं न सहस्रधा॥ **6.111.85**॥ 5029

त्वयि पञ्चत्वमापन्ने फलते शोकपीडितम्।
इत्येवं विलपन्ती सा बाष्पपर्याकुलेक्षणा॥ **6.111.86**॥ 5030

स्नेहोपस्कन्नहृदया तदा मोहमुपागमत्।
कश्मलाभिहता सन्ना बभौ सा रावणोरसि॥ **6.111.87**॥ 5031

सन्ध्यानुरक्ते जलदे दीप्ता विद्युदिवोज्ज्वला।
तथागतां समुत्थाप्य सपत्न्यस्तां भृशातुराः॥ **6.111.88**॥ 5032

पर्यवस्थापयामासू रुदत्यो रुदतीं भृशम्।
किं ते न विदिता देवि लोकानां स्थितिरध्रुवा॥ **6.111.89**॥ 5033

दशाविभागपर्याये राज्ञां वै चञ्चलाः श्रियः।
इत्येवमुच्यमाना सा सशब्दं प्ररुरोद ह॥ **6.111.90**॥ 5034

स्नपयन्ती तदास्रेण स्तनौ वक्त्रं सुनिर्मलम्।
एतस्मिन्नन्तरे रामो विभीषणमुवाच ह॥ **6.111.91**॥ 5035

संस्कारः क्रियतां भ्रातुः स्त्रीगणः परिसान्त्व्यताम्।
तमुवाच ततो धीमान् विभीषण इदं वचः॥ **6.111.92**॥ 5036

विमृश्य बुद्ध्या प्रश्रितं धर्मार्थसहितं हितम्।
त्यक्तधर्मव्रतं क्रूरं नृशंसमनृतं तथा॥ **6.111.93**॥ 5037

नाहमर्हामि संस्कर्तुं परदाराभिमर्शनम्।
भ्रातृरूपो हि मे शत्रुरेष सर्वाहिते रतः॥ **6.111.94**॥ 5038

रावणो नार्हते पूजां पूज्योऽपि गुरुगौरवात्।
नृशंस इति मां राम वक्ष्यन्ति मनुजा भुवि॥ **6.111.95**॥ 5039

श्रुत्वा तस्यागुणान् सर्वे वक्ष्यन्ति सुकृतं पुनः।
तच्छ्रुत्वा परमप्रीतो रामो धर्मभृतां वरः॥ **6.111.96**॥ 5040

विभीषणमुवाचेदं वाक्यज्ञं वाक्यकोविदः।
तवापि मे प्रियं कार्यं त्वत्प्रभावान्मया जितम्॥ **6.111.97**॥ 5041

अवश्यं तु क्षमं वाच्यो मया त्वं राक्षसेश्वर।
अधर्मानृतसंयुक्तः कामं त्वेष निशाचरः॥ **6.111.98**॥ 5042

तेजस्वी बलवाञ्छूरः सङ्ग्रामेषु च नित्यशः।
शतक्रतुमुखैर्देवैः श्रूयते न पराजितः॥ **6.111.99**॥ 5043

महात्मा बलसम्पन्नो रावणो लोकरावणः।
मरणान्तानि वैराणि निर्वृत्तं नः प्रयोजनम्॥ **6.111.100**॥ 5044

क्रियतामस्य संस्कारो ममाप्येष यथा तव।
त्वत्सकाशान्महाबाहो संस्कारं विधिपूर्वकम्॥ **6.111.101**॥ 5045

क्षिप्रमर्हति धर्मेण त्वं यशोभाग् भविष्यसि।
राघवस्य वचः श्रुत्वा त्वरमाणो विभीषणः॥ **6.111.102**॥ 5046

संस्कारयितुमारेभे भ्रातरं रावणं हतम्।
स प्रविश्य पुरीं लङ्कां राक्षसेन्द्रो विभीषणः॥ **6.111.103**॥ 5047

रावणस्याग्निहोत्रं तु निर्यापयति सत्वरम्।
शकटान् दारुरूपाणि अग्नीन् वै याजकांस्तथा॥ **6.111.104**॥ 5048

तथा चन्दनकाष्ठानि काष्ठानि विविधानि च।
अगरूणि सुगन्धीनि गन्धांश्च सुरभींस्तथा॥ **6.111.105**॥ 5049

मणिमुक्ताप्रवालानि निर्यापयति राक्षसः।
आजगाम मुहूर्तेन राक्षसैः परिवारितः॥ **6.111.106**॥ 5050

ततो माल्यवता सार्धं क्रियामेव चकार सः।
सौवर्णीं शिबिकां दिव्यामारोप्य क्षौमवाससम्॥ **6.111.107**॥ 5051

रावणं राक्षसाधीशमश्रुवर्णमुखा द्विजाः।
तूर्यघोषैश्च विविधैः स्तुवद्भिश्चाभिनन्दितम्॥ **6.111.108**॥ 5052

पताकाभिश्च चित्राभिः सुमनोभिश्च चित्रिताम्।
उत्क्षिप्य शिबिकां तां तु विभीषणपुरोगमाः॥ **6.111.109**॥ 5053

दक्षिणाभिमुखाः सर्वे गृह्य काष्ठानि भेजिरे।
अग्नयो दीप्यमानास्ते तदाध्वर्युसमीरिताः॥ **6.111.110**॥ 5054

शरणाभिगताः सर्वे पुरस्तात् तस्य ते ययुः।
अन्तःपुराणि सर्वाणि रुदमानानि सत्वरम्॥ **6.111.111**॥ 5055

पृष्ठतोऽनुययुस्तानि प्लवमानानि सर्वतः।
रावणं प्रयते देशे स्थाप्य ते भृशदुःखिताः॥ **6.111.112**॥ 5056

चितां चन्दनकाष्ठैश्च पद्मकोशीरचन्दनैः।
ब्राह्म्या संवर्तयामासू राङ्कवास्तरणावृताम्॥ **6.111.113**॥ 5057

प्रचक्रू राक्षसेन्द्रस्य पितृमेधमनुत्तमम्।
वेदिं च दक्षिणाप्राचीं यथास्थानं च पावकम्॥ **6.111.114**॥ 5058

पृषदाज्येन सम्पूर्णं स्रुवं स्कन्धे प्रचिक्षिपुः।
पादयोः शकटं प्रापुरूर्वोश्चोलूखलं तदा॥ **6.111.115**॥ 5059

दारुपात्राणि सर्वाणि अरणिं चोत्तरारणिम्।
दत्त्वा तु मुसलं चान्यं यथास्थानं विचक्रमुः॥ **6.111.116**॥ 5060

शास्त्रदृष्टेन विधिना महर्षिविहितेन च।
तत्र मेध्यं पशुं हत्वा राक्षसेन्द्रस्य राक्षसाः॥ **6.111.117**॥ 5061

परिस्तरणिकां राज्ञो घृताक्तां समवेशयन्।
गन्धैर्माल्यैरलङ्कृत्य रावणं दीनमानसाः॥ **6.111.118**॥ 5062

विभीषणसहायास्ते वस्त्रैश्च विविधैरपि।
लाजैरवकिरन्ति स्म बाष्पपूर्णमुखास्तथा॥ **6.111.119**॥ 5063

स ददौ पावकं तस्य विधियुक्तं विभीषणः।
स्नात्वा चैवार्द्रवस्त्रेण तिलान् दर्भविमिश्रितान्॥ **6.111.120**॥ 5064

उदकेन च सम्मिश्रान् प्रदाय विधिपूर्वकम्।
ताः स्त्रियोऽनुनयामास सान्त्वयित्वा पुनः पुनः॥ **6.111.121**॥ 5065

गम्यतामिति ताः सर्वा विविशुर्नगरं ततः।
प्रविष्टासु पुरीं स्त्रीषु राक्षसेन्द्रो विभीषणः।
रामपार्श्वमुपागम्य समतिष्ठद् विनीतवत्॥ **6.111.122**॥ 5066

रामोऽपि सह सैन्येन ससुग्रीवः सलक्ष्मणः।
हर्षं लेभे रिपुं हत्वा वृत्रं वज्रधरो यथा॥ **6.111.123**॥ 5067

ततो विमुक्त्वा सशरं शरासनं
महेन्द्रदत्तं कवचं स तन्महत्।
विमुच्य रोषं रिपुनिग्रहात् ततो
रामः स सौम्यत्वमुपागतोऽरिहा॥ **6.111.124**॥ 5068

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
एकादशाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वादशाधिकशततमः सर्गः ॥

विभीषणस्य राज्याभिषेकः श्रीरामेण हनुमद्द्वारा सीतां प्रति सन्देशस्य प्रेषणम्

ते रावणवधं दृष्ट्वा देवगन्धर्वदानवाः।
जग्मुः स्वैः स्वैर्विमानैस्ते कथयन्तः शुभाः कथाः॥ **6.112.1** ॥ 5069

रावणस्य वधं घोरं राघवस्य पराक्रमम्।
सुयुद्धं वानराणां च सुग्रीवस्य च मन्त्रितम्॥ **6.112.2** ॥ 5070

अनुरागं च वीर्यं च मारुतेर्लक्ष्मणस्य च।
पतिव्रतात्वं सीताया हनूमति पराक्रमम्॥ **6.112.3** ॥ 5071

कथयन्तो महाभागा जग्मुर्हृष्टा यथागतम्।
राघवस्तु रथं दिव्यमिन्द्रदत्तं शिखिप्रभम्॥ **6.112.4** ॥ 5072

अनुज्ञाप्य महाबाहुर्मातलिं प्रत्यपूजयत्।
राघवेणाभ्यनुज्ञातो मातलिः शक्रसारथिः॥ **6.112.5** ॥ 5073

दिव्यं तं रथमास्थाय दिवमेवोत्पपात ह।
तस्मिंस्तु दिवमारूढे सरथे रथिनां वरः॥ **6.112.6** ॥ 5074

राघवः परमप्रीतः सुग्रीवं परिषस्वजे।
परिष्वज्य च सुग्रीवं लक्ष्मणेनाभिवादितः॥ **6.112.7** ॥ 5075

पूज्यमानो हरिगणैराजगाम बलालयम्।
अथोवाच स काकुत्स्थः समीपपरिवर्तिनम्॥ **6.112.8**॥ 5076

सौमित्रिं सत्त्वसम्पन्नं लक्ष्मणं दीप्ततेजसम्।
विभीषणमिमं सौम्य लङ्कायामभिषेचय॥ **6.112.9**॥ 5077

अनुरक्तं च भक्तं च तथा पूर्वोपकारिणम्।
एष मे परमः कामो यदिमं रावणानुजम्॥ **6.112.10**॥ 5078

लङ्कायां सौम्य पश्येयमभिषिक्तं विभीषणम्।
एवमुक्तस्तु सौमित्री राघवेण महात्मना॥ **6.112.11**॥ 5079

तथेत्युक्त्वा सुसंहृष्टः सौवर्णं घटमाददे।
तं घटं वानरेन्द्राणां हस्ते दत्त्वा मनोजवान्॥ **6.112.12**॥ 5080

व्यादिदेश महासत्त्वान् समुद्रसलिलं तदा।
अतिशीघ्रं ततो गत्वा वानरास्ते मनोजवाः॥ **6.112.13**॥ 5081

आगतास्तु जलं गृह्य समुद्राद् वानरोत्तमाः।
ततस्त्वेकं घटं गृह्य संस्थाप्य परमासने॥ **6.112.14**॥ 5082

घटेन तेन सौमित्रिरभ्यषिञ्चद् विभीषणम्।
लङ्कायां रक्षसां मध्ये राजानं रामशासनात्॥ **6.112.15**॥ 5083

विधिना मन्त्रदृष्टेन सुहृद्गणसमावृतम्।
अभ्यषिञ्चस्तदा सर्वे राक्षसा वानरास्तथा॥ **6.112.16**॥ 5084

प्रहर्षमतुलं गत्वा तुष्टुवू राममेव हि।
तस्यामात्या जहृषिरे भक्ता ये चास्य राक्षसाः॥ **6.112.17**॥ 5085

दृष्ट्वाभिषिक्तं लङ्कायां राक्षसेन्द्रं विभीषणम्।
राघवः परमां प्रीतिं जगाम सहलक्ष्मणः॥ **6.112.18**॥ 5086

स तद् राज्यं महत् प्राप्य रामदत्तं विभीषणः।
सान्त्वयित्वा प्रकृतयस्ततो राममुपागमत्॥ **6.112.19**॥ 5087

दध्यक्षतान् मोदकांश्च लाजाः सुमनसस्तथा।
आजह्रुरथ संहृष्टाः पौरास्तस्मै निशाचराः॥ **6.112.20**॥ 5088

स तान् गृहीत्वा दुर्धर्षो राघवाय न्यवेदयत्।
मङ्गल्यं मङ्गलं सर्वं लक्ष्मणाय च वीर्यवान्॥ **6.112.21**॥ 5089

कृतकार्यं समृद्धार्थं दृष्ट्वा रामो विभीषणम्।
प्रतिजग्राह तत् सर्वं तस्यैव प्रतिकाम्यया॥ **6.112.22**॥ 5090

ततः शैलोपमं वीरं प्राञ्जलिं प्रणतं स्थितम्।
उवाचेदं वचो रामो हनूमन्तं प्लवङ्गमम्॥ **6.112.23**॥ 5091

अनुज्ञाप्य महाराजमिमं सौम्य विभीषणम्।
प्रविश्य नगरीं लङ्कां कौशलं ब्रूहि मैथिलीम्॥ **6.112.24**॥ 5092

वैदेह्यै मां च कुशलं सुग्रीवं च सलक्ष्मणम्।
आचक्ष्व वदतां श्रेष्ठ रावणं च हतं रणे॥ **6.112.25**॥ 5093

प्रियमेतदिहाख्याहि वैदेह्यास्त्वं हरीश्वर।
प्रतिगृह्य तु सन्देशमुपावर्तितुमर्हसि॥ **6.112.26**॥ 5094

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
द्वादशाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रयोदशाधिकशततमः सर्गः ॥

सीतया सह संलप्य निवृत्तेन हनुमता श्रीरामं प्रति तस्याः सन्देशस्य श्रावणम्

इति प्रतिसमादिष्टो हनूमान् मारुतात्मजः।
प्रविवेश पुरीं लङ्कां पूज्यमानो निशाचरैः॥ **6.113.1** ॥ 5095

प्रविश्य च पुरीं लङ्कामनुज्ञाप्य विभीषणम्।
ततस्तेनाभ्यनुज्ञातो हनूमान् वृक्षवाटिकाम्॥ **6.113.2** ॥ 5096

सम्प्रविश्य यथान्यायं सीताया विदितो हरिः।
ददर्श मृजया हीनां सातङ्कां रोहिणीमिव॥ **6.113.3** ॥ 5097

वृक्षमूले निरानन्दां राक्षसीभिः परीवृताम्।
निभृतः प्रणतः प्रह्वः सोऽभिगम्याभिवाद्य च॥ **6.113.4** ॥ 5098

दृष्ट्वा तमागतं देवी हनूमन्तं महाबलम्।
तूष्णीमास्त तदा दृष्ट्वा स्मृत्वा हृष्टाभवत् तदा॥ **6.113.5** ॥ 5099

सौम्यं तस्या मुखं दृष्ट्वा हनूमान् प्लवगोत्तमः।
रामस्य वचनं सर्वमाख्यातुमुपचक्रमे॥ **6.113.6** ॥ 5100

वैदेहि कुशली रामः सहसुग्रीवलक्ष्मणः।
कुशलं चाह सिद्धार्थो हतशत्रुरमित्रजित्॥ **6.113.7** ॥ 5101

विभीषणसहायेन रामेण हरिभिः सह।
निहतो रावणो देवि लक्ष्मणेन च वीर्यवान्॥ **6.113.8**॥ 5102

प्रियमाख्यामि ते देवि भूयश्च त्वां सभाजये।
तव प्रभावाद् धर्मज्ञे महान् रामेण संयुगे॥ **6.113.9**॥ 5103

लब्धोऽयं विजयः सीते स्वस्था भव गतज्वरा।
रावणश्च हतः शत्रुर्लङ्का चैव वशीकृता॥ **6.113.10**॥ 5104

मया ह्यलब्धनिद्रेण धृतेन तव निर्जये।
प्रतिज्ञैषा विनिस्तीर्णा बद्ध्वा सेतुं महोदधौ॥ **6.113.11**॥ 5105

सभ्रमश्च न कर्तव्यो वर्तन्त्या रावणालये।
विभीषणविधेयं हि लङ्कैश्वर्यमिदं कृतम्॥ **6.113.12**॥ 5106

तदाश्वसिहि विस्रब्धं स्वगृहे परिवर्तसे।
अयं चाभ्येति संहृष्टस्त्वद्दर्शनसमुत्सुकः॥ **6.113.13**॥ 5107

एवमुक्ता तु सा देवी सीता शशिनिभानना।
प्रहर्षेणावरुद्धा सा व्याहर्तुं न शशाक ह॥ **6.113.14**॥ 5108

ततोऽब्रवीद्धरिवरः सीतामप्रतिजल्पतीम्।
किं त्वं चिन्तयसे देवि किं च मां नाभिभाषसे॥ **6.113.15**॥ 5109

एवमुक्ता हनुमता सीता धर्मपथे स्थिता।
अब्रवीत् परमप्रीता बाष्पगद्गदया गिरा॥ **6.113.16**॥ 5110

प्रियमेतदुपश्रुत्य भर्तुर्विजयसंश्रितम्।
प्रहर्षवशमापन्ना निर्वाक्यास्मि क्षणान्तरम्॥ **6.113.17**॥ 5111

नहि पश्यामि सदृशं चिन्तयन्ती प्लवङ्गम।
आख्यानकस्य भवतो दातुं प्रत्यभिनन्दनम्॥ **6.113.18**॥ 5112

न हि पश्यामि तत् सौम्य पृथिव्यामपि वानर।
सदृशं यत्प्रियाख्याने तव दत्त्वा भवेत् सुखम्॥ **6.113.19**॥ 5113

हिरण्यं वा सुवर्णं वा रत्नानि विविधानि च।
राज्यं वा त्रिषु लोकेषु एतन्नार्हति भाषितम्॥ **6.113.20**॥ 5114

एवमुक्तस्तु वैदेह्या प्रत्युवाच प्लवङ्गमः।
प्रगृहीताञ्जलिर्हर्षात् सीतायाः प्रमुखे स्थितः॥ **6.113.21**॥ 5115

भर्तुः प्रियहिते युक्ते भर्तुर्विजयकाङ्क्षिणि।
स्निग्धमेवंविधं वाक्यं त्वमेवार्हस्यनिन्दिते॥ **6.113.22**॥ 5116

तवैतद् वचनं सौम्ये सारवत् स्निग्धमेव च।
रत्नौघाद् विविधाच्चापि देवराज्याद् विशिष्यते॥ **6.113.23**॥ 5117

अर्थतश्च मया प्राप्ता देवराज्यादयो गुणाः।
हतशत्रुं विजयिनं रामं पश्यामि सुस्थितम्॥ **6.113.24**॥ 5118

तस्य तद् वचनं श्रुत्वा मैथिली जनकात्मजा।
ततः शुभतरं वाक्यमुवाच पवनात्मजम्॥ **6.113.25**॥ 5119

अतिलक्षणसम्पन्नं माधुर्यगुणभूषणम्।
बुद्ध्या ह्यष्टाङ्गया युक्तं त्वमेवार्हसि भाषितुम्॥ **6.113.26**॥ 5120

श्लाघनीयोऽनिलस्य त्वं सुतः परमधार्मिकः।
बलं शौर्यं श्रुतं सत्त्वं विक्रमो दाक्ष्यमुत्तमम्॥ **6.113.27**॥ 5121

तेजः क्षमा धृतिः स्थैर्यं विनीतत्वं न संशयः।
एते चान्ये च बहवो गुणास्त्वय्येव शोभनाः॥ **6.113.28**॥ 5122

अथोवाच पुनः सीतामसम्भ्रान्तो विनीतवत्।
प्रगृहीताञ्जलिर्हर्षात् सीतायाः प्रमुखे स्थितः॥ **6.113.29**॥ 5123

इमास्तु खलु राक्षस्यो यदि त्वमनुमन्यसे।
हन्तुमिच्छामि ताः सर्वा याभिस्त्वं तर्जिता पुरा॥ **6.113.30**॥ 5124

क्लिश्यन्तीं पतिदेवां त्वामशोकवनिकां गताम्।
घोररूपसमाचाराः क्रूराः क्रूरतरेक्षणाः॥ **6.113.31**॥ 5125

इह श्रुता मया देवि राक्षस्यो विकृताननाः।
असकृत्परुषैर्वाक्यैर्वदन्त्यो रावणाज्ञया॥ **6.113.32**॥ 5126

विकृता विकृताकाराः क्रूराः क्रूरकचेक्षणाः।
इच्छामि विविधैर्घातैर्हन्तुमेताः सुदारुणाः॥ **6.113.33**॥ 5127

राक्षस्यो दारुणकथा वरमेतत् प्रयच्छ मे।
मुष्टिभिः पार्ष्णिघातैश्च विशालैश्चैव बाहुभिः॥ **6.113.34**॥ 5128

जङ्घाजानुप्रहारैश्च दन्तानां चैव पीडनैः।
कर्तनैः कर्णनासानां केशानां लुञ्चनैस्तथा॥ **6.113.35**॥ 5129

निपात्य हन्तुमिच्छामि तव विप्रियकारिणीः।
एवं प्रहारैर्बहुभिः सम्प्रहार्य यशस्विनि॥ **6.113.36**॥ 5130

घातये तीव्ररूपाभिर्याभिस्त्वं तर्जिता पुरा।
इत्युक्ता सा हनुमता कृपणा दीनवत्सला॥ **6.113.37**॥ 5131

हनूमन्तमुवाचेदं चिन्तयित्वा विमृश्य च।
राजसंश्रयवश्यानां कुर्वतीनां पराज्ञया॥ **6.113.38**॥ 5132

विधेयानां च दासीनां कः कुप्येद् वानरोत्तम।
भाग्यवैषम्यदोषेण पुरस्ताद्दुष्कृतेन च॥ **6.113.39**॥ 5133

मयैतत् प्राप्यते सर्वं स्वकृतं ह्युपभुज्यते।
मैवं वद महाबाहो दैवी ह्येषा परा गतिः॥ **6.113.40**॥ 5134

प्राप्तव्यं तु दशायोगान्मयैतदिति निश्चितम्।
दासीनां रावणस्याहं मर्षयामीह दुर्बला॥ **6.113.41**॥ 5135

आज्ञप्ता राक्षसेनेह राक्षस्यस्तर्जयन्ति माम्।
हते तस्मिन् न कुर्वन्ति तर्जनं मारुतात्मज॥ **6.113.42**॥ 5136

अयं व्याघ्रसमीपे तु पुराणो धर्मसंहितः।
ऋक्षेण गीतः श्लोकोऽस्ति तं निबोध प्लवङ्गम॥ **6.113.43**॥ 5137

न परः पापमादत्ते परेषां पापकर्मणाम्।
समयो रक्षितव्यस्तु सन्तश्चारित्रभूषणाः॥ **6.113.44**॥ 5138

पापानां वा शुभानां वा वधार्हाणामथापि वा।
कार्यं कारुण्यमार्येण न कश्चिन्नापराध्यति॥ **6.113.45**॥ 5139

लोकहिंसाविहाराणां क्रूराणां पापकर्मणाम्।
कुर्वतामपि पापानि नैव कार्यमशोभनम्॥ **6.113.46**॥ 5140

एवमुक्तस्तु हनुमान् सीतया वाक्यकोविदः।
प्रत्युवाच ततः सीतां रामपत्नीमनिन्दिताम्॥ **6.113.47**॥ 5141

युक्ता रामस्य भवती धर्मपत्नी गुणान्विता।
प्रतिसन्दिश मां देवि गमिष्ये यत्र राघवः॥ **6.113.48**॥ 5142

एवमुक्ता हनुमता वैदेही जनकात्मजा।
साब्रवीद् द्रष्टुमिच्छामि भर्तारं भक्तवत्सलम्॥ **6.113.49**॥ 5143

तस्यास्तद् वचनं श्रुत्वा हनूमान् मारुतात्मजः।
हर्षयन् मैथिलीं वाक्यमुवाचेदं महामतिः॥ **6.113.50**॥ 5144

पूर्णचन्द्रमुखं रामं द्रक्ष्यस्यद्य सलक्ष्मणम्।
स्थितमित्रं हतामित्रं शचीवेन्द्रं सुरेश्वरम्॥ **6.113.51**॥ 5145

तामेवमुक्त्वा भ्राजन्तीं सीतां साक्षादिव श्रियम्।
आजगाम महातेजा हनूमान् यत्र राघवः॥ **6.113.52**॥ 5146

सपदि हरिवरस्ततो हनूमान्
प्रतिवचनं जनकेश्वरात्मजायाः।
कथितमकथयद् यथाक्रमेण
त्रिदशवरप्रतिमाय राघवाय॥ **6.113.53**॥ 5147

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
त्रयोदशाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्दशाधिकशततमः सर्गः ॥

श्रीरामस्याज्ञया विभीषणेन सीतायास्तत्समीप आनयनं सीताकर्तृकं प्रियतममुखचन्द्रस्य दर्शनं च

तमुवाच महाप्राज्ञः सोऽभिवाद्य प्लवङ्गमः।
रामं कमलपत्राक्षं वरं सर्वधनुष्मताम्॥ **6.114.1** ॥ 5148

यन्निमित्तोऽयमारम्भः कर्मणां यः फलोदयः।
तां देवीं शोकसन्तप्तां द्रष्टुमर्हसि मैथिलीम्॥ **6.114.2** ॥ 5149

सा हि शोकसमाविष्टा बाष्पपर्याकुलेक्षणा।
मैथिली विजयं श्रुत्वा द्रष्टुं त्वामभिकाङ्क्षति॥ **6.114.3** ॥ 5150

पूर्वकात् प्रत्ययाच्चाहमुक्तो विश्वस्तया तया।
द्रष्टुमिच्छामि भर्तारमिति पर्याकुलेक्षणा॥ **6.114.4** ॥ 5151

एवमुक्तो हनुमता रामो धर्मभृतां वरः।
आगच्छत् सहसा ध्यानमीषद्बाष्पपरिप्लुतः॥ **6.114.5** ॥ 5152

स दीर्घमभिनिःश्वस्य जगतीमवलोकयन्।
उवाच मेघसङ्काशं विभीषणमुपस्थितम्॥ **6.114.6** ॥ 5153

दिव्याङ्गरागां वैदेहीं दिव्याभरणभूषिताम्।
इह सीतां शिरःस्नातामुपस्थापय मा चिरम्॥ **6.114.7** ॥ 5154

एवमुक्तस्तु रामेण त्वरमाणो विभीषणः।
प्रविश्यान्तःपुरं सीतां स्त्रीभिः स्वाभिरचोदयत्॥ **6.114.8**॥ 5155

ततः सीतां महाभागां दृष्ट्वोवाच विभीषणः।
मूर्ध्नि बद्धाञ्जलिः श्रीमान् विनीतो राक्षसेश्वरः॥ **6.114.9**॥ 5156

दिव्याङ्गरागा वैदेहि दिव्याभरणभूषिता।
यानमारोह भद्रं ते भर्ता त्वां द्रष्टुमिच्छति॥ **6.114.10**॥ 5157

एवमुक्ता तु वैदेही प्रत्युवाच विभीषणम्।
अस्नात्वा द्रष्टुमिच्छामि भर्तारं राक्षसेश्वर॥ **6.114.11**॥ 5158

तस्यास्तद् वचनं श्रुत्वा प्रत्युवाच विभीषणः।
यथाऽऽह रामो भर्ता ते तत् तथा कर्तुमर्हसि॥ **6.114.12**॥ 5159

तस्य तद् वचनं श्रुत्वा मैथिली पतिदेवता।
भर्तृभक्त्यावृता साध्वी तथेति प्रत्यभाषत॥ **6.114.13**॥ 5160

ततः सीतां शिरःस्नातां संयुक्तां प्रतिकर्मणा।
महार्हाभरणोपेतां महार्हाम्बरधारिणीम्॥ **6.114.14**॥ 5161

आरोप्य शिबिकां दीप्तां परार्ध्याम्बरसंवृताम्।
रक्षोभिर्बहुभिर्गुप्तामाजहार विभीषणः॥ **6.114.15**॥ 5162

सोऽभिगम्य महात्मानं ज्ञात्वापि ध्यानमास्थितम्।
प्रणतश्च प्रहृष्टश्च प्राप्तां सीतां न्यवेदयत्॥ **6.114.16**॥ 5163

तामागतामुपश्रुत्य रक्षोगृहचिरोषिताम्।
रोषं हर्षं च दैन्यं च राघवः प्राप शत्रुहा॥ **6.114.17**॥ 5164

ततो यानगतां सीतां सविमर्शं विचारयन्।
विभीषणमिदं वाक्यमहृष्टो राघवोऽब्रवीत्॥ **6.114.18**॥ 5165

राक्षसाधिपते सौम्य नित्यं मद्विजये रतः।
वैदेही सन्निकर्षं मे क्षिप्रं समभिगच्छतु॥ **6.114.19**॥ 5166

तस्य तद् वचनं श्रुत्वा राघवस्य विभीषणः।
तूर्णमुत्सारणं तत्र कारयामास धर्मवित्॥ **6.114.20**॥ 5167

कञ्चुकोष्णीषिणस्तत्र वेत्रझर्झरपाणयः।
उत्सारयन्तस्तान् योधान् समन्तात् परिचक्रमुः॥ **6.114.21**॥ 5168

ऋक्षाणां वानराणां च राक्षसानां च सर्वशः।
वृन्दान्युत्सार्यमाणानि दूरमुत्तस्थुरन्ततः॥ **6.114.22**॥ 5169

तेषामुत्सार्यमाणानां निःस्वनः सुमहानभूत्।
वायुनोद्धूयमानस्य सागरस्येव निःस्वनः॥ **6.114.23**॥ 5170

उत्सार्यमाणांस्तान् दृष्ट्वा समन्ताज्जातसम्भ्रमान्।
दाक्षिण्यात्तदमर्षाच्च वारयामास राघवः॥ **6.114.24**॥ 5171

संरम्भाच्चाब्रवीद् रामश्चक्षुषा प्रदहन्निव।
विभीषणं महाप्राज्ञं सोपालम्भमिदं वचः॥ **6.114.25**॥ 5172

किमर्थं मामनादृत्य क्लिश्यतेऽयं त्वया जनः।
निवर्तयैनमुद्वेगं जनोऽयं स्वजनो मम॥ **6.114.26**॥ 5173

न गृहाणि न वस्त्राणि न प्राकारस्तिरस्क्रिया।
नेदृशा राजसत्कारा वृत्तमावरणं स्त्रियाः॥ **6.114.27**॥ 5174

व्यसनेषु न कृच्छ्रेषु न युद्धेषु स्वयंवरे।
न क्रतौ नो विवाहे वा दर्शनं दूष्यते स्त्रियाः॥ **6.114.28**॥ 5175

सैषा विपद्गता चैव कृच्छ्रेण च समन्विता।
दर्शने नास्ति दोषोऽस्या मत्समीपे विशेषतः॥ **6.114.29**॥ 5176

विसृज्य शिबिकां तस्मात् पद्भ्यामेवापसर्पतु।
समीपे मम वैदेहीं पश्यन्त्वेते वनौकसः॥ **6.114.30**॥ 5177

एवमुक्तस्तु रामेण सविमर्शो विभीषणः।
रामस्योपानयत् सीतां सन्निकर्षं विनीतवत्॥ **6.114.31**॥ 5178

ततो लक्ष्मणसुग्रीवौ हनूमांश्च प्लवङ्गमः।
निशम्य वाक्यं रामस्य बभूवुर्व्यथिता भृशम्॥ **6.114.32**॥ 5179

कलत्रनिरपेक्षैश्च इङ्गितैरस्य दारुणैः।
अप्रीतमिव सीतायां तर्कयन्ति स्म राघवम्॥ **6.114.33**॥ 5180

लज्जया त्ववलीयन्ती स्वेषु गात्रेषु मैथिली।
विभीषणेनानुगता भर्तारं साभ्यवर्तत॥ **6.114.34**॥ 5181

विस्मयाच्च प्रहर्षाच्च स्नेहाच्च पतिदेवता।
उदैक्षत मुखं भर्तुः सौम्यं सौम्यतरानना॥ **6.114.35**॥ 5182

अथ समपनुदन्मनःक्लमं सा
सुचिरमदृष्टमुदीक्ष्य वै प्रियस्य।
वदनमुदितपूर्णचन्द्रकान्तं
विमलशशाङ्कनिभानना तदाऽऽसीत्॥ **6.114.36**॥ 5183

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
चतुर्दशाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चदशाधिकशततमः सर्गः ॥

सीतायाश्चरित्रं सन्दिह्य तामनङ्गीकृत्य श्रीरामेण तां प्रत्यन्यत्र कुत्रापि गन्तुमादेशदानम्

तां तु पार्श्वे स्थितां प्रह्वां रामः सम्प्रेक्ष्य मैथिलीम्।
हृदयान्तर्गतं भावं व्याहर्तुमुपचक्रमे ॥ **6.115.1** ॥ 5184

एषासि निर्जिता भद्रे शत्रुं जित्वा रणाजिरे।
पौरुषाद् यदनुष्ठेयं मयैतदुपपादितम् ॥ **6.115.2** ॥ 5185

गतोऽस्म्यन्तममर्षस्य धर्षणा सम्प्रमार्जिता।
अवमानश्च शत्रुश्च युगपन्निहतौ मया ॥ **6.115.3** ॥ 5186

अद्य मे पौरुषं दृष्टमद्य मे सफलः श्रमः।
अद्य तीर्णप्रतिज्ञोऽहं प्रभवाम्यद्य चात्मनः ॥ **6.115.4** ॥ 5187

या त्वं विरहिता नीता चलचित्तेन रक्षसा।
दैवसम्पादितो दोषो मानुषेण मया जितः ॥ **6.115.5** ॥ 5188

सम्प्राप्तमवमानं यस्तेजसा न प्रमार्जति।
कस्तस्य पौरुषेणार्थो महताप्यल्पचेतसः ॥ **6.115.6** ॥ 5189

लङ्घनं च समुद्रस्य लङ्कायाश्चापि मर्दनम्।
सफलं तस्य च श्लाघ्यमद्य कर्म हनूमतः ॥ **6.115.7** ॥ 5190

युद्धे विक्रमतश्चैव हितं मन्त्रयतस्तथा।
सुग्रीवस्य ससैन्यस्य सफलोऽद्य परिश्रमः॥ **6.115.8**॥ 5191

विभीषणस्य च तथा सफलोऽद्य परिश्रमः।
विगुणं भ्रातरं त्यक्त्वा यो मां स्वयमुपस्थितः॥ **6.115.9**॥ 5192

इत्येवं वदतः श्रुत्वा सीता रामस्य तद् वचः।
मृगीवोत्फुल्लनयना बभूवाश्रुपरिप्लुता॥ **6.115.10**॥ 5193

पश्यतस्तां तु रामस्य समीपे हृदयप्रियाम्।
जनवादभयाद् राज्ञो बभूव हृदयं द्विधा॥ **6.115.11**॥ 5194

सीतामुत्पलपत्राक्षीं नीलकुञ्चितमूर्धजाम्।
अवदद् वै वरारोहां मध्ये वानररक्षसाम्॥ **6.115.12**॥ 5195

यत् कर्तव्यं मनुष्येण धर्षणां प्रतिमार्जता।
तत् कृतं रावणं हत्वा मयेदं मानकाङ्क्षिणा॥ **6.115.13**॥ 5196

निर्जिता जीवलोकस्य तपसा भावितात्मना।
अगस्त्येन दुराधर्षा मुनिना दक्षिणेव दिक्॥ **6.115.14**॥ 5197

विदितश्चास्तु भद्रं ते योऽयं रणपरिश्रमः।
सुतीर्णः सुहृदां वीर्यान्न त्वदर्थं मया कृतः॥ **6.115.15**॥ 5198

रक्षता तु मया वृत्तमपवादं च सर्वतः।
प्रख्यातस्यात्मवंशस्य न्यङ्गं च परिमार्जता॥ **6.115.16**॥ 5199

प्राप्तचारित्रसन्देहा मम प्रतिमुखे स्थिता।
दीपो नेत्रातुरस्येव प्रतिकूलासि मे दृढा॥ **6.115.17**॥ 5200

तद् गच्छ त्वानुजानेऽद्य यथेष्टं जनकात्मजे।
एता दश दिशो भद्रे कार्यमस्ति न मे त्वया॥ **6.115.18**॥ 5201

कः पुमांस्तु कुले जातः स्त्रियं परगृहोषिताम्।
तेजस्वी पुनरादद्यात् सुहृल्लोभेन चेतसा॥ **6.115.19**॥ 5202

रावणाङ्कपरिक्लिष्टां दृष्टां दुष्टेन चक्षुषा।
कथं त्वां पुनरादद्यां कुलं व्यपदिशन्महत्॥ **6.115.20**॥ 5203

यदर्थं निर्जिता मे त्वं सोऽयमासादितो मया।
नास्ति मे त्वय्यभिष्वङ्गो यथेष्टं गम्यतामिति॥ **6.115.21**॥ 5204

तदद्य व्याहृतं भद्रे मयैतत् कृतबुद्धिना।
लक्ष्मणे वाथ भरते कुरु बुद्धिं यथासुखम्॥ **6.115.22**॥ 5205

शत्रुघ्ने वाथ सुग्रीवे राक्षसे वा विभीषणे।
निवेशय मनः सीते यथा वा सुखमात्मना॥ **6.115.23**॥ 5206

नहि त्वां रावणो दृष्ट्वा दिव्यरूपां मनोरमाम्।
मर्षयेत चिरं सीते स्वगृहे पर्यवस्थिताम्॥ **6.115.24**॥ 5207

ततः प्रियार्हश्रवणा तदप्रियं
प्रियादुपश्रुत्य चिरस्य मानिनी।
मुमोच बाष्पं रुदती तदा भृशं
गजेन्द्रहस्ताभिहतेव वल्लरी॥ **6.115.25**॥ 5208

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
पञ्चदशाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षोडशाधिकशततमः सर्गः ॥

श्रीरामाय सोपालम्भं प्रतिवचनं दत्त्वा स्वसतीत्वपरीक्षार्थं सीताया अग्नौ प्रवेशः

एवमुक्ता तु वैदेही परुषं रोमहर्षणम्।
राघवेण सरोषेण श्रुत्वा प्रव्यथिताभवत्॥ **6.116.1**॥ 5209

सा तदाश्रुतपूर्वं हि जने महति मैथिली।
श्रुत्वा भर्तुर्वचो घोरं लज्जयावनताभवत्॥ **6.116.2**॥ 5210

प्रविशन्तीव गात्राणि स्वानि सा जनकात्मजा।
वाक्शरैस्तैः सशल्येव भृशमश्रूण्यवर्तयत्॥ **6.116.3**॥ 5211

ततो बाष्पपरिक्लिन्नं प्रमार्जन्ती स्वमाननम्।
शनैर्गद्गदया वाचा भर्तारमिदमब्रवीत्॥ **6.116.4**॥ 5212

किं मामसदृशं वाक्यमीदृशं श्रोत्रदारुणम्।
रूक्षं श्रावयसे वीर प्राकृतः प्राकृतामिव॥ **6.116.5**॥ 5213

न तथास्मि महाबाहो यथा मामवगच्छसि।
प्रत्ययं गच्छ मे स्वेन चारित्रेणैव ते शपे॥ **6.116.6**॥ 5214

पृथक्स्त्रीणां प्रचारेण जातिं त्वं परिशङ्कसे।
परित्यजैनां शङ्कां तु यदि तेऽहं परीक्षिता॥ **6.116.7**॥ 5215

यदहं गात्रसंस्पर्शं गतास्मि विवशा प्रभो।
कामकारो न मे तत्र दैवं तत्रापराध्यति॥ **6.116.8**॥ 5216

मदधीनं तु यत् तन्मे हृदयं त्वयि वर्तते।
पराधीनेषु गात्रेषु किं करिष्याम्यनीश्वरी॥ **6.116.9**॥ 5217

सह संवृद्धभावेन संसर्गेण च मानद।
यदि तेऽहं न विज्ञाता हता तेनास्मि शाश्वतम्॥ **6.116.10**॥ 5218

प्रेषितस्ते महावीरो हनुमानवलोककः।
लङ्कास्थाहं त्वया राजन् किं तदा न विसर्जिता॥ **6.116.11**॥ 5219

प्रत्यक्षं वानरस्यास्य तद्वाक्यसमनन्तरम्।
त्वया सन्त्यक्तया वीर त्यक्तं स्याज्जीवितं मया॥ **6.116.12**॥ 5220

न वृथा ते श्रमोऽयं स्यात् संशये न्यस्य जीवितम्।
सुहृज्जनपरिक्लेशो न चायं विफलस्तव॥ **6.116.13**॥ 5221

त्वया तु नृपशार्दूल रोषमेवानुवर्तता।
लघुनेव मनुष्येण स्त्रीत्वमेव पुरस्कृतम्॥ **6.116.14**॥ 5222

अपदेशेन जनकान्नोत्पत्तिर्वसुधातलात्।
मम वृत्तं च वृत्तज्ञ बहु ते न पुरस्कृतम्॥ **6.116.15**॥ 5223

न प्रमाणीकृतः पाणिर्बाल्ये मम निपीडितः।
मम भक्तिश्च शीलं च सर्वं ते पृष्ठतः कृतम्॥ **6.116.16**॥ 5224

इति ब्रुवन्ती रुदती बाष्पगद्गदभाषिणी।
उवाच लक्ष्मणं सीता दीनं ध्यानपरायणम्॥ **6.116.17**॥ 5225

चितां मे कुरु सौमित्रे व्यसनस्यास्य भेषजम्।
मिथ्यापवादोपहता नाहं जीवितुमुत्सहे॥ **6.116.18**॥ 5226

अप्रीतेन गुणैर्भर्त्रा त्यक्तायाः जनसंसदि।
या क्षमा मे गतिर्गन्तुं प्रवेक्ष्ये हव्यवाहनम्॥ **6.116.19**॥ 5227

एवमुक्तस्तु वैदेह्या लक्ष्मणः परवीरहा।
अमर्षवशमापन्नो राघवं समुदैक्षत॥ **6.116.20**॥ 5228

स विज्ञाय मनश्छन्दं रामस्याकारसूचितम्।
चितां चकार सौमित्रिर्मते रामस्य वीर्यवान्॥ **6.116.21**॥ 5229

नहि रामं तदा कश्चित् कालान्तकयमोपमम्।
अनुनेतुमथो वक्तुं द्रष्टुं वाप्यशकत् सुहृत्॥ **6.116.22**॥ 5230

अधोमुखं स्थितं रामं ततः कृत्वा प्रदक्षिणम्।
उपावर्तत वैदेही दीप्यमानं हुताशनम्॥ **6.116.23**॥ 5231

प्रणम्य दैवतेभ्यश्च ब्राह्मणेभ्यश्च मैथिली।
बद्धाञ्जलिपुटा चेदमुवाचाग्निसमीपतः॥ **6.116.24**॥ 5232

यथा मे हृदयं नित्यं नापसर्पति राघवात्।
तथा लोकस्य साक्षी मां सर्वतः पातु पावकः॥ **6.116.25**॥ 5233

यथा मां शुद्धचारित्रां दुष्टां जानाति राघवः।
तथा लोकस्य साक्षी मां सर्वतः पातु पावकः॥ **6.116.26**॥ 5234

कर्मणा मनसा वाचा यथा नातिचराम्यहम्।
राघवं सर्वधर्मज्ञं तथा मां पातु पावकः॥ **6.116.27**॥ 5235

आदित्यो भगवान् वायुर्दिशश्चन्द्रस्तथैव च।
अहश्चापि तथा सन्ध्ये रात्रिश्च पृथिवी तथा।
यथान्येऽपि विजानन्ति तथा चारित्रसंयुताम्॥ **6.116.28**॥ 5236

एवमुक्त्वा तु वैदेही परिक्रम्य हुताशनम्।
विवेश ज्वलनं दीप्तं निःशङ्केनान्तरात्मना॥ **6.116.29**॥ 5237

जनश्च सुमहांस्तत्र बालवृद्धसमाकुलः।
ददर्श मैथिलीं दीप्तां प्रविशन्तीं हुताशनम्॥ **6.116.30**॥ 5238

सा तप्तनवहेमाभा तप्तकाञ्चनभूषणा।
पपात ज्वलनं दीप्तं सर्वलोकस्य सन्निधौ॥ **6.116.31**॥ 5239

ददृशुस्तां विशालाक्षीं पतन्तीं हव्यवाहनम्।
सीतां सर्वाणि रूपाणि रुक्मवेदिनिभां तदा॥ **6.116.32**॥ 5240

ददृशुस्तां महाभागां प्रविशन्तीं हुताशनम्।
ऋषयो देवगन्धर्वा यज्ञे पूर्णाहुतीमिव॥ **6.116.33**॥ 5241

प्रचुक्रुशुः स्त्रियः सर्वास्तां दृष्ट्वा हव्यवाहने।
पतन्तीं संस्कृतां मन्त्रैर्वसोर्धारामिवाध्वरे॥ **6.116.34**॥ 5242

ददृशुस्तां त्रयो लोका देवगन्धर्वदानवाः।
शप्तां पतन्तीं निरये त्रिदिवाद् देवतामिव॥ **6.116.35**॥ 5243

तस्यामग्निं विशन्त्यां तु हाहेति विपुलः स्वनः।
रक्षसां वानराणां च सम्बभूवाद्भुतोपमः॥ **6.116.36**॥ 5244

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
षोडशाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तदशाधिकशततमः सर्गः ॥

श्रीरामस्य पार्श्वे देवानामागमनं ब्रह्मणा तस्य भगवत्तायाः प्रतिपादनं स्तवनं च

ततो हि दुर्मना रामः श्रुत्वैवं वदतां गिरः।
दध्यौ मुहूर्तं धर्मात्मा बाष्पव्याकुललोचनः॥ **6.117.1** ॥ 5245

ततो वैश्रवणो राजा यमश्च पितृभिः सह।
सहस्राक्षश्च देवेशो वरुणश्च जलेश्वरः॥ **6.117.2** ॥ 5246

षडर्धनयनः श्रीमान् महादेवो वृषध्वजः।
कर्ता सर्वस्य लोकस्य ब्रह्मा ब्रह्मविदां वरः॥ **6.117.3** ॥ 5247

एते सर्वे समागम्य विमानैः सूर्यसन्निभैः।
आगम्य नगरीं लङ्कामभिजग्मुश्च राघवम्॥ **6.117.4** ॥ 5248

ततः सहस्ताभरणान् प्रगृह्य विपुलान् भुजान्।
अब्रुवंस्त्रिदशश्रेष्ठा राघवं प्राञ्जलिं स्थितम्॥ **6.117.5** ॥ 5249

कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानविदां विभुः।
उपेक्षसे कथं सीतां पतन्तीं हव्यवाहने।
कथं देवगणश्रेष्ठमात्मानं नावबुद्ध्यसे॥ **6.117.6** ॥ 5250

ऋतधामा वसुः पूर्वं वसूनां च प्रजापतिः।
त्रयाणामपि लोकानामादिकर्ता स्वयम्प्रभुः॥ **6.117.7** ॥ 5251

रुद्राणामष्टमो रुद्रः साध्यानामपि पञ्चमः।
अश्विनौ चापि कर्णौ ते सूर्याचन्द्रमसौ दृशौ॥ **6.117.8**॥ 5252

अन्ते चादौ च मध्ये च दृश्यसे च परन्तप।
उपेक्षसे च वैदेहीं मानुषः प्राकृतो यथा॥ **6.117.9**॥ 5253

इत्युक्तो लोकपालैस्तैः स्वामी लोकस्य राघवः।
अब्रवीत् त्रिदशश्रेष्ठान् रामो धर्मभृतां वरः॥ **6.117.10**॥ 5254

आत्मानं मानुषं मन्ये रामं दशरथात्मजम्।
सोऽहं यश्च यतश्चाहं भगवांस्तद् ब्रवीतु मे॥ **6.117.11**॥ 5255

इति ब्रुवाणं काकुत्स्थं ब्रह्मा ब्रह्मविदां वरः।
अब्रवीच्छृणु मे वाक्यं सत्यं सत्यपराक्रम॥ **6.117.12**॥ 5256

भवान् नारायणो देवः श्रीमांश्चक्रायुधः प्रभुः।
एकशृङ्गो वराहस्त्वं भूतभव्यसपत्नजित्॥ **6.117.13**॥ 5257

अक्षरं ब्रह्म सत्यं च मध्ये चान्ते च राघव।
लोकानां त्वं परो धर्मो विष्वक्सेनश्चतुर्भुजः॥ **6.117.14**॥ 5258

शार्ङ्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तमः।
अजितः खड्गधृग् विष्णुः कृष्णश्चैव बृहद्बलः॥ **6.117.15**॥ 5259

सेनानीर्ग्रामणीश्च त्वं बुद्धिः सत्त्वं क्षमा दमः।
प्रभवश्चाप्ययश्च त्वमुपेन्द्रो मधुसूदनः॥ **6.117.16**॥ 5260

इन्द्रकर्मा महेन्द्रस्त्वं पद्मनाभो रणान्तकृत्।
शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः॥ **6.117.17**॥ 5261

सहस्रशृङ्गो वेदात्मा शतशीर्षो महर्षभः।
त्वं त्रयाणां हि लोकानामादिकर्ता स्वयम्प्रभुः॥ **6.117.18**॥ 5262

सिद्धानामपि साध्यानामाश्रयश्चासि पूर्वजः।
त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारः परात्परः॥ **6.117.19**॥ 5263

प्रभवं निधनं चापि नो विदुः को भवानिति।
दृश्यसे सर्वभूतेषु गोषु च ब्राह्मणेषु च॥ **6.117.20**॥ 5264

दिक्षु सर्वासु गगने पर्वतेषु नदीषु च।
सहस्रचरणः श्रीमान् शतशीर्षः सहस्रदृक्॥ **6.117.21**॥ 5265

त्वं धारयसि भूतानि पृथिवीं सर्वपर्वतान्।
अन्ते पृथिव्याः सलिले दृश्यसे त्वं महोरगः॥ **6.117.22**॥ 5266

त्रीन् लोकान् धारयन् राम देवगन्धर्वदानवान्।
अहं ते हृदयं राम जिह्वा देवी सरस्वती॥ **6.117.23**॥ 5267

देवा रोमाणि गात्रेषु ब्रह्मणा निर्मिताः प्रभो।
निमेषस्ते स्मृता रात्रिरुन्मेषो दिवसस्तथा॥ **6.117.24**॥ 5268

संस्कारास्त्वभवन् वेदा नैतदस्ति त्वया विना।
जगत् सर्वं शरीरं ते स्थैर्यं ते वसुधातलम्॥ **6.117.25**॥ 5269

अग्निः कोपः प्रसादस्ते सोमः श्रीवत्सलक्षणः।
त्वया लोकास्त्रयः क्रान्ताः पुरा स्वैर्विक्रमैस्त्रिभिः॥ **6.117.26**॥ 5270

महेन्द्रश्च कृतो राजा बलिं बद्ध्वा सुदारुणम्।
सीता लक्ष्मीर्भवान् विष्णुर्देवः कृष्णः प्रजापतिः॥ **6.117.27**॥ 5271

वधार्थं रावणस्येह प्रविष्टो मानुषीं तनुम्।
तदिदं नस्त्वया कार्यं कृतं धर्मभृतां वर॥ **6.117.28**॥ 5272

निहतो रावणो राम प्रहृष्टो दिवमाक्रम।
अमोघं देव वीर्यं ते न ते मोघाः पराक्रमाः॥ **6.117.29**॥ 5273

अमोघं दर्शनं राम अमोघस्तव संस्तवः।
अमोघास्ते भविष्यन्ति भक्तिमन्तो नरा भुवि॥ **6.117.30**॥ 5274

ये त्वां देवं ध्रुवं भक्ताः पुराणं पुरुषोत्तमम्।
प्राप्नुवन्ति तथा कामानिह लोके परत्र च॥ **6.117.31**॥ 5275

इममार्षं स्तवं दिव्यमितिहासं पुरातनम्।
ये नराः कीर्तयिष्यन्ति नास्ति तेषां पराभवः॥ **6.117.32**॥ 5276

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
सप्तदशाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टादशाधिकशततमः सर्गः ॥

चितां विधूय सीतामादाय मूर्तिमतोऽग्निदेवस्य प्रकटनं सीतां श्रीरामाय समर्प्य तस्याः पवित्रतायाः प्रमाणीकरणं श्रीरामेण सहर्षं सीतायाः स्वीकरणं च

एतच्छ्रुत्वा शुभं वाक्यं पितामहसमीरितम्।
अङ्केनादाय वैदेहीमुत्पपात विभावसुः ॥ **6.118.1** ॥ 5277

विधूयाथ चितां तां तु वैदेहीं हव्यवाहनः।
उत्तस्थौ मूर्तिमानाशु गृहीत्वा जनकात्मजाम् ॥ **6.118.2** ॥ 5278

तरुणादित्यसङ्काशां तप्तकाञ्चनभूषणाम्।
रक्ताम्बरधरां बालां नीलकुञ्चितमूर्धजाम् ॥ **6.118.3** ॥ 5279

अक्लिष्टमाल्याभरणां तथारूपामनिन्दिताम्।
ददौ रामाय वैदेहीमङ्के कृत्वा विभावसुः ॥ **6.118.4** ॥ 5280

अब्रवीत् तु तदा रामं साक्षी लोकस्य पावकः।
एषा ते राम वैदेही पापमस्यां न विद्यते ॥ **6.118.5** ॥ 5281

नैव वाचा न मनसा नैव बुद्ध्या न चक्षुषा।
सुवृत्ता वृत्तशौटीर्यं न त्वामत्यचरच्छुभा ॥ **6.118.6** ॥ 5282

रावणेनापनीतैषा वीर्योत्सिक्तेन रक्षसा।
त्वया विरहिता दीना विवशा निर्जने सती ॥ **6.118.7** ॥ 5283

रुद्धा चान्तःपुरे गुप्ता त्वच्चित्ता त्वत्परायणा।
रक्षिता राक्षसीभिश्च घोराभिर्घोरबुद्धिभिः॥ **6.118.8**॥ 5284

प्रलोभ्यमाना विविधं तर्ज्यमाना च मैथिली।
नाचिन्तयत तद्रक्षस्त्वद्गतेनान्तरात्मना॥ **6.118.9**॥ 5285

विशुद्धभावां निष्पापां प्रतिगृह्णीष्व मैथिलीम्।
न किञ्चिदभिधातव्या अहमाज्ञापयामि ते॥ **6.118.10**॥ 5286

ततः प्रीतमना रामः श्रुत्वैवं वदतां वरः।
दध्यौ मुहूर्तं धर्मात्मा हर्षव्याकुललोचनः॥ **6.118.11**॥ 5287

एवमुक्तो महातेजा धृतिमानुरुविक्रमः।
उवाच त्रिदशश्रेष्ठं रामो धर्मभृतां वरः॥ **6.118.12**॥ 5288

अवश्यं चापि लोकेषु सीता पावनमर्हति।
दीर्घकालोषिता हीयं रावणान्तःपुरे शुभा॥ **6.118.13**॥ 5289

बालिशो बत कामात्मा रामो दशरथात्मजः।
इति वक्ष्यति मां लोको जानकीमविशोध्य हि॥ **6.118.14**॥ 5290

अनन्यहृदयां सीतां मच्चित्तपरिरक्षिणीम्।
अहमप्यवगच्छामि मैथिलीं जनकात्मजाम्॥ **6.118.15**॥ 5291

इमामपि विशालाक्षीं रक्षितां स्वेन तेजसा।
रावणो नातिवर्तेत वेलामिव महोदधिः॥ **6.118.16**॥ 5292

प्रत्ययार्थं तु लोकानां त्रयाणां सत्यसंश्रयः।
उपेक्षे चापि वैदेहीं प्रविशन्तीं हुताशनम्॥ **6.118.17**॥ 5293

न हि शक्तः सुदुष्टात्मा मनसापि हि मैथिलीम्।
प्रधर्षयितुमप्राप्यां दीप्तामग्निशिखामिव॥ **6.118.18**॥ 5294

नेयमर्हति वैक्लव्यं रावणान्तःपुरे सती।
अनन्या हि मया सीता भास्करस्य प्रभा यथा॥ **6.118.19**॥ 5295

विशुद्धा त्रिषु लोकेषु मैथिली जनकात्मजा।
न विहातुं मया शक्या कीर्तिरात्मवता यथा॥ **6.118.20**॥ 5296

अवश्यं च मया कार्यं सर्वेषां वो वचो हितम्।
स्निग्धानां लोकनाथानामेवं च वदतां हितम्॥ **6.118.21**॥ 5297

इत्येवमुक्त्वा विजयी महाबलः
प्रशस्यमानः स्वकृतेन कर्मणा।
समेत्य रामः प्रियया महायशाः
सुखं सुखार्होऽनुबभूव राघवः॥ **6.118.22**॥ 5298

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
अष्टादशाधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकोनविंशत्यधिकशततमः सर्गः ॥

श्रीमहादेवस्याज्ञया श्रीरामलक्ष्मणाभ्यां विमानेनागतस्य राज्ञो दशरथस्याभिवादनं पुत्राभ्यां सीतायै चावश्यकं सन्दिश्य तस्येन्द्रलोके गमनं च

एतच्छ्रुत्वा शुभं वाक्यं राघवेणानुभाषितम्।
ततः शुभतरं वाक्यं व्याजहार महेश्वरः॥ **6.119.1** ॥ 5299

पुष्कराक्ष महाबाहो महावक्षः परन्तप।
दिष्ट्या कृतमिदं कर्म त्वया धर्मभृतां वर॥ **6.119.2** ॥ 5300

दिष्ट्या सर्वस्य लोकस्य प्रवृद्धं दारुणं तमः।
अपवृत्तं त्वया सङ्ख्ये राम रावणजं भयम्॥ **6.119.3** ॥ 5301

आश्वास्य भरतं दीनं कौसल्यां च यशस्विनीम्।
कैकेयीं च सुमित्रां च दृष्ट्वा लक्ष्मणमातरम्॥ **6.119.4** ॥ 5302

प्राप्य राज्यमयोध्यायां नन्दयित्वा सुहृज्जनम्।
इक्ष्वाकूणां कुले वंशं स्थापयित्वा महाबल॥ **6.119.5** ॥ 5303

इष्ट्वा तुरगमेधेन प्राप्य चानुत्तमं यशः।
ब्राह्मणेभ्यो धनं दत्त्वा त्रिदिवं गन्तुमर्हसि॥ **6.119.6** ॥ 5304

एष राजा दशरथो विमानस्थः पिता तव।
काकुत्स्थ मानुषे लोके गुरुस्तव महायशाः॥ **6.119.7**॥ 5305

इन्द्रलोकं गतः श्रीमांस्त्वया पुत्रेण तारितः।
लक्ष्मणेन सह भ्रात्रा त्वमेनमभिवादय॥ **6.119.8**॥ 5306

महादेववचः श्रुत्वा राघवः सहलक्ष्मणः।
विमानशिखरस्थस्य प्रणाममकरोत् पितुः॥ **6.119.9**॥ 5307

दीप्यमानं स्वया लक्ष्म्या विरजोऽम्बरधारिणम्।
लक्ष्मणेन सह भ्रात्रा ददर्श पितरं प्रभुः॥ **6.119.10**॥ 5308

हर्षेण महताऽऽविष्टो विमानस्थो महीपतिः।
प्राणैः प्रियतरं दृष्ट्वा पुत्रं दशरथस्तदा॥ **6.119.11**॥ 5309

आरोप्याङ्के महाबाहुर्वरासनगतः प्रभुः।
बाहुभ्यां सम्परिष्वज्य ततो वाक्यं समाददे॥ **6.119.12**॥ 5310

न मे स्वर्गो बहु मतः सम्मानश्च सुरर्षभैः।
त्वया राम विहीनस्य सत्यं प्रतिशृणोमि ते॥ **6.119.13**॥ 5311

अद्य त्वां निहतामित्रं दृष्ट्वा सम्पूर्णमानसम्।
निस्तीर्णवनवासं च प्रीतिरासीत् परा मम॥ **6.119.14**॥ 5312

कैकेय्या यानि चोक्तानि वाक्यानि वदतां वर।
तव प्रव्राजनार्थानि स्थितानि हृदये मम॥ **6.119.15**॥ 5313

त्वां तु दृष्ट्वा कुशलिनं परिष्वज्य सलक्ष्मणम्।
अद्य दुःखाद् विमुक्तोऽस्मि नीहारादिव भास्करः॥ **6.119.16**॥ 5314

तारितोऽहं त्वया पुत्र सुपुत्रेण महात्मना।
अष्टावक्रेण धर्मात्मा कहोलो ब्राह्मणो यथा॥ **6.119.17**॥ 5315

इदानीं च विजानामि यथा सौम्य सुरेश्वरैः।
वधार्थं रावणस्येह विहितं पुरुषोत्तमम्॥ **6.119.18**॥ 5316

सिद्धार्था खलु कौसल्या या त्वां राम गृहं गतम्।
वनान्निवृत्तं संहृष्टा द्रक्ष्यते शत्रुसूदनम्॥ **6.119.19**॥ 5317

सिद्धार्थाः खलु ते राम नरा ये त्वां पुरीं गतम्।
राज्ये चैवाभिषिक्तं च द्रक्ष्यन्ते वसुधाधिपम्॥ **6.119.20**॥ 5318

अनुरक्तेन बलिना शुचिना धर्मचारिणा।
इच्छेयं त्वामहं द्रष्टुं भरतेन समागतम्॥ **6.119.21**॥ 5319

चतुर्दश समाः सौम्य वने निर्यातितास्त्वया।
वसता सीतया सार्धं मत्प्रीत्या लक्ष्मणेन च॥ **6.119.22**॥ 5320

निवृत्तवनवासोऽसि प्रतिज्ञा पूरिता त्वया।
रावणं च रणे हत्वा देवताः परितोषिताः॥ **6.119.23**॥ 5321

कृतं कर्म यशः श्लाघ्यं प्राप्तं ते शत्रुसूदन।
भ्रातृभिः सह राज्यस्थो दीर्घमायुरवाप्नुहि॥ **6.119.24**॥ 5322

इति ब्रुवाणं राजानं रामः प्राञ्जलिरब्रवीत्।
कुरु प्रसादं धर्मज्ञ कैकेय्या भरतस्य च॥ **6.119.25**॥ 5323

सपुत्रां त्वां त्यजामीति यदुक्ता केकयी त्वया।
स शापः कैकयीं घोरः सपुत्रां न स्पृशेत् प्रभो॥ **6.119.26**॥ 5324

तथेति स महाराजो राममुक्त्वा कृताञ्जलिम्।
लक्ष्मणं च परिष्वज्य पुनर्वाक्यमुवाच ह॥ **6.119.27**॥ 5325

रामं शुश्रूषता भक्त्या वैदेह्या सह सीतया।
कृता मम महाप्रीतिः प्राप्तं धर्मफलं च ते॥ **6.119.28**॥ 5326

धर्मं प्राप्स्यसि धर्मज्ञ यशश्च विपुलं भुवि।
रामे प्रसन्ने स्वर्गं च महिमानं तथोत्तमम्॥ **6.119.29**॥ 5327

रामं शुश्रूष भद्रं ते सुमित्रानन्दवर्धन।
रामः सर्वस्य लोकस्य हितेष्वभिरतः सदा॥ **6.119.30**॥ 5328

एते सेन्द्रास्त्रयो लोकाः सिद्धाश्च परमर्षयः।
अभिवाद्य महात्मानमर्चन्ति पुरुषोत्तमम्॥ **6.119.31**॥ 5329

एतत् तदुक्तमव्यक्तमक्षरं ब्रह्मसम्मितम्।
देवानां हृदयं सौम्य गुह्यं रामः परन्तपः॥ **6.119.32**॥ 5330

अवाप्तधर्माचरणं यशश्च विपुलं त्वया।
एवं शुश्रूषताव्यग्रं वैदेह्या सह सीतया॥ **6.119.33**॥ 5331

इत्युक्त्वा लक्ष्मणं राजा स्नुषां बद्धाञ्जलिं स्थिताम्।
पुत्रीत्याभाष्य मधुरं शनैरेनामुवाच ह॥ **6.119.34**॥ 5332

कर्तव्यो न तु वैदेहि मन्युस्त्यागमिमं प्रति।
रामेणेदं विशुद्ध्यर्थं कृतं वै त्वद्धितैषिणा॥ **6.119.35**॥ 5333

सुदुष्करमिदं पुत्रि तव चारित्रलक्षणम्।
कृतं यत् तेऽन्यनारीणां यशो ह्यभिभविष्यति॥ **6.119.36**॥ 5334

न त्वं कामं समाधेया भर्तृशुश्रूषणं प्रति।
अवश्यं तु मया वाच्यमेष ते दैवतं परम्॥ **6.119.37**॥ 5335

इति प्रतिसमादिश्य पुत्रौ सीतां च राघवः।
इन्द्रलोकं विमानेन ययौ दशरथो नृपः॥ **6.119.38**॥ 5336

विमानमास्थाय महानुभावः
श्रिया च संहृष्टतनुर्नृपोत्तमः।

आमन्त्र्य पुत्रौ सह सीतया च
जगाम देवप्रवरस्य लोकम्॥ **6.119.39**॥ 5337

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
एकोनविंशत्यधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ विंशत्यधिकशततमः सर्गः ॥

श्रीरामस्यानुनयेनेन्द्रेण मृतवानराणामुज्जीवनं देवानां प्रस्थानं वानरसेनाया विश्रामश्च

प्रतिप्रयाते काकुत्स्थे महेन्द्रः पाकशासनः।
अब्रवीत् परमप्रीतो राघवं प्राञ्जलिं स्थितम्॥ **6.120.1** ॥ 5338

अमोघं दर्शनं राम तवास्माकं नरर्षभ।
प्रीतियुक्ताः स्म तेन त्वं ब्रूहि यन्मनसेप्सितम्॥ **6.120.2** ॥ 5339

एवमुक्तो महेन्द्रेण प्रसन्नेन महात्मना।
सुप्रसन्नमना हृष्टो वचनं प्राह राघवः॥ **6.120.3** ॥ 5340

यदि प्रीतिः समुत्पन्ना मयि ते विबुधेश्वर।
वक्ष्यामि कुरु मे सत्यं वचनं वदतां वर॥ **6.120.4** ॥ 5341

मम हेतोः पराक्रान्ता ये गता यमसादनम्।
ते सर्वे जीवितं प्राप्य समुत्तिष्ठन्तु वानराः॥ **6.120.5** ॥ 5342

मत्कृते विप्रयुक्ता ये पुत्रैर्दारैश्च वानराः।
तान् प्रीतमनसः सर्वान् द्रष्टुमिच्छामि मानद॥ **6.120.6** ॥ 5343

विक्रान्ताश्चापि शूराश्च न मृत्युं गणयन्ति च।
कृतयत्ना विपन्नाश्च जीवयैतान् पुरन्दर॥ **6.120.7** ॥ 5344

मत्प्रियेष्वभिरक्ताश्च न मृत्युं गणयन्ति ये।
त्वत्प्रसादात् समेयुस्ते वरमेतमहं वृणे॥ **6.120.8**॥ 5345

नीरुजो निर्व्रणांश्चैव सम्पन्नबलपौरुषान्।
गोलाङ्गूलांस्तथर्क्षांश्च द्रष्टुमिच्छामि मानद॥ **6.120.9**॥ 5346

अकाले चापि पुष्पाणि मूलानि च फलानि च।
नद्यश्च विमलास्तत्र तिष्ठेयुर्यत्र वानराः॥ **6.120.10**॥ 5347

श्रुत्वा तु वचनं तस्य राघवस्य महात्मनः।
महेन्द्रः प्रत्युवाचेदं वचनं प्रीतिसंयुतम्॥ **6.120.11**॥ 5348

महानयं वरस्तात यस्त्वयोक्तो रघूत्तम।
द्विर्मया नोक्तपूर्वं च तस्मादेतद् भविष्यति॥ **6.120.12**॥ 5349

समुत्तिष्ठन्तु ते सर्वे हता ये युधि राक्षसैः।
ऋक्षाश्च सह गोपुच्छैर्निकृत्ताननबाहवः॥ **6.120.13**॥ 5350

नीरुजो निर्व्रणाश्चैव सम्पन्नबलपौरुषाः।
समुत्थास्यन्ति हरयः सुप्ता निद्राक्षये यथा॥ **6.120.14**॥ 5351

सुहृद्भिर्बान्धवैश्चैव ज्ञातिभिः स्वजनेन च।
सर्व एव समेष्यन्ति संयक्ताः परया मुदा॥ **6.120.15**॥ 5352

अकाले पुष्पशबलाः फलवन्तश्च पादपाः।
भविष्यन्ति महेष्वास नद्यश्च सलिलायुताः॥ **6.120.16**॥ 5353

सव्रणैः प्रथमं गात्रैरिदानीं निर्व्रणैः समैः।
ततः समुत्थिताः सर्वे सुप्त्वेव हरिसत्तमाः॥ **6.120.17**॥ 5354

बभूवुर्वानराः सर्वे किं त्वेतदिति विस्मिताः।
काकुत्स्थं परिपूर्णार्थं दृष्ट्वा सर्वे सुरोत्तमाः॥ **6.120.18**॥ 5355

अब्रुवन् परमप्रीताः स्तुत्वा रामं सलक्ष्मणम्।
गच्छायोध्यामितो राजन् विसर्जय च वानरान्॥ **6.120.19**॥ 5356

मैथिलीं सान्त्वयस्वैनामनुरक्तां यशस्विनीम्।
भ्रातरं भरतं पश्य त्वच्छोकाद् व्रतचारिणम्॥ **6.120.20**॥ 5357

शत्रुघ्नं च महात्मानं मातॄः सर्वाः परन्तप।
अभिषेचय चात्मानं पौरान् गत्वा प्रहर्षय॥ **6.120.21**॥ 5358

एवमुक्त्वा सहस्राक्षो रामं सौमित्रिणा सह।
विमानैः सूर्यसङ्काशैर्ययौ हृष्टः सुरैः सह॥ **6.120.22**॥ 5359

अभिवाद्य च काकुत्स्थः सर्वांस्तांस्त्रिदशोत्तमान्।
लक्ष्मणेन सह भ्रात्रा वासमाज्ञापयत् तदा॥ **6.120.23**॥ 5360

ततस्तु सा लक्ष्मणरामपालिता
महाचमूर्हृष्टजना यशस्विनी।
श्रिया ज्वलन्ती विरराज सर्वतो
निशा प्रणीतेव हि शीतरश्मिना॥ **6.120.24**॥ 5361

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
विंशत्यधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ एकविंशत्यधिकशततमः सर्गः ॥

श्रीरामस्यायोध्यायां गन्तुमुद्यमनं तदाज्ञया विभीषणेन पुष्पकस्यानयनं च

तां रात्रिमुषितं रामं सुखोदितमरिन्दमम्।
अब्रवीत् प्राञ्जलिर्वाक्यं जयं पृष्ट्वा विभीषणः॥ **6.121.1**॥ 5362

स्नानानि चाङ्गरागाणि वस्त्राण्याभरणानि च।
चन्दनानि च माल्यानि दिव्यानि विविधानि च॥ **6.121.2**॥ 5363

अलङ्कारविदश्चैता नार्यः पद्मनिभेक्षणाः।
उपस्थितास्त्वां विधिवत् स्नापयिष्यन्ति राघव॥ **6.121.3**॥ 5364

एवमुक्तस्तु काकुत्स्थः प्रत्युवाच विभीषणम्।
हरीन् सुग्रीवमुख्यांस्त्वं स्नानेनोपनिमन्त्रय॥ **6.121.4**॥ 5365

स तु ताम्यति धर्मात्मा मम हेतोः सुखोचितः।
सुकुमारो महाबाहुर्भरतः सत्यसंश्रयः॥ **6.121.5**॥ 5366

तं विना कैकयीपुत्रं भरतं धर्मचारिणम्।
न मे स्नानं बहु मतं वस्त्राण्याभरणानि च॥ **6.121.6**॥ 5367

एतत् पश्य यथा क्षिप्रं प्रतिगच्छाम तां पुरीम्।
अयोध्यां गच्छतो ह्येष पन्थाः परमदुर्गमः॥ **6.121.7**॥ 5368

एवमुक्तस्तु काकुत्स्थं प्रत्युवाच विभीषणः।
अह्ना त्वां प्रापयिष्यामि तां पुरीं पार्थिवात्मज॥ **6.121.8**॥ 5369

पुष्पकं नाम भद्रं ते विमानं सूर्यसन्निभम्।
मम भ्रातुः कुबेरस्य रावणेन बलीयसा॥ **6.121.9**॥ 5370

हृतं निर्जित्य सङ्ग्रामे कामगं दिव्यमुत्तमम्।
त्वदर्थं पालितं चेदं तिष्ठत्यतुलविक्रम॥ **6.121.10**॥ 5371

तदिदं मेघसङ्काशं विमानमिह तिष्ठति।
येन यास्यसि यानेन त्वमयोध्यां गतज्वरः॥ **6.121.11**॥ 5372

अहं ते यद्यनुग्राह्यो यदि स्मरसि मे गुणान्।
वस तावदिह प्राज्ञ यद्यस्ति मयि सौहृदम्॥ **6.121.12**॥ 5373

लक्ष्मणेन सह भ्रात्रा वैदेह्या भार्यया सह।
अर्चितः सर्वकामैस्त्वं ततो राम गमिष्यसि॥ **6.121.13**॥ 5374

प्रीतियुक्तस्य विहितां ससैन्यः ससुहृद्गणः।
सत्क्रियां राम मे तावद् गृहाण त्वं मयोद्यताम्॥ **6.121.14**॥ 5375

प्रणयाद् बहुमानाच्च सौहार्देन च राघव।
प्रसादयामि प्रेष्योऽहं न खल्वाज्ञापयामि ते॥ **6.121.15**॥ 5376

एवमुक्तस्ततो रामः प्रत्युवाच विभीषणम्।
रक्षसां वानराणां च सर्वेषामेव शृण्वताम्॥ **6.121.16**॥ 5377

पूजितोऽस्मि त्वया वीर साचिव्येन परेण च।
सर्वात्मना च चेष्टाभिः सौहार्देन परेण च॥ **6.121.17**॥ 5378

न खल्वेतन्न कुर्यां ते वचनं राक्षसेश्वर।
तं तु मे भ्रातरं द्रष्टुं भरतं त्वरते मनः॥ **6.121.18**॥ 5379

मां निवर्तयितुं योऽसौ चित्रकूटमुपागतः।
शिरसा याचतो यस्य वचनं न कृतं मया॥ **6.121.19**॥ 5380

कौसल्यां च सुमित्रां च कैकेयीं च यशस्विनीम्।
गुहं च सुहृदं चैव पौराञ्जानपदैः सह॥ **6.121.20**॥ 5381

अनुजानीहि मां सौम्य पूजितोऽस्मि विभीषण।
मन्युर्न खलु कर्तव्यः सखे त्वां चानुमानये॥ **6.121.21**॥ 5382

उपस्थापय मे शीघ्रं विमानं राक्षसेश्वर।
कृतकार्यस्य मे वासः कथं स्यादिह सम्मतः॥ **6.121.22**॥ 5383

एवमुक्तस्तु रामेण राक्षसेन्द्रो विभीषणः।
विमानं सूर्यसङ्काशमाजुहाव त्वरान्वितः॥ **6.121.23**॥ 5384

ततः काञ्चनचित्राङ्गं वैदूर्यमणिवेदिकम्।
कूटागारैः परिक्षिप्तं सर्वतो रजतप्रभम्॥ **6.121.24**॥ 5385

पाण्डुराभिः पताकाभिर्ध्वजैश्च समलङ्कृतम्।
शोभितं काञ्चनैर्हर्म्यैर्हेमपद्मविभूषितैः॥ **6.121.25**॥ 5386

प्रकीर्णं किङ्किणीजालैर्मुक्तामणिगवाक्षकम्।
घण्टाजालैः परिक्षिप्तं सर्वतो मधुरस्वनम्॥ **6.121.26**॥ 5387

तं मेरुशिखराकारं निर्मितं विश्वकर्मणा।
बृहद्भिर्भूषितं हर्म्यैर्मुक्तारजतशोभितैः॥ **6.121.27**॥ 5388

तलैः स्फटिकचित्राङ्गैर्वैदूर्यैश्च वरासनैः।
महार्हास्तरणोपेतैरुपपन्नं महाधनैः॥ **6.121.28**॥ 5389

उपस्थितमनाधृष्यं तद् विमानं मनोजवम्।
निवेदयित्वा रामाय तस्थौ तत्र विभीषणः॥ **6.121.29**॥ 5390

तत् पुष्पकं कामगमं विमान -
मुपस्थितं भूधरसन्निकाशम्।
दृष्ट्वा तदा विस्मयमाजगाम
रामः ससौमित्रिरुदारसत्त्वः॥ **6.121.30**॥ 5391

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
एकविंशत्यधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ द्वाविंशत्यधिकशततमः सर्गः ॥

श्रीरामस्याज्ञया विभीषणेन वानराणां भृशं सत्कारो विभीषणं वानरांश्च सहैवादाय श्रीरामस्य पुष्पकेणायोध्यां प्रति प्रस्थानं च

उपस्थितं तु तं कृत्वा पुष्पकं पुष्पभूषितम्।
अविदूरे स्थितो राममित्युवाच विभीषणः॥ **6.122.1** ॥ 5392

स तु बद्धाञ्जलिपुटो विनीतो राक्षसेश्वरः।
अब्रवीत् त्वरयोपेतः किं करोमीति राघवम्॥ **6.122.2** ॥ 5393

तमब्रवीन्महातेजा लक्ष्मणस्योपशृण्वतः।
विमृश्य राघवो वाक्यमिदं स्नेहपुरस्कृतम्॥ **6.122.3** ॥ 5394

कृतप्रयत्नकर्माणः सर्व एव वनौकसः।
रत्नैरर्थैश्च विविधैः सम्पूज्यन्तां विभीषण॥ **6.122.4** ॥ 5395

सहामीभिस्त्वया लङ्का निर्जिता राक्षसेश्वर।
हृष्टैः प्राणभयं त्यक्त्वा सङ्ग्रामेष्वनिवर्तिभिः॥ **6.122.5** ॥ 5396

त इमे कृतकर्माणः सर्व एव वनौकसः।
धनरत्नप्रदानैश्च कर्मैषां सफलं कुरु॥ **6.122.6** ॥ 5397

एवं सम्मानिताश्चैते नन्द्यमाना यथा त्वया।
भविष्यन्ति कृतज्ञेन निर्वृता हरियूथपाः॥ **6.122.7** ॥ 5398

त्यागिनं सङ्ग्रहीतारं सानुक्रोशं जितेन्द्रियम्।
सर्वे त्वामभिगच्छन्ति ततः सम्बोधयामि ते॥ **6.122.8**॥ 5399

हीनं रतिगुणैः सर्वैरभिहन्तारमाहवे।
सेना त्यजति संविग्ना नृपतिं तं नरेश्वर॥ **6.122.9**॥ 5400

एवमुक्तस्तु रामेण वानरांस्तान् विभीषणः।
रत्नार्थसंविभागेन सर्वानेवाभ्यपूजयत्॥ **6.122.10**॥ 5401

ततस्तान् पूजितान् दृष्ट्वा रत्नार्थैर्हरियूथपान्।
आरुरोह तदा रामस्तद् विमानमनुत्तमम्॥ **6.122.11**॥ 5402

अङ्केनादाय वैदेहीं लज्जमानां मनस्विनीम्।
लक्ष्मणेन सह भ्रात्रा विक्रान्तेन धनुष्मता॥ **6.122.12**॥ 5403

अब्रवीत् स विमानस्थः पूजयन् सर्ववानरान्।
सुग्रीवं च महावीर्यं काकुत्स्थः सविभीषणम्॥ **6.122.13**॥ 5404

मित्रकार्यं कृतमिदं भवद्भिर्वानरर्षभाः।
अनुज्ञाता मया सर्वे यथेष्टं प्रतिगच्छत॥ **6.122.14**॥ 5405

यत् तु कार्यं वयस्येन स्निग्धेन च हितेन च।
कृतं सुग्रीव तत् सर्वं भवताधर्मभीरुणा॥ **6.122.15**॥ 5406

किष्किन्धां प्रति याह्याशु स्वसैन्येनाभिसंवृतः।
स्वराज्ये वस लङ्कायां मया दत्ते विभीषण।
न त्वां धर्षयितुं शक्ताः सेन्द्रा अपि दिवौकसः॥ **6.122.16**॥ 5407

अयोध्यां प्रति यास्यामि राजधानीं पितुर्मम।
अभ्यनुज्ञातुमिच्छामि सर्वानामन्त्रयामि वः॥ **6.122.17**॥ 5408

एवमुक्तास्तु रामेण हरीन्द्रा हरयस्तथा।
ऊचुः प्राञ्जलयः सर्वे राक्षसश्च विभीषणः॥ **6.122.18**॥ 5409

अयोध्यां गन्तुमिच्छामः सर्वान् नयतु नो भवान्।
मुद्युक्ता विचरिष्यामो वनान्युपवनानि च॥ **6.122.19**॥ 5410

दृष्ट्वा त्वामभिषेकार्द्रं कौसल्यामभिवाद्य च।
अचिरादागमिष्यामः स्वगृहान् नृपसत्तम॥ **6.122.20**॥ 5411

एवमुक्तस्तु धर्मात्मा वानरैः सविभीषणैः।
अब्रवीद् वानरान् रामः ससुग्रीवविभीषणान्॥ **6.122.21**॥ 5412

प्रियात् प्रियतरं लब्धं यदहं ससुहृज्जनः।
सर्वैर्भवद्भिः सहितः प्रीतिं लप्स्ये पुरीं गतः॥ **6.122.22**॥ 5413

क्षिप्रमारोह सुग्रीव विमानं सह वानरैः।
त्वमप्यारोह सामात्यो राक्षसेन्द्र विभीषण॥ **6.122.23**॥ 5414

ततः स पुष्पकं दिव्यं सुग्रीवः सह वानरैः।
आरुरोह मुदा युक्तः सामात्यश्च विभीषणः॥ **6.122.24**॥ 5415

तेष्वारूढेषु सर्वेषु कौबेरं परमासनम्।
राघवेणाभ्यनुज्ञातमुत्पपात विहायसम्॥ **6.122.25**॥ 5416

खगतेन विमानेन हंसयुक्तेन भास्वता।
प्रहृष्टश्च प्रतीतश्च बभौ रामः कुबेरवत्॥ **6.122.26**॥ 5417

ते सर्वे वानरर्क्षाश्च राक्षसाश्च महाबलाः।
यथासुखमसम्बाधं दिव्ये तस्मिन्नुपाविशन्॥ **6.122.27**॥ 5418

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
द्वाविंशत्यधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ त्रयोविंशत्यधिकशततमः सर्गः ॥

अयोध्यां गच्छन् श्रीरामो सीतां मार्गस्थानान्यदर्शयत्

अनुज्ञातं तु रामेण तद् विमानमनुत्तमम्।
हंसयुक्तं महानादमुत्पपात विहायसम्॥ **6.123.1** ॥ 5419

पातयित्वा ततश्चक्षुः सर्वतो रघुनन्दनः।
अब्रवीन्मैथिलीं सीतां रामः शशिनिभाननाम्॥ **6.123.2** ॥ 5420

कैलासशिखराकारे त्रिकूटशिखरे स्थिताम्।
लङ्कामीक्षस्व वैदेहि निर्मितां विश्वकर्मणा॥ **6.123.3** ॥ 5421

एतदायोधनं पश्य मांसशोणितकर्दमम्।
हरीणां राक्षसानां च सीते विशसनं महत्॥ **6.123.4** ॥ 5422

एष दत्तवरः शेते प्रमाथी राक्षसेश्वरः।
तव हेतोर्विशालाक्षि निहतो रावणो मया॥ **6.123.5** ॥ 5423

कुम्भकर्णोऽत्र निहतः प्रहस्तश्च निशाचरः।
धूम्राक्षश्चात्र निहतो वानरेण हनूमता॥ **6.123.6** ॥ 5424

विद्युन्माली हतश्चात्र सुषेणेन महात्मना।
लक्ष्मणेनेन्द्रजिच्चात्र रावणिर्निहतो रणे॥ **6.123.7** ॥ 5425

अङ्गदेनात्र निहतो विकटो नाम राक्षसः।
विरूपाक्षश्च दुष्प्रेक्षो महापार्श्वमहोदरौ॥ **6.123.8**॥ 5426

अकम्पनश्च निहतो बलिनोऽन्ये च राक्षसाः।
त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ॥ **6.123.9**॥ 5427

युद्धोन्मत्तश्च मत्तश्च राक्षसप्रवरावुभौ।
निकुम्भश्चैव कुम्भश्च कुम्भकर्णात्मजौ बली॥ **6.123.10**॥ 5428

वज्रदंष्ट्रश्च दंष्ट्रश्च बहवो राक्षसा हताः।
मकराक्षश्च दुर्धर्षो मया युधि निपातितः॥ **6.123.11**॥ 5429

अकम्पनश्च निहतः शोणिताक्षश्च वीर्यवान्।
यूपाक्षश्च प्रजङ्घश्च निहतौ तु महाहवे॥ **6.123.12**॥ 5430

विद्युज्जिह्वोऽत्र निहतो राक्षसो भीमदर्शनः।
यज्ञशत्रुश्च निहतः सुप्तघ्नश्च महाबलः॥ **6.123.13**॥ 5431

सूर्यशत्रुश्च निहतो ब्रह्मशत्रुस्तथापरः।
अत्र मन्दोदरी नाम भार्या तं पर्यदेवयत्॥ **6.123.14**॥ 5432

सपत्नीनां सहस्रेण साग्रेण परिवारिता।
एतत् तु दृश्यते तीर्थं समुद्रस्य वरानने॥ **6.123.15**॥ 5433

यत्र सागरमुत्तीर्य तां रात्रिमुषिता वयम्।
एष सेतुर्मया बद्धः सागरे लवणार्णवे॥ **6.123.16**॥ 5434

तव हेतोर्विशालाक्षि नलसेतुः सुदुष्करः।
पश्य सागरमक्षोभ्यं वैदेहि वरुणालयम्॥ **6.123.17**॥ 5435

अपारमिव गर्जन्तं शङ्खशुक्तिसमाकुलम्।
हिरण्यनाभं शैलेन्द्रं काञ्चनं पश्य मैथिलि॥ **6.123.18**॥ 5436

विश्रमार्थं हनुमतो भित्त्वा सागरमुत्थितम्।
एतत् कुक्षौ समुद्रस्य स्कन्धावारनिवेशनम्॥ **6.123.19**॥ 5437

अत्र पूर्वं महादेवः प्रसादमकरोद् विभुः।
एतत् तु दृश्यते तीर्थं सागरस्य महात्मनः॥ **6.123.20**॥ 5438

सेतुबन्ध इति ख्यातं त्रैलोक्येन च पूजितम्।
एतत् पवित्रं परमं महापातकनाशनम्॥ **6.123.21**॥ 5439

अत्र राक्षसराजोऽयमाजगाम विभीषणः।
एषा सा दृश्यते सीते किष्किन्धा चित्रकानना॥ **6.123.22**॥ 5440

सुग्रीवस्य पुरी रम्या यत्र वाली मया हतः।
अथ दृष्ट्वा पुरीं सीता किष्किन्धां वालिपालिताम्॥ **6.123.23**॥ 5441

अब्रवीत् प्रश्रितं वाक्यं रामं प्रणयसाध्वसा।
सुग्रीवप्रियभार्याभिस्ताराप्रमुखतो नृप॥ **6.123.24**॥ 5442

अन्येषां वानरेन्द्राणां स्त्रीभिः परिवृता ह्यहम्।
गन्तुमिच्छे सहायोध्यां राजधानीं त्वया सह॥ **6.123.25**॥ 5443

एवमुक्तोऽथ वैदेह्या राघवः प्रत्युवाच ताम्।
एवमस्त्विति किष्किन्धां प्राप्य संस्थाप्य राघवः॥ **6.123.26**॥ 5444

विमानं प्रेक्ष्य सुग्रीवं वाक्यमेतदुवाच ह।
ब्रूहि वानरशार्दूल सर्वान् वानरपुङ्गवान्॥ **6.123.27**॥ 5445

स्त्रीभिः परिवृताः सर्वे ह्ययोध्यां यान्तु सीतया।
तथा त्वमपि सर्वाभिः स्त्रीभिः सह महाबल॥ **6.123.28**॥ 5446

अभित्वरय सुग्रीव गच्छामः प्लवगाधिप।
एवमुक्तस्तु सुग्रीवो रामेणामिततेजसा॥ **6.123.29**॥ 5447

वानराधिपतिः श्रीमांस्तैश्च सर्वैः समावृतः।
प्रविश्यान्तःपुरं शीघ्रं तारामुद्वीक्ष्य सोऽब्रवीत्॥ **6.123.30**॥ 5448

प्रिये त्वं सह नारीभिर्वानराणां महात्मनाम्।
राघवेणाभ्यनुज्ञाता मैथिलीप्रियकाम्यया॥ **6.123.31**॥ 5449

त्वर त्वमभिगच्छामो गृह्य वानरयोषितः।
अयोध्यां दर्शयिष्यामः सर्वा दशरथस्त्रियः॥ **6.123.32**॥ 5450

सुग्रीवस्य वचः श्रुत्वा तारा सर्वाङ्गशोभना।
आहूय चाब्रवीत् सर्वा वानराणां तु योषितः॥ **6.123.33**॥ 5451

सुग्रीवेणाभ्यनुज्ञाता गन्तुं सर्वैश्च वानरैः।
मम चापि प्रियं कार्यमयोध्यादर्शनेन च॥ **6.123.34**॥ 5452

प्रवेशं चैव रामस्य पौरजानपदैः सह।
विभूतिं चैव सर्वासां स्त्रीणां दशरथस्य च॥ **6.123.35**॥ 5453

तारया चाभ्यनुज्ञाताः सर्वा वानरयोषितः।
नेपथ्यविधिपूर्वं तु कृत्वा चापि प्रदक्षिणम्॥ **6.123.36**॥ 5454

अध्यारोहन् विमानं तत् सीतादर्शनकाङ्क्षया।
ताभिः सहोत्थितं शीघ्रं विमानं प्रेक्ष्य राघवः॥ **6.123.37**॥ 5455

ऋष्यमूकसमीपे तु वैदेहीं पुनरब्रवीत्।
दृश्यतेऽसौ महान् सीते सविद्युदिव तोयदः॥ **6.123.38**॥ 5456

ऋष्यमूको गिरिवरः काञ्चनैर्धातुभिर्वृतः।
अत्राहं वानरेन्द्रेण सुग्रीवेण समागतः॥ **6.123.39**॥ 5457

समयश्च कृतः सीते वधार्थं वालिनो मया।
एषा सा दृश्यते पम्पा नलिनी चित्रकानना॥ **6.123.40**॥ 5458

त्वया विहीनो यत्राहं विललाप सुदुःखितः।
अस्यास्तीरे मया दृष्टा शबरी धर्मचारिणी॥ **6.123.41**॥ 5459

अत्र योजनबाहुश्च कबन्धो निहतो मया।
दृश्यतेऽसौ जनस्थाने श्रीमान् सीते वनस्पतिः॥ **6.123.42**॥ 5460

जटायुश्च महातेजास्तव हेतोर्विलासिनि।
रावणेन हतो यत्र पक्षिणां प्रवरो बली॥ **6.123.43**॥ 5461

खरश्च निहतो यत्र दूषणश्च निपातितः।
त्रिशिराश्च महावीर्यो मया बाणैरजिह्मगैः॥ **6.123.44**॥ 5462

एतत् तदाश्रमपदमस्माकं वरवर्णिनि।
पर्णशाला तथा चित्रा दृश्यते शुभदर्शने॥ **6.123.45**॥ 5463

यत्र त्वं राक्षसेन्द्रेण रावणेन हृता बलात्।
एषा गोदावरी रम्या प्रसन्नसलिला शुभा॥ **6.123.46**॥ 5464

अगस्त्यस्याश्रमश्चैव दृश्यते कदलीवृतः।
दीप्तश्चैवाश्रमो ह्येष सुतीक्ष्णस्य महात्मनः॥ **6.123.47**॥ 5465

दृश्यते चैव वैदेहि शरभङ्गाश्रमो महान्।
उपयातः सहस्राक्षो यत्र शक्रः पुरन्दरः॥ **6.123.48**॥ 5466

अस्मिन् देशे महाकायो विराधो निहतो मया।
एते ते तापसा देवि दृश्यन्ते तनुमध्यमे॥ **6.123.49**॥ 5467

अत्रिः कुलपतिर्यत्र सूर्यवैश्वानरोपमः।
अत्र सीते त्वया दृष्टा तापसी धर्मचारिणी॥ **6.123.50**॥ 5468

असौ सुतनु शैलेन्द्रश्चित्रकूटः प्रकाशते।
अत्र मां कैकयीपुत्रः प्रसादयितुमागतः॥ **6.123.51**॥ 5469

एषा सा यमुना रम्या दृश्यते चित्रकानना।
भरद्वाजाश्रमः श्रीमान् दृश्यते चैष मैथिलि॥ **6.123.52**॥ 5470

इयं च दृश्यते गङ्गा पुण्या त्रिपथगा नदी।
नानाद्विजगणाकीर्णा सम्प्रपुष्पितकानना॥ **6.123.53**॥ 5471

शृङ्गवेरपुरं चैतद् गुहो यत्र सखा मम।
एषा सा दृश्यते सीते सरयूर्यूपमालिनी॥ **6.123.54**॥ 5472

एषा सा दृश्यते सीते राजधानी पितुर्मम।
अयोध्यां कुरु वैदेहि प्रणामं पुनरागता॥ **6.123.55**॥ 5473

ततस्ते वानराः सर्वे राक्षसाः सविभीषणाः।
उत्पत्योत्पत्य संहृष्टास्तां पुरीं ददृशुस्तदा॥ **6.123.56**॥ 5474

ततस्तु तां पाण्डुरहर्म्यमालिनीं
विशालकक्ष्यां गजवाजिभिर्वृताम्।
पुरीमपश्यन् प्लवगाः सराक्षसाः
पुरीं महेन्द्रस्य यथामरावतीम्॥ **6.123.57**॥ 5475

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
त्रयोविंशत्यधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ चतुर्विंशत्यधिकशततमः सर्गः ॥

भरद्वाजाश्रमेऽवतीर्य श्रीरामेण महर्षेर्दर्शनं ततो वरग्रहणं च

पूर्णे चतुर्दशे वर्षे पञ्चम्यां लक्ष्मणाग्रजः।
भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम्॥ **6.124.1**॥ 5476

सोऽपृच्छदभिवाद्यैनं भरद्वाजं तपोधनम्।
शृणोषि कच्चिद् भगवन् सुभिक्षानामयं पुरे।
कच्चित् स युक्तो भरतो जीवन्त्यपि च मातरः॥ **6.124.2**॥ 5477

एवमुक्तस्तु रामेण भरद्वाजो महामुनिः।
प्रत्युवाच रघुश्रेष्ठं स्मितपूर्वं प्रहृष्टवत्॥ **6.124.3**॥ 5478

आज्ञावशत्वे भरतो जटिलस्त्वां प्रतीक्षते।
पादुके ते पुरस्कृत्य सर्वं च कुशलं गृहे॥ **6.124.4**॥ 5479

त्वां पुरा चीरवसनं प्रविशन्तं महावनम्।
स्त्रीतृतीयं च्युतं राज्याद् धर्मकामं च केवलम्॥ **6.124.5**॥ 5480

पदातिं त्यक्तसर्वस्वं पितृनिर्देशकारिणम्।
सर्वभोगैः परित्यक्तं स्वर्गच्युतमिवामरम्॥ **6.124.6**॥ 5481

दृष्ट्वा तु करुणापूर्वं ममासीत् समितिञ्जय।
कैकेयीवचने युक्तं वन्यमूलफलाशिनम्॥ **6.124.7**॥ 5482

साम्प्रतं तु समृद्धार्थं समित्रगणबान्धवम्।
समीक्ष्य विजितारिं च ममाभूत् प्रीतिरुत्तमा॥ **6.124.8**॥ 5483

सर्वं च सुखदुःखं ते विदितं मम राघव।
यत् त्वया विपुलं प्राप्तं जनस्थाननिवासिना॥ **6.124.9**॥ 5484

ब्राह्मणार्थे नियुक्तस्य रक्षतः सर्वतापसान्।
रावणेन हृता भार्या बभूवेयमनिन्दिता॥ **6.124.10**॥ 5485

मारीचदर्शनं चैव सीतोन्मथनमेव च।
कबन्धदर्शनं चैव पम्पाभिगमनं तथा॥ **6.124.11**॥ 5486

सुग्रीवेण च ते सख्यं यत्र वाली हतस्त्वया।
मार्गणं चैव वैदेह्याः कर्म वातात्मजस्य च॥ **6.124.12**॥ 5487

विदितायां च वैदेह्यां नलसेतुर्यथा कृतः।
यथा चादीपिता लङ्का प्रहृष्टैर्हरियूथपैः॥ **6.124.13**॥ 5488

सपुत्रबान्धवामात्यः सबलः सहवाहनः।
यथा च निहतः सङ्ख्ये रावणो बलदर्पितः॥ **6.124.14**॥ 5489

यथा च निहते तस्मिन् रावणे देवकण्टके।
समागमश्च त्रिदशैर्यथा दत्तश्च ते वरः॥ **6.124.15**॥ 5490

सर्वं ममैतद् विदितं तपसा धर्मवत्सल।
सम्पतन्ति च मे शिष्याः प्रवृत्त्याख्याः पुरीमितः॥ **6.124.16**॥ 5491

अहमप्यत्र ते दद्मि वरं शस्त्रभृतां वर।
अर्घ्यं प्रतिगृहाणेदमयोध्यां श्वो गमिष्यसि॥ **6.124.17**॥ 5492

तस्य तच्छिरसा वाक्यं प्रतिगृह्य नृपात्मजः।
बाढमित्येव संहृष्टः श्रीमान् वरमयाचत॥ **6.124.18**॥ 5493

अकालफलिनो वृक्षाः सर्वे चापि मधुस्रवाः।
फलान्यमृतगन्धीनि बहूनि विविधानि च॥ **6.124.19**॥ 5494

भवन्तु मार्गे भगवन्नयोध्यां प्रति गच्छतः।
तथेति च प्रतिज्ञाते वचनात् समनन्तरम्॥ **6.124.20**॥ 5495

अभवन् पादपास्तत्र स्वर्गपादपसन्निभाः।
निष्फलाः फलिनश्चासन् विपुष्पाः पुष्पशालिनः॥ **6.124.21**॥ 5496

शुष्काः समग्रपत्रास्ते नगाश्चैव मधुस्रवाः।
सर्वतो योजनास्तिस्रो गच्छतामभवंस्तदा॥ **6.124.22**॥ 5497

ततः प्रहृष्टाः प्लवगर्षभास्ते
बहूनि दिव्यानि फलानि चैव।
कामादुपाश्नन्ति सहस्रशस्ते
मुदान्विताः स्वर्गजितो यथैव॥ **6.124.23**॥ 5498

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
चतुर्विंशत्यधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ पञ्चविंशत्यधिकशततमः सर्गः ॥

हनुमता निषादराजं गुहं श्रीभरतं चोपगम्य श्रीरामागमनस्य सूचनं ततः प्रसन्नेन भरतेन तस्माद् उपहारं दातुमुद्घोषणं च

अयोध्यां तु समालोक्य चिन्तयामास राघवः।
प्रियकामः प्रियं रामस्ततस्त्वरितविक्रमः॥ **6.125.1** ॥ 5499

चिन्तयित्वा ततो दृष्टिं वानरेषु न्यपातयत्।
उवाच धीमांस्तेजस्वी हनूमन्तं प्लवङ्गमम्॥ **6.125.2** ॥ 5500

अयोध्यां त्वरितो गत्वा शीघ्रं प्लवगसत्तम।
जानीहि कच्चित् कुशली जनो नृपतिमन्दिरे॥ **6.125.3** ॥ 5501

शृङ्गवेरपुरं प्राप्य गुहं गहनगोचरम्।
निषादाधिपतिं ब्रूहि कुशलं वचनान्मम॥ **6.125.4** ॥ 5502

श्रुत्वा तु मां कुशलिनमरोगं विगतज्वरम्।
भविष्यति गुहः प्रीतः स ममात्मसमः सखा॥ **6.125.5** ॥ 5503

अयोध्यायाश्च ते मार्गं प्रवृत्तिं भरतस्य च।
निवेदयिष्यति प्रीतो निषादाधिपतिर्गुहः॥ **6.125.6** ॥ 5504

भरतस्तु त्वया वाच्यः कुशलं वचनान्मम।
सिद्धार्थं शंस मां तस्मै सभार्यं सहलक्ष्मणम्॥ **6.125.7** ॥ 5505

हरणं चापि वैदेह्या रावणेन बलीयसा।
सुग्रीवेण च संवादं वालिनश्च वधं रणे॥ **6.125.8**॥ 5506

मैथिल्यन्वेषणं चैव यथा चाधिगता त्वया।
लङ्घयित्वा महातोयमापगापतिमव्ययम्॥ **6.125.9**॥ 5507

उपयानं समुद्रस्य सागरस्य च दर्शनम्।
यथा च कारितः सेतू रावणश्च यथा हतः॥ **6.125.10**॥ 5508

वरदानं महेन्द्रेण ब्रह्मणा वरुणेन च।
महादेवप्रसादाच्च पित्रा मम समागमम्॥ **6.125.11**॥ 5509

उपयातं च मां सौम्य भरताय निवेदय।
सह राक्षसराजेन हरीणामीश्वरेण च॥ **6.125.12**॥ 5510

जित्वा शत्रुगणान् रामः प्राप्य चानुत्तमं यशः।
उपायाति समृद्धार्थः सह मित्रैर्महाबलैः॥ **6.125.13**॥ 5511

एतच्छ्रुत्वा यमाकारं भजते भरतस्ततः।
स च ते वेदितव्यः स्यात् सर्वं यच्चापि मां प्रति॥ **6.125.14**॥ 5512

ज्ञेयाः सर्वे च वृत्तान्ता भरतस्येङ्गितानि च।
तत्त्वेन मुखवर्णेन दृष्ट्या व्याभाषितेन च॥ **6.125.15**॥ 5513

सर्वकामसमृद्धं हि हस्त्यश्वरथसङ्कुलम्।
पितृपैतामहं राज्यं कस्य नावर्तयेन्मनः॥ **6.125.16**॥ 5514

सङ्गत्या भरतः श्रीमान् राज्येनार्थी स्वयं भवेत्।
प्रशास्तु वसुधां सर्वामखिलां रघुनन्दनः॥ **6.125.17**॥ 5515

तस्य बुद्धिं च विज्ञाय व्यवसायं च वानर।
यावन्न दूरं याताः स्मः क्षिप्रमागन्तुमर्हसि॥ **6.125.18**॥ 5516

इति प्रतिसमादिष्टो हनूमान् मारुतात्मजः।
मानुषं धारयन् रूपमयोध्यां त्वरितो ययौ॥ **6.125.19**॥ 5517

अथोत्पपात वेगेन हनूमान् मारुतात्मजः।
गरुत्मानिव वेगेन जिघृक्षन्नुरगोत्तमम्॥ **6.125.20**॥ 5518

लङ्घयित्वा पितृपथं विहगेन्द्रालयं शुभम्।
गङ्गायमुनयोर्भीमं समतीत्य समागमम्॥ **6.125.21**॥ 5519

शृङ्गवेरपुरं प्राप्य गुहमासाद्य वीर्यवान्।
स वाचा शुभया हृष्टो हनूमानिदमब्रवीत्॥ **6.125.22**॥ 5520

सखा तु तव काकुत्स्थो रामः सत्यपराक्रमः।
ससीतः सह सौमित्रिः स त्वां कुशलमब्रवीत्॥ **6.125.23**॥ 5521

पञ्चमीमद्य रजनीमुषित्वा वचनान्मुनेः।
भरद्वाजाभ्यनुज्ञातं द्रक्ष्यस्यत्रैव राघवम्॥ **6.125.24**॥ 5522

एवमुक्त्वा महातेजाः सम्प्रहृष्टतनूरुहः।
उत्पपात महावेगाद् वेगवानविचारयन्॥ **6.125.25**॥ 5523

सोऽपश्यद् रामतीर्थं च नदीं वालुकिनीं तथा।
वरूथीं गोमतीं चैव भीमं शालवनं तथा॥ **6.125.26**॥ 5524

प्रजाश्च बहुसाहस्रीः स्फीताञ्जनपदानपि।
स गत्वा दूरमध्वानं त्वरितः कपिकुञ्जरः॥ **6.125.27**॥ 5525

आससाद द्रुमान् फुल्लान् नन्दिग्रामसमीपगान्।
सुराधिपस्योपवने यथा चैत्ररथे द्रुमान्॥ **6.125.28**॥ 5526

स्त्रीभिः सपुत्रैः पौत्रैश्च रममाणैः स्वलङ्कृतैः।
क्रोशमात्रे त्वयोध्यायाश्चीरकृष्णाजिनाम्बरम्॥ **6.125.29**॥ 5527

ददर्श भरतं दीनं कृशमाश्रमवासिनम्।
जटिलं मलदिग्धाङ्गं भ्रातृव्यसनकर्शितम्॥ **6.125.30**॥ 5528

फलमूलाशिनं दान्तं तापसं धर्मचारिणम्।
समुन्नतजटाभारं वल्कलाजिनवाससम्॥ **6.125.31**॥ 5529

नियतं भावितात्मानं ब्रह्मर्षिसमतेजसम्।
पादुके ते पुरस्कृत्य प्रशासन्तं वसुन्धराम्॥ **6.125.32**॥ 5530

चातुर्वर्ण्यस्य लोकस्य त्रातारं सर्वतो भयात्।
उपस्थितममात्यैश्च शुचिभिश्च पुरोहितैः॥ **6.125.33**॥ 5531

बलमुख्यैश्च युक्तैश्च काषायाम्बरधारिभिः।
नहि ते राजपुत्रं तं चीरकृष्णाजिनाम्बरम्॥ **6.125.34**॥ 5532

परिभोक्तुं व्यवस्यन्ति पौरा वै धर्मवत्सलाः।
तं धर्ममिव धर्मज्ञं देहबन्धमिवापरम्॥ **6.125.35**॥ 5533

उवाच प्राञ्जलिर्वाक्यं हनूमान् मारुतात्मजः।
वसन्तं दण्डकारण्ये यं त्वं चीरजटाधरम्॥ **6.125.36**॥ 5534

अनुशोचसि काकुत्स्थं स त्वां कौशलमब्रवीत्।
प्रियमाख्यामि ते देव शोकं त्यज सुदारुणम्॥ **6.125.37**॥ 5535

अस्मिन् मुहूर्ते भ्रात्रा त्वं रामेण सह सङ्गतः।
निहत्य रावणं रामः प्रतिलभ्य च मैथिलीम्॥ **6.125.38**॥ 5536

उपयाति समृद्धार्थः सह मित्रैर्महाबलैः।
लक्ष्मणश्च महातेजा वैदेही च यशस्विनी।
सीता समग्रा रामेण महेन्द्रेण शची यथा॥ **6.125.39**॥ 5537

एवमुक्तो हनुमता भरतः कैकयीसुतः।
पपात सहसा हृष्टो हर्षान्मोहमुपागमत्॥ **6.125.40**॥ 5538

ततो मुहूर्तादुत्थाय प्रत्याश्वस्य च राघवः।
हनूमन्तमुवाचेदं भरतः प्रियवादिनम्॥ **6.125.41**॥ 5539

अशोकजैः प्रीतिमयैः कपिमालिङ्ग्य सभ्रमात्।
सिषेच भरतः श्रीमान् विपुलैरश्रुबिन्दुभिः॥ **6.125.42**॥ 5540

देवो वा मानुषो वा त्वमनुक्रोशादिहागतः।
प्रियाख्यानस्य ते सौम्य ददामि ब्रुवतः प्रियम्॥ **6.125.43**॥ 5541

गवां शतसहस्रं च ग्रामाणां च शतं परम्।
सकुण्डलाः शुभाचारा भार्याः कन्यास्तु षोडश॥ **6.125.44**॥ 5542

हेमवर्णाः सुनासोरूः शशिसौम्याननाः स्त्रियः।
सर्वाभरणसम्पन्नाः सम्पन्नाः कुलजातिभिः॥ **6.125.45**॥ 5543

निशम्य रामागमनं नृपात्मजः
कपिप्रवीरस्य तदाद्भुतोपमम्।
प्रहर्षितो रामदिदृक्षयाभवत्
पुनश्च हर्षादिदमब्रवीद् वचः॥ **6.125.46**॥ 5544

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
पञ्चविंशत्यधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ षड्विंशत्यधिकशततमः सर्गः ॥

हनुमता भरतं प्रति श्रीरामलक्ष्मणसीताकर्तृकवनवाससम्बन्धिनां समेषां वृत्तानां श्रावणम्

बहूनि नाम वर्षाणि गतस्य सुमहद्वनम्।
शृणोम्यहं प्रीतिकरं मम नाथस्य कीर्तनम्॥ **6.126.1** ॥ 5545

कल्याणी बत गाथेयं लौकिकी प्रतिभाति माम्।
एति जीवन्तमानन्दो नरं वर्षशतादपि॥ **6.126.2** ॥ 5546

राघवस्य हरीणां च कथमासीत् समागमः।
कस्मिन् देशे किमाश्रित्य तत्त्वमाख्याहि पृच्छतः॥ **6.126.3** ॥ 5547

स पृष्टो राजपुत्रेण बृस्यां समुपवेशितः।
आचचक्षे ततः सर्वं रामस्य चरितं वने॥ **6.126.4** ॥ 5548

यथा प्रव्राजितो रामो मातुर्दत्तौ वरौ तव।
यथा च पुत्रशोकेन राजा दशरथो मृतः॥ **6.126.5** ॥ 5549

यथा दूतैस्त्वमानीतस्तूर्णं राजगृहात् प्रभो।
त्वयायोध्यां प्रविष्टेन यथा राज्यं न चेप्सितम्॥ **6.126.6** ॥ 5550

चित्रकूटगिरिं गत्वा राज्येनामित्रकर्शनः।
निमन्त्रितस्त्वया भ्राता धर्ममाचरता सताम्॥ **6.126.7** ॥ 5551

स्थितेन राज्ञो वचने यथा राज्यं विसर्जितम्।
आर्यस्य पादुके गृह्य यथासि पुनरागतः॥ **6.126.8**॥ 5552

सर्वमेतन्महाबाहो यथावद् विदितं तव।
त्वयि प्रतिप्रयाते तु यद् वृत्तं तन्निबोध मे॥ **6.126.9**॥ 5553

अपयाते त्वयि तदा समुद्भ्रान्तमृगद्विजम्।
परिद्यूनमिवात्यर्थं तद् वनं समपद्यत॥ **6.126.10**॥ 5554

तद्धस्तिमृदितं घोरं सिंहव्याघ्रमृगाकुलम्।
प्रविवेशाथ विजनं स महद् दण्डकावनम्॥ **6.126.11**॥ 5555

तेषां पुरस्ताद् बलवान् गच्छतां गहने वने।
विनदन् सुमहानादं विराधः प्रत्यदृश्यत॥ **6.126.12**॥ 5556

तमुत्क्षिप्य महानादमूर्ध्वबाहुमधोमुखम्।
निखाते प्रक्षिपन्ति स्म नदन्तमिव कुञ्जरम्॥ **6.126.13**॥ 5557

तत् कृत्वा दुष्करं कर्म भ्रातरौ रामलक्ष्मणौ।
सायाह्ने शरभङ्गस्य रम्यमाश्रममीयतुः॥ **6.126.14**॥ 5558

शरभङ्गे दिवं प्राप्ते रामः सत्यपराक्रमः।
अभिवाद्य मुनीन् सर्वाञ्जनस्थानमुपागमत्॥ **6.126.15**॥ 5559

पश्चाच्छूर्पणखा नाम रामपार्श्वमुपागता।
ततो रामेण सन्दिष्टो लक्ष्मणः सहसोत्थितः॥ **6.126.16**॥ 5560

प्रगृह्य खड्गं चिच्छेद कर्णनासं महाबलः।
चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम्॥ **6.126.17**॥ 5561

हतानि वसता तत्र राघवेण महात्मना।
एकेन सह सङ्गम्य रामेण रणमूर्धनि॥ **6.126.18**॥ 5562

अह्नश्चतुर्थभागेन निःशेषा राक्षसाः कृताः।
महाबला महावीर्यास्तपसो विघ्नकारिणः॥ **6.126.19**॥ 5563

निहता राघवेणाजौ दण्डकारण्यवासिनः।
राक्षसाश्च विनिष्पिष्टाः खरश्च निहतो रणे॥ **6.126.20**॥ 5564

दूषणं चाग्रतो हत्वा त्रिशिरास्तदनन्तरम्।
ततस्तेनार्दिता बाला रावणं समुपागता॥ **6.126.21**॥ 5565

रावणानुचरो घोरो मारीचो नाम राक्षसः।
लोभयामास वैदेहीं भूत्वा रत्नमयो मृगः॥ **6.126.22**॥ 5566

सा राममब्रवीद् दृष्ट्वा वैदेही गृह्यतामिति।
अयं मनोहरः कान्त आश्रमो नो भविष्यति॥ **6.126.23**॥ 5567

ततो रामो धनुष्पाणिर्मृगं तमनुधावति।
स तं जघान धावन्तं शरेणानतपर्वणा॥ **6.126.24**॥ 5568

अथ सौम्य दशग्रीवो मृगं याति तु राघवे।
लक्ष्मणे चापि निष्क्रान्ते प्रविवेशाश्रमं तदा॥ **6.126.25**॥ 5569

जग्राह तरसा सीतां ग्रहः खे रोहिणीमिव।
त्रातुकामं ततो युद्धे हत्वा गृध्रं जटायुषम्॥ **6.126.26**॥ 5570

प्रगृह्य सहसा सीतां जगामाशु स राक्षसः।
ततस्त्वद्भुतसङ्काशाः स्थिताः पर्वतमूर्धनि॥ **6.126.27**॥ 5571

सीतां गृहीत्वा गच्छन्तं वानराः पर्वतोपमाः।
ददृशुर्विस्मिताकारा रावणं राक्षसाधिपम्॥ **6.126.28**॥ 5572

ततः शीघ्रतरं गत्वा तद् विमानं मनोजवम्।
आरुह्य सह वैदेह्या पुष्पकं स महाबलः॥ **6.126.29**॥ 5573

प्रविवेश तदा लङ्कां रावणो राक्षसेश्वरः।
तां सुवर्णपरिष्कारे शुभे महति वेश्मनि॥ **6.126.30**॥ 5574

प्रवेश्य मैथिलीं वाक्यैः सान्त्वयामास रावणः।
तृणवद् भाषितं तस्य तं च नैर्ऋतपुङ्गवम्॥ **6.126.31**॥ 5575

अचिन्तयन्ती वैदेही ह्यशोकवनिकां गता।
न्यवर्तत तदा रामो मृगं हत्वा तदा वने॥ **6.126.32**॥ 5576

निवर्तमानः काकुत्स्थो दृष्ट्वा गृध्रं स विव्यथे।
गृध्रं हतं तदा दृष्ट्वा रामः प्रियतरं पितुः॥ **6.126.33**॥ 5577

मार्गमाणस्तु वैदेहीं राघवः सहलक्ष्मणः।
गोदावरीमनुचरन् वनोद्देशांश्च पुष्पितान्॥ **6.126.34**॥ 5578

आसेदतुर्महारण्ये कबन्धं नाम राक्षसम्।
ततः कबन्धवचनाद् रामः सत्यपराक्रमः॥ **6.126.35**॥ 5579

ऋष्यमूकगिरिं गत्वा सुग्रीवेण समागतः।
तयोः समागमः पूर्वं प्रीत्या हार्दो व्यजायत॥ **6.126.36**॥ 5580

भ्रात्रा निरस्तः क्रुद्धेन सुग्रीवो वालिना पुरा।
इतरेतरसंवादात् प्रगाढः प्रणयस्तयोः॥ **6.126.37**॥ 5581

रामः स्वबाहुवीर्येण स्वराज्यं प्रत्यपादयत्।
वालिनं समरे हत्वा महाकायं महाबलम्॥ **6.126.38**॥ 5582

सुग्रीवः स्थापितो राज्ये सहितः सर्ववानरैः।
रामाय प्रतिजानीते राजपुत्र्यास्तु मार्गणम्॥ **6.126.39**॥ 5583

आदिष्टा वानरेन्द्रेण सुग्रीवेण महात्मना।
दश कोट्यः प्लवङ्गानां सर्वाः प्रस्थापिता दिशः॥ **6.126.40**॥ 5584

तेषां नो विप्रकृष्टानां विन्ध्ये पर्वतसत्तमे।
भृशं शोकाभितप्तानां महान् कालोऽत्यवर्तत॥ **6.126.41**॥ 5585

भ्राता तु गृध्रराजस्य सम्पातिर्नाम वीर्यवान्।
समाख्याति स्म वसतीं सीतां रावणमन्दिरे॥ **6.126.42**॥ 5586

सोऽहं दुःखपरीतानां दुःखं तज्ज्ञातिनां नुदन्।
आत्मवीर्यं समास्थाय योजनानां शतं प्लुतः।
तत्राहमेकामद्राक्षमशोकवनिकां गताम्॥ **6.126.43**॥ 5587

कौशेयवस्त्रां मलिनां निरानन्दां दृढव्रताम्।
तया समेत्य विधिवत् पृष्ट्वा सर्वमनिन्दिताम्॥ **6.126.44**॥ 5588

अभिज्ञानं मया दत्तं रामनामाङ्गुलीयकम्।
अभिज्ञानं मणिं लब्ध्वा चरितार्थोऽहमागतः॥ **6.126.45**॥ 5589

मया च पुनरागम्य रामस्याक्लिष्टकर्मणः।
अभिज्ञानं मया दत्तमर्चिष्मान् स महामणिः॥ **6.126.46**॥ 5590

श्रुत्वा तां मैथिलीं रामस्त्वाशशंसे च जीवितम्।
जीवितान्तमनुप्राप्तः पीत्वामृतमिवातुरः॥ **6.126.47**॥ 5591

उद्योजयिष्यन्नुद्योगं दध्रे लङ्कावधे मनः।
जिघांसुरिव लोकान्ते सर्वान् लोकान् विभावसुः॥ **6.126.48**॥ 5592

ततः समुद्रमासाद्य नलं सेतुमकारयत्।
अतरत् कपिवीराणां वाहिनी तेन सेतुना॥ **6.126.49**॥ 5593

प्रहस्तमवधीन्नीलः कुम्भकर्णं तु राघवः।
लक्ष्मणो रावणसुतं स्वयं रामस्तु रावणम्॥ **6.126.50**॥ 5594

स शक्रेण समागम्य यमेन वरुणेन च।
महेश्वरस्वयम्भूभ्यां तथा दशरथेन च॥ **6.126.51**॥ 5595

तैश्च दत्तवरः श्रीमानृषिभिश्च समागतैः।
सुरर्षिभिश्च काकुत्स्थो वरान् लेभे परन्तपः॥ **6.126.52**॥ 5596

स तु दत्तवरः प्रीत्या वानरैश्च समागतैः।
पुष्पकेण विमानेन किष्किन्धामभ्युपागमत्॥ **6.126.53**॥ 5597

तां गङ्गां पुनरासाद्य वसन्तं मुनिसन्निधौ।
अविघ्नं पुष्ययोगेन श्वो रामं द्रष्टुमर्हसि॥ **6.126.54**॥ 5598

ततः स वाक्यैर्मधुरैर्हनूमतो
निशम्य हृष्टो भरतः कृताञ्जलिः।
उवाच वाणीं मनसः प्रहर्षिणीं
चिरस्य पूर्णः खलु मे मनोरथः॥ **6.126.55**॥ 5599

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
षड्विंशत्यधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ सप्तविंशत्यधिकशततमः सर्गः ॥

अयोध्यायां श्रीरामस्य सत्कारार्थमायोजनम्, श्रीरामं प्रत्युद्गन्तुमनसां सर्वेषां जनानां भरतेन सह नन्दिग्रामे गमनम्, श्रीरामस्यागमनं भरतादिभिः सह तस्य समागमः पुष्पकविमानस्य तेन कुबेरपार्श्वे प्रेषणं च

श्रुत्वा तु परमानन्दं भरतः सत्यविक्रमः।
हृष्टमाज्ञापयामास शत्रुघ्नं परवीरहा॥ **6.127.1** ॥ 5600

दैवतानि च सर्वाणि चैत्यानि नगरस्य च।
सुगन्धमाल्यैर्वादित्रैरर्चन्तु शुचयो नराः॥ **6.127.2** ॥ 5601

सूताः स्तुतिपुराणज्ञाः सर्वे वैतालिकास्तथा।
सर्वे वादित्रकुशला गणिकाश्चैव सर्वशः॥ **6.127.3** ॥ 5602

राजदारास्तथामात्याः सैन्याः सेनाङ्गनागणाः।
ब्राह्मणाश्च सराजन्याः श्रेणीमुख्यास्तथा गणाः॥ **6.127.4** ॥ 5603

अभिनिर्यान्तु रामस्य द्रष्टुं शशिनिभं मुखम्।
भरतस्य वचः श्रुत्वा शत्रुघ्नः परवीरहा॥ **6.127.5** ॥ 5604

विष्टीरनेकसाहस्रीश्चोदयामास भागशः।
समीकुरुत निम्नानि विषमाणि समानि च॥ **6.127.6** ॥ 5605

स्थानानि च निरस्यन्तां नन्दिग्रामादितः परम्।
सिञ्चन्तु पृथिवीं कृत्स्नां हिमशीतेन वारिणा॥ **6.127.7** ॥ 5606

ततोऽभ्यवकिरन्त्वन्ये लाजैः पुष्पैश्च सर्वतः।
समुच्छ्रितपताकास्तु रथ्याः पुरवरोत्तमे ॥ **6.127.8** ॥ 5607

शोभयन्तु च वेश्मानि सूर्यस्योदयनं प्रति।
स्रग्दाममुक्तपुष्पैश्च सुवर्णैः पञ्चवर्णकैः ॥ **6.127.9** ॥ 5608

राजमार्गमसम्बाधं किरन्तु शतशो नराः।
ततस्तच्छासनं श्रुत्वा शत्रुघ्नस्य मुदान्विताः ॥ **6.127.10** ॥ 5609

धृष्टिर्जयन्तो विजयः सिद्धार्थश्चार्थसाधकः।
अशोको मन्त्रपालश्च सुमन्त्रश्चापि निर्ययुः ॥ **6.127.11** ॥ 5610

मत्तैर्नागसहस्रैश्च सध्वजैः सुविभूषितैः।
अपरे हेमकक्षाभिः सगजाभिः करेणुभिः ॥ **6.127.12** ॥ 5611

निर्ययुस्तुरगाक्रान्ता रथैश्च सुमहारथाः।
शक्त्यृष्टिपाशहस्तानां सध्वजानां पताकिनाम् ॥ **6.127.13** ॥ 5612

तुरगाणां सहस्रैश्च मुख्यैर्मुख्यतरान्वितैः।
पदातीनां सहस्रैश्च वीराः परिवृता ययुः ॥ **6.127.14** ॥ 5613

ततो यानान्युपारूढाः सर्वा दशरथस्त्रियः।
कौसल्यां प्रमुखे कृत्वा सुमित्रां चापि निर्ययुः ॥ **6.127.15** ॥ 5614

कैकेय्या सहिताः सर्वा नन्दिग्राममुपागमन् ॥ **6.127.16** ॥ 5615

द्विजातिमुख्यैर्धर्मात्मा श्रेणीमुख्यैः सनैगमैः।
माल्यमोदकहस्तैश्च मन्त्रिभिर्भरतो वृतः ॥ **6.127.17** ॥ 5616

शङ्खभेरीनिनादैश्च बन्दिभिश्चाभिनन्दितः।
आर्यपादौ गृहीत्वा तु शिरसा धर्मकोविदः ॥ **6.127.18** ॥ 5617

पाण्डुरं छत्रमादाय शुक्लमाल्योपशोभितम्।
शुक्ले च वालव्यजने राजार्हे हेमभूषिते॥ **6.127.19**॥ 5618

उपवासकृशो दीनश्चीरकृष्णाजिनाम्बरः।
भ्रातुरागमनं श्रुत्वा तत्पूर्वं हर्षमागतः॥ **6.127.20**॥ 5619

प्रत्युद्ययौ यदा रामं महात्मा सचिवैः सह।
अश्वानां खुरशब्दैश्च रथनेमिस्वनेन च॥ **6.127.21**॥ 5620

शङ्खदुन्दुभिनादेन सञ्चचालेव मेदिनी।
गजानां बृंहितैश्चापि शङ्खदुन्दुभिनिःस्वनैः॥ **6.127.22**॥ 5621

कृत्स्नं तु नगरं तत् तु नन्दिग्राममुपागमत्।
समीक्ष्य भरतो वाक्यमुवाच पवनात्मजम्॥ **6.127.23**॥ 5622

कच्चिन्न खलु कापेयी सेव्यते चलचित्तता।
नहि पश्यामि काकुत्स्थं राममार्यं परन्तपम्॥ **6.127.24**॥ 5623

कच्चिन्न चानुदृश्यन्ते कपयः कामरूपिणः।
अथैवमुक्ते वचने हनूमानिदमब्रवीत्॥ **6.127.25**॥ 5624

अर्थ्यं विज्ञापयन्नेव भरतं सत्यविक्रमम्।
सदाफलान् कुसुमितान् वृक्षान् प्राप्य मधुस्रवान्॥ **6.127.26**॥ 5625

भरद्वाजप्रसादेन मत्तभ्रमरनादितान्।
तस्य चैव वरो दत्तो वासवेन परन्तप॥ **6.127.27**॥ 5626

ससैन्यस्य तदातिथ्यं कृतं सर्वगुणान्वितम्।
निःस्वनः श्रूयते भीमः प्रहृष्टानां वनौकसाम्॥ **6.127.28**॥ 5627

मन्ये वानरसेना सा नदीं तरति गोमतीम्।
रजोवर्षं समुद्भूतं पश्य सालवनं प्रति॥ **6.127.29**॥ 5628

मन्ये सालवनं रम्यं लोलयन्ति प्लवङ्गमाः।
तदेतद् दृश्यते दूराद् विमानं चन्द्रसन्निभम्॥ **6.127.30**॥ 5629

विमानं पुष्पकं दिव्यं मनसा ब्रह्मनिर्मितम्।
रावणं बान्धवैः सार्धं हत्वा लब्धं महात्मना॥ **6.127.31**॥ 5630

तरुणादित्यसङ्काशं विमानं रामवाहनम्।
धनदस्य प्रसादेन दिव्यमेतन्मनोजवम्॥ **6.127.32**॥ 5631

एतस्मिन् भ्रातरौ वीरौ वैदेह्या सह राघवौ।
सुग्रीवश्च महातेजा राक्षसश्च विभीषणः॥ **6.127.33**॥ 5632

ततो हर्षसमुद्भूतो निःस्वनो दिवमस्पृशत्।
स्त्रीबालयुववृद्धानां रामोऽयमिति कीर्तिते॥ **6.127.34**॥ 5633

रथकुञ्जरवाजिभ्यस्तेऽवतीर्य महीं गताः।
ददृशुस्तं विमानस्थं नराः सोममिवाम्बरे॥ **6.127.35**॥ 5634

प्राञ्जलिर्भरतो भूत्वा प्रहृष्टो राघवोन्मुखः।
यथार्थेनार्घ्यपाद्याद्यैस्ततो राममपूजयत्॥ **6.127.36**॥ 5635

मनसा ब्रह्मणा सृष्टे विमाने भरताग्रजः।
रराज पृथुदीर्घाक्षो वज्रपाणिरिवामरः॥ **6.127.37**॥ 5636

ततो विमानाग्रगतं भरतो भ्रातरं तदा।
ववन्दे प्रणतो रामं मेरुस्थमिव भास्करम्॥ **6.127.38**॥ 5637

ततो रामाभ्यनुज्ञातं तद् विमानमनुत्तमम्।
हंसयुक्तं महावेगं निपपात महीतलम्॥ **6.127.39**॥ 5638

आरोपितो विमानं तद् भरतः सत्यविक्रमः।
राममासाद्य मुदितः पुनरेवाभ्यवादयत्॥ **6.127.40**॥ 5639

तं समुत्थाय काकुत्स्थश्चिरस्याक्षिपथं गतम्।
अङ्के भरतमारोप्य मुदितः परिषस्वजे॥ **6.127.41**॥ 5640

ततो लक्ष्मणमासाद्य वैदेहीं च परन्तपः।
अथाभ्यवादयत् प्रीतो भरतो नाम चाब्रवीत्॥ **6.127.42**॥ 5641

सुग्रीवं केकयीपुत्रो जाम्बवन्तमथाङ्गदम्।
मैन्दं च द्विविदं नीलमृषभं चैव सस्वजे॥ **6.127.43**॥ 5642

सुषेणं च नलं चैव गवाक्षं गन्धमादनम्।
शरभं पनसं चैव परितः परिषस्वजे॥ **6.127.44**॥ 5643

ते कृत्वा मानुषं रूपं वानराः कामरूपिणः।
कुशलं पर्यपृच्छंस्ते प्रहृष्टा भरतं तदा॥ **6.127.45**॥ 5644

अथाब्रवीद् राजपुत्रः सुग्रीवं वानरर्षभम्।
परिष्वज्य महातेजा भरतो धर्मिणां वरः॥ **6.127.46**॥ 5645

त्वमस्माकं चतुर्णां वै भ्राता सुग्रीव पञ्चमः।
सौहृदाज्जायते मित्रमपकारोऽरिलक्षणम्॥ **6.127.47**॥ 5646

विभीषणं च भरतः सान्त्ववाक्यमथाब्रवीत्।
दिष्ट्या त्वया सहायेन कृतं कर्म सुदुष्करम्॥ **6.127.48**॥ 5647

शत्रुघ्नश्च तदा राममभिवाद्य सलक्ष्मणम्।
सीतायाश्चरणौ वीरो विनयादभ्यवादयत्॥ **6.127.49**॥ 5648

रामो मातरमासाद्य विवर्णां शोककर्शिताम्।
जग्राह प्रणतः पादौ मनो मातुः प्रहर्षयन्॥ **6.127.50**॥ 5649

अभिवाद्य सुमित्रां च कैकेयीं च यशस्विनीम्।
स मातृश्च ततः सर्वाः पुरोहितमुपागमत्॥ **6.127.51**॥ 5650

स्वागतं ते महाबाहो कौसल्यानन्दवर्धन।
इति प्राञ्जलयः सर्वे नागरा राममब्रुवन्॥ **6.127.52**॥ 5651

तान्यञ्जलिसहस्राणि प्रगृहीतानि नागरैः।
व्याकोशानीव पद्मानि ददर्श भरताग्रजः॥ **6.127.53**॥ 5652

पादुके ते तु रामस्य गृहीत्वा भरतः स्वयम्।
चरणाभ्यां नरेन्द्रस्य योजयामास धर्मवित्॥ **6.127.54**॥ 5653

अब्रवीच्च तदा रामं भरतः स कृताञ्जलिः।
एतत् ते सकलं राज्यं न्यासं निर्यातितं मया॥ **6.127.55**॥ 5654

अद्य जन्म कृतार्थं मे संवृत्तश्च मनोरथः।
यत् त्वां पश्यामि राजानमयोध्यां पुनरागतम्॥ **6.127.56**॥ 5655

अवेक्षतां भवान् कोशं कोष्ठागारं गृहं बलम्।
भवतस्तेजसा सर्वं कृतं दशगुणं मया॥ **6.127.57**॥ 5656

तथा ब्रुवाणं भरतं दृष्ट्वा तं भ्रातृवत्सलम्।
मुमुचुर्वानरा बाष्पं राक्षसश्च विभीषणः॥ **6.127.58**॥ 5657

ततः प्रहर्षाद् भरतमङ्कमारोप्य राघवः।
ययौ तेन विमानेन ससैन्यो भरताश्रमम्॥ **6.127.59**॥ 5658

भरताश्रममासाद्य ससैन्यो राघवस्तदा।
अवतीर्य विमानाग्रादवतस्थे महीतले॥ **6.127.60**॥ 5659

अब्रवीत् तु तदा रामस्तद् विमानमनुत्तमम्।
वह वैश्रवणं देवमनुजानामि गम्यताम्॥ **6.127.61**॥ 5660

ततो रामाभ्यनुज्ञातं तद् विमानमनुत्तमम्।
उत्तरां दिशमुद्दिश्य जगाम धनदालयम्॥ **6.127.62**॥ 5661

विमानं पुष्पकं दिव्यं सङ्गृहीतं तु रक्षसा।
अगमद् धनदं वेगाद् रामवाक्यप्रचोदितम्॥ **6.127.63**॥ 5662

पुरोहितस्यात्मसखस्य राघवो
बृहस्पतेः शक्र इवामराधिपः।
निपीड्य पादौ पृथगासने शुभे
सहैव तेनोपविवेश वीर्यवान्॥ **6.127.64**॥ 5663

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
सप्तविंशत्यधिकशततमः सर्गः॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

॥ अष्टाविंशत्यधिकशततमः सर्गः ॥

भरतेन श्रीरामाय राज्यस्य पुनः प्रत्यर्पणं श्रीरामस्य नगरे गमनं राज्येऽभिषेकः वानराणां प्रस्थापनं ग्रन्थस्य माहात्म्यं च

शिरस्यञ्जलिमाधाय कैकेयीनन्दिवर्धनः।
बभाषे भरतो ज्येष्ठं रामं सत्यपराक्रमम्॥ **6.128.1** ॥ 5664

पूजिता मामिका माता दत्तं राज्यमिदं मम।
तद् ददामि पुनस्तुभ्यं यथा त्वमददा मम॥ **6.128.2** ॥ 5665

धुरमेकाकिना न्यस्तां वृषभेण बलीयसा।
किशोरवद् गुरुं भारं न वोढुमहमुत्सहे॥ **6.128.3** ॥ 5666

वारिवेगेन महता भिन्नः सेतुरिव क्षरन्।
दुर्बन्धनमिदं मन्ये राज्यच्छिद्रमसंवृतम्॥ **6.128.4** ॥ 5667

गतिं खर इवाश्वस्य हंसस्येव च वायसः।
नान्वेतुमुत्सहे वीर तव मार्गमरिन्दम॥ **6.128.5** ॥ 5668

यथा चारोपितो वृक्षो जातश्चान्तर्निवेशने।
महानपि दुरारोहो महास्कन्धः प्रशाखवान्॥ **6.128.6** ॥ 5669

शीर्येत पुष्पितो भूत्वा न फलानि प्रदर्शयन्।
तस्य नानुभवेदर्थं यस्य हेतोः स रोपितः॥ **6.128.7** ॥ 5670

एषोपमा महाबाहो त्वमर्थं वेत्तुमर्हसि।
यद्यस्मान् मनुजेन्द्र त्वं भर्ता भृत्यान् न शाधि हि॥ **6.128.8**॥ 5671

जगदद्याभिषिक्तं त्वामनुपश्यतु राघव।
प्रतपन्तमिवादित्यं मध्याह्ने दीप्ततेजसम्॥ **6.128.9**॥ 5672

तूर्यसङ्घातनिर्घोषैः काञ्चीनूपुरनिःस्वनैः।
मधुरैर्गीतशब्दैश्च प्रतिबुध्यस्व शेष्व च॥ **6.128.10**॥ 5673

यावदावर्तते चक्रं यावती च वसुन्धरा।
तावत् त्वमिह लोकस्य स्वामित्वमनुवर्तय॥ **6.128.11**॥ 5674

भरतस्य वचः श्रुत्वा रामः परपुरञ्जयः।
तथेति प्रतिजग्राह निषसादासने शुभे॥ **6.128.12**॥ 5675

ततः शत्रुघ्नवचनान्निपुणाः श्मश्रुवर्धनाः।
सुखहस्ताः सुशीघ्राश्च राघवं पर्यवारयन्॥ **6.128.13**॥ 5676

पूर्वं तु भरते स्नाते लक्ष्मणे च महाबले।
सुग्रीवे वानरेन्द्रे च राक्षसेन्द्रे विभीषणे॥ **6.128.14**॥ 5677

विशोधितजटः स्नातश्चित्रमाल्यानुलेपनः।
महार्हवसनोपेतस्तस्थौ तत्र श्रिया ज्वलन्॥ **6.128.15**॥ 5678

प्रतिकर्म च रामस्य कारयामास वीर्यवान्।
लक्ष्मणस्य च लक्ष्मीवानिक्ष्वाकुकुलवर्धनः॥ **6.128.16**॥ 5679

प्रतिकर्म च सीतायाः सर्वा दशरथस्त्रियः।
आत्मनैव तदा चक्रुर्मनस्विन्यो मनोहरम्॥ **6.128.17**॥ 5680

ततो वानरपत्नीनां सर्वासामेव शोभनम्।
चकार यत्नात् कौसल्या प्रहृष्टा पुत्रवत्सला॥ **6.128.18**॥ 5681

ततः शत्रुघ्नवचनात् सुमन्त्रो नाम सारथिः।
योजयित्वाभिचक्राम रथं सर्वाङ्गशोभनम्॥ **6.128.19**॥ 5682

अग्र्यर्कामलसङ्काशं दिव्यं दृष्ट्वा रथं स्थितम्।
आरुरोह महाबाहू रामः परपुरञ्जयः॥ **6.128.20**॥ 5683

सुग्रीवो हनुमांश्चैव महेन्द्रसदृशद्युती।
स्नातौ दिव्यनिभैर्वस्त्रैर्जग्मतुः शुभकुण्डलौ॥ **6.128.21**॥ 5684

सर्वाभरणजुष्टाश्च ययुस्ताः शुभकुण्डलाः।
सुग्रीवपत्न्यः सीता च द्रष्टुं नगरमुत्सुकाः॥ **6.128.22**॥ 5685

अयोध्यायां च सचिवा राज्ञो दशरथस्य च।
पुरोहितं पुरस्कृत्य मन्त्रयामासुरर्थवत्॥ **6.128.23**॥ 5686

अशोको विजयश्चैव सिद्धार्थश्च समाहिताः।
मन्त्रयन् रामवृद्ध्यर्थमृद्ध्यर्थं नगरस्य च॥ **6.128.24**॥ 5687

सर्वमेवाभिषेकार्थं जयार्हस्य महात्मनः।
कर्तुमर्हथ रामस्य यद् यन्मङ्गलपूर्वकम्॥ **6.128.25**॥ 5688

इति ते मन्त्रिणः सर्वे सन्दिश्य च पुरोहितः।
नगरान्निर्ययुस्तूर्णं रामदर्शनबुद्धयः॥ **6.128.26**॥ 5689

हरियुक्तं सहस्राक्षो रथमिन्द्र इवानघः।
प्रययौ रथमास्थाय रामो नगरमुत्तमम्॥ **6.128.27**॥ 5690

जग्राह भरतो रश्मीञ्शत्रुघ्नश्छत्रमाददे।
लक्ष्मणो व्यजनं तस्य मूर्ध्नि संवीजयंस्तदा॥ **6.128.28**॥ 5691

श्वेतं च वालव्यजनं जगृहे परितः स्थितः।
अपरं चन्द्रसङ्काशं राक्षसेन्द्रो विभीषणः॥ **6.128.29**॥ 5692

ऋषिसङ्घैस्तदाऽऽकाशे देवैश्च समरुद्गणैः।
स्तूयमानस्य रामस्य शुश्रुवे मधुरध्वनिः॥ **6.128.30**॥ 5693

ततः शत्रुञ्जयं नाम कुञ्जरं पर्वतोपमम्।
आरुरोह महातेजाः सुग्रीवः प्लवगर्षभः॥ **6.128.31**॥ 5694

नव नागसहस्राणि ययुरास्थाय वानराः।
मानुषं विग्रहं कृत्वा सर्वाभरणभूषिताः॥ **6.128.32**॥ 5695

शङ्खशब्दप्रणादैश्च दुन्दुभीनां च निःस्वनैः।
प्रययौ पुरुषव्याघ्रस्तां पुरीं हर्म्यमालिनीम्॥ **6.128.33**॥ 5696

ददृशुस्ते समायान्तं राघवं सपुरःसरम्।
विराजमानं वपुषा रथेनातिरथं तदा॥ **6.128.34**॥ 5697

ते वर्धयित्वा काकुत्स्थं रामेण प्रतिनन्दिताः।
अनुजग्मुर्महात्मानं भ्रातृभिः परिवारितम्॥ **6.128.35**॥ 5698

अमात्यैर्ब्राह्मणैश्चैव तथा प्रकृतिभिर्वृतः।
श्रिया विरुरुचे रामो नक्षत्रैरिव चन्द्रमाः॥ **6.128.36**॥ 5699

स पुरोगामिभिस्तूर्यैस्तालस्वस्तिकपाणिभिः।
प्रव्याहरद्भिर्मुदितैर्मङ्गलानि वृतो ययौ॥ **6.128.37**॥ 5700

अक्षतं जातरूपं च गावः कन्याः सहद्विजाः।
नरा मोदकहस्ताश्च रामस्य पुरतो ययुः॥ **6.128.38**॥ 5701

सख्यं च रामः सुग्रीवे प्रभावं चानिलात्मजे।
वानराणां च तत् कर्म ह्याचचक्षेऽथ मन्त्रिणाम्॥ **6.128.39**॥ 5702

श्रुत्वा च विस्मयं जग्मुरयोध्यापुरवासिनः।
वानराणां च तत् कर्म राक्षसानां च तद् बलम्।
विभीषणस्य संयोगमाचचक्षेऽथ मन्त्रिणाम्॥ **6.128.40**॥ 5703

द्युतिमानेतदाख्याय रामो वानरसंयुतः।
हृष्टपुष्टजनाकीर्णामयोध्यां प्रविवेश सः॥ **6.128.41**॥ 5704

ततो ह्यभ्युच्छ्रयन् पौराः पताकाश्च गृहे गृहे।
ऐक्ष्वाकाध्युषितं रम्यमाससाद पितुर्गृहम्॥ **6.128.42**॥ 5705

अथाब्रवीद् राजपुत्रो भरतं धर्मिणां वरम्।
अर्थोपहितया वाचा मधुरं रघुनन्दनः॥ **6.128.43**॥ 5706

पितुर्भवनमासाद्य प्रविश्य च महात्मनः।
कौसल्यां च सुमित्रां च कैकेयीमभिवाद्य च॥ **6.128.44**॥ 5707

तच्च मद्भवनं श्रेष्ठं साशोकवनिकं महत्।
मुक्तावैदूर्यसङ्कीर्णं सुग्रीवाय निवेदय॥ **6.128.45**॥ 5708

तस्य तद् वचनं श्रुत्वा भरतः सत्यविक्रमः।
हस्ते गृहीत्वा सुग्रीवं प्रविवेश तमालयम्॥ **6.128.46**॥ 5709

ततस्तैलप्रदीपांश्च पर्यङ्कास्तरणानि च।
गृहीत्वा विविशुः क्षिप्रं शत्रुघ्नेन प्रचोदिताः॥ **6.128.47**॥ 5710

उवाच च महातेजाः सुग्रीवं राघवानुजः।
अभिषेकाय रामस्य दूतानाज्ञापय प्रभो॥ **6.128.48**॥ 5711

सौवर्णान् वानरेन्द्राणां चतुर्णां चतुरो घटान्।
ददौ क्षिप्रं स सुग्रीवः सर्वरत्नविभूषितान्॥ **6.128.49**॥ 5712

तथा प्रत्यूषसमये चतुर्णां सागराम्भसाम्।
पूर्णैर्घटैः प्रतीक्षध्वं तथा कुरुत वानराः॥ **6.128.50**॥ 5713

एवमुक्ता महात्मानो वानरा वारणोपमाः।
उत्पेतुर्गगनं शीघ्रं गरुडा इव शीघ्रगाः॥ **6.128.51**॥ 5714

जाम्बवांश्च हनूमांश्च वेगदर्शी च वानरः।
ऋषभश्चैव कलशाञ्जलपूर्णानथानयन्॥ **6.128.52**॥ 5715

नदीशतानां पञ्चानां जलं कुम्भैरुपाहरन्।
पूर्वात् समुद्रात् कलशं जलपूर्णमथानयत्॥ **6.128.53**॥ 5716

सुषेणः सत्त्वसम्पन्नः सर्वरत्नविभूषितम्।
ऋषभो दक्षिणात्तूर्णं समुद्राज्जलमानयत्॥ **6.128.54**॥ 5717

रक्तचन्दनकर्पूरैः संवृतं काञ्चनं घटम्।
गवयः पश्चिमात् तोयमाजहार महार्णवात्॥ **6.128.55**॥ 5718

रत्नकुम्भेन महता शीतं मारुतविक्रमः।
उत्तराच्च जलं शीघ्रं गरुडानिलविक्रमः॥ **6.128.56**॥ 5719

आजहार स धर्मात्मानिलः सर्वगुणान्वितः।
ततस्तैर्वानरश्रेष्ठैरानीतं प्रेक्ष्य तज्जलम्॥ **6.128.57**॥ 5720

अभिषेकाय रामस्य शत्रुघ्नः सचिवैः सह।
पुरोहिताय श्रेष्ठाय सुहृद्भ्यश्च न्यवेदयत्॥ **6.128.58**॥ 5721

ततः स प्रयतो वृद्धो वसिष्ठो ब्राह्मणैः सह।
रामं रत्नमये पीठे ससीतं सन्न्यवेशयत्॥ **6.128.59**॥ 5722

वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः।
कात्यायनः सुयज्ञश्च गौतमो विजयस्तथा॥ **6.128.60**॥ 5723

अभ्यषिञ्चन्नरव्याघ्रं प्रसन्नेन सुगन्धिना।
सलिलेन सहस्राक्षं वसवो वासवं यथा॥ **6.128.61**॥ 5724

ऋत्विग्भिर्ब्राह्मणैः पूर्वं कन्याभिर्मन्त्रिभिस्तथा।
योधैश्चैवाभ्यषिञ्चस्ते सम्प्रहृष्टैः सनैगमैः॥ **6.128.62**॥ 5725

सर्वौषधिरसैश्चापि दैवतैर्नभसि स्थितैः।
चतुर्भिर्लोकपालैश्च सर्वैर्देवैश्च सङ्गतैः॥ **6.128.63**॥ 5726

ब्रह्मणा निर्मितं पूर्वं किरीटं रत्नशोभितम्।
अभिषिक्तः पुरा येन मनुस्तं दीप्ततेजसम्॥ **6.128.64**॥ 5727

तस्यान्ववाये राजानः क्रमाद् येनाभिषेचिताः।
सभायां हेमकृप्तायां शोभितायां महाधनैः॥ **6.128.65**॥ 5728

रत्नैर्नानाविधैश्चैव चित्रितायां सुशोभनैः।
नानारत्नमये पीठे कल्पयित्वा यथाविधि॥ **6.128.66**॥ 5729

किरीटेन ततः पश्चाद् वसिष्ठेन महात्मना।
ऋत्विग्भिर्भूषणैश्चैव समयोक्ष्यत राघवः॥ **6.128.67**॥ 5730

छत्रं तस्य च जग्राह शत्रुघ्नः पाण्डुरं शुभम्।
श्वेतं च वालव्यजनं सुग्रीवो वानरेश्वरः॥ **6.128.68**॥ 5731

अपरं चन्द्रसङ्काशं राक्षसेन्द्रो विभीषणः।
मालां ज्वलन्तीं वपुषा काञ्चनीं शतपुष्कराम्॥ **6.128.69**॥ 5732

राघवाय ददौ वायुर्वासवेन प्रचोदितः।
सर्वरत्नसमायुक्तं मणिभिश्च विभूषितम्॥ **6.128.70**॥ 5733

मुक्ताहारं नरेन्द्राय ददौ शक्रप्रचोदितः।
प्रजगुर्देवगन्धर्वा ननृतुश्चाप्सरोगणाः॥ **6.128.71**॥ 5734

अभिषेके तदर्हस्य तदा रामस्य धीमतः।
भूमिः सस्यवती चैव फलवन्तश्च पादपाः॥ **6.128.72**॥ 5735

गन्धवन्ति च पुष्पाणि बभूवू राघवोत्सवे।
सहस्रशतमश्वानां धेनूनां च गवां तथा॥ **6.128.73**॥ 5736

ददौ शतवृषान् पूर्वं द्विजेभ्यो मनुजर्षभः।
त्रिंशत्कोटीर्हिरण्यस्य ब्राह्मणेभ्यो ददौ पुनः॥ **6.128.74**॥ 5737

नानाभरणवस्त्राणि महार्हाणि च राघवः।
अर्करश्मिप्रतीकाशां काञ्चनीं मणिविग्रहाम्॥ **6.128.75**॥ 5738

सुग्रीवाय स्रजं दिव्यां प्रायच्छन्मनुजाधिपः।
वैदूर्यमयचित्रे च चन्द्ररश्मिविभूषिते॥ **6.128.76**॥ 5739

वालिपुत्राय धृतिमानङ्गदायाङ्गदे ददौ।
मणिप्रवरजुष्टं तं मुक्ताहारमनुत्तमम्॥ **6.128.77**॥ 5740

सीतायै प्रददौ रामश्चन्द्ररश्मिसमप्रभम्।
अरजे वाससी दिव्ये शुभान्याभरणानि च॥ **6.128.78**॥ 5741

अवेक्षमाणा वैदेही प्रददौ वायुसूनवे।
अवमुच्यात्मनः कण्ठाद्धारं जनकनन्दिनी॥ **6.128.79**॥ 5742

अवैक्षत हरीन् सर्वान् भर्तारं च मुहुर्मुहुः।
तामिङ्गितज्ञः सम्प्रेक्ष्य बभाषे जनकात्मजाम्॥ **6.128.80**॥ 5743

प्रदेहि सुभगे हारं यस्य तुष्टासि भामिनि।
अथ सा वायुपुत्राय तं हारमसितेक्षणा॥ **6.128.81**॥ 5744

तेजो धृतिर्यशो दाक्ष्यं सामर्थ्यं विनयो नयः।
पौरुषं विक्रमो बुद्धिर्यस्मिन्नेतानि नित्यदा॥ **6.128.82**॥ 5745

हनूमांस्तेन हारेण शुशुभे वानरर्षभः।
चन्द्रांशुचयगौरेण श्वेताभ्रेण यथाचलः॥ **6.128.83**॥ 5746

सर्वे वानरवृद्धाश्च ये चान्ये वानरोत्तमाः।
वासोभिर्भूषणैश्चैव यथार्हं प्रतिपूजिताः॥ **6.128.84**॥ 5747

विभीषणोऽथ सुग्रीवो हनूमाञ्जाम्बवांस्तथा।
सर्वे वानरमुख्याश्च रामेणाक्लिष्टकर्मणा॥ **6.128.85**॥ 5748

यथार्हं पूजिताः सर्वे कामै रत्नैश्च पुष्कलैः।
प्रहृष्टमनसः सर्वे जग्मुरेव यथागतम्॥ **6.128.86**॥ 5749

ततो द्विविदमैन्दाभ्यां नीलाय च परन्तपः।
सर्वान् कामगुणान् वीक्ष्य प्रददौ वसुधाधिपः॥ **6.128.87**॥ 5750

दृष्ट्वा सर्वे महात्मानस्ततस्ते वानरर्षभाः।
विसृष्टाः पार्थिवेन्द्रेण किष्किन्धां समुपागमन्॥ **6.128.88**॥ 5751

सुग्रीवो वानरश्रेष्ठो दृष्ट्वा रामाभिषेचनम्।
पूजितश्चैव रामेण किष्किन्धां प्राविशत् पुरीम्॥ **6.128.89**॥ 5752

विभीषणोऽपि धर्मात्मा सह तैर्नैर्ऋतर्षभैः।
लब्ध्वा कुलधनं राजा लङ्कां प्रायान्महायशाः॥ **6.128.90**॥ 5753

स राज्यमखिलं शासन्निहतारिर्महायशाः।
राघवः परमोदारः शशास परया मुदा।
उवाच लक्ष्मणं रामो धर्मज्ञं धर्मवत्सलः॥ **6.128.91**॥ 5754

आतिष्ठ धर्मज्ञ मया सहेमां
गां पूर्वराजाध्युषितां बलेन।

तुल्यं मया त्वं पितृभिर्धृता या
तां यौवराज्ये धुरमुद्वहस्व ॥ **6.128.92** ॥ 5755

सर्वात्मना पर्यनुनीयमानो
यदा न सौमित्रिरुपैति योगम्।
नियुज्यमानो भुवि यौवराज्ये
ततोऽभ्यषिञ्चद् भरतं महात्मा ॥ **6.128.93** ॥ 5756

पौण्डरीकाश्वमेधाभ्यां वाजपेयेन चासकृत्।
अन्यैश्च विविधैर्यज्ञैरयजत् पार्थिवात्मजः ॥ **6.128.94** ॥ 5757

राज्यं दशसहस्राणि प्राप्य वर्षाणि राघवः।
शताश्वमेधानाजह्रे सदश्वान् भूरिदक्षिणान् ॥ **6.128.95** ॥ 5758

आजानुलम्बिबाहुः स महावक्षाः प्रतापवान्।
लक्ष्मणानुचरो रामः शशास पृथिवीमिमाम् ॥ **6.128.96** ॥ 5759

राघवश्चापि धर्मात्मा प्राप्य राज्यमनुत्तमम्।
ईजे बहुविधैर्यज्ञैः ससुहृज्ज्ञातिबान्धवः ॥ **6.128.97** ॥ 5760

न पर्यदेवन् विधवा न च व्यालकृतं भयम्।
न व्याधिजं भयं चासीद् रामे राज्यं प्रशासति ॥ **6.128.98** ॥ 5761

निर्दस्युरभवल्लोको नानर्थं कश्चिदस्पृशत्।
न च स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते ॥ **6.128.99** ॥ 5762

सर्वं मुदितमेवासीत् सर्वो धर्मपरोऽभवत्।
राममेवानुपश्यन्तो नाभ्यहिंसन् परस्परम् ॥ **6.128.100** ॥ 5763

आसन् वर्षसहस्राणि तथा पुत्रसहस्रिणः।
निरामया विशोकाश्च रामे राज्यं प्रशासति ॥ **6.128.101** ॥ 5764

रामो रामो राम इति प्रजानामभवन् कथाः।
रामभूतं जगदभूद् रामे राज्यं प्रशासति॥ **6.128.102**॥ 5765

नित्यमूला नित्यफलास्तरवस्तत्र पुष्पिताः।
कामवर्षी च पर्जन्यः सुखस्पर्शश्च मारुतः॥ **6.128.103**॥ 5766

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा लोभविवर्जिताः।
स्वकर्मसु प्रवर्तन्ते तुष्टाः स्वैरेव कर्मभिः॥ **6.128.104**॥ 5767

आसन् प्रजा धर्मपरा रामे शासति नानृताः।
सर्वे लक्षणसम्पन्नाः सर्वे धर्मपरायणाः॥ **6.128.105**॥ 5768

दशवर्षसहस्राणि दशवर्षशतानि च।
भ्रातृभिः सहितः श्रीमान् रामो राज्यमकारयत्॥ **6.128.106**॥ 5769

धर्म्यं यशस्यमायुष्यं राज्ञां च विजयावहम्।
आदिकाव्यमिदं चार्षं पुरा वाल्मीकिना कृतम्॥ **6.128.107**॥ 5770

यः शृणोति सदा लोके नरः पापात् प्रमुच्यते।
पुत्रकामश्च पुत्रान् वै धनकामो धनानि च॥ **6.128.108**॥ 5771

लभते मनुजो लोके श्रुत्वा रामाभिषेचनम्।
महीं विजयते राजा रिपूंश्चाप्यधितिष्ठति॥ **6.128.109**॥ 5772

राघवेण यथा माता सुमित्रा लक्ष्मणेन च।
भरतेन च कैकेयी जीवपुत्रास्तथा स्त्रियः॥ **6.128.110**॥ 5773

भविष्यन्ति सदानन्दाः पुत्रपौत्रसमन्विताः।
श्रुत्वा रामायणमिदं दीर्घमायुश्च विन्दति॥ **6.128.111**॥ 5774

रामस्य विजयं चेमं सर्वमक्लिष्टकर्मणः।
शृणोति य इदं काव्यं पुरा वाल्मीकिना कृतम्॥ **6.128.112**॥ 5775

श्रद्दधानो जितक्रोधो दुर्गाण्यतितरत्यसौ।
समागम्य प्रवासान्ते रमन्ते सह बान्धवैः॥ **6.128.113**॥ 5776

शृण्वन्ति य इदं काव्यं पुरा वाल्मीकिना कृतम्।
ते प्रार्थितान् वरान् सर्वान् प्राप्नुवन्तीह राघवात्॥ **6.128.114**॥ 5777

श्रवणेन सुराः सर्वे प्रीयन्ते सम्प्रशृण्वताम्।
विनायकाश्च शाम्यन्ति गृहे तिष्ठन्ति यस्य वै॥ **6.128.115**॥ 5778

विजयेत महीं राजा प्रवासी स्वस्तिमान् भवेत्।
स्त्रियो रजस्वलाः श्रुत्वा पुत्रान् सूयुरनुत्तमान्॥ **6.128.116**॥ 5779

पूजयंश्च पठंश्चैनमितिहासं पुरातनम्।
सर्वपापैः प्रमुच्येत दीर्घमायुरवाप्नुयात्॥ **6.128.117**॥ 5780

प्रणम्य शिरसा नित्यं श्रोतव्यं क्षत्रियैर्द्विजात्।
ऐश्वर्यं पुत्रलाभश्च भविष्यति न संशयः॥ **6.128.118**॥ 5781

रामायणमिदं कृत्स्नं शृण्वतः पठतः सदा।
प्रीयते सततं रामः स हि विष्णुः सनातनः॥ **6.128.119**॥ 5782

आदिदेवो महाबाहुर्हरिर्नारायणः प्रभुः।
साक्षाद् रामो रघुश्रेष्ठः शेषो लक्ष्मण उच्यते॥ **6.128.120**॥ 5783

एवमेतत् पुरावृत्तमाख्यानं भद्रमस्तु वः।
प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम्॥ **6.128.121**॥ 5784

देवाश्च सर्वे तुष्यन्ति ग्रहणाच्छ्रवणात् तथा।
रामायणस्य श्रवणे तृप्यन्ति पितरः सदा॥ **6.128.122**॥ 5785

भक्त्या रामस्य ये चेमां संहितामृषिणा कृताम्।
ये लिखन्तीह च नरास्तेषां वासस्त्रिविष्टपे॥ **6.128.123**॥ 5786

कुटुम्बवृद्धिं धनधान्यवृद्धिं
स्त्रियश्च मुख्याः सुखमुत्तमं च।
श्रुत्वा शुभं काव्यमिदं महार्थं
प्राप्नोति सर्वां भुवि चार्थसिद्धिम्॥ **6.128.124**॥ 5787

आयुष्यमारोग्यकरं यशस्यं
सौभ्रातृकं बुद्धिकरं शुभं च।
श्रोतव्यमेतन्नियमेन सद्भि -
राख्यानमोजस्करमृद्धिकामैः॥ **6.128.125**॥ 5788

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
अष्टाविंशत्यधिकशततमः सर्गः॥